# पाणिनिसम्प्रदाये परिभाषासमीक्षा

यादवपुरविश्वविद्यालयस्य संस्कृतसंकाये

पि.–एइच्.–डि. इत्युपाधिनिमित्तोऽयं शोधनिबन्धः

**शोधनिबन्धकारः**

**गौतम-जानाः**

**तत्त्वावधायकाः**

**प्रफेसर् ड. तपनशङ्करभट्टाचार्य्याः**

**संस्कृतसंकायाध्यक्षाः**

**यादवपुरविश्वविद्यालयस्य**

**संस्कृतविभागः**

**यादवपुरविश्वविद्यालयः**

**२०१६**

# PĀÎINISAMPRADĀYE PARIBHAØĀSAMĪKØĀ

**A Dissertation submitted in Partial fulfilling for the Degree of Doctor of Philosophy**

**Submitted by**

**Goutam Jana**

**Registration Number: 29/05/2012**

**Under Supervision of**

**Prof. Dr. Tapan Sankar Bhattacharyya**

**Department of Sanskrit**

**Faculty of Arts**

**Jadavpur University**

**Kolkata – 700 032**

**2016**

Certified that the Thesis entitled **'पाणिनिसम्प्रदाये परिभाषासमीक्षा'** submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the supervision of Professor Dr. Tapan Sankar Bhattacharyya, Prefessor, Department of Sanskrit, Jadavpur University, Kolkata, and that neither this thesis nor any part of it has been submitted before for any degree of diploma anywhere / elsewhere.

Countersigned by the

Supervisor:

Dated:

Candidate:

Dated:

# कार्तज्ञज्ञापनम्

‘अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते’ इति उपनिषद्वाणीमात्मनि निधाय नूतनतत्त्वविश्लेषणाय नियुक्तः । अनुसन्धानविषयचयनादारभ्य ग्रन्थसमाप्तिं यावत् सर्वान् विघ्नान् विदूरीकृत्य शारीरिकमानसिकबलप्रदाने ये सर्वथा कृतप्राणाः, तानुद्दिश्य मे सश्रद्धं षाष्ठाङ्गिकप्रणत्यादिकं विज्ञाप्यते । सच्चिदानन्दस्वरूपान् श्रीरामकृष्णदेव-सारदामाता-स्वामिविवेकानन्दादिमहापुरुषान् प्रति मे सश्रद्धं प्रणतिं विज्ञाप्यते । तेषां पादपद्मे बाल्यादेवासीनः सर्वदा तत्रैव भविष्यामि । श्रीमत्-स्वामितत्त्वविदानन्दस्वामिपादेभ्यः तथाः प्रफेसर-अशोककुमारपण्डापादेभ्यः सविशेषं प्रणामादिकं विज्ञाप्यते येषां ज्ञानाञ्जनशलाकया ज्ञानच्छायया पवित्रपादस्पर्शेनाहमधुना गवेषणे रतः ।

पुनश्च ये सहृदयाः विद्यामन्दिरे पठनसमये भविष्यज्जीवनविषये सदुपदेशेन प्रोत्साहितवन्तः तेभ्यः अध्यापकेभ्यः ड.-सत्यव्रतपाहाडीमहोदयेभ्यो, अध्यापक-दुर्गाशङ्करचक्रवर्तीमहोदयेभ्यस्तथा ड.-अयनभट्टाचार्यमहोदयेभ्यश्च मे आजीवनं कार्तज्ञं प्रकाशयामि ।

कोविदकुमुदकलानिधीनां पदवाक्यप्रमाणपारावारीणां श्रीमतां प्रफेसर-ड.-तपनशङ्करभट्टाचार्य्यमहोदयानां पादपद्मे नतिकृतज्ञतामुपहरामि । शोधबन्धप्रस्तुतकाले सर्वदा सहायकपदालंकृतान् मे परिवारान् प्रति कार्तज्ञं विज्ञापयामि । एतदनुसन्धानकार्यं निर्वर्तयितुं रामकृष्णमठ-विवेकानन्दवेदविद्यालयस्य, रामकृष्णमिशन्-विद्यामन्दिरस्य यादवपुरविश्वविद्यालयस्य तथा नन्दकुमारमहाविद्यालयस्य ग्रन्थागाराद् ग्रन्थाः स्वीकृताः, तत्रोपस्थितेभ्यः कर्मचारिभ्यो धन्यवादान् ज्ञापयामि ।

यस्य भूयसा प्रयत्नेन ग्रन्थस्यास्य मुद्रणादिदोषाः परिहृताः, सोऽयं श्रीअञ्जनवणिक् अनेकैः साधुवादैः संभाज्यते । अन्यैरपि यैः प्रत्यक्षपरोक्षरूपेण उपकृतः तेभ्यः सर्वेभ्यः भूयो भूयः कृतज्ञतां प्रकाशयामि।

विनीतस्य सीतानन्दनन्दनस्य
गौतमजाना इत्यस्य
शोधविद्यार्थिनः यादवपुरविश्वविद्यालयस्य

ओं सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ओं शान्तिः शान्तिः शान्तिः ॥
ओं ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतं सं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समस्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

## ग्रन्थसंकेतः

अष्टा. – अष्टाध्यायी
अ. को. – अमरकोषः
ऋ. वे. – ऋग्वेदसंहिता
का. वृ. – काशिकावृत्तिः
चा. व्या. – चान्द्रव्याकरणम्
नि. – निरुक्तम्
न्या. द. – न्यायदर्शनम्
परि. – परिभाषा
परिभा. – परिभाषेन्दुशेखरः
प. वृ. – परिभाषावृत्तिः
पृ. – पृष्ठाङ्कः
प्र. कु. – प्रक्रियाकौमुदी
प्रौ. म. – प्रौढमनोरमा
बृ. शे. – बृहद्शब्देन्दुशेखरः
महा. – महाभाष्यम्
महा. प्र. – महाभाष्यप्रदीपः
महा. उ. – महाभाष्योद्द्योतः
श. कौ. – शब्दकौस्तुभः
सि. कौ. – सिद्धान्तकौमुदी

# पाणिनिसम्प्रदाये परिभाषासमीक्षा

पादसंकेतः

भूमिका १ – ३८

प्रथमोऽध्यायः परिभाषालक्षणनिरूपणम् । ३९ – ६७

द्वितीयोऽध्यायः अन्येषु शास्त्रेषु केचित् पारिभाषिकशब्दाः तेषाञ्च वैशिष्ट्यम् । ६८ – ८९

तृतीयोऽध्यायः त्रिमुनिव्याकरणे परिभाषापर्यालोचनम् । ९० – १३१

चतुर्थोऽध्यायः परिभाषाणां वर्गीकरणे नागेशभट्टस्य स्वतन्त्रता । १३२–२४२

पञ्चमोऽध्यायः परिभाषेन्दुशेखरे पारिभाषिकशब्दानां विश्लेषणम् । २४३–२६१

परिशिष्टम् २६२–२८७

क. लौकिकन्यायानां संग्रहः ।
ख. महाभाष्ये प्रयुक्तानां लौकिकदृष्टान्तानां संग्रहः ।

उपसंहारः २८८–२९१

ग्रन्थसूची २९२–२९७

# प्रस्तावना

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

इह खलु जगति प्राणिनां कर्मोपभोगफलो विचित्रो वैरञ्चो जीवसर्गः । तथाहि केचन स्थावराः, केचन जङ्गमाः । परस्परं भावाभिव्यक्तये च तेषां विचित्रा विविधाश्च व्यापाराः । तत्र स्थावरा वागिन्द्रियविकलाः चेष्टया एव स्वस्वभावमभिव्यञ्जयन्ति तरुगुल्मशस्यघासादयः । अभिव्यक्ततरश्च चेष्टया भावाभिव्यक्तिप्रकारो जलसेचनकाले तरुगुल्मादीनाम् । विशेषतः च लज्जन्त्या औषधेः । मूकानाञ्च मानवेषु अपि चेष्टयैव भावाभिव्यक्तिः दृश्यते वाग्विकलानाम् ।

वाक्सम्पन्नानां जीवानां तु स्वस्वभावाविष्काराय द्विविधा भाषाप्रवृत्तिः दृश्यते –

१. अव्यक्तभाषाप्रवृत्तिः ।

२. व्यक्तभाषाप्रवृत्तिः ।

तत्र अव्यक्तभाषाप्रवृत्तिः तिरश्चाम्, व्यक्तभाषाप्रवृत्तिः मानवानाम् । पक्षिणामपि शुकसारिकादीनां शिक्षितानां व्यक्तभाषाप्रवृत्तिः दृश्यते, परन्तु सा न स्वभावाविष्काराय, अपि तु शिक्षितृभावाविष्काराय इति विशेषः । अतः दृश्यमानेऽस्मिन् विश्वप्रपञ्चे शब्दमन्तरा व्यवहारप्रयोजकं ज्ञानं नैव सम्पद्यते । किं बहुना शब्दं विना, न धर्माधर्मजिज्ञासाव्यवस्था, न गुरुशिष्योपदेशसम्प्रदायः, न च उत्तमाधमर्णव्यवहारादिकमिति सर्वमेवेदं जगत् शब्देनैव प्रकाशते, पदवाक्यप्रमाणपारावरीणां वैयाकरणमीमांसकनैयायिकानामयमविचलः राद्धान्तः । तदुक्तं वाक्यपदीये भर्तृहरिणा –

"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[१]" ॥ इति ॥

---

१. भर्तृहरिकृतवाक्यपदीयस्य ब्रह्मकाण्डम् – १२३, 'यथास्य संहृतरूपा शब्दभावना तथा ज्ञेयेष्वर्थेषूत्पन्नेनापि अविकल्पकेन कार्यं न क्रियते' ।

अनुरूपञ्चाभिहितं काव्यादर्शे दण्डिना –

"इदमन्धः तमः कृत्स्नं जायते भुवनत्रयम् ।
यदि शब्दाह्वायं ज्योतिरासंसारं न दीप्यते ॥"[२] इति ॥

ऋग्वेदे – 'देवीं वाचमजनयन्त देवास्तां विश्वरूपा पशवो वदन्ति'[३] इति ।

मनुस्मृतौ – "सर्वेषान्तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाञ्च निर्ममे ॥"[४] इति ॥

अपि च महाभारते – 'अनादिनिधना नित्या वागुत्कृष्टा स्वयम्भुवा'[५] इति ।

मैत्रायणीयसंहितायाः –

सा वै वाक् सृष्टा चतुर्धा व्यभवत्, एषु लोकेषु त्रीणि तुरीयाणि, पशुषु तुरीयं या पृथिव्यां साग्नौ सा रथन्तरे यान्तरिक्षे सा वाते सा वामदेव्ये, या दिवि सा बृहति सा स्तनयित्नौ, अथ पशुषु, ततो या वागत्यरिच्यत तां ब्राह्मणे न्यदधुः, तस्माद् ब्राह्मण उभयीं वाचं वदति यश्च वेद यश्च न । या बृहद्रथन्तयोर्यज्ञादेनं तथा गच्छति"[६] इति वचनेन ।

काठकसंहिताकपिष्ठलसंहितयोर्वचनैश्च वाचश्चत्वारो समुद्घोष्यन्ते[७] । परा, पश्यन्ती, मध्यमा, वैखरीभेदेभ्यः चतस्रो वाचो व्याकरणशास्त्रे वर्णिताः ।

अपि च – यजुःसंहितायाः – "दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः"[८] इति

तैत्तिरीयसंहितायाः – "वाग्वै पराच्यव्याकृताऽवदत् । ते देवा इदमब्रुवन् इमां नो वाचं व्याकुर्विति. . . तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोद्"[९] इति ।

गोपथब्राह्मणस्य – "ओङ्कारं पृच्छामः । को धातुः किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं, का विभक्तिः, कः प्रत्ययः, कः स्वरः, क उपसर्गो निपातः, किं

२. दण्डिकृतकाव्यादर्शः – १/४ ।
३. ऋग्वेदः – ८/१००/११ ।
४. मनुसंहिता – १/२७ ।
५. महाभारतम्, शान्तिपर्व – २३१/५६ ।
६. मैत्रायणीयसंहिता – १–१२/१५ ।
७. काठकसंहिता – १४/१५; कपिष्ठलसंहिता – ४२/३ ।
८. यजुःसंहिता – १९/७७ ।
९. तैत्तिरीयसंहिता – ६/४/७ ।

वैयाकरणं, को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कतिपदः, कः संयोगः, किं स्थानं नादाप्रदानानुकरणम्"[१०] इत्यादिः ।

एवञ्चायं शब्दः प्रत्यक्षादिषु प्रमाणेष्वन्यतम इत्यत्र नास्ति विसंवादः, लौकायतिकसौगतवैशेषिकान् विना । तथा चोक्तं – 'शब्दप्रमाणका वयम्' । यच्छब्द आह तदस्माकं प्रमाणम्'[११] इति । 'आप्तोपदेशः शब्दः' प्रमाणम्[१२] इति ।
धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमचरमपुरुषार्थः, मोक्षावाप्तिश्च सनातनधर्मनये सा वेदाध्ययनेनैव सम्भवति । तस्मादवश्यमेव वेदाध्ययनं करणीयम् । "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च[१३]" इति आगमप्रमाणात् प्रमाणीभवति व्याकरणस्य प्रामुख्यमिति । 'प्रधानं हि षट्स्वङ्गेषु व्याकरणम् । प्रधाने हि कृते यत्ने फलवान् भवति' इत्यन्यत्र ।

'प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानपूर्वकं वेदशब्दतत्तदर्थज्ञानजनकत्वेनोपकार्योपकारकभाव– सम्बन्धेन वेदाङ्गत्वं व्याकरणस्य[१४] ' इत्यादिवचनानुरोधेन च व्याकरणस्य वेदाङ्गता सिद्धा भवति ।
महाभारते –

"सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते ।
प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ॥"[१५] इति ॥

महाभाष्ये –

"वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थञ्चोपदिश्यते ॥"[१६] इति ॥

---

१०. गोपथब्राह्मणम् – १/२४ ।
११. महाभाष्यम् – २/१/१ ।
१२. न्यायदर्शनम् – १/१/७ ।
१३. महाभाष्यम्, पस्पशाह्निकम्, ।
१४. संस्कृत व्याकरण शास्त्र का इतिहास, युधिष्टिरमीमांसक, पृष्ठा – ३/३/९ ।
१५. महाभारतम्, उद्योगपर्व – ४२/६१–६२ ।
१६. महाभाष्यम्, पस्पशाह्निकम् ।

वाक्यपदीये भर्तृहरिणा –

"आपः पवित्रं परमं पृथिव्या–
मद्भ्यः पवित्रं परमञ्च मन्त्राः ।
तेषाञ्च सामर्ग्युजषं पवित्रं
महर्षयो व्याकरणं निराहुः ॥"[१७]

इत्यादीनि वचनानि व्याकरणस्य महत्त्वाधायकानि । यद्यपि ". . . यथा आचार्या ऊचुर्ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते"[१८] इत्युक्त्या,

ब्राह्मेशानमिन्द्रं च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलिञ्चैव पाणिनीयमथाष्टमम् ॥
यस्मिन् व्याकरणान्यष्टौ निरूप्यन्ते महान्ति च ।
तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते ।
तृतीयं यास्यमाख्यातं चतुर्थं रौद्रमुच्यते ॥
वायव्यं पञ्चमं प्रोक्तं षष्ठं वारुणमुच्यते ।
सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा ॥[१९]

इत्याद्युक्तिभिः च ब्रह्मा हि सर्वप्रथमः प्रवक्ताऽक्षरसमाम्नायस्य सिद्धो भवति । अतएव ब्राह्मं व्याकरणमाद्यमुच्यते । नैतच्चित्रम्, यतो वेदानामपि चतुर्मुखमुखनिःसृतत्वादपौरुषेयता विचक्षणैराख्यायते । एवञ्च ब्रह्मणः सृष्टिकर्तृत्वं वेदकर्तृत्वं व्याकरणकर्तृत्वञ्च परिनिष्पद्यते । ब्रह्मणः बृहस्पतिः बृहस्पतेरिन्द्र इत्ययं क्रमस्तु देवकोटिसमाविष्टोऽलौकिको वक्तुं शक्यते । यथोक्तं भाष्यकृतापि – "एवं हि श्रूयते . . . बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम । बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न नान्तं जगाम"[२०] इति ।

तथापि लौकिकपुरुष ऋषिकल्पो भरद्वाज इन्द्रादधीतवान् । अत ऐन्द्रव्याकरणस्याधारत्वं सिध्यति । ऐन्द्रव्याकरणस्य वैशद्यमाहात्म्ययोः च संकेतो

---

१७. भर्तृहरिकृतवाक्यपदीयम्, ब्रह्मकाण्डम्, १४ संख्यकश्लोकवृत्तिः ।
१८. महाभाष्यम्, शब्दकल्पद्रुमः ।
१९. द्रष्टव्यम् ड. रामसुरेशत्रिपाठीकृत संस्कृत व्याकरणदर्शन का इतिहास ।
२०. महाभाष्यम्, पस्पशाह्निकम् ।

महाभाष्यकारस्य उपरितनोक्तिदिशा प्राप्यते । एवं यद्यपि ऐन्द्रव्याकरणापेक्षया बार्हस्पत्यस्य, तदपेक्षया ब्राह्मस्य च विशदतोत्कृष्टता च श्रूयते । यथोक्तं –

> “समुद्रवद् व्याकरणं महेश्वरे
> तदर्धकुम्भोद्धरणं बृहस्पतौ ।
> तद्भागभागाच्च धृतं पुरन्धरे
> कुशाग्रविन्दूत्पतितं हि पाणिनौ ॥”[२१] इति ॥

तथापि तेषामनुपलब्धेः श्रुतिमात्रपरकत्वमेव । ऐन्द्रव्याकरणस्यापि नोपलब्धिः । ऐन्द्रव्याकरणस्य सत्तास्वीकाराय कानिचिद्वचनानि तु पूर्वोद्धृतान्येव कानिचिदन्यान्यपि शास्त्रेषु दरीदृश्यन्ते । तानि यथा –

महाभारतटीकायां देवबोधोक्तिः –

> “यान्युज्जहार महेन्द्राद् व्यासो व्याकरणार्णवात् ।
> तानि किं पदरत्नानि सन्ति पाणिनिगोष्पदे ॥”[२२] इति ॥

चरकव्याख्यायां भट्टारकहरिश्चन्द्रः –

> “शास्त्रेष्वपि अथ वर्णसमूहः इत्यैन्द्रव्याकरणस्य’[२३] इति ।

निरुक्तवृत्तौ दुर्गाचार्यो हि –

> ‘नैकं पदजातम्, यथा – अर्थः पदमित्यैन्द्राणाम्’[२४] इत्युक्तवान् इति

शाकटायनव्याकरणे – ‘जराया ङष् इन्द्रस्याचि’[२५] इति ।

अन्यत्रापि – ‘अर्थः पदमाहुरैन्द्राः, विभक्त्यन्तः पदमाहुरापिशालीयाः सुप्तिङन्तमिति पाणिनीयाः’[२६] इत्यादि ।

---

२१. गुरुपदहालदारकृत व्याकरणदर्शनेर इतिहास, पृ. – ३०९ ।
२२. महाभारतम्, देवबोधिटीका ।
२३. भट्टारकहरिश्चन्द्रकृतचरकव्याख्या ।
२४. निरुक्तम्, दुर्गाचार्यवृत्तिः ।
२५. शाकटायनव्याकरणम् – १/२/३७ ।
२६. संस्कृत व्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसक, पृष्ठा – ४० ।

अपि च –

"इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।
सारस्वतं चापिशलं शाखलं पाणिनीयकम् ॥"[२७] इति ॥

तिब्बतीयग्रन्थानुसारमैन्द्रव्याकरणं पञ्चविंशतिसहस्रश्लोकात्मकमासीदिति युधिष्ठिर–मीमांसकेन उपवर्णितम् । व्याकरणानां बाहुल्यविषये तत्तच्छास्त्रेषु अन्यान्यपि विविधानि वचनान्युद्धृतानि सन्ति तानि संक्षेपतो निर्दिश्यन्ते वाल्मीकिरामायणे –

"नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहुव्यवहारताऽनेन न किञ्चिदपभाषितम् ॥"[२८] इति ॥

इत्यनेनानेकव्याकरणस्य संकेत उपलभ्यते । उत्तरकाण्डे[२९] तु नवव्याकरणानां निर्देशः कृतो वर्तते । गीतासारनामके हस्तलेखेऽपि –

"गीतासारमिदं शास्त्रं गीतासारसमुद्भवम् ।
अत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसमुच्चयम् ॥
अष्टादशपुराणानि नवव्याकरणानि च ।
निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम् ॥"[३०] इति ॥

एवमेव क्वचिदष्टादशव्याकरणानां क्वचिच्च पञ्चव्याकरणानामुल्लेखः प्राप्यते[३१] । तत्राष्टव्याकरणानामुक्तनवव्याकरणेष्वेव समावेशः । पञ्चव्याकरणविषये तु नामोल्लेखाभावात् नामसंकेतोऽसम्भवः । महर्षिपाणिनिना स्वीयाष्टाध्यायां दशानामाचार्याणां नामानि उल्लिखितानि । तानि यथा –

१. आपिशालिः क. 'वा सुप्यापिशलेः' (अष्टा. – ६/१/९२)

---

२७. शब्दकल्पद्रुमः, संस्कृत व्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसक, पृष्ठा – ४१ ।
२८. वाल्मीकिरामायणम्, किष्किन्दाकाण्डम् – ३/२९ ।
२९. तत्रैव, उत्तरकाण्डम् – ३६/४७ ।
३०. संस्कृत व्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसक, पृष्ठा – ४१–४२ ।
३१. तुलनीयम् – इन्द्रश्चन्द्रः काशकृत्स्नापिशल . . . ।
. . . . . . . जयन्त्यष्टादिशाब्दिकाः ॥ शब्दकल्पद्रुमः ।

२.काश्यपः क. 'तृषिमृषिकृषेः काश्यपस्य' (तदेव १/२/४२),

ख. 'नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवनाम्' (अ. – ८/४/६७)

३.गार्ग्यः । क. 'अङ्गार्ग्यगालवयोः' (अ. ७/३/९९),

ख. 'ओतो गार्ग्यस्य' (अ. ८/३/२०),

ग. 'नोदात्तस्वरितोदयमगार्ग्य' (अ. ८/४/६७)

४.गालवः । क. 'इको ह्रस्वोऽङ्यो गालवस्य ( ६/३/६१),

ख. 'तृतीयादिषु भासितपुंसवद् गालवस्य' (७/१/७४),

ग. 'अङ्गार्ग्यगालवयोः' (७/३/९९),

घ. 'नोदात्तस्वरितो' (८/४/६७)

५. चाक्रवर्मणः । क. 'ई चाक्रवर्मणः' (६/१/१३०)

६. भारद्वाजः क. 'ऋतो भारद्वाजस्य (७/२/६३)

७. शाकटायनः । क. 'लङः शाकटायनस्यैव' (३/४/१११),

ख. 'व्योर्लघुप्रयत्नतरः शाकटायनस्य' (८/४/१८),

ग. 'त्रिप्रभृतिषु शाकटायनस्य' (८/४/५०)

८. शाकल्यः । क. 'सम्बुद्धौ शाकल्यस्येतावनार्षे' (१/१/१६),

ख. 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' (६/१/१२७),

ग. 'लोपः शाकल्यस्य' (८/३/१९),

घ. 'सर्वत्र शाकल्यस्य' (८/४/९१)

९. सेनकः । क. 'गिरेश्च सेनकस्य' (५/४/११)

१०.स्फोटायनः । क. 'अवङ्स्फोटायनस्य' (६/१/१२३)

अन्यत्रापि[३२] त्रयोदशाचार्याणां नामानि व्याकरणशास्त्रप्रणेतृरूपेण प्राप्यन्ते । १. इन्द्रः, २. वायुः, ३. भारद्वाजः, ४. भागुरिः, ५. पौष्करसादिः, ६. काशकृत्स्नः, ७. रौढिः, ८. चारायणः, ९. माध्यन्दिनिः, १०. वैयाघ्रपद्यः, ११. शौनकिः, १२. गौतमः,१३. व्याडिः चेति। अतोऽन्ये सप्तपञ्चाशदाचार्या व्याकरणशास्त्रप्रणेतारो वैदिकव्याकरणेषु[३३] प्रतिशाख्येषु च निर्दिष्टाः सन्ति । एवं हि अशीतिराचार्या व्याकरणशास्त्रप्रणेतारः पाणिनितः प्रचीनाः श्रूयन्ते।

---

३२. युधिष्टिरमीमांसककृत संस्कृत व्याकरण शास्त्र का इतिहास, पृ. – ४६ ।

३३. तत्रैव, पृ. – ४७–४८ ।

## व्याकरणशास्त्रस्य स्वरूपनिरूपणम्

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति आगमप्रामाण्यात् प्रामाणीभवति व्याकरणस्य प्राधान्यम् । वेदाङ्गानि च – शिक्षा, कल्पः, व्याकरणम्, ज्योतिषम्, छन्दः नैरुक्तञ्चेति । पाणिनीयशिक्षा प्राह –

"शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां चयः ।
ज्योतिषमयनं चैव वेदाङ्गानि षडेव तु ॥" इति ।

तत्रैवालोचितं यत् – वेदस्य पादौ छन्दः, हस्तौ कल्पः, नयनं ज्योतिषम्, शोत्रं निरुक्तम्, घ्राणं शिक्षा, मुखं व्याकरणमिति षड् वेदाङ्गानि तैः सहैव वेदाध्ययनेन ब्रह्मलोके महीयते[३४]।

यथा शरीरावयवेषु मुखस्य प्राधान्यं तद्वद् षडङ्गेषु वेदाङ्गेषु व्याकरणस्य प्रामुख्यम् । व्याकरणस्य च शब्दानुशासनमन्वर्थं प्रकाशते । अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य ज्ञायन्ते साधुशब्दा अनेनेति व्याकरणम् । वि–आङ्पूर्वकस्य कृधातोः करणे ल्युटि प्रत्यये कृते सति व्याकरणशब्दो निष्पद्यते । तथा च 'व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम्' इत्यनया व्युत्पत्त्या व्याकरणशब्दः सूत्रं संकेतयति, किन्तु 'कृत्यल्युटो बहुलमिति सूत्रेणाधिकृत्य कर्मणि ल्युटि कृते सति 'व्याक्रियते यत्तद् व्याकरणम्' इत्यनेन प्रकारेण साधितः व्याकरणशब्दः 'शब्दम्' एव पुरस्करोति । तथा चाह महाभाष्यकारः पतञ्जलिः[३५] 'व्याकरणमित्यस्य शब्दस्य कः पदार्थः'? इत्याशङ्क्य सूत्रमिति उत्तरितम् । परमेतादृशार्थस्वीकारे व्याकरणस्य सूत्रमिति षष्ठ्यर्थो नोपपद्यते इति प्रथमं दोषमुद्भाव्य सूत्रे व्याकरणे शब्देऽप्रतिपत्तिरूपं दूषणमाशङ्कितम् । यतो हि न केवलेन सूत्रेण शब्दाः प्रतिपाद्यन्ते । किन्तु उदाहरणप्रत्युदाहरणवाक्याध्याहाररूपेण शब्दानां ज्ञानं भवति । तस्मात् सूत्रं व्याकरणमिति वक्तुं न शक्यते । यदि च शब्दो व्याकरणमित्याश्रीयते तदा व्याक्रियन्ते शब्दा अनेनेति करणे ल्युट् नोपपद्यते । किञ्च 'भवे च तद्धितः', 'प्रोक्तदयश्च तद्धिताः' नोपपद्यन्ते । यथा पाणिनिना प्रोक्तं पाणिनीयम् इत्यत्र न हि पाणिनिना शब्दाः प्रोक्ताः किन्तु सूत्राणीति । तस्मात् तथा सति प्रोक्तादयश्च नोपपद्यन्ते । पुनराचार्येण 'शब्दे ल्युडर्थः'

---

३४. "शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" ॥

३५. महाभाष्यम्, पस्पशाह्निकम्, व्याकरणपदार्थनिरूपणावसरे ।

इत्यक्षेपस्य समाधानाय न केवलं करणाधिकरणयोरेव ल्युड्विधीयते किन्तु अन्येष्वपि कारकेषु ल्युट् भवति । यथा प्रस्कन्दनं प्रतपनमित्यत्र 'कृत्यल्युटो बहुलम्' इत्यनेन ल्युट् विधीयते इति । शब्दैरपि शब्दा ज्ञायन्ते । यथा 'गौः' इत्युक्ते गवेतराणामश्वगर्दभादीनां निवृत्तिः भवतीति समाहितम् ।

क्रमेणाक्षेपनिरसनपूर्वकं 'लक्ष्यलक्षणे व्याकरणम्'[३६] इति सिद्धान्तभूतं समाधानमुक्तम् । अर्थात् लक्ष्यलक्षणमेतं समुदितं व्याकरणं भवति । यथा 'लक्षणं सूत्रं शब्दो लक्ष्य' इति । सूत्रे व्याकरणे षष्ठ्यर्थोपपादनं च व्यपदेशिवद्भावेन कृतम् । यथा – 'राहोः शिरः' इत्येकस्मिन्नपि वस्तुनि शब्दार्थभेदाद् भेदव्यवहारः । अनेकावस्थायुक्तशिरो हि राहुशब्दार्थः । यत्किञ्चिदेकावस्थायुक्तं तच्छिरः शब्दार्थः । अत्र हि व्याकरणशब्देन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते, सूत्रशब्देन तु समुदायरूपतेति भेदव्यवहार उपपद्यते । नापि शब्दाप्रतिपत्तिराशङ्कनीया । न हि सूत्रत एव शब्दान् प्रतिपद्यन्ते । किन्तर्हि व्याख्यानतश्च इति परिहृतम् – 'तदेव सूत्रं विगृहीतं व्याख्यानं भवति'[३७] इति । ननु चोक्तं – "न केवलानि चर्चापदानि व्याख्यातम् – 'वृद्धिः आद् ऐच्' इति । किं तर्हि उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् व्याख्यानं भवति । अविजानत एतदेवं भवति । सूत्रत एव शब्दान् प्रतिपद्यन्ते । आतश्च सूत्रत एव यो हि आत्सूत्रं कथयेन्नादो गृह्यते" इति । तस्मात् लक्ष्यलक्षणमेतत् समुदितं व्याकरणं भवतीति वैयाकरणानां सिद्धान्तः ।

## व्याकरणस्याध्ययनस्य प्रयोजनम्

व्याकरणस्याध्ययनस्य साक्षात् प्रयोजनं शब्दानुशासनमिति । अतएव करणव्युत्पत्त्या अनुशिष्यन्ते अपशब्देभ्यः पृथक्कृत्य कथ्यन्ते साधुशब्दा अनेनेति शब्दानुशासनमिति, शब्दानुशासनं नाम शास्त्रमिति प्रतिज्ञया साधुशब्दज्ञानं व्याकरणाध्ययनस्य मुख्यं प्रयोजनमिति लभ्यते । न च 'ब्राह्मणेन निष्कारणो धर्म'[३८] इत्यादिश्रुतिप्रामाण्यात् सन्ध्योपासनादाविव प्रत्यवायपरिहाररूपं प्रयोजनं कुतो नोक्तमिति जिज्ञासायामुच्यते भगवता

---

३६. महाभाष्यम्, पस्पशाह्निकम्, व्याकरणपदार्थनिरूपणावसरे ।

३७. तत्रैव, पृ. – ७१ ।

३८. तत्रैव , प्रयोजननिरूपणप्रकरणम्, पृ. – २० ।

पतञ्जलिना – "कानि पुनः शब्दानुशासनस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[३९] इति ।

"विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम् ।
विनानुबन्धं ग्रन्थादौ मङ्गलं नैव शिष्यते" ॥

इत्यभियुक्तोक्त्याऽस्मिन् व्याकरणशास्त्रे अनुबन्धचतुष्टयमावश्यकम् । तथाहि लौकिकवैदिकशब्दाश्च शब्दाः विषयः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधीतकाव्यकोशादि-रधिकारी, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । प्रयोजनमष्टादशविधम् । तथा वेदरक्षा, ऊहः, आगमः, लाघवम्, असन्देहः, अम्लेच्छता सम्पत्तिः, स्वरवर्णदोषराहित्यम्, सार्थकवेदज्ञानम्, साधुशब्दापशब्दयोर्धर्मार्थबोधः, प्रत्यभिवादेनाम्निप्लुतिज्ञानम्, विध्यादिवाक्यघटकविभक्ति-पदार्थादिज्ञानम्, पदाक्षरादिविभागज्ञानम्, चतुर्विधपदज्ञानजातकालव्यङ्ग्यव्यञ्जकविभक्ति-स्थानभेदज्ञानम् (यद्वा सकलपदजातिज्ञानम्), वाग्विस्तारसम्पत्तिः असाधु शब्देभ्यो विविच्य साधुशब्दज्ञानम्, अपशब्दप्रयोगजन्यप्रत्यवायपरिहारकप्रायश्चित्ताभावः, नामकरणेषु विहितनामस्वरूपज्ञानम्, सर्वविभक्त्यन्तानां सम्यगुच्चारणमिति । महाभाष्यकृता व्याकरणस्य प्रयोजनानि वदता 'रक्षोहागमलघ्वसन्देहा इति पञ्च व्याकरणस्य मुख्यप्रयोजनानि पूर्वमुक्तानि, पश्चात् च त्रयोदशापराण्यपि निर्दिष्टानि । तानि व्याकरणस्योपयोगितां प्रतिपादयन्ति ।

भाष्यकृद्भिः 'रक्षार्थं वेदानामध्येयं व्याकरणमि'ति[४०] । 'लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यती'ति[४१] उक्तम् । अयम्भावः – लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्रामयेदवैयाकरणः, वैयाकरणस्तु न भ्रमति वेदार्थं चाऽध्यवस्यति । ऊहः[४२] खल्वपि प्रयोजनम्, न सर्वैर्लिङ्गैर्न सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदितास्ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्यः । यथा – 'अन्वेनं माता मन्यताम्, अनु पिता न भ्राता' इति प्रकृतिपशुविशेषो मन्त्रपाठः । अस्य च मन्त्रस्य विकृतौ पशुद्वये सति 'अन्वेतौ' पशुबहुत्वे च 'अन्वेनान्' माता मन्यताम् इत्यूहः कर्तव्यः । अतः व्याकरणस्य ज्ञानमन्तरेण

---

३९. महाभाष्यम्, प्रयोजननिरूपणप्रकरणम्, पृ. – २१ ।

४०. "वेदरक्षाऽपि नैतदस्मादृतेऽध्येतृपरम्पराम् ।
सम्प्रदायोऽनुवृत्तश्चैतद्वेदस्तेनैव रक्ष्यते" ॥ इति कुमारिलभट्टोक्तिर्निराकृता ।

४१. महाभाष्यम्, पस्पशाह्निकम् ।

४२. तत्रैव ।

पदानि यथायथं विपरिणमितुं न शक्यन्ते । तस्मात् ऊहार्थमध्येयं व्याकरणम् । न च ऊहः मीमांसादर्शितदिशा भवति । ऊहस्य कर्तव्याकर्तव्यव्यवस्थितेरेव केवलं मीमांसासाध्यत्वात् । आगमोऽपि[४३] प्रयोजनम् – तत्रागमः प्रवर्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति । 'ब्राह्मणेन निष्कारणो . . .' इति । प्रधानं च षडङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवतीति । तथाहि व्याकरणस्य पदपदार्थावगमद्वारा वाक्यार्थावगमोपयोगित्वात् तदध्ययनप्रयुक्तस्य वेदार्थज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारार्थाध्येयं व्याकरणम् । केचन तु भट्टोजिदीक्षितपादादयः शब्दकौस्तुभादिषु प्राहुः – 'रक्षोहलाघवासन्देहाख्यानि चत्वारि फलानि आगमस्तु प्रवर्तकः'[४४] इति ।

ननु पाणिनीयव्याकरणस्य आगमबोधितत्वं कथमुपपद्यते? यतः आगमो नित्यः एवञ्च व्याकरणं मुनित्रयं प्रणीतत्वादनित्यमिति नित्यानित्यसंयोगविरोधात् श्रुतिबोधितमस्य न स्यादिति चेदत्रोच्यते कैयटेन 'श्रुतौ अपि जनमेजयाद्युपाख्यानवत् पौरुषेयव्याकरणस्यापि नित्यताबोधनमुपपद्यते'[४५] इति । 'यद्वा तेन प्रोक्तम्' इति सूत्रोक्तभाषारीत्या 'वेदार्थवत् व्याकरणार्थोऽपि', 'अनादित्वरूपनित्यतावान्' इति श्रुत्या तस्य नित्यत्वबोधनमिति बोध्यम् ।

लघ्वर्थापि व्याकरणाधीतिर्विधेया । ब्राह्मणस्याध्यापनं वृत्तिः । ब्राह्मणेनावश्यं शब्दा ज्ञेया इति । न च व्याकरणमन्तरेण लघुना उपायेन शब्दा ज्ञातुं शक्याः । तत्र शब्दानां प्रतिपदं पाठेन ज्ञानमसम्भवि । तथाहि श्रुतिराख्यायते – 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच, नान्तं जगाम'[४६] इति । व्याकरणेन सुप्तिङाद्येकादशजातीयप्रत्ययकल्पनेन कोटिशब्दानुगमनदर्शनाल्लाघवेन शब्दज्ञानं सम्भवति । तदुक्तं भगवता भाष्यकारेण 'कथं तर्हीमे शब्दाः प्रतिपत्तव्याः, किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्, येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्'[४७] इति । उक्तञ्च – ''ऋषयोऽप्युपदेशस्य नान्तं यान्ति पृथक्त्वशः ।

लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥'' इति ॥

४३. महाभाष्यम्, पस्पशाह्निकम् ।
४४. भट्टोजिदीक्षितकृतशब्दकौस्तुभः, प्रारम्भे ।
४५. महाभाष्यप्रदीपः, पस्पशाह्निकम् ।
४६.महाभाष्यम्, पस्पशाह्निकम् ।
४७.महाभाष्यम्, पस्पशाह्निकम् ।

तस्माल्लाघवार्थं व्याकरणमध्येयमिति ।

असन्देहश्च प्रयोजनं व्याकरणाध्ययनस्य । तथाहि याज्ञिकाः पठन्ति 'स्थूलपृषतीमाग्निवारुणीमड्‌वाहीमालभेत' इति । अत्र न ज्ञायते, किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती, स्थूला चासौ पृषती चेति स्थूलपृषतीति वा । वैयाकरणं विना स्वरतः नाध्यवस्यति, यदि समासान्तोदात्तत्वं तदा कर्मधारयः, अथ पूर्वपदप्रकृतिस्वरत्वं तदा बहुव्रीहिरिति अतः असन्देहार्थमप्यध्येयं व्याकरणम् ।

एवं शब्दानुशासनस्य मुख्यप्रयोजनानि प्रोच्य अवान्तरप्रयोजनान्यपि त्रयोदशभिः प्रतीकैः प्रतिपादितानि[४८] – १. तेऽसुरा, २. दुष्टः शब्दः, ३. यदधीतम्, ४. यस्तु प्रयुङ्क्ते, ५. अविद्वांसः, ६. विभक्तिं भवन्ति, ७. यो वा इमाम्, ८. चत्वारि, ९. उत त्वः, १०. सक्तुमिव, ११. सरस्वतीम्, १२. दशभ्यां पुत्रस्य, १३. सुदेवोऽसि वरुणः चेति ।

ननु पुरुषार्थचतुष्टयस्य प्राप्तिरेव साधीयसी समासां क्रियाणां शास्त्राणाञ्चेति सिद्धान्तः सर्वमान्य एव । अनेन व्याकरणशास्त्रेण कथं पुरुषार्थसिद्धिरिति चेत्? अत्रोच्यते व्याकरणं समासां भाषाणां प्रवेशमार्गः । व्याकरणज्ञानमन्तरेण कस्यामपि भाषायां प्रवेशो न सम्भवति । ग्रीकलाटिनावेस्तादिभाषाणां यद्यपि संक्षिप्तमेवास्ते तथापि तज्ज्ञानमन्तरा तास्वपि प्रवेशोऽसम्भवः । का कथा पुनः संस्कृतवाङ्मये । संस्कृतवाङ्मयस्य साहित्यं विश्वसाहित्ये सर्वोत्कृष्टं वर्तते इत्यत्र नास्ति कोऽपि सन्देहावकाशः । व्याकरणज्ञानेन तत्तद्‌भाषागतसाहित्यज्ञानं सुकरं भवति । तत्तद्भाषागतसाहित्यज्ञानमवाप्य विद्वांसो भूत्वा जना विशिष्टेषु स्थानेषु नियुक्ताः सन्तो धर्मार्थकामान् पुरुषार्थान् सफलीकर्तुं शक्नुवन्ति । मोक्षरूपचरमपुरुषार्थस्य प्राप्तिस्तु विदुषां सदाचारेणैव ज्ञायते नान्यः पन्थाः अन्वेषणीयः । 'रामवत् प्रवर्तितव्यं न रावणादिवत्' इत्युक्तीनामध्ययनेन व्यवहारिके जीवने तत्परिपालनेन च मोक्षप्राप्तिः सुतरां साध्या ।

महाभाष्यकारस्तु एकस्यापि साधुशब्दस्य कामधुक्त्वं प्रतिपादितवान् । यथोक्तम् 'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवती'ति[४९] ।

---

४८. महाभाष्यम्, पस्पशाह्निकम्, अप्रधानप्रयोजननिरूपणम् ।
४९. तत्रैव ।

शब्दब्रह्मणः सत्ता न केवलैर्वैयाकरणैरेव स्वीक्रियते, अपि तु प्रायः सर्वैर्दार्शनिकैः । पुराणेष्वपि द्वयोः ब्रह्मणोः वेद्यत्वं महर्षिभिः प्रतिपादितम् – 'एकं शब्दब्रह्म, अपरं परब्रह्म । तत्र शब्दब्रह्मणि निष्णातः परं ब्रह्म प्राप्नोती'ति सिद्धान्तितम् ।

तथोक्तम् –

"द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥"[५०] इति ॥

व्याकरणस्य व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या शब्दानां संस्कारत्वं सिद्धमेव । शाब्दश्च नित्यो ब्रह्मरूप एव । एवं सति ब्रह्मणः संस्कारकत्वं व्याकरणस्य निष्पन्नम् । अतएव वैयाकरणदार्शनिकशिरोमणिभर्तृहतिः व्याकरणस्य दर्शनत्वमुपपादयितुं शब्दस्य ब्रह्मत्वं शब्दसंस्कारकव्याकरणस्य ब्रह्मसाजुज्ज्यकरत्वं चानेकवचनैः प्रतिपादयन्नाह –

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।
अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ॥
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥
तस्माद्यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।
तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ॥"[५१] इति ॥

एवमुपरितनोक्तिदिशा व्याकरणस्य पुरुषार्थचतुष्टयसाधकत्वे न सन्देहकणिका पुनरुदेतुं शक्नोति । एवमेतावता वर्णनेनैव निश्चीयते यत् व्याकरणशास्त्रे सर्वथा पुरुषार्थचतुष्टयस्य प्रतिपादकता स्थिता ।

महाभाष्ये हि प्रथमं पस्पशाह्निके 'अथ गौरित्यत्र कः शब्दः' इति प्रश्ने द्रव्यस्य क्रियाया गुणस्य आकृतेश्च शब्दत्वमाशङ्क्य प्रत्याख्याय च 'येनोच्चारितेन साम्नालाङ्गुलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः । अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते'[५२] । तथा च

---

५०. अग्निपुराणम् – १/२५, विष्णुपुराणम् – ६/५/७६४ ।

५१. भर्तृहरिकृतवाक्यपदीयम्, ब्रह्मकाण्डम् – १/१३०/१६/१३१ ।

५२. महाभाष्यम्, पस्पशाह्निकम् ।

“ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते ।
अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः॥”[५३] इति ॥

तपरसूत्रभाष्येण उभयोरपि शब्दसम्बन्धितया तयोरेवात्रोपन्यासः । तथा च प्रथममान्तरः शब्द उच्यते । अथवेत्यनेन तु वाह्यो ध्वन्यपरपर्यायः । व्याकरणे व्युत्पत्तिं विना प्राकृतः शब्दार्थबोधः पदार्थबोधो वाक्यार्थबोधश्च न सम्भवेत् । वैयाकरणैः ‘एकतिङ् वाक्यमि’ति वाक्यलक्षणकरणात् तिङन्तपदमपरिहार्यं भवति वाक्ये । ततस्तिङन्तं पदमाश्रित्य क्रियानिष्पादकतया कर्त्रादिकारकाण्यपि वाक्ये नान्तरीयकाणि भवन्ति । ततः पुनः कारकपदानां विशेषणतया प्रतियोगितया वा सम्बन्धबोधकं षष्ठ्यन्तं पदमपि वाक्ये प्रयोक्तव्यं भवति । तदेवं वाक्ये व्यवहृतानां सर्वेषामेव पदानां क्रियान्वयितया मिथः साकाङ्क्षाणां शक्त्या वाक्यवृत्त्या वाक्यार्थाभिधानं भवति । एवम्भूतदृष्ट्या वैयाकरणानां मते क्रियया सह अन्वितानामेव पदार्थानां वाक्यैरभिधानादन्विताभिधानवादः प्रसज्यते । अथवा पदार्थस्य इतरपदार्थैरन्वयज्ञाप्यवाक्यस्फोटस्यैव वाक्यार्थबोधकत्वात् वैयाकरणपतञ्जलिप्रमुखानां मते अन्विताभिधानवादः संगच्छते । मीमांसामते पदार्थानां प्रत्येकं शक्तिलभ्यत्वात् ततस्तेषां मिथोऽन्वयविशिष्टः शाब्दबोधस्तु अभिधातिरिक्तया लक्षणारूपवाक्यवृत्त्यैवोपपन्नतरो भवति । द्वैतवादिवेदान्तमते तु अभिहितान्वयवादः समास्थितः । नैयायिकानाञ्च वाक्यगतपदार्थानां शक्तिवाच्यत्वाङ्गीकारेऽपि एकपदार्थस्य स्वेतरपदार्थेनान्वयस्य न शक्तिवाच्यत्वम्, किन्तु आकाङ्क्षाज्ञाप्यतया अभिहितान्वयवाद एवात्र प्रसरति । व्युत्पत्तिवादप्रारम्भे ‘शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते । स च क्वचिदभेदः। क्वचिच्च तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः’ इति गदाधरभट्टेनाभिहितमेतत्।

पतञ्जलिप्रमुखानां वैयाकरणानां मते अर्थवाचकः शब्दः स च नित्यः स्फोटरूपः । नैयायिकानां मते शब्दो वर्णात्मको ध्वन्यात्मको वा स्यात्, स चोत्पादविनाशशीलः कार्यः अनित्यो वा, किन्तु शब्दस्यानित्यत्वपक्षे तस्य अर्थवाचकत्वमेव न स्यादिति आक्षेपो वैयाकरणानाम् । मीमांसकाः ध्वनिव्यङ्ग्यं वर्णात्मकं नित्यं शब्दमातिष्ठन्ते । वैयाकरणास्तु केचिद् वर्णव्यतिरिक्तं पदस्फोटं शब्दमिच्छन्ति, अन्ये तु पदस्फोटमनङ्गीकृत्य वाक्यस्फोटमेव शब्दमभ्युपगच्छन्ति, पदे वर्णानामिव वाक्ये पदानां कल्पितत्वात् । अतो वर्णानामिव पदानामपि तत्त्वतोऽर्थवत्त्वं नास्ति । वक्तुर्विवक्षितार्थवाचकत्वाद्

---

५३. भर्तृहरिकृतवाक्यपदीयम्, ब्रह्मकाण्डम् – १/१/७० ।

वाक्यस्फोटस्यैवास्त्यर्थवत्त्वम् । अतः तद्दृष्ट्या तस्यैव शब्दत्वमिति वैयाकरणानां मतम् । व्यवहारकाले तु ध्वनेः अपि श्रवणादर्थप्रतीतेस्तस्यापि गौणतया शब्दत्वम्, अनादिप्रवाहपतिततया च नित्यत्वमभीप्सितम् । अतः उक्तोभयविधशब्दयोरेव नित्यत्वमादाय प्रवर्तते भाष्यवार्तिकं 'सिद्धे शब्दार्थसम्बन्धे'[५४] । इति ।

शब्दस्यार्थनिरूपणेऽपि दृश्यते मिथो नैयायिकमीमांसकवैयाकरणानां शाब्दिकानां मतपार्थक्यम् । 'चतुष्टयी शब्दानां प्रवृत्तिरि'ति सुष्टूपदर्शितं पतञ्जलिना महाभाष्ये प्रत्याहाराह्निके[५५] । अतो गवादिशब्दप्रतीतिजन्योऽर्थो न केवलं सास्नादिद्रव्यविशेषः, न वा श्वेतकृष्णादिगुणविशिष्टः, नापि गमनशयनादिक्रियाविशेषः, नापि वा पुनर्गोत्वादिजातिविशेषः, किन्तु गवादिशब्दानां द्रव्यगुणकर्मसामान्यसमुदाय एव शक्तिः स्वीकार्या । अत्र मीमांसकैः केवलजातौ शक्तिरास्थिता । एतन्मते 'नागृहीतविशेषणा बुद्धिविशेष्येषूपजायते' इति न्यायानुसारं विशेष्यज्ञानं प्रति विशेषणज्ञानस्यैव कारणत्वाद् 'अयं घटः' इत्याकारज्ञानस्थले विशेष्यस्य घटस्य ज्ञानात् पूर्वमेवाभिधावृत्त्या तद्विशेषणस्य घटत्वस्य जातेर्भाणं भवतु । ततश्च 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात् अभिधावृत्त्या विरतव्यापारत्वात्तया वृत्त्या विशेष्यस्य ज्ञानं भवितुं नार्हति, किन्तु धर्मधर्मिरूपशक्त्यर्थसम्बन्धमादाय लक्षणयैव धर्मिणो विशेषस्य ज्ञानं भवेत् ।

जातिशक्तिवादिमते 'गौर्जायते', 'गौर्म्रियते' इत्यत्र गोशब्दवाच्यगोत्वेन जननमरणयोरन्वयानुपपत्तेर्वाक्यार्थबाधरूपलक्षणाबीजस्य सम्भवात् लक्षणावृत्त्या गोशब्देन गोव्यक्तेरपि बोधः स्यात् । एतन्मीमांसकमतं वैयाकरणाः न सहन्ते । यतो हि 'अयं घटः अस्ती'त्यत्र घटव्यक्तेः बोधाय लक्षणावृत्तेर्ग्रहणं व्यवहारविरुद्धमेव । घटशब्दोच्चारणमात्रेण सर्वसम्मताभिधावृत्त्यैव घटव्यक्तेर्बोधात् वाक्यार्थबाधरूपलक्षणाबीजस्य असम्भवात् मीमांसकानां लक्षणावृत्त्या घटव्यक्तेर्बोधः अनुपपन्न एव । वैयाकरणास्तु तत्र व्यक्तिरेव हि शब्दप्रतीतिजन्यो मुख्योऽर्थ इति सङ्गिरन्ते जातिश्च तदुपलक्षणतया अभिधावृत्त्यैव वेदनीया । यद्वा जातिं विना व्यक्तेर्बोधस्यासम्भवाद् अविनाभावसम्बन्धवशादभिधावृत्त्यैव जातेरपि बोधोऽस्तु इति सर्वं सुसङ्गतम्।

---

५४. महाभाष्यम्, पस्पशाह्निकम्, कात्यायनवार्तिकः, 'तत्र कैयट आह तत्र नित्यः शब्दो जातिस्फोटलक्षणो व्यक्तिस्फोटलक्षणो वा । कार्यशाब्दिकानामपि मते प्रवाहनित्यता' । द्रष्टव्यम् – वाक्यपदीयम् ।

५५. जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्धा ।

अत्र पाणिन्यादिव्याकरणानां माहात्म्यमिदमेव यत् केवलव्यक्तौ केवलजातौ वा न तेषां पक्षपातः । तेषां मते व्यवहारानुरोधादेव विवक्षया क्वचिज्जातेः क्वचिद्वा व्यक्तेर्बोधो भवतु । अत्र महर्षिपाणिनिना 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामि'ति सूत्रकरणात् 'गौ पूज्यः' गावः पूज्याः इत्यादिषु गोजातेरिव शब्दार्थ इति ज्ञापितः, एवं 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रकरणाद् रामश्च रामश्च रामश्चेति 'सरूपव्यक्तीनामेकशेषे 'रामा' इत्यत्र व्यक्तिरेव शब्दार्थ इति सूचितः । अतः पाणिनिमते जातिः व्यक्तिश्चेति द्वयमेव शब्दार्थ इति लभ्यते । महाभाष्यकृन्मते जातिः, व्यक्तिः, लिङ्गं, संख्या, कारकञ्चेति पञ्चैते नामशब्दार्थाः । कैयटमते जातिः, व्यक्ति; लिङ्गं संख्या चेति चतुष्कं शब्दार्थः । वार्तिककारमते तु जातिः व्यक्तिः लिङ्गं चेति त्रयं प्रातिपदिकार्थः । पाणिनिस्तु द्विपक्षपातीति । प्रवृत्तिनिमित्तं जातिर्वेत्येक एव शब्दार्थ इति व्याडेर्मतम् । व्यक्तिरित्येकः स इति प्राह व्याजप्यायनः । एवं शब्दार्थनिरूपणे वैयाकरणानामपि मतभेदो दृश्यते[५६] । 'यथोत्तरं मुनीनां प्रामाण्यमित्यभ्युपगमात् पाणिनिकात्यायनपतञ्जलिषु पतञ्जलेर्मतमेवाधिकप्रामाण्यादुपादेयम् ।

## आचार्यपाणिनेर्जीवनवृत्तम्

ऐन्द्र–चान्द्र–काशकृत्स्नसारस्वतादिव्याकरणेषु रत्नायमानं साङ्गोपाङ्गसमेतं संस्कृतव्याकरणं पाणिनीयमेव अस्माभिः समुपलभ्यते । संस्कृतवाङ्मयस्य अनुपमरत्नस्वरूपमिदं पाणिनीयव्याकरणमित्यत्र नास्ति मनागपि संशीतिः । आचार्यस्य पाणिनेः पूर्वं विद्यमानव्याकरणशास्त्रे समग्रस्य शब्दराशेः व्युत्पत्तिसामर्थ्यम् अदृष्ट्वा नूतनशब्दसाधुत्वं प्रतिपादयितुं लौकिकवैदिकोभयविधप्रयोगसाधनार्थं महेश्वरप्रसादप्राप्तोजसा[५७] महामुनिः पाणिनिः 'अष्टाध्यायी' इति ग्रन्थं विरचितवान् ।

---

५६. कौण्डभट्टकृतवैयाकरणभूषणसारः –
"एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नानार्था इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥"

५७. नन्दिकेश्वरकृतकाशिका –
"नृत्यावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥"

अस्मिन् ग्रन्थरत्ने विद्यमानैः प्रायः चतुःसहस्रसूत्रैः पदसाधुत्वं वैज्ञानिकपद्धत्या युक्तिपुरःसरः उपस्थाप्यते । सुसङ्गतं सुन्दरं सूक्ष्मतमपदार्थावद्योतनसामर्थ्यं पश्यन्तः प्राच्याः पाश्चात्याश्च विद्वांसो मुक्तकण्ठेन एनं प्रशंसन्ति । प्रख्यात इतिहासविद् वेलभालकारः शब्दसाधुत्वप्रकारतां विज्ञानशैलीं दृष्ट्वा अष्टाध्यायी विश्वकोषागारस्वरूपा इत्येवं प्रशंसितवान् ।

आचार्येण पतञ्जलिनापि पाणिनीयसूत्राणि वेदमन्त्रतुल्यानि आलोचितानि 'छन्दोवत् सूत्राणि भवन्ति' इति । नोयामचमस्किमहोदयोऽपि पाणिनिव्याकरणे आधुनिकभाषाविज्ञानस्य बीजं लक्षितवान् । महेश्वरप्रसादाल्लब्धानि 'अइउण्' इत्यादीनि चतुर्दशसूत्राणि उपजीव्य प्रत्याहारमुद्रया वैज्ञानिकी सूत्ररचनापद्धतिः पाणिनेराचार्यस्य प्रतिभायाः अलौकिकशक्तिं प्रकाशयति । यदि विश्वभाषासु नेत्रे विस्फार्य दृष्टिः दीयेत्, तदा विश्वेऽस्मिन् कस्याञ्चिदपि भाषायामेतादृशं व्याकरणं नोपलभ्यते, यादृशं संस्कृतवाङ्मयस्य गौरवाधायकं पाणिनीयव्याकरणं देववाण्यां विराजते ।

पणनः पणः पणोऽस्यास्तीति पणी, पणिनो गोत्रापत्यं पाणिनः, तस्यापत्यं पाणिनिः इति व्युत्पत्त्या एव आचार्यस्यास्य नाम्नो अन्वर्थता द्रष्टुं शक्यते । त्रिकाण्डकोषे[५८] पुरुषोत्तमदेवेन तु षड्धा नामनिर्देशः कृतः । तथाहि १. पाणिनः, २. पाणिनिः, ३. दाक्षीपुत्रः, ४. शालातुरीयः, ५. शालङ्किः, ६. आहिकः ।

श्लोकात्मिकायां पाणिनीयशिक्षायां याजुष्पाठे 'पाणिनेय'[५९] इत्यपि नाम दृश्यते । यशस्तिलकचम्पूग्रन्थे 'पाणिपुत्र'[६०] इति नाम्नाऽपि निर्देशो लभ्यते । पाणिनस्य अपत्यमिति पूर्वोक्तव्युत्पत्त्या अस्य आचार्यस्य पितुर्नाम 'पाणिन' इत्यासीत् । उक्तञ्च महाभाष्यप्रदीपे – 'पाणिनोऽपत्यमित्यण् पाणिनः पाणिनस्यापत्यं युवेति इञ् पाणिनिः'[६१] इति ।

पदमञ्जरीकारेण हरदत्तेनाकलितं – 'पणोऽस्यास्तीति पणी, तस्यापत्यं पाणिनः, पणिनस्यापत्यं पाणिनो युवा पाणिनिः'[६२] इति ।

---

५८. पाणिनिस्त्वाहिको दाक्षीपुत्रः शालङ्किपाणिनौ । शालतुरीयः . . . ।

५९. दाक्षीपुत्रः पाणिनेयो येनेदं व्याहृतं भुवि पाणिनीयशिक्षायाजुषपाठः, – पृ. – ३८ ।

६०. यशस्तिलकचम्पूः, आश्वासः – २, पृ. – २३६ ।

६१. महभाष्यप्रदीपः १/१/७३, आह्निकम् – ९ ।

६२. काशिका पदमञ्जरी, २ भाग, पृ. १४ ।

सिद्धान्तकौमुद्याः बालमनोरमाटीकाकृतापि उदीरितं – 'पणिनो गोत्रापत्यं पाणिनः, तस्यापत्यं पाणिनिः'[६३] इति ।

'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः' इति महाभाष्यवचनेन[६४] ज्ञायते यदस्य मातुर्नाम 'दाक्षी' इत्यासीत् । संग्रहकारस्य व्याडेर्नाम बहुधा 'दाक्षायण' इत्येवं रूपेण भाष्यकृता प्रोक्तम्[६५]। तदनुसारं दाक्षायणो व्याडिः पाणिनेः मातुलपुत्र इति ज्ञायते ।

परन्तु काशिकायां (अष्टा.–६/२/६९) सूत्रे 'कुमारीदाक्षा' इत्युदाहरणे दाक्षायणस्येव दाक्षिनाम्नाऽपि संकेतः कृतोऽस्ति । अतः संग्रहकारस्य व्याडेराचार्यस्य 'दाक्षायण–दाक्षि' इत्युभयनामाभ्यां संकेतदर्शनेन व्याडिः दाक्षिपुत्रस्य पाणिनेर्मातुल एवासीदिति निर्णेतुं शक्यते । एवञ्च दाक्षेः गोत्रापत्ये युवत्वारोपेण दाक्षायणशब्दस्य निष्पत्तिर्बोध्यव्या । यथा 'द्रोणपर्वतजीवन्तादन्यतरस्यामि'ति सूत्रेण[६६] गोत्रापत्येऽर्थे विकल्पेन 'फक्' प्रत्यये कृते सति द्रौणायनः' इति सिद्ध्यति । फगभावपक्षे 'इञ्' प्रत्यये सति द्रोणिः इति रूपं च सिध्यति । अत्रेदं शङ्क्यते द्रोणाचार्यस्यानन्तरापत्ये अश्वत्थाम्नि द्रोण–शब्दस्य कथं प्रयोगः? अत्रोक्तं सिद्धान्तकौमुद्याम्[६७] – 'अश्वत्थाम्न्यनन्तरे तूपचारात्' इति । तथैवात्रापि दक्षस्य गोत्रापत्ये दाक्षिरित्येव स्यात् । दाक्षायण इति तु गोत्रापत्ये युवत्वारोपेण बोध्यम् । एतेन व्याडेः भगिन्या दाक्ष्या नाम व्याड्या इत्यपि भवितुमर्हति । पिङ्गलाचार्यः छन्दःशास्त्रप्रवक्तृत्वेन पाणिनेः भ्रातृत्वेन च वेदार्थदीपिकायां स्मृतोऽस्ति । पाणिनिनाष्टाध्यायाम्[६८]आचार्यशब्दस्य द्विःप्रयोगः कृतो वर्तते । तत्र पदमञ्जरीकारेण[६९] भणितं यत् सूत्रकारः बहुवचनान्तस्याचार्यशब्दस्य प्रयोगं स्वगुरोः निर्देशाय करोति ।

कथासरित्सागरग्रन्थाध्ययनेन[७०] ज्ञायते यत् पाणिनेः गुरोर्नाम 'वर्षः' आसीत् । वर्षस्यानुज उपवर्ष आसीत् । श्लोकात्मकपाणिनीयशिक्षानुसारेण महेश्वरोऽपि

---

६३. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमाटीका, भागः – १, लाहौर संस्करणम्, पृ. ३९२ ।

६४. महाभाष्यम् – १/१/२०, आह्निकम् – ५ ।

६५. शोभना खलु दाक्षायणस्य संग्रहस्य कृतिः । महाभाष्यम्, २/३/६६ ।

६६. अष्टा. – ४/१/१०३ ।

६७. वैयाकरणसिद्धान्तकौमुदी – ४/१/१०३ ।

६८. आदाचार्यानाम् – अष्टा. – ७/३/४९, दीर्घादाचार्याणाम् – ८/४/३२ ।

६९. आचार्यस्य पाणिनेय आचार्यः, स इहाचार्यः गुरुत्वाद् बहुवचनम् पदमञ्जरी, भा. – २, पृ. ८८१ ।

७०. अथ कालेन वर्षस्य शिष्यवर्गो महानभूत् ।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत् ॥ लम्बक १, तरङ्ग – ४ ।

पाणिनेर्गुरुरासीत् ज्ञायते । महेश्वरप्रसादादेव वर्णसमाम्नायरूपचतुर्दशसूत्राणामुपदेशं प्राप्य तदाश्रित्य स्वीयः 'अष्टाध्यायी' ग्रन्थो निर्मितः[७१]। स्कन्दपुराणाध्ययनेन[७२] ज्ञायते यत् गोपर्वते तपश्चर्यानन्तरं पाणिनिना विशिष्टस्य ज्ञानस्य उपदेशः प्राप्तः । हरिचरितचिन्तामणिग्रन्थानुसारं[७३] वर्षाचार्यस्य शिष्यत्वं प्राप्तोऽपि पाणिनिर्यदा विशिष्टं वैदुष्यं नाप्तवान् तदा स्वीयबुद्धिविवर्धनाय स हिमगिरिं महत्तपः चकार । तदीयतपसा सन्तुष्टो भगवान् महेश्वरः तस्मै व्याकरणशास्त्रमुपदिष्टवान् ।

## आचार्यस्य पाणिनेः शिष्याणां परम्परा

'उपसेदिवान् कौत्सः पाणिनम्'[७४] इति महाभाष्योक्तोदाहरणात् 'अनूषिवान् कौत्सः पाणिनम्' 'उपशुश्रुवान् कौत्सः पाणिनम्'[७५] इति काशिकोदाहरणाच्च ज्ञायते यत् कौत्सः नाम कश्चन विद्वान् आसीत् यः आचार्यपाणिनेः शिष्येषु प्रधानतम आसीत् । उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः । केचित् 'आकडारादेका संज्ञे'ति, केचित् 'प्राक्कडारात् परं कार्यमि'ति अनया भाष्योक्त्या[७६] निर्णीयते यत् पाणिनेर्भगवतो बहवः शिष्या आसन् ।

आचार्यः पाणिनि स्वगृहे एव शिष्यान् अध्यापयति स्म, तेभ्यो भोजनमपि ददाति स्म । ज्ञायते चैतत् 'ओदनपाणिनीयाः'[७७] इत्युदाहरणं प्रदर्शयता भाष्यकृता ।

## पाणिनेर्निवासभूमिः

गणरत्नमहोदधौ[७८] शालातुरीयशब्दस्य व्युत्पत्तिप्रदर्शनेन ज्ञायते यत् पाणिनेराचार्यस्याभिजनः शालातुरो नाम ग्राम आसीत् । आचार्येण स्वयमपि

---

७१. येनाक्षरसमाम्नायमधिपम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
७२. स्कन्दपुराणम्, उत्तरार्धम् – २/६८ ।
७३. जयरथकृतहरिश्चन्द्रचिन्तामणि – १७/७२–७५ ।
७४. महाभाष्यम् – ३/२/१०८ ।
७५. काशिकावृत्तिः – ३/२/१०८ ।
७६. महाभाष्यम् – १/४/१ ।
७७. म. भा.– १/१/७३, आ. – ९ ।
७८. गणरत्नमहोदधिः, पृ. १ ।

'तूदीशालातुरवर्मतीकूचवाराड् ढक्छण्टञ्यकः'[७९] इति सूत्रे शालातुरशब्दं पठित्वा अभिजनेऽर्थे शालातुरीयशब्दस्य साधुता प्रदर्शिता । महाभाष्ये अभिजननिवासयोः भेदः संकेतितोऽस्ति[८०] । तथाहि अभिजनो नाम यत्र पूर्वैरुषितम्, निवासो नाम यत्र सम्प्रत्युष्यत इति । एतल्लक्षणेन ज्ञायते यत् शालातुरनामा ग्रामः पाणिनेः पूर्वजानां निवासस्थानमासीत्। पाणिनेस्तु अन्यदेव किञ्चित् स्थानमासीत् । 'शालातुर' ग्रामोऽधुना 'लाहुर' इति शब्देन प्रसिद्धोऽस्ति, पुरातत्त्वविदां मतम् । 'उदक् च विपाशः' 'वाहीकग्रामेभ्यश्च'[८१] इत्यादिसूत्रेभ्यः तत्रत्यमहाभाष्येभ्यश्च प्रतीयते यत् पाणिनिना विशेषरूपेण वाहीकदेशोऽभ्यस्त आसीत् । अतः वाहीकदेशस्तत्समीपदेशो वा तदीया निवासभूः स्वीकर्तुं शक्यते ।

**पाणिनेः कालः**

आचार्यस्य पाणिनेः कालनिर्धारणे पाश्चात्यैः तदनुयायिभारतीयैश्च समुपस्थापितेषु प्रमाणेषु कतिचन निर्दिश्यन्ते –

१. आर्यमञ्जुश्रीमूलकल्पग्रन्थे[८२] लिखितं यत् महापद्मस्य नन्दस्य सखा पाणिनिः नामैको माणव आसीत् ।

२. कथासरित्सागरे[८३] पाणिनिः महाराजस्य नन्दस्य समकालिकः निर्देशितः ।

३. बौद्धभिक्षूणां कृते प्रयुज्यमानस्य श्रमणधर्मस्य प्रयोगः 'कुमारश्रमणादिभिः' इति सूत्रे कृतोऽस्ति पाणिनिना[८४] ।

४. बुद्धकालिकस्याचार्यस्य कृते 'मस्करी' शब्दस्य निर्देशः कृतोऽस्ति सूत्रकृता पाणिनिना[८५] ।

---

७९. अष्टा. – ४/३/९४ ।

८०. महाभाष्यम् – ४/३/९० ।

८१. अष्टा. – ४/२/७४, ४/२/११७ ।

८२. तस्याप्यन्यतमः सख्यः पाणिनिर्नाम मानवः – आर्यमञ्जुश्रीकुलकल्पः ।

८३. कथासरित्सागरः, लम्बक – १, तरङ्ग – ४ ।

८४. अष्टा. – २/१/७० ।

८५. तत्रैव – ६/१/१३४ ।

५. खण्डिकादिगणे[८६] 'क्षुद्रकमालवात् सेनासंज्ञायाम्' इति गणसूत्रे मालवानां सेनायाः सङ्केतः पाणिनिना कृतः । सा च सेना सिकन्दरेण सह युद्धं विधाय तं विजित्य परावर्तमानानां मालवानामासीत्, इति पाश्चात्यविद्वद्वरस्य श्रीवेवरमहोदयस्यास्ति मतम् ।

६. 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामनुक्'[८७] इति सूत्रे यवनशब्दपाठेन ज्ञापितं श्रीकीथमहोदयेन पाश्चात्येन विदुषा यत् पाणिनेः कालः सिकन्दराक्रमणात् परोऽस्ति इति ।

७. पाटलिपुत्रे सम्पन्नायां शास्त्रार्थपरीक्षायां वर्षोपवर्षपाणिनिपिङ्गलादिभिः पुरस्कारप्राप्त्या यशो लब्धमिति राजशेखरेण[८८] काव्यमीमांसायामुल्लेखः कृतः ।

पण्डितश्रीवाचस्पतिगैरोलामहोदयेनाचार्यस्य पाणिनेः कालविषये बहूनां प्राच्यानां पाश्चात्यानां मतानि संकेलितानि, तदीयैतिहासिके[८९] ग्रन्थे द्रष्टव्यानि । श्रीयुधिष्ठिरमीमांसकमहोदयेन बहुतरप्रमाणैः निर्णीतम्, यत्पाणिनेराचार्यस्य कालो वैक्रमाब्दादेकोनत्रिंशच्छतवर्षपूर्वमासीत्। तदुपस्थापितानि कतिपयानि प्रमाणानि निर्दिश्यन्ते –

१. ब्रह्मवैवर्तपुराणे[९०] पाणिनिः साक्षाद् 'ग्रन्थकार' इत्युक्तम् ।

२. वायुपुराणे[९१] पाणिनगोत्रस्य संकेत उपलभ्यते ।

३. मत्स्यपुराणे[९२] पाणिनिगोत्रस्य निर्देशः प्राप्यते ।

४. बौधायनश्रौतसूत्रे[९३] प्रवराध्याये पाणिनेः साक्षाद् उल्लेखः अस्ति ।

५. शौनकशाखाप्रवक्ता[९४] गृहपतिः शौनकः ऋक्प्रातिशाख्ये व्याडेः निर्देशं करोति ।

६. पाणिनीयगणपाठे[९५] व्याडिर्दाक्षायणश्चेति नामद्वयं समुपलभ्यते ।

---

८६. अष्टा. – ४/२/४५ ।

८७. तत्रैव – ४/१/४९ ।

८८. राजशेखरकृतकाव्यमीमांसा, अध्याय १० ।

८९. संस्कृत साहित्य का इतिहास, पृ. ६३३ ।

९०. ब्रह्मवैवर्तपुराणम् – ४/६७ ।

९१. वायुपुराणम् – ९/९९ ।

९२. मत्स्यपुराणम् – १९७/१० ।

९३. बौधायनश्रौतसूत्रम्, प्रवराध्यायः – ३ ।

९४. शौनकीयऋक्प्रातिशाख्यम् – २/२३–२८, ६/४३ ।

९५. पाणिनीयगणपाठः – ४/१/८०, ४/२/५४ ।

७. 'शौनकादिभ्यश्छन्दसि'[९६] इति सूत्रे पाणिनिना शौनकस्योल्लेखः कृतः ।

एभिः प्रमाणैः पूर्वनिर्दिष्टः काल एवाचार्यस्य काल इति वक्तुं युज्यते । अत्र चेदमपि ज्ञातव्यम् यद् अष्टाध्याय्यां 'वासुदेवार्जुनाभ्यां वुन्'[९७] इति सूत्रनिर्माणेन वासुदेवस्यार्जुनस्य च स्मरणं करोति आचार्यः । 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः'[९८] इत्यनेन ब्रह्मसूत्रं कर्तुर्महर्षिव्यासस्य स्मरणं कृतम् । एतेनाधुनिकपद्धत्याऽनुमीयते यदाचार्यस्य कालो वासुदेवादिकालेन सम एव । किञ्च 'संग्रामे प्रयोजनयोद्धृभ्यः'[९९] इति सूत्रेणाण्प्रत्यये सति भारतशब्दः संग्रामेऽर्थे सिध्यति । तदीयो विग्रहश्च 'भरता भारतवंशीयाः (कौरवपाण्डवाः) योद्धारो संग्रामस्य स भारतः संग्राम इति । अनेनेत्थं ज्ञातुं शक्यते यत् महाभारतसंग्राम आचार्यस्य कालात् पुर्ववर्ती आसीत्' ।

अथ च 'व्यास–वरुण–निषाद्–चाण्डाल–विम्बानां चेति वक्तव्यम्'[१००] इति कात्यायनवार्तिकेन वैयासकिः श्रीशुकदेवः स्मृतो भवति । आचार्यपाणिनिना 'सुधातुरकङ् च'[१०१] इति सूत्रं विदधता वैयासकिः न स्मृतः । नापि अर्जुनस्य पौत्रः परीक्षिन्नामा राजर्षिः स्मृतः । अतो हेतोर्ज्ञायते यत् परीक्षितः कालात् पूर्वमेव आचार्यो बभूव । द्वापरयुगस्य समाप्तौ कलियुगस्यारम्भोऽयं समयः । तस्मिन् समये संस्कृतभाषा व्यवहृयमाण आसीत् । अतश्च उच्यते तत्र तत्र सूत्रे 'प्रथमायाश्च द्विवचने भाषायाम्'[१०२] 'विभाषा भाषायाम्'[१०३] इत्यादौ लोकभाषास्माकम् ।

**पाणिनेराचार्यस्य कृतयः**

व्याकरणोपज्ञात्रा भगवता पाणिनिना न केवलमष्टाध्यायी पातालविजयपरनामकं जाम्बवतीविजयनामकं चेति महाकाव्यं व्यरचि । अतएव हारावल्यां सूक्तिमुक्तावल्यां च लिखितं राजशेखरीयं –

---

९६. अष्टा. – ४/३/१०६ ।
९७. तत्रैव – ४/३/९८ ।
९८. तत्रैव – ४/३/११० ।
९९. तत्रैव – ४/२/५६ ।
१००. कात्यायन वार्तिकम्, अष्टा. – ४/१/९७ ।
१०१. अष्टा. १/४/९७ ।
१०२. तत्रैव – ७/२/८८ ।
१०३. तत्रैव – ६/१/१८ ।

"स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः ।
आदौ व्याकरणं काव्यमनुजाम्बवतीजयम् ॥" इति ॥

सदुक्तिकर्णामृते ।

"असौ गिरेः शीतलकन्दरस्थः पारावतो मन्मथचाटुदक्षः ।
घर्मालसाङ्गीं मधुराणि कूजन् संबीजते पक्षपुटेन कान्ताम्" ॥
उद्बुद्धेभ्यः सुदूरं घनजनिततमः पूरितेषु द्रुमेषु
प्रोद्ग्रीवं पश्य पादद्वयनमितभुवः श्रेणयः फेरवाणाम् ।
उत्कालोकैः स्फुरद्भिर्निजवदनदरीसर्पिभिर्वीक्षितेभ्य –
श्च्योतत्सान्द्रं वसाम्भः कुथितशववपुर्मण्डलेभ्यः पिबन्ति ॥"[१०४]

इत्यादिश्लोकाः पाणिनीयत्वेन उपन्यस्ताः ।

१.अष्टाध्यायी, २.पाणिनीयशिक्षा, ३.जाम्बवतीविजयम्, ४.धातुपाठः, ५.गणपाठः, ६.लिङ्गानुशासनम्, ७.द्विरूपकोशः, ८.अष्टाध्यायाः स्वोपज्ञवृत्तिः चेति पाणिनेः कृतित्वं मन्यते विद्वद्भिः ।

अत्र कृतिषु अष्टाध्याय्याः सर्वा पूर्णता स्वीक्रियते । अस्याः लौकिकवैदिकोभयविधशब्दसिद्धये नियमनिर्देशाः बहुभिः प्रकारैः प्रदर्शिताः सन्ति । भाषातत्त्वविदा सुनीतिकुमारचटर्ज्जीमहोदयेन प्रोक्तमस्ति[१०५] यद् – 'यदा ऋग्वेदस्य भाषा किञ्चित् प्राचीना सर्वसाधारणस्य कृते आंशिकरूपेण दुर्बोधा चानुभूता, तदा भारतीयार्यभाषायाः एकमर्वाचीनतरं रूपं विशिष्टसाहित्यिकरूपेण प्रतिष्ठापयितुं पश्चिमोत्तर–पाञ्जावनिवासिना पाणिनिना नवीनसाहित्यिकभाषाव्याकरणं विरचय्य लोकभाषायाः रूपं प्रदत्तम्' इति ।

पाणिनेरष्टाध्याय्यां प्रायेण चत्वारि सहस्राणि सूत्राणि सन्ति अष्टसु भागेषु विभक्तैषा इति कृत्वा अष्टाध्यायी इत्युच्यते, प्रत्येकं भागे चत्वारः पादाः सन्ति । अत्यन्तसरलया सुबोधया शैल्या सूत्राणां रचना कृतास्ति ।

---

१०४. सदुक्तिकर्णामृतम् – ५/२१, ५/३६३

१०५. वाचस्पतिश्रीगैरालाकृत संस्कृत साहित्य का इतिहास, पृ. ६२९ – ६३२ ।

भाष्यकारो भगवान् पतञ्जलिः पाणिनिविषये ससम्मानं स्वाशयं प्रकाशयति – ‘प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयन्ति स्म । तत्राशक्य वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण’[१०६] इति ।

पुनश्च ब्रवीति ‘सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्’[१०७] इति । शाब्दिकमूर्धन्यस्य तार्किकप्रवरस्य भाष्यकारस्येदृश्य उक्तयः पाणिनेर्महामुनेर्महत्त्वातिशयं ज्ञापयन्ति । काशिकावृत्तौ उदीरितं ‘महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य’[१०८] इति ।

चीनदेशीयः ह्वेनसांगनामा यात्री लिखति यत्[१०९] – ‘‘ऋषिः पूर्णमनसा शब्दभाण्डारतः शब्दान् सञ्चयद् १००० पद्येषु च सम्पूर्णां व्युत्पत्तिं विरचितवान् । प्रत्येकं पद्यं द्वात्रिंशदक्षरात्ममासीत् । अत्र प्राचीनार्वाचीनं समस्तं लिखितं ज्ञानं समाप्तम् । तत्र शब्दाक्षरविषयकं किमपि तथ्यं विस्मृतं भवितुं नाशकत्’ ।

ऋग्वेदभाष्यकारेण श्रीवेङ्कटमाधवेनोक्तमस्ति यत् – ‘शाकल्यः पाणिनिर्यास्क इत्यृगर्थपरास्त्रयः’[११०] इति । वेदार्थविषये स्वरज्ञानं प्रधानं साधनमस्ति । आचार्येण स्वरज्ञानार्थमेव सूत्राणां चतुःशती निर्मिता, वैदिकं प्रकरणं सिद्धान्तकौमुद्यां तत एव विभक्तम् । एतेनाचार्यस्य वेदज्ञता सुस्पष्टं परिलक्ष्यते ।

आधुनिकानां पाश्चात्यविदुषामपि पाणिनीयव्याकरणविषये साधुतमा हार्दानि प्रकाशयन्ते –

१.जर्मनीदेशीयम्यक्समूलरमहोदयेनोच्यते – ‘हिन्दूनां व्याकरणान्वययोग्यता विश्वस्य कस्या अपि जातेर्व्याकरणसाहित्यादधिकं वर्तते’[१११] ।

२.श्रीकोलब्रुकमहोदयेनाकलितं – ‘व्याकरणस्य नियमाः अत्यन्तसतर्कतया निर्मिताः तेषां शैली चातिप्रतिभापूर्णा विद्यते’[११२] ।

---

१०६. महाभाष्यम् – १/१/१ ।
१०७. तत्रैव ।
१०८. काशिकावृत्तिः – ४/२/७४ ।
१०९. ह्वेनसांगकृत वाटर्स का अनुवाद । भा. – १, पृ. – २२१ ।
११०. वेङ्कटमाधवकृत, मन्त्रार्थानुक्रमणी, ऋग्भाष्यम् – ८/१ ।
१११. रामशङ्करमिश्रकृत महान् भारत, पृ. – १४९– १५० ।
११२. तत्रैव, पृ. – १५० ।

३.लण्डनदेशीयेन मोनियरविलियममहोदयेनोच्यते – 'संस्कृतं व्याकरणं तस्य मानवमस्तिष्कप्रतिभाया आश्चर्यतम आदर्शोऽस्ति । यत् केनापि देशेन नाद्यावधि आविष्कृतम्' ।

४. सरहण्टरमहानुभावेन कथितं यत् – 'विश्वव्याकरणेषु पाणिनीयव्याकरणं शेखरीभूतमस्ति । तस्य वर्णशुद्धता, भाषाया धात्वन्वयसिद्धान्तः, प्रयोगविधेयश्चाद्वितीया अपूर्वाश्च सन्ति ।

५.रूशदेशीयः लेनिनग्रादनगरनिवासी शेरवात्सकीथमहोदयो ब्रवीति – 'पाणिनीयव्याकरणं मानवमस्तिष्कस्य सर्वोत्कृष्टकृतिष्वेकमस्ति' इति ।

६.भाषाविज्ञानविदा ब्लुमफील्डमहोदयेनैतद्विषये उच्यते – 'मानवबुद्धिमत्तया महत्तमासु कृतिष्वेकमस्तीदं पाणिनीयं व्याकरणम्' इति ।

७.म्याकडोनलमहोदयः कथयति यत्[११३] – 'पाणिनीयं व्याकरणं स्वनीतिनियमकारणेन इयतीं व्यापिकां ख्यातिमर्जयद् यदाधारेण वक्तुं शक्यते यद् भारतीयव्याकरणे विश्वस्मिन् सर्वप्रथमं शब्दानां वैज्ञानिकं विवेचनं जातम् । प्रकृतिप्रत्यययोर्भेदपरिचयो जातः, शब्दसिद्धिप्रकारनिर्धारणं निश्चितम् । सर्वजनीनसर्वाङ्गीणविशुद्धायाः पद्धतेर्निर्माणमजायत । तस्य तुलना विश्वस्य केनापि व्याकरणेन कर्तुं न शक्यते' ।

पाणिनेरष्टाध्याय्याः अस्तित्वं तावत् पर्यन्तं स्थास्यति, यावत्कालं विश्वस्मिन् संस्कृतभाषायाः अध्ययनाध्यापनप्रवाहः प्रचलिष्यति इति निश्चप्रचं साम्रेडं वक्तुं शक्यते ।

## पाणिनीयसम्प्रदाये वैयाकरणाः

**आचार्यः कात्यायनः** – पाणिनीयव्याकरणस्य वार्तिककारेषु अन्यतम आचार्यः कात्यायनः । कात्यायनस्य देशकालविषये न किमपि स्फुटं विज्ञायते । ऐतिहासिकैरपि एतद्विषये स्फुटं निर्णेतुं न शक्यम् । कात्यायनः वररुचिः इत्यादीनि नामान्यपि बहुतरदेशकालव्यवहितानामनेकव्यक्तीनां सम्भाव्यन्ते । अतः तेषां देशकालनिर्णये महानन्तरायः । कात्यायनो हि शुक्लयजुर्वेदश्रौतसूत्रकार एकः, सोऽतिप्राचीनः सम्भाव्यते । प्रातिशाख्यकर्ताऽपि कश्चित् कात्यायनः, पाणिनेः सूत्रवार्तिककारोऽपि कात्यायनः स्वर्गारोहणकाव्यनिर्माता च कात्यायन उच्यते । तेषु कस्य कस्यैक्यं को वा भिन्न इति

११३. श्रीवाचस्पतिगैरालाकृत संस्कृत साहित्य का इतिहास, पृ. – ६२९–६३१ ।

जटिलोऽयं प्रश्नः । तथैव वररुचिरपि एकः कौटिल्येन स्वीयेऽर्थशास्त्रे राजनीतेराचार्यत्वेन स्मृतः । एकश्च महाराजविक्रमादित्यस्य सभायाः नवेषु रत्नेषु अपि स्मर्यते, वाररुचं काव्यमपि तत्र तत्रोपलिख्यते, अतः तत्राप्यैक्यं भिन्नत्वं वा सुदृढं नैव वक्तुं शक्यते । अत एतावदेव वक्तुं शक्यते यत् कथासरित्सागरे पाणिनिकात्यायनयोः समकालिकत्वं परस्परं विद्वेषः, शास्त्रार्थादिकञ्च यदुपनिबध्यते, तत्तु प्रायेण समकालिकमेव प्रतीयते । उक्तरीत्या पाणिनिकात्ययनयोर्बहुकालव्यवधानमेवानुमीयते । यच्च कथासरित्सागरे कौशाम्बीनिवासित्वं कात्यायनस्योक्तम्, कौशाम्बीं च प्रयागसन्निहितमेवेति, सम्भावयन्त्यैतिहासिकाः, तदेतदप्यनुपपन्नमिव । भाष्यकारो हि 'प्रियतद्धिताः दाक्षिणात्याः', यथा – 'लोके वेदे चेति प्रयोक्तव्ये, लौकिकवैदिकेष्विवि प्रयुञ्जते'[११४] इत्यादिरीत्या दाक्षिणात्यत्वेन वार्तिककार–मुपहसति । तेनानेन दृढेन प्रमाणेन कात्यायनस्य दाक्षिणात्यत्वं स्फुटीभवति । ततश्च प्रयागप्रान्तवासित्वं न तस्य सम्भवति ।

यदि तु कौशाम्बी दक्षिणप्रान्त एव क्वचिद् भवेत्तर्हि सम्भवति कौशाम्बीवासित्वं तस्य । भाष्यकारसमये दक्षिणदेशस्यावधिः क आसीदिति निश्चेतुं दुःशकमेव । दाक्षिणात्यः स आसीदिति भाष्यप्रमाण्येन निश्चितं प्रतीयते ।

एतेषां विद्वम्मूर्धन्यानां कालविषये यीशुख्रिष्टतः पूर्वं चतुर्थशताब्दी तस्य काल इति कैश्चित् पाश्चात्यैरैतिहासिकैः निर्णीतम् । दृढं प्रमाणं तु न तत्र किमप्युपलभ्यते । केचित्तु 'पाण्डोर्ड्यण्' इति वार्तिककरणात् पाण्ड्यराज्यपरिचयस्तस्यासीदिति सम्भावयन्ति । परं सर्वमेतद्दृढानुमानमात्रम् । पाणिनेः परभवाः शब्दाः एव कात्यायनेनोपसंख्याताः इति मूलभूतसिद्धान्त एव सपरिकरमस्माभिः खण्डितः । पाण्ड्यराज्यस्य स्थापनकालोऽपि चाद्यावधि सम्यक् न निश्चितः । तस्मात् तस्य कालस्य सम्यक् निश्चयो नास्ति । अस्मन्मते कौटिलीयेऽर्थशास्त्रे ये राजनीतेराचार्या परिगणिताः तेषूक्तेषु वररुचिरयमेव स्यादिति विशेषेण सम्भाव्यते ।

भाष्यकृतः पतञ्जलेः कात्यायनस्य च काले चतुष्पञ्चशताब्दीव्यवधाने नावश्यं भवितव्यमिति निश्चेतुं शक्यते । सत्यव्रतसामश्रमिमहाशयोऽपि चैतदेव साधयति । तत्रेदमपि प्रमाणं तेनोपन्यस्तम्, यद् वार्तिककृता स्त्रीप्रत्ययसिद्ध्यर्थं सभाशब्दात् क्रियमाणे प्रत्यये

११४. महाभाष्यम्, पस्पशाह्निकम्, 'यथा लौकिकवैदिकेषु', इति पर्यालोचनावसरे

यदनुबन्धाञ्जनमुपसंख्यातम्, तद्भाष्यकृता 'कथं स्त्रीणां सभासु साध्वी स्यात्'[११५] इत्युक्त्वा प्रत्याख्यातम् । तेनेदं शक्यतेऽनुमातं यत् कात्यायनकाले सभासु स्त्रीणां साधुत्वम् । अर्थात् वर्तत्वादिना भागग्रहणं प्रचलितमासीत्, भाष्यकारकाले तु तन्निवृत्तमिति । एवं विधं सामाजिकं नाल्पेन कालेन सम्भवतीत्यनयोश्चतुष्पञ्चशताब्दीव्यवधाने नावश्यं भाव्यमिति ।

## वार्तिकपदस्य साधुत्वविचारः

तत्र वार्तिकपदं त्रेधा व्युत्पद्यते – वार्तपदाद्, वार्तापदाद्, वृत्तिपदाद् । तत्र 'वार्तफल्गुन्यरोगेऽपि' इत्यमरः । वार्ता प्रवृत्तिर्वृत्तान्त इति च । वृत्तिस्तु शास्त्रस्य सूत्रस्य प्रवृत्तिः स्थितिर्वा । तत्र वार्तशब्दात् सूत्रस्य फल्गुत्वं तुच्छत्वं ज्ञाप्यत्वेन वर्ततेऽस्मिन्निति वार्तिकम् । 'अत इनिठनौ'[११६] इति ठन् प्रत्ययः ।

यद्वा वार्ता सूत्रस्य उक्तानुक्तदुरुक्तचिन्तारूपो वृत्तान्तो विचारो वास्ति अस्मिन्निति वार्तिकम् । 'मालादित्वात् ठक् प्रत्ययो मत्वर्थीयः' । यद्वा वार्ता सूत्रस्य प्रवृत्तिर्नान्यथा इति स्थितेः । अथवा वृत्तिः सुत्रस्य आरम्भरूपा प्रवृत्तिः, स्थितरूपा वा सूत्रस्य वृत्तिः, तमधिकृत्य कृतं वार्तिकम् । 'अधिकृत्य कृते'[११७] ग्रन्थे इत्यस्मिन् प्रकरणे यथा प्राप्तः प्रत्ययः । मत्वर्थीयो वा व्युत्पादितस्य अधिकृत्यकृते शक्तिः । अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तमिति अभियुक्तानां व्यवहारात्, तत्रार्थे लक्षणा वा ।

## वार्तिकलक्षणम् –

तत्र 'उक्तानुक्तदुरुक्तचिन्ताकरत्वं वार्तिकत्वमि'ति नागेशभट्टः[११८] भाष्यप्रदीपोद्द्योते आह । तथाहि –

"उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते ।
तं ग्रन्थं वार्तिकं प्राहुर्वार्तिकज्ञाः विचक्षणाः ॥" इति ॥

---

११५. महाभाष्यम् –४/४/१०५ ।
११६. अष्टा. – ५/२/११५ ।
११७. तत्रैव – ४/३/८७ ।
११८. महाभाष्यम् – 'वृद्धिरादैच्' (१/१/१) ।

तत्र उक्तचिन्ता यथा – 'अनुपसर्गात् फुल्लक्षीबकृशोल्लाघाः'[११९] इति सूत्रे कृशपदस्य सिद्धिरुक्ता, तत्रानुपसर्गादित्युक्तम् । तत्र विचारः – कथं परिकृशमिति? तत्रोक्तचिन्तापराणि वाक्यानि 'कृशेः क एव विहित इगुपधात्' स्वरे हि दोषो भवति 'परिकृशे' पदस्य लोपो विहित इति मतम् ।

अनुक्तचिन्ता यथा – 'अनाम्नवतिनगरीणामिति वाच्यम्', 'न पदान्ताट्टोरनाम्' इति सूत्रे[१२०] इदं वार्तिकं पठितम् – 'मद्राच्चेति वक्तव्यम्' । 'मद्रात् परिवापणे', 'वीवधाच्चेति वाच्यम्' इति ।

दुरुक्तचिन्ता यथा – 'हल् ग्रहणमनर्थकमन्यत्रापि दृष्टत्वात्' इति 'घसिभसोर्हलि'[१२१] इति सूत्रे वार्तिकरूपेण पठितम् । 'आदिग्रहणानर्थक्यमाकारग्रहणात्' इति 'मन्त्रेष्वाङ्यादेरात्मनः'[१२२] इति सूत्रस्थं वार्तिकम् ।

'विप्रतिषिद्धन्तु' इति 'न वेति विभाषा' [१२३] इति सूत्रे उक्तं वार्तिकम् । एषु दुरुक्तानां हल् ग्रहणादीनां चिन्ता । कात्यायनो वार्तिकानां प्रणेता । वार्तिकानां संख्याविषये बहवो विप्रतिपत्तयः सन्ति । कात्यायनकृतो 'अष्टाध्यायी वार्तिकपाठः' इति नाम्ना प्रसिद्धः । तत्र द्वे सहस्रे वार्तिकानि विद्यन्ते । द्वितीयन्तु हस्तलिखितमेव वार्तिकग्रन्थनाम्ना प्रसिद्धम् । तत्र वार्तिकानामष्टादशशती षट्सप्तत्यधिका वर्तते । तृतीयस्तु ओरियेन्टालराजकीयपुस्तकालयस्य हस्तलिखितो ग्रन्थ एव । अस्यापि संज्ञा 'अष्टाध्यायी वार्तिकपाठ' इति अस्यापि संख्या सप्तदशशती वर्तते । चतुर्थन्तु 'वार्तिकसंग्रहः', इति नामकम्, तस्यापि संख्या नवाधिका द्वादशशती विद्यते । एकमपरं पुस्तकं तत्त्वविवेचकमुद्रणालये मुम्बै नगरे १९१५ शाके मुद्रितम् । तस्य च संज्ञा 'कात्यायन प्रणीतो वार्तिकपाठः' इति तत्र च वार्तिकानां संख्या द्वात्रिंशदधिका पञ्चसाहस्री ।

एवं संख्याविषये एतदवगम्यते, भाष्यवाक्यान्यपि नूनं वार्तिकत्वेनात्र परिगणितानि इति । सर्वेषु शास्त्रेषु समासां भाषाणां च इयं शैली लक्ष्यते, यत् पूर्वं संग्राहकवाक्यानि संस्थाप्य तेषामग्रे व्याख्यानमिति । अतत्रवोक्तं भाष्यलक्षणम् –

---

११९. अष्टा. – ८/२/५ ।
१२०. तत्रैव. – ८/४/४२ ।
१२१. तत्रैव. – ६/४/१००
१२२. तत्रैव. – ६/४/१४१ ।
१२३. तत्रैव – १/१/४४ ।

"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्राणुसारिभिः ।
स्वपदानि च वर्ण्यते भाष्यं भाष्यविदो विदुः ॥" इति ॥

अत्र 'वर्ण्यते' इत्यस्य व्याख्यायते इत्यर्थः । वार्तिकसादृश्याच्च भाष्यवाक्येषु वार्तिकत्वव्यवहार उपपद्यते । सादृश्यञ्चात्र उक्तानुक्तदुरुक्तचिन्ताकरत्वमेव । तत्र कात्यायनवार्तिकानि स्वार्थपर्यवसितानि, भाष्यवार्तिकानि तु सूत्रार्थे एव पर्यवसितानि इति विशेषः । किञ्च भाष्यवार्तिकानि सूत्रार्थं विचारयितुं व्यवस्थापयितुं च प्रवृत्तानि । कात्यायनवार्तिकानि तु सूत्रच्छिद्राणि प्रदर्शयितुं सूत्राणि दूषयितुञ्च । इदञ्च पाश्चात्यविद्वद्भिरपि गोल्डस्टकरमहोदयेनोक्तम् । ड. वरसेल – कीलहार्नद्वारा सम्पादिते 'कात्यायन एण्ड पतञ्जलि' ग्रन्थे चतुर्थपृष्ठे प्रभृतिभिरुपगतानि ।

वार्तिकानां स्वरूपविषयेऽपि महती विप्रतिपत्तिः दृश्यते । यथा संख्यावैषम्यं सम्पद्यते । एवं वार्तिकानां स्वरूपनिर्णायकेषु हेतुषु प्रमाणेषु च बह्व्यो विप्रतिपत्तयः सन्ति, ताभिरपि संख्यावैषम्यं भवति वार्तिकानाम् ।

**महाभाष्यकर्तुः पतञ्जलेः परिचयः**

महाभाष्यकर्तुः पतञ्जलेर्देशकालादिपरिचयविषये इदमित्थमिति विनिश्चेतुं न केऽपि समर्था इदानीं यावत् । खेदस्यायं विषयो यस्मिन् पातञ्जलमहाभाष्ये सकलमपि वाङ्मयं सुस्पष्टं प्रतिभाति तत्र तस्यैव ग्रन्थकर्तुः परिचयोऽन्विष्यापि नैवोपलभ्यते ।

अयं महामुनिः प्राचीनेषु ग्रन्थेषु विविधैर्नामभिरवगम्यते । यथा गोनर्दीयः, गोणिकपुत्रः नागनाथः, अहिपतिः, फणिभृत्, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारश्चेति । अस्यावतारविषये जनश्रुतिरेषा बहुचर्तितास्ति । यतो हि पाणिनिकात्यायनयोः सूत्रवार्तिककारयोः पारस्परिकविरोधात् तयोः पाणिनिकात्यायनव्याकरणयोः ह्रासप्रायो जातः । भगवता शङ्करेण तद्रक्षणाय निवेदितः शेषः भगवान् सञ्जातः ।

तस्योत्पत्तिरपि विलक्षणमस्ति । तथाहि दक्षिणभारतस्य चिदम्बरं प्रान्ते एका गोणिका नाम्नी महासती प्राज्ञा पुत्रप्राप्तिकामनया भूतभावनं विश्वेशम् आशुतोषं समारराध । एकदा सा तपस्विनी भास्कराय अर्घ्यं समर्पयन्ती तस्याञ्जलौ सर्परूपः शेषो भगवान् समवतरत् ।

दृष्ट्वै सा तमपृच्छत् – को भवान्? शेषः कथयति – 'सप्पोऽहम्', पुनः पृच्छति 'क्व रेफः गव गतः' इति । पुनः शेषो भगवान् वदति – त्वया अपहृत इति श्रुत्वा प्रसन्ना गोणिका जाता । स च भगवान् शेषः शिशुरूपे परिणतोऽभूत् । तदैव शैषावतारस्य भगवतो नाम पतञ्जलिः इति लोके प्रसिद्धत्वमागतम् । सोऽपि स्वल्पेनैव कालेन भगवतः अनुग्रहेण विश्वविभूतत्वमुपजगाम । तदनन्तरं सहस्रसंख्यकान् छात्रान् पाणिनीयव्याकरणं पाठयामास ।

**जन्मकालः**

अथ महामुनिपतञ्जलेः कालनिर्णयविषये युक्तियुक्तं दृढं साधनं प्रस्तूयते । पाणिनिना हि भगवता भूतार्थे लकारत्रयं विहितम्–लुङ्, लङ्, लिट् चेति । तत्र भूतसामान्ये लुङ्, अनद्यतने भूते लङ्, परोक्षानद्यतने लिडिति सूत्रोक्ता व्यवस्था । तत्रानद्यतने लङिति सूत्रे 'परोक्षे च लोकविज्ञाते प्रयुक्तुर्दर्शनविषये'[१२४] इति वार्तिककृतोक्तम् । तत्रोदाहरणप्रत्युदाहरणे आह भाष्यकारः – 'अरुणद्यवनः साकेतम्, अरुद्यवनो माध्यमिकाम् इति' । प्रयोक्तुर्दर्शनविषये इति किम्? जघान कंसं किल वासुदेवः इत्येतद्व्याख्यातवान् कैयटः । अननुभूतत्वात् परोक्षेऽपि प्रत्यक्षयोग्यतामात्राश्रयणेन दर्शनविषये इति विरोधाभावः । उद्द्योतकृन्नागेशश्चात्रैव व्याख्यातवान् 'भाष्ये' जघानेति कंसवधो हि नेदनीन्तनप्रयोक्तुर्दर्शनयोग्योऽपि इत्यर्थः । अरुणदित्युदाहरणे तु तुल्यकालः प्रवक्ते किं बोध्यम् । अत्रेदं तात्पर्यं यत्–या घटना स्वयं न दृष्टा, परं स्वकाल एव जातत्वेन दर्शनयोग्या लोकप्रसिद्धा च, तस्यां बोध्यायां पाणिनिरीत्या अदृष्टत्वेन परोक्षात् लिडेव प्राप्तः, परं तत्र लङ्प्रयोक्तव्य इति वार्तिककृता सर्वसम्मतिः प्रदर्शिता । तत्र च भाष्यकृता पतञ्जलिना 'अरुणद्यवनः साकेतम्' अरुणद्यवनो माध्यमिकाम् इत्युदाहरणद्वयं दत्तम् । तेनेदं स्फुटीभवति यत्–यवनकृतः साकेतावरोधो माध्यमिकावरोधश्च यद्यपि पतञ्जलिना स्वयं न दृष्टः, तथापि पतञ्जलिसमसामयिकत्वाद् दर्शनयोग्यो लोकप्रसिद्धश्चेति तत्र लङ्लकारप्रयोगोदाहरणं तेन प्रदत्तम् । तथायं साकेतावरोधो माध्यमिकावरोधश्च यवनकृतः कदा बभूवेति ऐतिहासिकैः सुस्पष्टमद्य निर्णीतम् । ऐतिहासिकदृष्ट्या यीशुख्रीष्टतः ३२७ वर्षेभ्यः पूर्वम् अलक्षेन्द्रस्य आक्रमणम् । तदनन्तरं चन्द्रगुप्तराज्यकाले सेल्युकासनामा

---

१२४. 'परोक्षे लिट्' ।

यवनो भारतमाचक्राम । चन्द्रगुप्तेन पराजितश्च स्वकन्यां तस्मै दत्वा गत इति सुप्रसिद्धा घटना । तस्यैव सिल्युकसनाम्नो यवनस्योत्तराधिकारी 'मीनाण्डार' नामान्यो यवनः पुष्यमित्रराज्यकाले पुनः भारतमाचक्राम । सः स्वयं यद्यपि मथुरापर्यन्तमायातः, परं तत्सेनानायकैरयोध्यां विजित्य ततोऽपि पूर्वस्यां दिशि बहुदूरपर्यन्तमाक्रमणं कृतम् । अनन्तरं तेऽपि तत्रावस्थातुमशक्ताः परावृत्ताः । सोऽयं साकेतावरोधः । एतत्सहचारिण्येका च सैन्यपङ्क्तिः चित्रकूटप्रान्तेऽपि गता । तत्र च चित्रोडसमीपवर्तिनी माध्यमिकानगर्यपि तयाक्रान्तमिति साधितमैतिहासिकैः । तस्याक्रमणस्य वृत्तं गर्गसंहितायामपि प्राप्यते । तत्र 'मेनन्द्र' इति मीनाण्डारस्य नाम निर्दिष्टम् । संस्कृतीकृत्यैव तन्नाम भारतीयैः परिचितमिति ऐतिहासिकैः मन्यते । अतएव 'मेनन्द्र' नाम्नैव खरोष्ट्री इत्याख्यां लिप्यां तन्मुद्राः मथुराप्रान्ते समुपलब्धाः । ततश्च सुसिद्धमिदं जातं यत् पुष्यमित्रराज्यकाल एव यवनस्य सकेतावरोधकालो माध्यमिकावरोधकालश्च । स एव च महाभाष्यकारस्य पतञ्जलेरपि समयः । महाभाष्ये 'पुष्यमित्रं याजयामहे' इत्याद्युदाहरणमुपलभ्यते । तेन पुष्यमित्रपुरोहितोऽयमिति बहवोऽभिप्रयन्ति । राजसभा, चन्द्रगुप्तसभा इत्युदाहरणदर्शनात् चन्द्रगुप्तपरभवत्वमस्य सिध्यत्येव । पुष्यमित्रसमयश्चाधुनिकानामैतिहासिकानां दृष्ट्या यीशुख्रीष्टतः पूर्वा द्वितीया शताब्दीति । तस्मात् पुष्यमित्रराज्यकाल एव पतञ्जलेः काल इति सुनिर्णीतमेतावन्मात्रम् ।

देशोऽप्यस्य 'गोनर्दः' । स्वयमेव भाष्यकृता । स्वमतमभिनिवेशेन तत्र तत्रोपन्यस्तया 'गोनर्दीयस्त्वाह' इत्युक्तम् । यद्यपि केचिन्महाशयाः परमतमेवेदम्, अन्य एव कश्चिद् 'गोनर्दीय' इत्यपि ब्रुवन्ति, परं प्रामाणिकव्याख्याकृतो गोनर्दीयपदेन स्वमतमेवोपन्यस्तमित्येवाभ्युपगच्छन्ति । अस्माभिरपि तत्र तत्र भाष्यकारशैलीं दृष्ट्वा व्याख्याकृन्मतमेवानुमन्यते, तेन गोनर्दाभिजनो गोनर्दीयो भाष्यकार इति स्फुटीभवति । गोनर्ददेशश्चायं 'गोंडा' इति प्रसिद्धजनपदो बहवो मन्यन्ते । पुष्यमित्रस्य यद्यपि प्रधानभूता राजधानी पाटलीपुत्रमासीत्, तथापि अयोध्यायामपि तेनोपराजस्थानं स्थापितमित्यप्यैतिहासिकाः विवृण्वन्ति । ततश्च 'गोंडा' जनपदवासिनः पतञ्जलेस्सम्भवति अयोध्यायां वसता पुष्यमित्रेण सम्बन्धः । पुष्पमित्रेण अश्वमेधराजसूयाद्यनुष्ठानं कृतमिति प्राप्तेभ्यः अभिलेखेभ्यः हरिवंशादिभ्यश्चापि प्रसिध्यति । एवं विधेषु महत्सु यज्ञेषु

पतञ्जलिसदृशो महाविद्वान् सम्मिलितो बभूवेति क एतन्नानुमन्येत । अन्ये तु गोनर्दस्थानमुज्जयिनीप्रान्ते मध्यदेशे अभ्युपगच्छन्ति । यस्य प्राकृतं नाम गोनद्धमित्यासीत्, व्यापारिणाञ्च तत्केन्द्रस्थानं बभूव । पुष्यमित्रादीनां शुङ्गवंशीयानाञ्च मूलस्थानं विदिशानगरी । येदानीं ग्वालियरराज्ये 'भिलसा' इत्याख्यायतेऽद्य तदेवमभिजनस्थानसामीप्यात् पुरातन एव पतञ्जलिपुष्यमित्रयोः सम्बन्ध इति तेषामभिप्रायः । काशिकादिषु व्याकरणग्रन्थेषु तु प्राग्देशेष्वेव गोनर्दस्य गणना कृतेति 'गोंडा' जनपदमेव गोनर्दपदेन स्वीकर्तव्यमित्यधिकं सम्भावयामः ।

**आचार्यपतञ्जलेः कृतिः**

आचार्येण पतञ्जलिना सूत्रव्याख्यात्मकं बृहन्महाभाष्यं रचयामाम । अष्टाध्याय्यां क्रमेण समेषां सूत्राणां भाष्यं पञ्चाशीत्याह्निकात्मकं निर्माय पाणिनीयव्याकरणस्य संरक्षणं प्रचारं प्रसारञ्च कृतवान् इति ।

अयं भगवान् शेषावतारः सहस्रशीर्षः सहस्राननत्वादेव महाभाष्ये बहुप्रश्नानामुत्तरेण सहैव पुनरन्तरः प्रश्नः, पुनश्चोत्तरं पुनश्चाक्षेपः तस्यापि उत्तरमित्थं विलक्षणां पद्धतिं दृष्ट्वा शक्यतेऽनुमातुमनेकानि मुखानि इति ।

अनेन मुनिना योगशास्त्रे, व्याकरणशास्त्रे, वैद्यकशास्त्रे च ग्रन्थान् निर्माय पाठकानामात्मनश्च महान् उपकारः कृतः । अतएवोक्तम् –

"योगेन चित्तस्य यमेन वाचं
मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत्तं प्रवरं मुनीनां
पतञ्जलिं प्राञ्जलिरानतोऽस्मि" ॥ इति ॥

अन्ये तु उत्तरप्रदेशस्य गोण्डाख्ये मण्डले सरय्वां स्नात्वा तर्पणपरस्य कस्यचिद् ब्राह्मणस्य हस्ते सर्परूपेण पतितः महाभाष्यं रचयामास । समयभेददर्शनेन योगस्य वैद्यकस्य च विरचितारौ अन्यौ पतञ्जली इति वदन्ति ।

## पाणिनीये सूत्रभेदाः

### संज्ञासूत्रम्

संज्ञा–परिभाषा–विधि–नियमातिदेशाधिकारभेदात् षड्विधं सूत्रं दृश्यते । तेषु आद्यं संज्ञासूत्रम् । 'संज्ञा खलु नाममात्रकथनम्' इति संज्ञासूत्रस्य सामान्यलक्षणम्, परन्तु वैयाकरणाः साक्षात् शक्तिग्राहकत्वं संज्ञासूत्रत्वम्' इति विशेषलक्षणमपि कुर्वन्ति । अधोलिखितरूपेणास्य लक्षणस्य समन्वयः कर्तुं शक्यते । यथा 'वृद्धिरादैच्', 'अदेङ्गुणः', इति संज्ञासूत्रे अत्र हि आदैजर्थनिरूपितशक्तिमत्पदग्राह्यत्वं वृद्ध्यादिपदेन ग्राह्यते । यथा अत्रैव सूत्रे भगवता पतञ्जलिनाप्युक्तं भाष्ये 'लोके तावत् मातापितरौ पुत्रस्य जातस्य संवृत्तेऽवकाशे नाम कुर्वाते यज्ञदत्तो देवदत्त इति । तयोरुपचारादन्येऽपि जानन्ति यदस्य संज्ञेति एवमिहापि । इहैव तावत् केचिद्विचक्षणाः आहुः वृद्धिशब्दाः संज्ञाः, आदैच् संज्ञिनः'[१२५] इति ।

संज्ञासूत्रं द्विविधम् – शब्दसंज्ञार्थसंज्ञाभेदात् । वृद्धि–गुण–प्रभृति–संज्ञाः शब्दसंज्ञाः, लोप कर्म–करणप्रभृतिसंज्ञाः अर्थसंज्ञाः । अन्वर्थानन्वर्थभेदाभ्यामपि तद्द्विविधम् – आद्यं सर्वनाम–कारक–अव्यय–प्रभृतिसंज्ञासूत्रम् । टि–घु–भप्रभृतिसंज्ञा अनन्वर्थाः । सर्वनामादिसंज्ञानामन्वर्थत्वं नाम स्वावयवार्थबोधकत्वम् । यथा सर्वेषां नाम सर्वनाम इति व्युत्पत्त्या सर्वनामपदं स्वीयप्रधानसर्वार्थबोधकमिति, तथैव सर्वनामसंज्ञा भवति, न त्वन्यासामिति । टि –घु–भादिषु इयं स्थितिर्नास्ति इति ता अनन्वर्थाः । सर्वे संज्ञाशब्दाः स्वार्थ(संज्ञी)निरूपितशक्तिग्राहकाः यथा वृद्धिशब्दः आदैज्निरूपितशक्तिग्रहजनक इति तस्य संज्ञात्वं सम्मान्यते संज्ञापरिभाषाविषये पक्षद्वयं वर्तते –

क. यथोद्देशं संज्ञापरिभाषम् ।
ख. कार्यकालं संज्ञापरिभाषम् ।

शोधबन्धस्यास्य प्रथमाध्याये परिभाषासूत्रलक्षणविषये यथाशक्ति आलोचनं करिष्ये ।

---

१२५. महाभाष्यम् – १/१/१ ।

## विधिसूत्रम्

विधिसूत्रलक्षणविषये भणितं लघुशब्देन्दुशेखरस्याभिनवचन्द्रिकायाम्[१२६] – 'साक्षात् लक्ष्यसंस्कारकसाधुत्वप्रकारकबोधजनकत्वं विधिसूत्रम्' इति । अथवा अत्यन्ताप्राप्त्यर्थप्रतिपादकत्वे सति साक्षात् साधुत्वविषयकशास्त्रत्वं विधिसूत्रलक्षणम् । यथा 'इको यणचि', 'आद्गुणः'[१२७] इति वा विधिसूत्रम् । तत्र हि 'सुद्ध्युपास्यः' इत्यादिलक्ष्यविषयको योऽपूर्वसंस्कारो यणात्मकस्तद्विषयकबोधजनकत्वं वर्तते एव । एवमेवान्यत्रापि 'अकः सवर्णे दीर्घः'[१२८] इत्यादावपि लक्षणसमन्वयः कर्तुं युज्यते । वैयाकरणैः विधिसूत्राणां भागद्वयं कृतमस्ति – आदेशा आमगाश्चेति। अर्थात् कानिचित् आदेशविधिसूत्राणि कानिचिच्च आगमविधिसूत्राणि ।

आदेशविधिसूत्राणि – यथा – 'जशः शी', 'झोऽन्तः'[१२९] इति

आगमविधिसूत्राणि यथा – 'ह्रस्वनद्यापो नुट्', 'आमि सर्वनाम्नः सुट्'[१३०] इत्यादि ।

अपि च विधिसूत्रम् उत्सर्गापवादभेदाभ्यां द्विविधं द्रष्टव्यम् । सामान्यरूपेण कस्यचन कार्यस्य विधायकं सूत्रमुत्सर्गसूत्रं कथ्यते । यथा 'कर्मण्यण्'[१३१] इति । विशेषरूपेण तत्कार्यस्य विधायकं सूत्रमपवादसूत्रमुच्यते यथा – 'आतोऽनुपसर्गे कः'[१३२] इति सूत्रम् । इदं सूत्रं कर्मवाचकपदे उपपदे सति उपसर्गरहितादन्ताद्धातोः कप्रत्ययः कर्त्रर्थे विदधाति । 'कर्मण्यण्' सूत्रं तु कर्मवाचके उपपदे सति धातोरण् प्रत्ययं कर्तरि विदधाति । तदीयोद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदकधातुवृत्तिधातुत्वम् । 'आतोऽनुपसर्गे' इत्यस्योद्देश्यतावच्छेदको धर्मः कर्मवाचकोपपदकानुसृष्टादन्तधातुत्वम् । एष एव धर्मो व्याप्यः, 'कर्मण्यण्' इत्योद्देश्यतावच्छेदकः कर्मवाचकोपपदकधातुवृत्तिधातुम् । एष च 'आतोऽनुपसर्गे' एतदीयोद्देश्यतावच्छेदकव्यापकः । यतश्च यत्र यत्र कर्मवाचकोपपदकधातु–वृत्तिधातुत्वं वर्तते एव । अत एतेनापवादशास्त्रेण नाप्राप्तस्योत्सर्गशास्त्रस्य बाधो भवति ।

---

१२६. द्रष्टव्यम् लघुशब्देन्दुशेखरः, अभिनवचन्द्रिकाटीका ।
१२७. अष्टा. – ६/१/७७, ६/१/८३ ।
१२८. तत्रैव – ६/१/१०१ ।
१२९. तत्रैव – ७/१/१७, ७/१/३ ।
१३०. तत्रैव – ७/१/५४, ७/१/५२ ।
१३१. तत्रैव – ३/२/१ ।
१३२. तत्रैव – ३/२/३ ।

अतएव च व्याप्यधर्मावच्छिन्नातिरिक्तत्वेन व्यापकधर्मावच्छिन्ने उत्सर्गशास्त्रीयोद्देश्यताव–च्छेदकावच्छिन्ने संकोचो भवति इति राद्धान्तः पर्यवसन्न उत्सर्गापवादयोः शास्त्रयोः ।

पुनश्च नाशनिषेधाभ्यामपि अस्य विधिसूत्रस्य भागद्वयमुपलभ्यते । नाशविधिसूत्रम् – 'लोपः शाकल्यस्य'[१३३]। निषेधविधिसूत्रम् – 'न पदान्ताट्टोरनाम्'[१३४] इति । एतस्मिन् विधिसूत्रलक्षणे गौतमाचार्यैः कृतं लक्षणमप्यन्तर्भवति । यथा तैरुक्तम् – विधिर्विधायक इति ।

## नियमसूत्रम् –

अन्यनिवृत्तिफलकत्वे सति सिद्धान्तप्रतिपादकत्वमिति नियमसूत्रस्य लक्षणं लघुशब्देन्दुशेखरे अभिनवचन्द्रिकाटीकायां टङ्कितम् । सिद्धौ सत्यामारभ्यमाणविधित्वं नियमसूत्रत्वम् । अथवा साक्षादितरव्यावर्तकशास्त्रत्वं नियमसूत्रलक्षणमित्यन्यैः । विधेरुदाहरणम् – 'इको यणचि' इत्यादि, अश्वमेधेन यजेत इत्यादि च । नियमस्योदाहरणम् – 'व्रीहीनवहन्ति' इति उक्तमेव, व्याकरणशास्त्रे 'कर्मणि द्वितीयैव' एवं परं 'कर्मणि द्वितीया' इत्यादिसूत्रम् । 'कृत्तद्धितसमामाश्च' इत्यत्र समासग्रहणम्, 'धातोस्तन्निमित्तस्यैव', 'पतिः समास एव' इत्यादि च । यथा – 'वान्तो यि प्रत्यये' इत्यनेनैव वान्तादेशस्य सिद्धत्वात् तत्र लक्षणसमन्वयः सुतरां जातः । केचन वैयाकरणाः प्रकारान्तरेण नियमसूत्रं व्युत्पादयन्ति । यथा 'सामान्यप्राप्तस्य विशेषावधारणं नियमः' । तद्यथा 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[१३५] इति सूत्रेण समासग्रहणं नियमं करोति । मीमांसाकनिकाये नियम एव परिसंख्यापदेन उच्यते–

"विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" ॥ इति लक्षणात् ।

यथा 'पञ्च पञ्चनखा भक्ष्याः' इत्यत्र रागप्रमादेन पञ्चनखानां तदितरेषाञ्च आत्मपोषणाय भक्षणं प्राप्तम्, तत्र अनया रीत्या नियम्यते यत् 'पञ्चनखा भक्ष्याः चेत्तर्हि पञ्चैव न तु इतरे । एवमेव मीमांसकनिकाये 'व्रीहयोऽवहन्तव्या' इति वाक्यं मिलति यज्ञप्रसङ्गे । तत्र

---

१३३. अष्टा. – ८/३/१९ ।

१३४. तत्रैव – ८/४/४२ ।

१३५. तथैव – १/२/४५ ।

व्रीहीणामवहननमुभयथा प्राप्तम्, अवघातेन नखविदलनेन वा । तत्रापि अनया रीत्या नियम्यते यत् व्रीहीणामवहननमवघातनैव, न तु नखविदलनेनेति ।

## अतिदेशसूत्रम्

साक्षात् सादृश्यग्राहकशास्त्रत्वमतिदेशत्वम् । वतिप्रत्ययघटितत्वमतिदेशसूत्रलक्षणम्। यस्य सूत्रस्य घटकीभूतं पदं वतिप्रत्ययप्रकृतित्वेन गृहीतं भवति । यथा 'स्थानिवदादेशोऽनल्विधौ', 'अन्तादिवच्च'[१३६] इत्येतेषु स्थानिवत्पदघटितत्वमेवास्ते तत्र लक्षणसमन्वयः। क्वचिद्वतिं विनापि यदि वत्यर्थोऽवगम्यते, तदा तत्रप्यातिदेशत्वं मन्तव्यमेव । उक्तञ्च महर्षिपतञ्जलिना 'बहुगणवतुडति संख्या' इति सूत्रे असंख्यां यदयं संख्यामित्याह ततोऽवगम्यते संख्यावदिति । यथा अब्रह्मदत्तं ब्रह्मदत्त इत्याह तदा ब्रह्मदत्तवदिति गम्यते । एवं च 'असंयोगाल्लिट् कित्' 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इत्यादीनि[१३७] 'किद्वत्', 'ङिद्वत्' इत्याद्यर्थकरणात्, आरोपबोधकत्वमस्य स्वरूपम् ।

**अत्रायमाशयः** – अन्यस्य धर्मोऽन्यस्मिन्नतिदिश्यते आरोप्यते अनेनेति कृत्वा आरोपबोधकत्वं तस्योच्यते । यथा स्थानिवृत्तिधर्म आदेशे आरोप्यते 'स्थानिवदादेश' इत्यनेन । तत्फलं भवति 'रामाय' इति प्रयोगे 'ङेर्यः' इत्यनेन यादेशे कृते सति तत्र ङेर्वृत्तिः सुप्त्वधर्म आरोपितोऽनेन, ततश्च 'सुपि च' इति सूत्रेण दीर्घः सिद्धो भवति । अतएव अतस्मिन् तद्धर्मारोपः क्रियते अनेन । एतावतेदमागतम् – यत् विधिसंज्ञादिसूत्राणां क्षेत्रवर्धनं क्रियतेऽतिदेशशास्त्रेण ।

## अधिकारसूत्रम्

स्वोच्चारणस्थानादुत्तरसूत्रेषु 'स्वरितेनाधिकारः'[१३८] इति सूत्रव्यवस्था स्वरितत्व–प्रतिज्ञाबलात् स्वानुवृत्तिबोधनमधिकारसूत्रप्रयोजनमस्ति । अधिकारत्वं नाम स्वदेशे लक्ष्यसंस्कारकवाक्यार्थशून्यत्वे सति निषेधनियमाद्यविषयत्वे सति तत्तद्विधिसूत्रैकवाक्यतया

---

१३६. अष्टा. – ६/१/८५ ।
१३७. तत्रैव – १/२/५, १/२/१ ।
१३८. तत्रैव – २/३/१२ ।

लक्ष्यधर्मिकसाधुत्वप्रकारकबोधजनकत्वम् । अर्थात् 'स्वदेशे लक्ष्यसंस्कारविषयक–वाक्यार्थबोधाजनकत्वे सति उत्तरोत्तरसूत्रेण सहैकवाक्यतया वाक्यार्थबोधजनकत्वमधिकार–सूत्रत्वम् । अथवा केचन वैयाकरणाः प्रकारान्तरेण इत्थं व्युत्पादयन्ति यत् पूर्वसूत्रेणोपात्त–पदादेरुत्तरसूत्रेष्वनुवर्तमानमधिकारः । यथा पद्येनाप्याह –

"कार्याकार्यनिमित्तानां पदानां यदुदीरणम् ।
वक्ष्यमाणार्थसङ्क्षेपादधिकारः स उच्यते" ॥ इति ॥

स्वरूपदृष्ट्या अधिकारसूत्रमनेकविधम् – संज्ञाधिकारः यथा 'प्रत्ययः', विशेषाधिकारो यथा शेषे, स्थान्यधिकारो यथा 'एकः पूर्वपरयोः', प्रकृत्यधिकारो यथा 'ज्ञाप्प्रातिपदिकात्', निमित्ताधिकारो यथा 'आर्धधातुके', आदेशाधिकारः 'अपदान्तस्य मूर्धन्यः' इत्येवं रीत्या ।

भाष्यकारेण 'षष्ठी स्थानेयोगा' इति सूत्रे अधिकारस्यापरे त्रयो भेदा; कथिताः प्रदीपवत्, रज्ज्वा बद्धकाष्ठवत्, अधिक्रियमाणानुच्चरितशब्दप्रतियोगोपस्थितिरूपकश्च । तथा च भाष्यम् 'अधिकारो नाम त्रिप्रकारः, कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति अपरोऽधिकारो यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते चकारेण । अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते'[१३९] इति ।

क) कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा प्रदीपः एकत्र स्थिते सर्वदिक्षु आलोकं विस्तारयति । इत्यस्योदाहरणम् – 'षष्ठी स्थानेयोगा'[१४०] ।

ख) यथा रज्ज्वायसा वा बद्धं काष्ठमनुकृष्यते तद्वच्चकारेणेति द्वितीयम् । यथा लः कर्मणि च भावे चाकर्मकेभ्यः'[१४१] इत्यत्र 'कर्तरि कृत्' इत्यतः 'कर्तरि' इति पदं चकारेणानुकृष्यते[१४२] एवमेव 'अभिनिविशश्च' इत्यत्र सूत्रस्थस्य चकारेण 'आधारोऽधिकरणम्' इत्यत आधारपदमनुकृष्यते ।

ग) प्रतियोगं तस्यानिर्देशार्थो योगे योगे उपतिष्ठते इति तृतीयम् । यथा 'पूर्वत्रासिद्धम्' । विशेषदृष्ट्या अस्याधिकारस्य त्रयो विभागाः पुनरपि कर्तुं शक्यन्ते । उक्तञ्च शिष्टैः –

---

१३९. महाभाष्यम्, स्वरितेनाधिकारः ।
१४०. अष्टा. – १/१/४९ ।
१४१. तत्रैव – ३/४/३९ ।
१४२. लः कर्मणि कर्तरि कृत् भावे चाकर्मकेभ्यः ।

"सिंहावलोकितञ्चैव मण्डूकप्लुतिमेव वा ।

गङ्गाप्रवाहवच्चापि ह्यधिकारस्त्रिधा मतः ॥ इति ॥

क) सिंहावलोकितम् । यथा 'आदिरन्त्येन सहेता'[१४३] इति सूत्रं 'हलन्त्यम्' इति सूत्रं च सिंहवदवलोकयति तथैव कार्यं करोति सम्पादयति च ।

ख) मण्डूकप्लुतिः – यथा मण्डूका एकस्मात् स्थानादुत्प्लुत्योत्प्लुत्य गच्छन्ति अपरं स्थानं प्राप्नुवन्ति, तद्वत् । 'इको यणचि' इति सूत्रस्थम् अच्पदं मण्डूकप्लुत्या 'अवङ् स्फोटायनस्य' इत्यत्रानुवर्तते । एवमेव 'तावदित्थं ग्रहणमिति लुग्वा' इति सूत्रस्थं 'वा' इति पदं 'श्रोत्रियश्छन्दोऽधीते' इत्यत्र मण्डूकप्लुत्या आगच्छति ।

ग) गङ्गाप्रवाहो यथाऽविच्छिन्नरूपेण प्रवहति तद्वद् यत् सूत्रमनुकरोति तत् गङ्गाप्रवाहाधिकार इति नाम्ना व्यपदिश्यते । यथा – 'अव्ययीभावः' इत्यधिकारः 'अन्यपदार्थे च संज्ञायाम्' इति सूत्रपर्यन्तं गङ्गाप्रवाहवदविच्छिन्नरूपेण प्रचलतीति ।

इत्थमखिलेऽपि 'पाणिनीयाष्टाध्यायीग्रन्थे चतुष्पञ्चाशद् अधिकारसूत्राणि सन्ति । यद्यपि सर्वाणि अधिकारसूत्राणि अधिकारमेव बोधयन्ति, किन्तु 'शेषे' इति सूत्रमधिकारसूत्रेण सह विधिसूत्रमपि बोधयति ।

अधिकारसूत्राणां कस्य कस्मात् प्राक् किमभिव्याप्य वा अधिकार इति सर्वं भाष्यात् लक्ष्यसिद्ध्यर्थकसूत्रार्थाद् वा ज्ञायते । एतानि अधिकारसूत्राणि पाणिनीयाष्टाध्यायीग्रन्थे सर्वेष्वध्यायेषु सन्ति । संज्ञाधिकारविषयाणि सूत्राणि च प्रथमाध्याये सन्ति । द्वितीये च संज्ञाधिकारविषयकाणि विशेषणनिमित्ताधिकारविषयकाणि चाधिकारसूत्राणि, तृतीये संज्ञा–विशेषणनिमित्तप्रकृतिस्थान्यधिकारविषयकाणि अधिकारसूत्राणि, चतुर्थे प्रवृत्तिनिमित्तादेश–विशेषणाधिकारविषयकाणि अधिकारसूत्राणि, पञ्चमे च संज्ञाप्रकृत्यादेशविशेषणविषयकाणि अधिकारसूत्राणि, षष्ठे च स्थानिनिमित्तादेशाधिकारविषयकाणि, सप्तमे च स्थान्यधिकार–विषयकाणि तथाष्टमे स्थानादेशविशेषणविषयकाणि चाधिकारसूत्रणि  लभ्यन्ते ।

---

१४३. अष्टा. – १/१/७१ ।

# प्रथमोऽध्यायः

## परिभाषालक्षणनिरूपणम्

संज्ञापरिभाषाविधिनियमातिदेशाधिकारभेदात् सूत्रं[१४४] षड्विधं भवति । अस्मिन् शोधबन्धस्य प्रथमाध्याये परिभाषासूत्रलक्षणमालोच्यते । भगवता पाणिनिनापि परिभाषानामापि नोच्चारितम्, तस्य लक्षणमपि कुत्रापि न प्रदत्तम् । एवं चेदं सत्यमस्ति यत्परिभाषानिरूपणे शाब्दिकैः किञ्चित् काटिन्यमनुभूयते । तथापि परवर्तिनः आचार्याः परिभाषापदार्थनिरूपणे लेखनीं व्यापारयामासुः । इमां परिभाषामाश्रित्य व्याकरणनिकाये वहूनि शास्त्राणि रचितानि परिभाषेन्दुशेखरात् पूर्वं प्रायः पञ्चदशवृत्तिग्रन्थाः रचिताः, तत्परं परिभाषाभास्कर इति वृत्तिः रचिता ।

परिभाषालक्षणविषये कैश्चिद्वैयाकरणैरुच्यते "अनियमनिवारको न्यायविशेष" इति परिभाषा । प्रसिद्धिरप्यस्ति 'अनियमे नियमकारिणी परिभाषा'[१४५] इति । यद्यपि नियमसूत्राणां "धातोस्तन्निमित्तस्यैव"[१४६] इत्यादीनां नियमकारित्वमप्यस्ति, तथापि 'सिद्धे सति प्रमाणान्तरेण विधेयेऽवगते सति पुनरारभ्यमाणो विधिर्नियमाय कल्पते' इति कृत्वास्ति विशेषः । अत्र तु प्रमाणान्तरेण सिद्धिर्नास्ति अपि तु अनियमप्रसक्तिरस्ति । एवञ्च लिङ्गवत्त्वे सति नियामकत्वमिति परिभाषात्वमुच्यते । नियामकत्वमित्यस्य अनियमे नियमकारिणीत्वमित्यर्थः । अनियमत्वं नाम न्यूनाधिकवृत्तित्वम् । अत्र परिभाषा न्यूनाधिकलक्ष्यदेशे गन्तुं प्रवृत्तं विधिसूत्रं नियम्य यथादेशे यथालक्ष्यं वा प्रवर्तयति । अतएव एवमनियमे नियमकारिणीत्युच्यते । परिभाषेन्दुशेखरवृत्तौ दुर्गाचार्येणोकम् – 'इयञ्च लिङ्गं दृष्ट्वा प्रवर्तते अतो लिङ्गवती'त्युच्यते । यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्य'[१४७], 'असिद्धं बहिरङ्गमन्तरङ्गे'[१४८] इत्यादिः । अचीति सप्तमीनिर्देशं लिङ्गं दृष्ट्वा तस्मिन्निति

---

१. संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥

२. तुलनीयम् – जयादित्यवामनकृतकाशिकावृत्तिः, इको गुणवृद्धी (१/१/३) परिभाषेयं स्थानिनियमार्था । अतिप्रसङ्गे नियमो विधीयते ।

३. अष्टाध्यायी – ६/१/८० ।

४. तत्रैव – १/१/६६ ।

५. नागेशभट्टकृतपरिभाषेन्दुशेखरः, परिभाषा – ५१ ।

प्रवर्तते, प्रवृत्त्य च 'इको यणचि' इत्यौपश्लेषिकाधारसप्तमीत्वादजुपश्लिष्टस्येको यणित्यर्थे सुधी + उपास्य इत्यत्र ईकाररूपेणाचोपश्लिष्टस्य उपास्यघटकोकारस्येको यणं प्राप्तं वारयति सुघटकोकारस्य इकोपश्लिष्टस्य च यणन्तं निवारयति, सुघटकोकारस्य इकोपश्लिष्टस्य च यणन्तं निवारयति, अजव्यवहितपूर्वस्येत्यस्योपस्थापनेन अजव्यवहितपूर्वत्वविशिष्टस्येको यण् स्यादित्यर्थं यस्य सम्पाद्यः । उपश्लेषो नाम सामीप्यादिसम्बन्धकृतः कश्चन धर्मविशिष्टो व्यवहिताव्यवहितसाधारणः पूर्वापरसाधारणश्च । अतो यण्विधौ अनियम आसीत् । सोऽनया निरस्य नियमत्वं सम्पादितमिति परिभाषालक्षणसमन्वयः । एवं पचावेदमित्यत्र गुणे कृते 'एत ऐ'[१४९] इति सूत्रमतिप्रसक्तम्, परन्तु अन्तरङ्गपरिभाषयान्तरङ्गरूपं लिङ्गं दृष्ट्वा बहिरङ्गगुणमसिद्धं विधाय 'एत ऐ' इत्येतन्नियम्यते । इत्थं विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वाप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारभिन्नत्वं परिभाषात्वमिति फलितम् । 'वृद्धिरादैच्'[१५०] इत्यादिसंज्ञासूत्रे अतिव्याप्तिवारणाय 'शक्त्यविषयका' इति बोधविशेषणम् । अपवादशास्त्रे अति व्याप्तिवारणायाधिकारभिन्नत्वमिति निवेशः । परिभाषाशास्त्रं किमपि विधिसूत्रं समुचितशब्दसंनिवेशसंकोचादिना तथा प्रवर्तयति यथा शिष्टप्रयुक्तः शब्दः सिध्यति अतिप्रसक्तञ्च तन्निवर्तयति । इत्थं विधिसूत्रादिप्रवृत्तिनिवृत्तिरेव परिभाषाशास्त्रव्यापारः । परिभाषाशब्दस्य व्युत्पत्तिलब्धोऽर्थ उक्तः –

"परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।
परितो भाष्यते या सा परिभाषा प्रकीर्तिता ॥"[१५१] इति ।

अपि च –

"परितः प्रमिताक्षराऽपि सर्वं विषयं प्राप्तवती गता प्रतिष्ठाम् ।
न खलु प्रतिहन्यते कदाचित्, परिभाषेव गरीयसी यथाज्ञा ॥" इति ।

परिभाषणमित्यत्र यौ पर्युपसर्गभाष्धातू तावेव 'परिभाषा' इत्यत्र । केवलं प्रत्ययभेदः । प्रथमे ल्युट्प्रत्ययः द्वितीये च घञ्प्रत्ययः । किन्तु उभौ प्रत्ययावपि समानार्थकौ । 'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणमित्यमरकोशात्

---

६. अष्टा. – ३/४/९३ ।
७. तत्रैव – १/१/१ ।
८. द्रष्टव्यम् – शब्देन्दुशेखरस्य अभिनवगुप्तकृतटीका, गुरुपदहालदारकृत व्याकरणदर्शनेर इतिहास ।

सनिन्दोपालम्भार्थकः परिभाषणशब्दार्थः परिभाषापदार्थकुक्षिप्रविष्टः । अनियमत्वं विधिशास्त्रस्य निन्दा, इको यणचीत्यादिविधिः अचि परे इको यणं विदधाति संहितायाः विषये, परन्तु सुधी + उपास्य इत्यादौ अच्परत्वं यथा धीघटकेकारस्योपास्यघटकोकारपरत्वात् वर्तते तथा सुघटकोकारस्यापि धीघटकेकाराच्परत्वमस्ति उपास्यघटकस्य उकाररूपस्येकोऽपि पाघटकाकाररूपाच्परत्वं दृश्यते, अतः कस्येकः कमचं परमाश्रित्य स विधिर्वशको यणं करोतु इति नास्ति निश्चयः । अनिश्चयत्वात् स विधिः निन्दनीयः । तस्मिन्निति इत्यादिपरिभाषा चाव्यवहितपूर्वत्वं तत्रोपस्थाप्य अजव्यवहितपूर्वत्वविशिष्टस्यैवेको यणं भवतीति निश्चयं जनयति अनिश्चये निश्चयजननञ्च प्रकारान्तरेण सनिन्दोपालम्भः । अत्रानिश्चयांशः निन्दा निश्चयांशश्चोपालम्भः ।

परिभाषाविषये भावशर्मणोदीरितं – "भाष्यन्ते परितो यस्मात् परिभाषास्ततः स्मृताः"[१५२] इति। पद्मनाभदत्तेनालोचितं 'सा च पदार्थविवेचकाचार्याणां युक्तियुक्ता वाक्'[१५३] इति । हरदत्तेन पदमञ्जर्यां भाष्यकारपतञ्जलिमतमेवोपन्यस्तम् – 'परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नानन्तरे च भाष्यते कार्यमनया सा परिभाषा'[१५४] इति । परिभाषाविषये अभिनवचन्द्रिकायामभिहितं "स्वदेशे लक्ष्यसंस्कारकबोधजनकत्वे सति विधिसूत्रैकवाक्यतया बोधजनकत्वम्" [१५५] इति । अधिकारसूत्रे अतिव्याप्तिवारणाय सत्यन्तदलम् । यदि तु पुनरपि 'अङ्गस्य', 'भस्य', 'विभाषा' इत्यादिषु सूत्रेषु अतिप्रसङ्गवारणाय अधिकारसूत्रलक्षणे 'स्वदेशे वाक्यार्थशून्यत्वे सति' इत्यंशमधिकारसूत्रलक्षणे निवेश्य परिभाषालक्षणे सत्यन्तदलं नोपादेयमित्युच्यते, तन्न युक्तियुक्तम्, 'शेषे' इत्यत्राव्याप्तिप्रसङ्गात् ।

यदि तु 'शेषे' इत्यस्यावृत्त्या एकस्य विधित्वमपरस्य अधिकारत्वमित्युच्यते, तदिदमपि सुवचमिति[१५६] वक्तुं शक्यते, किन्तु तावतापि यदि 'पूर्वत्रासिद्धम्'[१५७], 'प्राग्दीव्यतोऽण्'[१५८] इत्यादौ वाक्यार्थबोधशून्यत्वाभावेनाव्याप्तिप्रसङ्ग उच्यते, तद्वावणाय यदि

---

९. परिभाषेन्दुशेखरः, भावशर्मकृतवृत्तिः ।

१०. अष्टा. – १/३/११, अन्यनिर्देशस्तु निवर्तकस्तस्मात् परिभाषा ।

११. हरदत्तकृतपदमञ्जरी – समर्थः पदविधिः (२/१/१) ।

१२. शब्देन्दुशेखरस्य अभिनवगुप्तकृतटीका, संज्ञाप्रकरणम् ।

१३. इयञ्च विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वप्रकारकशक्त्यविषयकबोधजनकत्वे सति अधिकारभिन्नत्वमिति ।

१४. अष्टा. – ८/२/१ ।

१५. तत्रैव – ४/१/८३ ।

साक्षाल्लक्ष्यसंस्कारकवाक्यार्थशून्यत्वे सतीत्येवं परिष्क्रियते, तदा पुनरपि परिभाषासूत्रेण साङ्कर्यमागतमेव, तद्वारणाय प्रतिज्ञाविषयस्वरितधर्मविशिष्टत्वमिति पर्यवसितमधिकारसूत्र–लक्षणं वक्तव्यम् ।

ननु एवमपि 'इको यणचि[१५९]' इत्यादौ अच्पदे स्वरितत्वप्रतिज्ञावशादतिव्याप्तिरिति चेदत्रोच्यते – 'प्रतिज्ञातस्वरितधर्मविशिष्टत्वे सति सूत्रत्वम्' इति लक्षणेनाचीत्यस्य सूत्रत्वाभावेन दोषाभावः । न च 'समर्थानां प्रथमाद्वा' 'अलुगुत्तरपदे'[१६०] इत्यादौ प्रत्येकं पदे एव स्वरितत्वं प्रतिज्ञातं न तु सूत्रे, अतएवोक्तं मूले कौमुद्याम्[१६१] – 'इदं पदत्रयमधिक्रियते इत्यादि, इति वाच्यम्, "प्रतिज्ञातस्वरितधर्मविशिष्टत्वे सति सूत्रत्वम्" इति परिष्कारेण सर्वदोषनिरासात् वैशिष्ट्यञ्च–स्वोद्देशत्वस्वविशिष्टपदविशिष्टत्वेत्येतदन्यतरसम्बन्धेन । पुनर्वैशिष्ट्यम् – स्वोद्देशपदघटितत्वस्वानुद्देश्यपदाघटितत्वे तदुभयसम्बन्धेन। 'पूर्वत्रासिद्धम्', प्राग्दीव्यतोऽण्' इत्यादौ सूत्रमुद्दिश्य स्वरितत्वं विहितमिति तत्राद्यसम्बन्धः । इको यणचीत्यादौ अतिव्याप्तिर्न शङ्कनीया, स्वानुद्देश्ययणादिपदघटितत्वात् । यत्र क्वचन 'अनुस्वारस्य ययि परसवर्णः' इत्यादौ पकारे सकारे पदैकदेशे स्वरितत्वप्रतिज्ञा कृतास्ति, तत्रैकदेशेन समग्रं पदं लक्ष्यते, सामर्थ्यात् । स्वरितत्वप्रतिज्ञाविचारः 'स्वरितेनाधिकारः[१६२]' इति सूत्रव्याख्याने शब्देन्दुशेखरे महाभाष्यादौ च कृतोऽस्ति । यस्मिन् सूत्रे पदे वा स्वरितत्वं प्रतिज्ञातम्, तस्यैवोत्तरमनुवृत्तिर्भवति, पुनश्च भाष्यव्याख्यानान्निवृत्तिरपि बोध्यते । क्वचन स्वरितत्वप्रतिज्ञाबलेन कस्यचन पदार्थस्यापकर्षोऽपि भवति । अतश्चोत्तरोत्तरगमनमधिकारत्वव्यापकं नास्ति ।

अस्तु एतावता विवरणेनेदमायातं यत् परिभाषासूत्रस्य लक्षणम् – 'विधिसूत्रैकवाक्यतया शाब्दबोधजनकत्वम्' इति । सा चेयमेकवाक्यता त्रिविधा भवति – वाक्यैकवाक्यता, पदैकवाक्यता, पदार्थैकवाक्यता चेति । तत्र उपजीव्योपजीवकभावापन्न–बोधप्रयोजकत्वरूपा आद्या । यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषासूत्रस्य वाक्यार्थबोध उपजीव्यः इको यणचीत्यस्य विधिसूत्रस्य वाक्यार्थबोध उपजीवक इति कृत्वा द्वयोर्वाक्ययोरेकवाक्यार्थबोध उपजीवक इति कृत्वा द्वयोर्वाक्ययोरेकवाक्यतायामुपजीव्योप–

---

१६. अष्टा. – ६/१/७७ ।

१७. तत्रैव – ४/१/८२, ६/३/१ ।

१८. भट्टोजिदीक्षितविरोचितवैयाकरणसिद्धान्तकौमुदी ।

१९. अष्टा. – १/३/११ ।

जीवकभावापन्नो बोधः समायात इति सादृश्यबोधप्रयोजिका इयमेकवाक्यता वाक्यैकवाक्यता अस्ति । यतो हि 'इको यणची'त्यस्य पूर्वं सामान्यतो बोधो भवति – अच्समीपवर्तिन इकः स्थाने यण् भवतु, अनेन बोधनेनेदं सूत्रं 'सुधी + उपास्य' इत्यत्रोकारेऽपि प्रसक्तम् । अतएव तस्मिन्निितिपरिभाषासूत्रं सहायकं मत्वा ततोऽव्यवहितं पूर्वांशं लब्ध्वा 'अजव्यवहितपूर्वस्येकः स्थाने यण् भवतु" इति वाक्यार्थं बोधयित्वानिष्टप्रसङ्गान्निवर्तते । अत्र ज्ञापकसिद्धादीनां परिभाषाणां सोदाहरणलक्षण–मत्रोपस्थाप्यते ।

एवमेव 'प्रयाजैश्चरन्ति' इत्याद्यङ्गवाक्यानां 'दर्शपूर्णमासाभ्यां यजते इत्याद्यङ्गिवाक्यानाञ्च परस्परं वाक्यैकवाक्यता द्रष्टव्या । "परस्परनिरूप्यनिरूपकभावापन्न–विषयता प्रयोजकपदघटितत्वम्, पदैकवाक्यत्वम्"[१६३] इति । यथा 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यस्य 'इको यणचि' इति विधिशास्त्रेण सह । तथाहि तस्मिन्नित्यतो 'निर्दिष्टे पूर्वस्य' इति पदद्वयम् 'इको यणचि' इत्यत्रोपतिष्ठते । 'निर्दिष्टे अचि पूर्वस्येको यण् स्यात" इति च सूत्रार्थः सम्पद्यते । तत्र निर्दिष्टे इति प्रकारताप्रयोजकं पदम्, 'अचि' इति च तन्निरूपितविशेष्यताप्रयोजकं पदम् । अतश्च निरूप्यनिरूपकभावापन्नविषयताप्रयोजकमिदं पदद्वयम्, 'निर्दिष्टे' इति, 'अचि' इति च, तद्घटितत्वम् 'इको, यणचि' इति, सूत्रीयवाक्यस्येति समन्वयो बोध्यः । पदार्थैकवाक्यत्वञ्च – 'परस्परनिरूपकभावापन्न–विषयताश्रयत्वम्' इति । तच्चापि पूर्वोक्तयोः सूत्रयोरस्त्येव, निर्दिष्टे, अचि इत्यनयोर्यौ अर्थौ तयोः परस्परं तादृशविषयताश्रयत्वमस्त्येव[१६४] । अर्थात् 'साक्षात् विधिशास्त्रतात्पर्य–ग्राहकशास्त्रत्वं परिभाषासूत्रत्वम्'[१६५] इति वक्तुं शक्यते । परिभाषायाः गुरुत्वमवबोधयता केनाप्युच्यते –

"दीपो यथा प्रभाद्वारा सर्वगेहप्रकाशकः ।
परिभाषा तथा बुद्ध्या सर्वशास्त्रोपकारिका ॥"[१६६] इति ॥

शास्त्रेषु बहुत्राव्यक्तवाक्यानि परिभाषया स्फुटीभवन्ति । कस्मिंश्चिद्वैद्यशास्त्रे आभाषितम् –

"अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः ।

---

२०. लघुशब्देन्दुशेखरः, अभिनवगुप्तटीका, परिभाषाप्रकरणम् ।
२१. तत्रैव ।
२२. गुरुपदकृतव्याकरणदर्शनेर इतिहास, पृ. – ३६४ ।
२३. तत्रैव, पृ. – ३६५ ।

परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः ॥"[१६७] इति ॥

महाभाष्यकारेण पतञ्जलिना सोदाहरणमुदीरितम्[१६८] – "यथा लोके कश्चित् कश्चित् पृच्छति ग्रामान्तरं गमिष्यामि पन्थानं मे भवानुपदिशत्वमिति, स तस्मा आचष्टे अमुस्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः, अमुस्मिन्नवकाशे हस्तवाम इति । यस्तत्र तिर्य्यक्पथो भवति न तस्मिन् सन्देह इति कृत्वा नासावुपदिश्यते" इति । अतः स्थलानुसारं परिभाषा प्रयुज्यते । तस्मात् जैनाचार्याः तदीये न्यायसंग्रहे आकलन्ति – "न्यायाः स्थविरयष्टिप्रायाः"[१६९] इति । अत्र 'न्याय' शब्देन परिभाषा बोध्यते । अन्यत्रानुरूपमुदीरितं "न्यायो हि स्थविरयष्टिवत् क्वचिदाद्रियते क्वचिन्नाद्रियते" इति न केवलं वैयाकरणसम्प्रदायेऽपि तु प्रातिशाख्यग्रन्थेषु परिभाषाः दृश्यन्ते । तद्यथा वाजसनेयिसंहितायाः प्रातिशाख्ये 'सन्निकृष्टविप्रकृष्टयोः सन्निकृष्टस्य'[१७०], 'पूर्वोत्तरयोरुत्तरस्य'[१७१], 'विप्रतिषेध उत्तरं बलवदलोपे' [१७२] इत्यादि ।

परिभाषायाः लक्षणमप्यन्यत्रोपलभ्यते । तद्यथा –

१. आधुजिकसंकेतः परिभाषा इति वैशेषिके, न्यायकोशे गादाधर्य्याञ्च ।

२.लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितबोधोपयोगिबोधजनकत्वं परिभाषात्वमिति शाब्दिकाः ।

महामहोपाध्यायेन नागेशभट्टेन तदीये परिभाषेन्दुशेखरे परिभाषापर्यालोचनावसरे उक्तम् – "प्राचीनवैयाकरणतन्त्रे वाचनिकानि च तत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबन्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते"[१७३] इति अत्र प्राचीनोक्तानां तासामेव परिभाषाणां व्याख्यानं प्रतिज्ञायते, याः भाष्यवार्तिकयोरुपनिबद्धाः । परन्तु 'अकृतव्यूहाः पाणिनीयाः', 'संज्ञाः पूर्वको विधिरनित्यः' इत्यादिपरिभाषाः न भाष्यवार्तिकयोः वर्णितास्तासां व्याख्यानेन प्रतिज्ञाहानिः दृश्यते । तस्मात् ज्ञापकयुक्तानां न्यायनिमित्तानां स्वतःसिद्धनां वाचनिकानाञ्च परिभाषारुपाणामिह व्याख्यानं करिष्यत इति प्रतिज्ञावाक्यार्थे सर्वेषां संग्रहः सिद्धः । वैद्यनाथपायगुण्डमहोदयेन तदीयकाशिकायामुक्तम्

---

२४. तत्रैव, पृ. – ३६५ ।

२५. महाभाष्ये – १/१/४९ ।

२६. जैनन्यायसंग्रहप्रातिशाख्यम् – ३/१८ ।

२७. शुक्लयजुर्वेदप्रातिशाख्यम् – १/१४४ ।

२८. तत्रैव – १/४५ ।

२९. तत्रैव – १/५९ ।

३०. परिभाषेन्दुशेखरः, राष्ट्रीयसंस्कृतसंस्थानम्, पृ. – १६ ।

– ''ज्ञापकस्येत्यस्य प्रायेणेत्यादिः । तथा च वाचनिकानामपि तत्सहचरितानां संग्रहः । '. . . . तत्रैतच्छास्त्रीयलिङ्गं ज्ञापकम्' । एतच्छास्त्रलोकतन्त्रान्तरप्रसिद्धयुक्तिर्न्यायः''[१७४]। परिभाषावृत्तौ पुरुषोत्तमदेवेनाकलितम्[१७५] 'इह च काश्चित् परिभाषा न्यायमूलाः । यथेयमेवार्थग्रहण इति। अर्थप्रतिपादनाय खलु शब्दान्वाख्यानमित्यनर्थकोपादानस्यायुक्तत्वात् । काश्चित्तु वचनमूलाः, यथा लुग्विकरणलुगविकरणयोरलुग्विकरणस्यैव ग्रहणमिति । उभयीनामासां परिभाषाणां पाणिनीयसूत्राणामिव यद्यपि पृथगेव प्रामाण्यमिष्यते, विधिनिग्रहाविष्टाः, सूत्रसूत्रैकदेशान्यथानुपपत्तिलक्षणेन ज्ञापकेनैव ताः प्रमाणयन्ति' इति ।

एतत्सर्वमालोच्य वक्तुं शक्यते यत् परिभाषा त्रिधा विभज्यते –

क. ज्ञापकसिद्धा ।

ख. न्यायमूला न्यायसिद्धा वा ।

ग. वाचनिकी ।

ज्ञापकसिद्धापरिभाषा यथा 'नानुबन्धकृतमनेकाल्त्वम्'[१७६] इति । अनुबन्धकृत–मनेकाल्त्वं नाश्रीयते अर्थात् इत्संज्ञायोग्याल्कृतानेकाल्त्वं न भवतीति परिभाषार्थः । अनुबन्धानां बोधकावयवत्वे 'अष्टाभ्य औश्'[१७७] इत्यादिसूत्रविहितानाम्, औशादीनामनेकाल्त्वादेव 'अनेकाल्शित् सर्वस्य'[१७८] इत्यनेन सर्वादेशत्वसिद्धौ पुनः 'शिद्ग्रहणं व्यर्थमिति चेन्न 'नानुबन्धकृतमनेकाल्त्वम्' इति परिभाषाज्ञापनेन इत्संज्ञायोग्याल्कृतानेकाल्त्वं न ग्रहणात् तस्य चारितार्थ्यात् । यदि ह्यनुबन्धकृतमनेकाल्त्वं स्यात् तर्हि 'व्यतिबभूव' इत्यादौ एशादेः शित्त्वेऽप्यनेकाल्त्वात् सर्वादेशत्वसिद्धेः शित्करणं पृथक् न कुर्यात् । न च व्याघ्रपादित्यादौ विहितलोपः सर्वादेशो मा भूदिति हेतोः बोधवृत्त्यनेकाल्त्वमेव सर्वादेशताप्रयोजकं न बोध्यवृत्तीति स्वीकार आवश्यकः । तथा चानुबन्धविनिर्मुक्तपदार्थोपस्थित्या 'अष्टाभ्य औश्' इत्यादौ बोध्यस्य औकारस्यानेकाल्त्वाभावेन सर्वादेशाय शिद्ग्रहणस्य चारितार्थ्यात् ज्ञापकत्वासम्भव इति वाच्यमानुमानिकस्थान्यादेश भावकल्पनेनानेकाल्त्वात् सर्वादेशसिद्धेः । एवञ्च

---

३१. वैद्यनाथपायगुण्डकृतकाशिका ।

३२. पुरुषोत्तमकृतपरिभाषावृत्तिः – १ ।

३३. परिभाषेन्दुशेखरः, परि – ६ ।

३४. अष्टा. – ७/१/२१ ।

३५. तत्रैव – १/१/५५ ।

शिद्ग्रहणस्य ज्ञापकत्वं निर्बाधम् । अतएव अर्वन्तौ अर्वन्त इत्यादौ 'अवर्णस्त्रसावनञः'[१७९] इति त्रादेशो न सर्वस्य स्थाने । न  चैवं डादेशः णलादेशश्च सर्वस्य स्थाने न स्यात्, तथाच 'भविता', 'बभूव' इत्याद्यसिद्धिरिति वाच्यम्, सर्वादेशत्वं विना प्रत्ययादित्वाभावेन 'चुटू'[१८०] इत्यादेरप्रवृत्त्या डादीनामनुबन्धत्वाभावेन परिभाषाया अप्रवृत्त्या अनुपूर्वात् सर्वादेशसिद्धेः । अतः इत्संज्ञावत्त्वमनुबन्धत्वमिति स्वीक्रियते । महामतिना पतञ्जलिना महाभाष्ये भणितम् 'एवं तर्हि सिद्धे सति यत् शित्सर्वस्येति तज्ज्ञापयत्याचार्यः अस्त्येषा परिभाषा नानुबन्धकृतमनेकाल्त्वं भवती'ति[१८१] ।

ज्ञापकसिद्धा परिभाषा द्विविधा भवति –

क. निर्देशानुपपत्तिज्ञापकज्ञापिता ।

ख. अर्थानुपपत्तिज्ञापकज्ञापिता ।

'स्थण्डिलाच्छयितरि व्रते'[१८२] इत्यत्र 'शयितरि' इत्यनेन ज्ञाप्यते 'कार्यमनुभवन् हि कार्यी निमित्तया नाश्रीयते'[१८३] । यतः शीङ्धातोः तृच्प्रत्यये शीङः कार्यित्वेऽपि निमित्तत्वेनाश्रयणान् ङिन्निमित्तके 'क्ङिति च'[१८४] इति गुणनिषेधे 'शयितरि' इति गुणेऽयादेशे विधिरनुपपन्नः स्यात् । ततः कार्यभाक् यत्तत् कार्यं प्रति निमित्तं न भवति । एवञ्च 'प्राग्दीव्यतोऽण्'[१८५] इत्यत्र 'दीव्यतः' इति निर्देशेन ज्ञाप्यते "एकदेशविकृतमनन्यवत्"[१८६] इति । एषा हि निर्देशानुपपत्तिज्ञापकज्ञापिता ।

अर्थानुपपत्तिज्ञापकज्ञापिता – 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'[१८७]ति । कुमारः श्रमणादिभिः[१८८] इत्यत्र 'कुमार' इत्यस्य परिभाषाप्रवृत्तिरिष्यते, तत्रोपात्तपदं 'कुमार' इति तेन कुमारत्वपुंस्त्वादिविशिष्टकुमारार्थोऽवगम्यते, तस्मिन्नर्थे

---

३६. तत्रैव – ६/४/१२७ ।
३७. तत्रैव – १/३/७, 'प्रत्ययादौ चुटू इतौ स्तः' इत्यर्थः ।।
३८. महाभाष्यम् – १/१/५५ ।
३९. महाभाष्यम् – ४/२/१५ ।
४०. परिभाषेन्दुशेखरः, परि. – ११ ।
४१. अष्टा. – १/१/५ ।
४२. तत्रैव – ४/१/८३ ।
४३. परिभाषेन्दुशेखरः, परि. – ३८, कुत्रापि – ३७ ।
४४. परिभाषेन्दुशेखरः, परि. – ७२, ङ्याप्प्रातिपदिकात् (४/१/१) सूत्रभाष्ये दर्शितः ।
४५. अष्टा – २/१/७० ।

प्रातिपदिकव्याप्यकुमार– त्वप्रकारकधर्मो भासते तादृशधर्मप्रकारतापूर्वीबोधकुमारग्रहणेऽस्याः परिभाषायाः प्रवृत्तिः सुलभेति ।

समानाधिकरणाधिकारस्थे 'कुमारः श्रमणादिभिः' इति सूत्रे स्त्रीलिङ्गश्रमणा–दिपाठोऽस्याः ज्ञापकः । इह गणे श्रमणा, प्रव्रजिता, कुलटा, गर्भिणी, तापसी, दासी, बन्धकी, अध्यापकः, पण्डितः, पटुः, मृदुः, कुशलः, चपलः, निपुणश्चेति शब्दाः पठ्यन्ते । अत्र श्रमणादिबन्धक्यन्तस्त्रीलिङ्गशब्दैः सह कुमारशब्दस्य सामानाधिकरण्याभावात् समासाप्राप्त्या तेषां तत्र पाठो व्यर्थः सन् परिभाषां ज्ञापयति । ज्ञापितायान्तु कुमारशब्देन कुमारीशब्दस्यापि ग्रहणसम्भावात् कुमारी चासौ श्रमणा कुमारीश्रमणा इत्यादौ सामानाधिकरण्यात् समासविधानाय गणे तेषां पाठश्चरितार्थः । तदाह[१८९] – 'कुमारीशब्दस्यैव सामानाधिकरण्यम्, न तु कुमारशब्दस्येति तदेतज्ज्ञापकमि'ति । अतएव 'युवा खलतिपलितवलिनजरतीभिः'[१९०] इत्यत्र जरतीग्रहणं चरितार्थम् । अन्यथा जरतीति स्त्रीलिङ्गेन युवेति पुल्लिङ्गस्य सामानाधिकरण्याभावात् समासप्राप्त्या जरतीशब्दपाठो व्यर्थः स्यात् । 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इत्यनया परिभाषया युवेत्यनेन युवतीत्यस्यापि ग्रहणात् 'युवतिः जरती'ति 'युवजरती' इत्यादौ समासविधानाय सूत्रे तस्योल्लेखः सफलः ।

एवञ्च 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति' इत्यस्य 'सुप्तिङन्तं पदम्'[१९१] इति सूत्रस्थमन्तग्रहणं ज्ञापकम् । अन्यथा सुप्तिङौ पदमिति सूत्रे कृते अपि 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्'[१९२] इति परिभाषया तदादेः तद्विशेष्यकतदन्तस्य चोपस्थितौ सुबन्ततदादिस्तिङन्ततदादिश्च पदसंज्ञाकौ स्यातामित्यर्थेनैव पदसंज्ञासिद्धौ 'अन्तग्रहणं' व्यर्थं स्यात् । न च परिभाषायां ज्ञापितायामपि 'अन्तग्रहणं' व्यर्थमिति वाच्यम्, संज्ञाविधाविति निषेधेन सुप्तिङोरेव पदसंज्ञाविधाने पचति इत्यादौ तिङं पदं मत्वा 'नित्यवीप्सयोः'[१९३] पदस्य तिमात्रस्य द्वित्वापत्तेस्तद्वारणाय अन्तग्रहणस्य सूत्रे चारितर्थ्यात् । एतादृशी परिभाषा अर्थानुपपत्तिज्ञापकज्ञापिता इत्युच्यते । ज्ञापकसिद्धा परिभाषा पुनः द्विविधा विभज्यते । तद्यथा –

४६. परिभाषेन्दुशेखरः, परि. – ७२ ।
४७. अष्टा. – २/१/६७ ।
४८. अष्टा. – १/४/१४ ।
४९. परिभाषेन्दुशेखरः, परि. – २४ ।
५०. अष्टा. – ८/१/४ ।

क. लिङ्गवती,

ख. विध्यङ्गदेशभूता चेति ।

उभयविधपरिभाषाविषये वर्णितम्[१९४] –

> 'एकस्थः सविता देवो यथा विश्वप्रकाशकः ।
> तथा लिङ्गवती शास्त्रमेकस्थोऽपि प्रदीपयेत् ॥
> एकाऽपि पुंश्चली पुंसां यथैककं प्रयाति हि ।
> विध्यङ्गशेषभूता सा विधिं प्रत्यनुगच्छति ॥' इति ॥

'या एकत्र गृहीतासम्बन्धा सती प्रदीपवत् सर्वशास्त्रमभिज्वलयति सा लिङ्गवतीत्युच्यते । यथा 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि'[१९५], 'इको गुणवृद्धी' चेति । 'इको गुणवृद्धी' इति परिभाषया गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते । तत्र लिङ्गन्तु गुणवृद्धिशब्दयोः उच्चारणम् ।

विध्यङ्गशेषभूता परिभाषा द्विविधा भवति । कस्यचिद्विधेः अङ्गभूता, विधिशेषभूता चेति । 'इको गुणवृद्धी' इति सूत्रस्य व्याख्यानावसरे पुरुषोत्तमदेवेनोक्तं[१९६] – "परि सर्वशास्त्र उपयुक्ता वाणी भाषा सा परिभाषा । सा च लिङ्गवती विध्यङ्गशेषभूता च । या लिङ्गद्वारा भावेनोपयुज्यते सा लिङ्गवती । या सर्वैव विधिवाक्ये उपयुज्यते साऽपरा साऽपि काचित् विधेरङ्गभूता यां विना विधिवाक्यान्नैव प्रवर्तते, यथा – 'आदेः परस्य' इति" । न हि तद्विना 'ईदासः'[१९७] इति प्रवर्तते । यतः 'आस् उपवेशने' इत्यनुदात्तेत्त्वात् लटः शानचि, अनुबन्धलोपे कृते 'आन' इत्यवस्थायाम् 'आदेः परस्य' इति परिभाषासूत्रबलेन परस्य यद्विहितं तत्तस्यादेर्बोध्यम् इति नियमानुसारे 'आसीनः' रूपं सिद्ध्यति ।

अपि चोक्तं विधिशेषभूताविषये – 'काचिद् विधिशेषाभूता विप्रतिषेधे परं कार्यम्' (अष्टा.–१/४/२) इत्यविरोधे वृक्षेष्वित्यादौ झल्येत्त्वम् (अष्टा.–७/१/१०३) अव्याहतमेव । विरोधविषये तु एत्त्वात् परं कारयती'ति[१९८] । कातन्त्रस्य 'आगम उदनुबन्धः स्वरादन्त्यात् परः'[१९९] इति परिभाषासूत्रीयटीकायां दुर्गासिंहेनाकलितम् – "परिभाषा यत्र यत्र लिङ्गमस्ति

---

५१. व्याकरणदर्शनेर इतिहास, पृ. ३६५ ।

५२. परिभाषेन्दुशेखरः,परि. – २३ ।

५३. भाषावृत्तिः – १/१/३ ।

५४. अष्टा. ७/२/८३ ।

५५. भाषावृत्तिः १/१/३ ।

५६. कातन्त्रनामलिङ्गानुशासनम् – १/६ ।

तेन सहैकवाक्यतामापद्यमाना विध्यङ्गशेषभूतोच्यते । अथवा नानादेशावस्थितानि सर्वाण्येव कार्याणि लिङ्गान्युत्पाद्यैकदेशस्थैव नियमयति, यथा प्रदीपः सर्वतोऽवस्थितान् घटादीन् प्रकाशयति तथोद्देशं संज्ञापरिभाषा इत्युभयथाऽपि लिङ्गद्वारेणैव प्रवर्तते लिङ्गमात्राश्रयत्वात् लिङ्गवतीत्युच्यते । तत्पुनरस्या लिङ्गमुदनुबन्ध आगमो धुट् स्वरात् घुटि नुरित्येवमादिषु" इति । काशिकावृत्तौ 'विप्रतिषेधे परं कार्यमि'ति सूत्रस्य पर्यावलोचनावसरे वर्णितम्[२००] – "तुल्यबलविरोधो विप्रतिषेधः । यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः । तस्मिन् विप्रतिषेधे परं कार्यं भवति" इति । पूर्वमीमांसायामप्येवं जैमिनीयसूत्रमस्ति – 'पौर्वापर्य्ये पूर्वदौर्बल्यं प्रकृतिवत्'[२०१] इति । अस्मिन् विषये काचन प्राचीनकारिकापि वर्तते –

'पूर्वात् परं बलीयस्त्वं तत्र नाम प्रतीयताम् ।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥' इति ।

माधवाचार्येण न्यायमालाविस्तारे विस्तारितं यत् – "उत्पद्यमानं चोत्तरज्ञानं स्वविरुद्धस्य पूर्वज्ञानस्य बाधेनैवोत्पद्यते । ननु निरपेक्षत्वस्य समानत्वात् पूर्वज्ञानमेवोत्तरस्य बाधकमस्ति चेत् ? न पूर्वज्ञानोत्पत्तिदशायामविद्यमानस्योत्तरज्ञानस्य बाध्यत्वायोगात् । उत्तरकाले तु स्वयं बाधितं पूर्वज्ञानं कथमुत्तरस्य बाधकं भवेत्"[२०२] इति । एतत्सर्वं विचार्य मन्यते 'भवति विज्ञतमः क्रमशो जनः'। 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्येव स्पष्टीकरोति । पाणिनीयसम्प्रदाये ज्ञापकसिद्धाः परिभाषाः निम्नोक्ताः

१. नानुबन्धकृतमनेकाल्त्वम् ।
२. नानुबन्धकृतमनेजन्तत्वम् ।
३. नानुबन्धकृतमसारूप्यम् ।
४. उभयगतिरिह
५. भाव्यमानेन सवर्णानां ग्रहणं न ।
६. भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ।
७. वर्णाश्रये नास्ति प्रत्ययलक्षणम्[२०३] ।
८. उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ।

---

५७. काशिकावृत्तिः – १/४/२ ।

५८. जैमिनीयसूत्रम् – ६/५/५४ ।

५९. माधवाचार्यकृतन्यायमालाविस्तारः, जैमिनीयसूत्रम् – ६/५/५४ ।

६०. परिभाषावृत्तिः – वर्णाश्रये प्रत्ययलक्षणं नास्ति । गोस्त्रियोरुपसर्जनस्य इत्यत्र गोशब्दान्तमाचक्षते प्रत्ययविधिविषयसमाख्याय । तत्र परिभाषाया प्रत्याख्यानमुक्तम् ।

९. संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।
१०. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।
११. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति[२०४] ।
१२. सर्वो द्वन्द्वो विभाषयैकवद्भवति[२०५] ।
१३. प्रकृतिवदनुकरणं भवति ।
१४. विकरणेभ्यो नियमो वलीयान् ।
१५. असिद्धं बहिरङ्गमन्तरङ्गे[२०६] ।
१६. नाजानन्तर्ये बहिष्ट्वप्रक्ळप्तिः ।
१७. अन्तरङ्गानपि विधीन् बहिरङ्गो गुणो बाधते[२०७] ।
१८. पूर्वोत्तरनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न ।
१९. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते ।
२०. वर्णादाङ्गं बलीयो भवति ।
२१. अकृतव्यूहाः पाणिनीयाः ।
२२. अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ।
२३. ताच्छीलिकेषु वासरूपविधिर्नास्ति ।
२४. क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ।
२५. लादेशेषु वासरूपविधिर्नास्ति ।
२६. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्[२०८] ।
२७. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राकसुबुत्पत्तेः ।
२८. चानुकृष्टं नोत्तरत्र ।
२९. स्वरविधौ व्यञ्जनमविद्यमानवत् ।
३०. हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ।
३१. निरनुबन्धकग्रहणे न सानुबन्धकस्य ।
३२. तदनुबन्धकग्रहणे नातदनुबन्धकस्य ।
३३. क्वचित् स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते ।
३४. सन्नियोगशिष्टानामन्यतरापाये उभयोऽप्यपायः[२०९] ।

---

६१. तत्रैव ।

६२. तिष्यपुनर्वस्वोः – १/२/६७ ।

६३. कातन्त्रपरिभाषातन्त्रम् – 'प्रकृतेः पूर्वं पुर्वं स्यादन्तरङ्गम्', 'प्रकृत्याश्रितमन्तरङ्गम्', 'प्रत्ययाश्रितं बहिरङ्गम्', 'अल्पाश्रितमन्तरङ्गम्', 'बह्वाश्रितं बहिरङ्गम्', एकाश्रितमन्तरङ्गम्', उभयाश्रितं बहिरङ्गम् ।

६४. भाष्यरीत्या वाचनिक एवार्थः ।

६५. कौमारसम्प्रदाये – 'लिङ्गग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इत्येवं पठितः ।

३५. तन्मध्यपतितस्तद्ग्रहणेन गृह्यते[२१०] ।
३६. प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्[२११] ।
३७. अङ्गवृत्ते पुनर्वृत्तावविधिः ।
३८. संज्ञापूर्वकविधेरनित्यत्वम्[२१२] ।
३९. आगमशास्त्रमनित्यम् ।
४०. गणकार्यमनित्यम् ।
४१. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ।
४२. नञ्घटितमनित्यम् ।
४३. आतिदेशिकमनित्यम् ।
४५. सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ।
४६. प्रकृतिग्रहणे यङ्लुङन्तस्यापि ग्रहणम् ।
४७. विधौ परिभाषोपतिष्ठते नानुवादे[२१३] ।
४८. गामादाग्रहणेष्वविशेषः[२१४] ।
४९. अभेदका गुणाः ।
५०. सम्प्रसारणं तदाश्रयं च कार्यं बलवत्[२१५] ।
५१. शितपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ चेति ॥

---

६६. 'बिल्वकादिभ्यश्छस्य लुक्' (अष्टा. – ६/४/१५३) इत्यत्र छग्रहणेन इयं परिभाषा भाष्ये ज्ञापिता ।

६७. तन्मध्यपतितस्य तद्व्यपदेशोऽयं छत्रिणो यान्तीति लोकव्यवहारसिद्ध एव । अस्याः ज्ञापकम् 'नेदमदसोरकोरि'ति – अष्टा. – ७/१/११ ।

६८. ज्ञापकञ्चात्र 'हेरचङी'ति (अष्टा. – ७/३/५६) प्रतिषेधवचनम् ।

६९. 'ओर्गुणः' (अष्टा. – ६/४/१४६) गुणग्रहणेन ज्ञापितः ।

७०. वृद्धिर्यस्याचाम् (१/१/७३) इत्यत्र वृद्धिपदन्तु अनुवादकोटिप्रविष्टम्, वृद्धिमनूद्य वृद्धसंज्ञा विधानात् 'इको गुण्वृद्धी' (१/१/३) इति परिभाषा नोपतिष्ठते ।

७१. 'इयं च लक्षणप्रतिपदोक्तपरिभाषानिरनुबन्धकपरिभाषालुग्विकरणपरिभाषाणां बाधिका' । दाधा घ्वदाप् (अष्टा. १/१/२०) सूत्रभाष्ये स्पष्टा ।

७२. प्राचीनाचार्याः लिट्यभ्यासोभयेषाम् (६/१/१७) इत्यत्रोभयेषां ग्रहणं ज्ञापिकमिति आहुः ।

## न्यायसिद्धा परिभाषा

नियमो न्यायो नीतिरित्यादिष्वर्थेषु न्यायशब्द प्रयुज्यते। 'एतच्छास्त्रालोकतन्त्रान्तर–प्रसिद्धयुक्तिर्न्याय' इत्युच्यते । परन्तु न्यायेन 'लोकन्याय' एवात्रावगन्तव्यः । "प्रमाणैर्वस्तुतत्त्वपरीक्षणं न्याय" इत्युच्यते । अर्थात् प्रत्यक्षादिप्रमाणैः वास्तविकायाः परीक्षणं हि न्यायः । लोकसिद्धत्वात् न्यायसिद्धपरिभाषायां ज्ञापकस्यापेक्षा नानुभूयते । यथा – 'एकदेशविकृतमनन्यवत्'[२१६] इति । एकदेशो विकृतो यस्मिन् एकदेकदेशविकृतम् । अथवा विकृतमिति भावे क्तः विकार इत्यर्थः । एकदेशस्य विकृतं विकारो यस्मिन्निति व्यधिकरणपदो बहुव्रीहिः । अथवा एकदेशेनावच्छेदेन विकृतमिति तृतीयातत्पुरुषः । एकदेशविकारविशिष्टमनन्यवद्भवति अन्यवन्न भवतीति अन्यसादृश्यनिषेधेऽन्यत्वाभावः सुतरां सिद्ध्यत्येव । एकदेशविकृतं शब्दस्वरूपमन्यवदन्यसदृशं नेत्यर्थः । यथा यस्य शुनः पुच्छं छिन्नं सोऽपि लोके श्वेत्युच्यते, छिन्नत्वात् पुच्छस्य स कुकुर एकदेशेन पुच्छदेशेन विकृतोऽपि अन्य पशुवत् गर्दभादिवन्न मन्यते एवं यथा वृद्धौ जातायां कार्यकालपक्षे 'राम् औ' इत्यवग्रहे 'राम' इत्येकदेशेन विकृतमपि अनन्यवद्भावात् श्ववदर्थात् रामवद् भवतीति सुबन्ततदादित्वनिबन्धना पदसंज्ञा जायते । अन्यथा परिभाषाया अभावे शक्यता–वच्छेदकानुपूर्व्या 'राम + औ' इत्येवं रूपायाः ज्ञानाभावाद् बोधो न स्यात् । एवञ्च परिभाषायाः स्वीकारे 'राम्' इति मान्तस्य यस्माद्विहितस्तत्त्वमनया सम्पाद्यते, 'औ' इत्यस्य च 'अन्तादिवच्च'[२१७] इति परादित्वभावेन सुप्त्वम् । अतएव सुबन्ततदादित्वात् पदत्वं सिध्यति । अतः अन्तिमेनाकाररूपेण एकदेशेन विकृतोऽपि 'राम्' इति मान्तशब्दः अन्यवन्न भवतीति । छिन्नपुच्छश्वदृष्टान्तेन लौकिकेन सिद्धत्वादियं परिभाषा लोकसिद्धा ।

लोकसिद्धायास्तस्याः शास्त्रे समुपादनं शास्त्रीयं प्रमाणमपेक्षते एव तस्मादाह नागेशाचार्यः – "अतएव 'प्राग्दीव्यतोऽण्' इति सूत्रे भाष्ये दीव्यतिशब्दैकदेश–दीव्यच्छब्दानुकरणमिदमित्युक्त्वा किमर्थं विकृतनिर्देश एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषैकदेशविकृतमनन्यवदित्युक्तम् । एतेनायं शास्त्रीयकार्य एव शास्त्रीयविकार एवेत्यपास्तम्"[२१८] इति ।

---

७३. परिभाषेन्दुशेखरः, परि. – ३८ ।

७४. अष्टा. – ६/१/८५ ।

७५. परिभाषान्दुशेखरः, परि. – ३८ ।

भट्टोजिदीक्षितेन 'जराया जरसन्यतरस्याम्'[२१९] इति सूत्रस्य वृत्तौ 'एकदेशविकृतस्यानन्यत्वाज्जराशब्दस्य जरस्' इति । तस्यैव व्याख्यानावसरे वासुदेवदीक्षितेनोच्यते[२२०] – 'छिन्नेऽपि पुच्छे श्वा श्वैव न चाश्वो न च गर्दभ इति न्यायादि'ति भावः । स्थानिवदादेशोऽनल्विधौ इत्यस्य व्याख्याने 'एकदेशविकृतस्या–नन्यत्वात् सिद्धम्' इत्युक्तं कात्यायनेन । भाष्येऽपि सम्यगुक्तम् । तन्त्रवार्तिके कुमारिलभट्टेन भणितम् 'न हि गोर्गडुनि जाते विषाणे वा भग्ने गोत्वं तिरोधीयते इत्यन्यत्र न हि केवलभोजी देवदत्तोऽन्यैः सह पङ्क्त्यां भुञ्जानोऽन्यत्वं प्रपद्यते'[२२१] इति । एवञ्चान्यत्र[२२२] ।

न्यायसिद्धपरिभाषा द्विविधा लोकन्यायसिद्धा युक्तिसिद्धा चेति । लोकन्यायसिद्धाः परिभाषाः यथा –

१. कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते[२२३] ।
२. यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यते ।
३. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः[२२४] ।
४. एकयोगनिविष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ।
५. व्यपदेशिवदेकस्मिन्[२२५] ।
६. एकदेशविकृतमनन्यवत्[२२६] ।
७. असिद्धं बहिरङ्गमन्तरङ्गे ।
८. सूत्रे लिङ्गवचनमतन्त्रम्[२२७] ।
९. नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः ।

---

७६. अष्टा. – ७/२/१०१ ।

७७. वैयाकरणसिद्धान्तकौमुदीस्थबालमनोरमायाम् – ७/२/१०१ ।

७८. कुमारिलभट्टकृततन्त्रवार्तिकम् – २/१/३४ ।

७९. तत्त्वकौमुदीकृतो वाचस्पतिमिश्र आह – 'न हि पाणौ वृक्णे जाते वा स्तनादौ महत्यवयवे युवतिर्जाता मृता वा भवति' (१८) ।

८०. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः – 'न कार्यी निमित्तत्वेनाश्रीयते' इत्येवं पठिता ।

८१. गुणादागतो गौणः । मुखमिव प्राधान्यान्मुख्यः । श्रुतिमात्रेण यत्रान्यतादर्थमवसीयते ।
तं मुख्यमर्थं मन्यन्ते गौणं यत्नोपपादितम् ॥ इति

८२. सूत्रनिष्पन्नवाचनिकीत्येके – द्रष्टव्यम् – भाष्यवार्तिकादि – १/४/२ ।

८३. ज्ञापकसिद्धापि परिभाषा ।

८४. कौमाराः – 'सूत्रे लिङ्गं संख्या कालश्चातन्त्राणि' (कुलचन्द्र – २२०), सरस्वतीकण्ठाभरणे – 'सूत्रे लिङ्गवचनाद्यप्रामाण्यमविवक्षातः' (१/१/६४)

१०.सम्प्रतिकाभावे भूतपूर्वगतिः ।

११.बहुव्रीहौ तद्गुणसंविज्ञानमपि[२२८] ।

१२.सन्निपातलक्षणे विधिरनिमित्तं तद्विघातस्य ।

१३.सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः ।

१४.प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः[२२९] ।

१५.अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ।

१६.प्रत्येकं वाक्यपरिसमाप्तिः ।

१७.क्वचित् समुदायेऽपि ।

१८.पर्जन्यवल्लक्षणप्रवृत्तिः[२३०] ।

१९.निषेधाश्च बलीयांसः चेति ।

युक्तिसिद्धा न्यायसिद्धा वा परिभाषा । यथा 'प्र + ऊढ' इत्यत्र प्रादुहोढोढ्येषैष्येषु इति वार्तिकेन 'ऊढ' इति आनुपूर्वीयपरत्वात् गुणं बाधित्वा वृद्धिर्भवति तथा प्रपूर्वात् वह्धातोः क्तवतुप्रत्ययेन पूर्वोक्तरीत्या निष्पन्ने 'प्र ऊढवान्' इत्यत्र गुणं बाधित्वा कथं वृद्धिः नेति चेन्न 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'[२३१] इति परिभाषावतरणात् । अर्थविशिष्टस्य शब्दोपलब्धौ अनर्थकस्य ग्रहणं न भवतीति परिभाषार्थः । अतएव 'प्रादुहो' इति वार्तिकेन विधीयमाना वृद्धिः 'प्रौढ' इत्यत्र अर्थात ऊशब्दावयवोकारस्यैव, न तु 'प्रोढवान्' इत्यत्र ऊढवान् शब्दैकदेशस्थानार्थकस्योढशब्दावयवस्य । तत्र हि ऊढवान् एवार्थवान्, न तु तदेकदेशः । न्यायोऽयं विशिष्टरूपोपादाने एव प्रवर्तते । न तु तदेकदेशः । युक्त्या सिद्धत्वात् परिभाषेयं युक्तिसिद्धा । अन्याः युक्तिसिद्धापरिभाषाः यथा –

१. अनेकान्ता अनुबन्धाः[२३२]।

---

८५. लौकन्यायसिद्धापि, महाभाष्ये – सिद्धं तु तद्गुणातद्गुणाभ्यां पाणिनेर्यथा लोके इति । यथा लम्बकर्णमानय,

चित्रगुमानयेति ।

८६. स्पष्टा चेयं 'पुमान् स्त्रिया' (१/२/६७) नपुंसकमनपुंसकेन (१/२/६९) इत्यनयोर्भाष्ये नागेशेन ।

८७. महाभाष्यम् – 'कृतकारि खल्वपि पर्जन्यवत् । तद्यथा पर्जन्यो यावदूनं पूर्णं च समभिवर्षति (१/२/९),

सरस्वतीकण्ठाभरणे हृदयहारिणीटीकायां दण्डनाथेन उक्तं – यथा पर्जन्यो जलपूर्णं चाभिवर्षति, तथा लक्षणमसिद्धे सिद्धे च कार्ये क्वचित् प्रवर्तते ।

८८. परिभाषेन्दुशेखरः, परि. – १५ ।

८९. तत्रैव, परि. – ४ ।

२. सर्वो द्वन्द्वो विभाषयैकवद्भवति ।
३. कृताकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम् ।
४. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्[२३३] ।
५. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ।
६. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेन बाध्यते ।
७. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्[२३४] ।
८. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्[२३५] ।
९. विधौ परिभाषोपतिष्ठते नानुवादे[२३६] ।
१०. विधिर्नियमसम्भवे विधिरेव ज्यायान् ।
११. सामान्यातिदेशे विशेषानतिदेशः ।
१२. श्रुतानुमितयोः श्रुतसम्बन्धो बलवान्[२३७] ।
१३. [२३८]लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।
१४. अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ।
१५. योगविभागादिष्टसिद्धिः[२३९] ।
१६. ज्ञापकसिद्धं न सर्वत्र ।
१७. एकस्या आकृतेश्चरितः प्रयोगे द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ।
१८. पदगौरवाद्योगविभागो गरीयान् । इति ।

---

९०. कौमारसम्प्रादाये – 'उत्सर्गापवादयोरपवादविधिर्बलवान्', 'पूर्वापरयोः परविधिर्बलवान्', 'परान्नित्यम्', 'नित्यानित्ययोः नित्यः' चेत्येवं पठिता ।

९१. पुरुषोत्तमदेवपरिभाषावृत्तिः – अयञ्च विप्रतिषेधे परं कार्यमित्यस्यैवार्थः परिभाषारूपेण पठ्यते ।

९२. कौमारसम्प्रदाये – प्रकृतिग्रहणे चेक्रीषितलुगन्तस्यापि ग्रहणे इत्यस्ति ।
भोजदेवकृतसरस्वतीकण्ठाभरणे
सूत्रितम् – 'प्रकृतिग्रहणे यङ् लुगन्तस्यापि' (१/२/७७) ।

९३. पुरुषोत्तमदेवमते ज्ञापकसिद्धापि ।

९४. कौमारसम्प्रदायेऽनुरूपमुक्तम् – 'प्रत्यक्षानुमितयोः प्रत्यक्षविधिर्बलवान', 'आख्यातानाख्यातयोराख्यातं बलीयः', 'अनुशिष्टानुशिष्टयोरनुशिष्टं प्रमाणम्' ।

९५. लक्षणं लाक्षणिकमुपचारादिति ।

९६. अन्वयं विच्छिद्य अन्वयं कृत्वा पृथक् सूत्रकरणं योगविभागः ।

## वाचनिकी परिभाषा

या परिभाषा पाणिनिकात्यायनपतञ्जलिभिः वचनरूपेण साक्षात् प्रोक्ता सा वाचनिकी परिभाषा इत्युच्यते । यथा 'इको गुणवृद्धी' इति पाणिनिमुखोद्गतवचनाद् वाचनिकी । 'अनिनस्मन्' इति परिभाषा 'येन विधिस्तदन्तस्य'[२४०] इति भाष्यवचनरूपेण पठिता । 'एकदेश विकृतमनन्यवत्', 'सन्निपातलक्षणो विधिनिमित्तं तद्विघातस्य', उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः, 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्', 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी', 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इत्यादिपरिभाषाः आचार्यकात्यायनेन साक्षात् वचनरूपेण पठिताः परन्तु नागेशचार्येण सर्वा वाचनिकीरूपेण न स्वीकृता । नागेशमते तु या न महाभाष्ये ज्ञापकन्यायसिद्धा प्रतिपादिता या वाचनिकीति । वचनरूपेण पठिताः परिभाषाः यथा –

१. अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति [२४१]।
२. प्रत्ययग्रहणे चापञ्चम्याः[२४२] ।
३. स्त्रीप्रत्यये चानुपसर्जने न[२४३] ।
४. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति[२४४] ।
५. यस्मिन् विधिस्तदादावल्ग्रहणे[२४५] ।
६. अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ।
७. विभक्तौ लिङ्गविशिष्टस्याग्रहणम्[२४६] ।
८. उपपदविभक्तेः कारकविभक्तिर्बलीयसी[२४७] ।
९. अनन्त्यविकारेऽन्त्यसदेशस्य[२४८] ।

---

९७. अष्टा. – १/१/७२ ।
९८. 'येन विधिस्तदन्तस्य' (१/१/७२) इत्यस्य वचनमेव ।
९९. 'येन विधिस्तदन्तस्य' (१/१/७२) इत्यस्य सूत्रवार्तिकं द्रष्टव्यम् ।
१००. द्रष्टव्यम्, 'ष्यङः' (६/१/१३) सूत्रीयभाष्यवार्तिकम् ।
१०१. 'येन विधिस्तदन्तस्य' (१/१/७२) इत्यस्य सूत्रवार्तिकं द्रष्टव्यम् ।
१०२. तत्रैव ।
१०३. 'युवोरनाकौ' (७/१/१) सूत्रभाष्ये पठिता ।
१०४. कौमारसम्प्रदाये – उपपदसिद्धेः कारकसिद्धिर्बलीयसी इत्यस्ति । कालपकाः वदन्ति –
'नमोयोगे क्रियाशुन्ये चतुर्थी सम्मता बुधैः ।
करोत्यर्थविवक्षायां द्वितीया तत्र निश्चला ॥' इति ।
१०५. 'अल्लोऽपनः' (६/४/१३४) इति सूत्रभाष्ये पठिता ।

१०. नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे[२४९] ।

११. व्यवस्थितविभाषयापि कार्याणि क्रियन्ते[२५०] ।

१२. प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्[२५१] ।

१३. पूर्वत्रासिद्धीयमद्वित्वे[२५२] ।

पाणिनीयसूत्रविश्लेषणविशेषसाधिता परिभाषाऽपि वाचनिकी परिभाषा मन्यते । तद्यथा –

१. निर्दिश्यमानस्यादेशा भवन्ति[२५३]।

२. यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः[२५४] ।

३. वर्णाश्रये नास्ति प्रत्ययलक्षणम्[२५५] ।

४. प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्[२५६] ।

५. पादाङ्गाधिकारे तस्य च तदन्तस्य च[२५७] ।

६. सर्वे विधयश्छन्दसि विकल्प्यन्ते[२५८] ।

७. पूर्वापरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः[२५९] ।

८. पुनः प्रसङ्गविज्ञानात् सिद्धम्[२६०] ।

९. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्[२६१] इति ।

वाचनिकी परिभाषा बहुविधा विभज्यते । तद्यथा सूत्रनिष्पन्ना सूत्रेतरवचननिष्पन्ना, सूत्रेतरवचनात्मिका, सूत्ररूपेण पठिता चेति । सूत्रनिष्पन्ना परिभाषा, यथा –

---

१०६. 'अलोऽन्त्यात् पूर्व उपाधा' (१/१/६५) सूत्रभाष्ये स्पष्टा ।

१०७. 'शाश्छोरन्यतरस्याम्' (६/४/४१) सूत्रभाष्ये स्पष्टा ।

१०८. 'अङ्गस्य' (६/४/१) सूत्रभाष्ये स्पष्टा ।

१०९. 'सर्वस्य द्वे' (८/१/१) सूत्रभाष्ये स्पष्टा ।

११०. 'षष्ठी स्थानेयोगा' (१/१/४९) इति सूत्रविश्लेषणात् साधिता ।

१११. द्रष्टव्यम्, 'स्थानेऽन्तरतमः' (१/१/५०) भाष्यकाशिकादि ।

११२. 'प्रत्यलोपे प्रत्ययलक्षणम्' इति सूत्रीयभाष्यं द्रष्टव्यम् ।

११३. 'यस्मात् प्रत्ययविधिः (१/४/१३) इति सूत्रीयभाष्यं द्रष्टव्यम् ।

११४. 'येन विधिस्तदन्तस्य' (१/१/७२) इत्यस्य सूत्रभाष्यं द्रष्टव्यम् ।

११५. 'षष्ठीयुक्त' (१/४/९), 'व्यत्ययो बहुलम्' (३/१/८५) चेति सूत्रीयभाष्यं द्रष्टव्यम् । महाभाष्ये उक्तं
'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥' (३/१/८५) ।

११६. 'विप्रतिषेधे' (१/४/२) इति सूत्रीयभाष्यं द्रष्टव्यम् ।

११७. तत्रैव ।

११८. युक्तिसिद्धापि परिभाषा (१/४/२) ।

'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः'[११९] इति । सूत्रेतरवचननिष्पन्ना "सकृद्गतौ विप्रतिषेधे यद्वाधितं तद्बाधितमेव" इति । सूत्रेतरवचनात्मिका 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति सूत्ररूपेण पठिता परिभाषा । कातन्त्रे यथा 'आगमः उदनुबन्धः स्वरादन्त्यात् परम्' (नाम. १/६), 'उणादयो भूतेऽपि'(कृत् – ३१२), 'भविष्यति गम्यादयः'(कृत्. – ३१३) इत्यादि । पाणिनीयतन्त्रे परिभाषासूत्राणि – 'विप्रतिषेधे परं कार्यम्' (अष्टा. – १/४/२), 'इको गुणवृद्धी' (अष्टा. – १/१/३) आद्यन्तौ टकितौ (अष्टा. – १/१/४६), 'अलोऽन्त्यस्य' (अष्टा. – १/१/५२), 'आदेः परस्य' (अष्टा. – १/१/५४). 'ङिच्च' (अष्टा. – १/१/५३), 'मिदचोऽन्त्यात् परः' (अष्टा. – १/१/४७), 'षष्ठी स्थानेयोगा' (अष्टा. – १/१/४९), 'स्थानेऽन्तरतमः' (अष्टा. – १/१/५०), 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (अष्टा. – १/१/६६), 'तस्मादित्युत्तरस्य' (अष्टा. – १/१/६३), 'अनेकाल्शित्सर्वस्य' (अष्टा. – १/१/५५), 'स्वरितेनाधिकारः' (अष्टा. – १/३/११), चेत्यादीनि । परिभाषासूत्रेषु कानिचित् पणिनिना स्वयं रचितानि, कानिचित् प्राचीनवैयाकरणतन्त्रात् ग्रहीतानि । यथा 'आद्यन्तौ टकितौ' इति पाणिनिरचितम् । 'इको गुणवृद्धी' इति पूर्वाचार्याद् गृहीतम् ।

पूर्वप्रचलितापरिभाषासूत्राणां योगविभागं कृत्वा पाणिनीयसूत्रान् संगृह्य श्वेताम्बरसम्प्रदाये बहुपरिभाषावतारिता । ताः यथा[१२०] – 'स्वं रूपं शब्दस्याशब्दसंज्ञा', 'आद्यन्तवदेकस्मिन्', 'भाविनि भूतवदुपचारः', सिद्धे सत्यारम्भो नियमार्थः, 'वार्णात् प्राकृतम्', प्राकरणिकाप्राकरणिकयोः प्राकरणिकस्यैव', 'उपसर्गो न व्यवधायी', 'पूर्वं पूर्वोत्तरपदयोः कार्य्यं पश्चात् सन्धिकार्यम्', 'संज्ञा न संज्ञान्तरबाधिका', 'अनित्यो णिच्चुरादीनाम्', 'धातवोऽनेकार्थाः', 'गत्यर्था ज्ञानार्थाः', 'नाम्नां व्युत्पत्तिरव्यवस्थिता', 'सम्भवे व्यभिचारे च विशेषणमर्थवत्' द्वौ नञौ प्रकृतमर्थं गमयतः, 'व्याख्यातो विशेषार्थप्रतिपत्तिः', 'न केवला प्रकृतिः प्रयोक्तव्या', 'यत्रान्यत् क्रियापदं न श्रुयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते', 'नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम्', 'विचित्राः शब्दशक्तयः', 'नानिष्टार्था शास्त्रप्रवृत्तिः', 'अन्तरङ्गं बहिरङ्गात्', 'विवक्षातः कारकाणि', 'किं हि वचनान्न भवति चे'ति ।

---

११९. परिभाषेन्दुशेखरः, परि. – १४ ।

१२०. श्वेताम्बरसम्प्रदाये हेमचन्द्रकृताः परिभाषा ।

परिभाषाः अवलम्ब्य व्याकरणसम्प्रदाये बह्व्यः कारिकाः प्रचलिताः । यथा –

"बहिरङ्गविधिभ्यः स्यादन्तरङ्गविधिर्बली ।
प्रत्ययाश्रितकार्य्यं तु बहिरङ्गमुदाहृतम् ॥
प्रकृत्याश्रितकार्य्यं स्यादन्तरङ्गतरमिति ध्रुवम् ।
प्रकृतेः पूर्वपूर्वं स्यादन्तरङ्गतरं तथा ॥
सावकाशविधिभ्यं स्याद्बली निरवकाशकः ।
कस्यचिद् भिन्नकार्य्यस्य प्रथमे परतस्तथा ॥
सम्भवेद् विषयो यस्य स भवेत् सावकाशकः ।
आदौ हि विषयो यस्य परतो न हि सम्भवेत् ।
स पण्डितगणैरुक्तो विधिः निरवकाशकः ।
तथा सामान्यकार्येभ्यो विशेषकविधिर्बली ॥
बहवो विषया यस्य स सामान्यविधिर्भवेत् ।
अल्पः स्याद् विषयो यस्य स विशेषविधिर्मतः ॥
आगमादेशयोर्मध्ये बलीयानागमो विधिः ।
प्रकृतेः प्रत्ययस्यापि सम्बन्धो यो भवेदपि ॥
तयोरनुपघाती स्यादागमः स बुधैर्मतः ।
आदेश उपघाती यः प्रकृतेः प्रत्ययस्य वा ॥
सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्बली ॥"[१२१] इति ॥

## परिभाषाणां लक्ष्यम्

विधिसंज्ञादिषु शास्त्रेष्वव्याप्त्यतिव्याप्त्यसम्भवादिदोषवारणमेव परिभाषायाः लक्ष्यम् । यथा 'जराया जरसन्यतरस्याम्' इति सूत्रेण 'निजरसौ' इत्यत्राप्रवृत्तौ अव्याप्तिरुत्पद्यते तस्मात् 'येन विधिस्तदन्तस्य', 'पदाङ्गाधिकारे तस्य च तदन्तस्य', 'निर्दिश्यमानस्यादेशा भवन्ति', 'एकदेशविकृतमनन्यवद्' इत्यादिपरिभाषाभिः अव्याप्तिः दूरीभवति । परा (उत्कृष्टा) जयति सेना इत्यत्र 'विपराभ्यां जेः'[१२२], इत्यनेनात्मनेपदत्वादतिव्याप्तिनिवारणाय 'सहचरितासहचरितयोः सहचरितस्यैव

---

१२१. द्रष्टव्यम्, गुरुपदहालदारकृत व्याकरण दर्शनेर इतिहास, पृ. – ३७५ ।
१२२. अष्टा. – १/३/१९ ।

गहणमित्यस्याः प्रवृत्तिः'[२६६] इति । 'शतानि' इत्यत्र षट्संज्ञया तथा 'षड्भ्यो लुक्' इत्यनेन अतिप्रसक्तिः सन्निपातपरिभाषाबलाद्दूरीभवति ।

कदापि परिभाषा दोषयुक्ता भवति । तस्माद् भाष्यकारेण पतञ्जलिना निगदितं[२६७] – "एतस्याः परिभाषायाः दोषाः एतानि च प्रयोजनानि स्युः । एते दोषाः समाः भूयांसो वा । तस्मान्नार्थोऽनया परिभाषया । न हि दोषाः सन्तीति परिभाषा न कर्तव्या, लक्षणं वा न प्रणेयम् । न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते । न च मृगाः सन्तीति यवा नोप्यन्ते । दोषा खल्वपि साकल्येन परिगणिताः प्रयोजनानामुदाहरनमात्रम् । कुत एतत् न हि दोषाणां लक्षणमस्तीति । तस्माद्यान्येतस्याः परिभाषाया प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या, प्रतिविधेयं च दोषेषु" इति ।

चन्द्रगोमिमते 'ज्ञापकेऽर्थमनित्यम्'[२६८] इति । कातन्त्रेऽप्युच्यते 'ज्ञापकज्ञापिता विधयोऽनित्याः' इति । तस्मात् ज्ञापकसिद्धं सर्वत्र इति न स्वीक्रियते । परिभाषावृत्तौ पुरुषोत्तमदेवेनाकलितम् यत् "ज्ञापकसिद्धं न सर्वत्र (११८) इदमप्युचितमेव ज्ञापकं हि नाम न वाचकं किन्तर्हि इङ्गितेन सूचकं क्वचिदेव इष्टसिद्धावाश्रीयते न सर्वत्रेति युज्यते ज्ञापकसिद्धं न सार्वत्रिकम् इति । ज्ञापकसाधितमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोज्यम् । किन्तु विशिष्टप्रयोगदर्शनात् क्वचिदेव"[२६९] इति ।

अपि च "अगत्या तु परिभाषाश्रीयते'। इदमपि यौक्तमेवोच्यते । परिभाषा हि न पाणिनीयानि वचनानि किन्तर्हि नानाचार्याणाम् । तत्र पाणिनीये शब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेनासिद्धिः तत्रैवैता गत्यन्तरमपश्यद्भिराश्रीयन्ते । न तु यत्रैतासां समाश्रयणे दोष एव प्रत्युपपद्यते तत्रैताः समाश्रीयन्ते । एतेन परिभाषासञ्जनेन नानिष्टमित्युक्तं भवति । तेन 'राज्ञः क च' (अष्टा.–४/२/१४०) राजकीयमित्यत्र 'एकदेशविकृतमनन्यवद्भवतीति परिभाषया 'अल्लोपोऽनः' (अष्टा.–६/४/१३४) इति न प्रवर्तते"[२७०] इति । सीरदेवेनाप्यनुरूपमुक्तम् ।

---

१२३. परिभाषेन्दुशेखरः, परि. –११२ ।

१२४. महाभाष्यम् – ४/१/१ ।

१२५. चान्द्रपरिभाषा – ७७ ।

१२६. ज्ञापकसिद्ध अनुदात्तेल्लक्षणामात्मनेपदमनित्यम् इति ।

१२७. परिभाषेन्दुशेखरे 'अगत्या तु परिभाषाश्रीयते' इत्यस्या उल्लेखो नास्ति ।

सीरदेवेनापि तदीये ग्रन्थे ग्रन्थितम्[१२८] – "ज्ञापकसिद्धं न सर्वत्र, उचितमेवैतत् । ज्ञापकं नाम न बोधकमपि तु निमित्तेन सूचकम् । तच्च क्वचिदिष्टासिद्धौ व्याप्रियते न सर्वत्रेति युज्यते । तेन ज्ञापकसिद्धमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोक्तव्यम्, किन्तु क्वचिदेव शिष्टप्रयोगदर्शनात्" इति । अतः अनियमे नियमकारिणी परिभाषा भवति । परन्तु इत्यस्यापवादोऽपि वहुत्र दृश्यते । आचार्यनागेशेन तदीये परिभाषेन्दुशेखरे बह्व्यः परिभाषाः स्वीकृताः, यासां अनियमे नियमकारित्वं नास्ति । तस्मिन् विषये चतुर्थाध्याये दिग्दर्शनं करिष्ये ।

## व्याकरणनिकाये परिभाषाशास्त्राणि

सर्वेषां शास्त्राणां परिभाषोल्लेखयोग्या । इमां परिभाषाम् अवलम्ब्य व्याकरणसम्प्रदाये बहुनि शास्त्रानि रचितानि । परिभाषेन्दुशेखात् पूर्वं प्रायः पञ्चदशवृत्तिग्रन्थाः रचिताः । ताः यथा – १.व्याडिकृतं परिभाषासूचनम् २. व्याडिपरिभाषापाठः, ३. शाकटायनपरिभाषासूत्राणि, ४. चान्द्रपरिभाषासूत्राणि, ५. कात्रन्त्रपरिभाषासूत्राणि, दुर्गासिंहकृतवृत्तिसहितानि, ६. कातन्त्रपरिभाषासूत्रम्, भावमिश्रकृतवृत्तिसहितम्, ७. कातन्त्रपरिभाषासूत्रम्, ८. कालापपरिभाषासूत्रम्, ९. जैनेन्द्रपरिभाषा अभ्यङ्करकृतवृत्तिसहिता, १०. भोजदेवकृतपरिभाषासूत्रम्, ११. श्रीसिद्धहेमचन्द्रव्याकरणन्यायसंग्रहः हेमहंसगणिद्वारा संगृहीतः, १२. पुरुषोत्तमदेवकृता लघुपरिभाषावृत्तिः १३. सीरदेवकृतबृहत्परिभाषावृत्तिः, १४. नीलकण्ठदीक्षितकृता परिभाषावृत्तिः, १५. परिभाषाभास्करः हरिभास्कर–अग्निहोत्रिकृतः, १६. नागेशभट्टकृत परिभाषेन्दुशेखरः, १७. शेषाद्रिसुधीकृत–परिभाषाभास्करश्चेति ।

सर्वेषु परिभाषाग्रन्थेषु व्याडिकृतपरिभाषासूचनं प्राचीनतमम् । सर्वाः परिभाषाः एकत्रीकृत्य परिभाषासूचनवृत्तिग्रन्थः तेन प्रारब्धः । आचार्यो व्याडिः पाणिनिपतञ्जल्योः मध्यवर्ती भवितुमर्हति । आदौ परिभाषासूचने ९३ संख्यकाः परिभाषा आसन् ताः अवलम्ब्य तेन वृत्तिग्रन्थः रचितः । कालक्रमेण तत्र अन्याः परिभाषाः उपन्यस्ताः । व्याडिकृतपरिभाषासूचने तथा तदीये परिभाषापाठे महदनन्तरं दृश्यते । परिभाषासूचनस्य प्रारब्धे 'ॐ परिभाषासूचनं व्याख्यास्यामः' इति । तदनन्तरम् – "अथेत्ययमधिकारार्थः ।

१२८. सीरदेवकृतबृहत्परिभाषावृत्तिः, परि. – १२३ ।

परिभाषासूचनं शास्त्रमधिकृतं वैदितव्यम्' यदित ऊर्ध्वमनुक्रमिष्याम इयमस्मिन् सूत्रे सिद्धा इयमस्मिन् सिद्धेति । किं कारणम् । अत्र हि ज्ञातपरिभाषो स्वयं शास्त्रं प्रतिपादयितुं समर्थो भवति । स तावत् स्वयं ज्ञानपरिभाषो भवति । अतो व्याख्यानं द्रष्टव्यम् । तत्रादित एव तावदियं परिभाषा भवति । अर्थवद्ग्रहणं नानर्थकस्य । क्व पुनरियं परिभाषा पठ्यते 'व्रश्चभ्रस्जादिसूत्रे' (अष्टा. – ८/२/३६) कथंकृत्वा । अत्र हि राजभ्राजशब्दौ पठ्येते'[२७२] इत्यादि । व्याडिकृतां शैलीमालोक्य मन्यते पतञ्जलिकृतायाः शैल्याः पूर्वावस्था हि इयं शैली । अनेनावगम्यते यत् पतञ्जतिपूर्वो ह्ययमाचार्यो व्याडिः । भाष्ये दृश्यते "अथ शब्दानुशासनम् अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते । शब्दानुशासनं नाम शास्त्रमधिकृतवेदितव्यम्"[२७३] इति ।

'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्यय' इति परिभाषायाम् आचार्यो व्याडिः वार्तिककारस्य कात्यायनस्य मतमङ्गृतम् – 'न पूजनादित्यत्र वार्तिककारेणोक्तं स्वत्योर्ग्रहणं कर्तव्यम् । तन्न कर्तव्यं भवती'ति (अष्टा.–५/४/६९) । तस्मात् मन्यते कात्यायनस्य परवर्ति इदं परिभाषासूचनम् । 'द्रव्याभिधानं व्याडिः' इत्युक्तिदिशा पतञ्जलेः पूर्ववर्ती व्याडिः । पतञ्जलिना महाभाष्ये 'स्वागतादीनाञ्च'[२७४] इत्यत्र 'व्यड' इति स्वागतादिगणे पठितः । काशिकावृत्तौ 'व्यडस्यापत्यं पुमान्' इत्युदाहृतम् । शाकलप्रातिशाख्ये अस्योल्लेखो दृश्यते । सुपद्मे सूचितम् – 'यणा व्यवधानं व्याडिगालवयोः' इति । लघुवृत्तौ पुरुषोत्तमदेवेन 'इकं यण्भिः व्यवधानं व्याडिगालवयोरिति वक्तव्यमि'ति । जयादित्येन व्याड्युपज्ञं दुष्करणम् (अष्टा.–२/४/२१) इति, तन्त्रप्रदीपे उक्तं व्याडिराचार्यः स्वस्मिन् व्याकरणे युगपत्कालभाविनां विधीनां मध्ये दशदुष्करणानि कृत्वा परिभाषितवान् प्रथमं भूताख्यं पश्चात् वर्तमानादिकं कालमिति । हरदत्तेनाप्युक्तम् 'आन्यायादुत्थानादित्यादिकालपरिभाषायुक्तं व्याकरणं दशदुष्कराणि विधाय कृतवान्' इति । त्रिकाण्डशेषे पुरुषोत्तमदेवेनाकलितं व्याडिः विन्ध्यास्थो नन्दिनीसुतः । अतः नन्दिनी दाक्षिपत्नी, आचार्यपाणिनेः मातुलानी च । 'सिद्धे शब्दार्थसम्बन्धे'[२७५] इति वार्तिकस्य भाष्यदीपिकायां भर्तृहरिणालोचितम् – 'संग्रहोऽप्यस्य शास्त्रैकदेशः, तत्रैकतन्त्रत्वात् व्याडेश्च

---

१२९. व्याडिकृतपरिभाषासूचनम्, प्रारम्भे ।

१३०. महाभाष्यम्, पस्पशाह्निकम्, प्रारम्भे ।

१३१. अष्टा. – ७/३/७ ।

१३२. महाभाष्यम्, प्रथमाह्निकम्, भाष्यवार्तिकम् ।

प्रामाण्यादिहापि तथैव सिद्धपद उपात्तः' इति । नागेशभट्टेन 'संग्रहो व्याडिकृतो लक्षश्लोकसंख्यो ग्रन्थः प्रसिद्धः' इत्युक्तम् ।

आचार्येण पतञ्जलिना वहुत्र 'असिद्धं बहिरङ्गमन्तरङ्गे', 'या असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे', 'येन नाप्राप्ते', 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इत्यादीनामालोचनावसरे "अन्तरङ्गत्वात् सिद्धम्, न वा बहिरङ्गलक्षणत्वात्, अपवादत्वात्, सन्निपातलक्षणत्वात् सिद्धम् इत्यत्र हेतुमात्रोल्लेख्यादनुमीयते यत् तस्मिन् समये असिद्धादिपरिभाषाः विद्वत्समाजे पूर्णतः प्रचलिताः आसन् ।

आचार्यव्याडिना पूर्वाचार्याणां परिभाषाणां समाकलनं कृतम् । पतञ्जलिना ताः परिभाषाः शास्त्रानुगं विचार्य्य महाभाष्ये सन्निविष्टाः, कुत्रापि खण्डिताः । यथा व्याडिकृतसन्निपातपरिभाषा पतञ्जलिना 'तस्मात् प्रयोजनं मृग्यम्' इत्युक्त्वा खण्डिता । पुनः 'कृन्मेजन्तः' इत्यत्र भाष्ये भाषितम् – "एषा परिभाषा कर्तव्या । कः पुनरत्र विशेषः – एषा वा परिभाषा क्रियते, अनन्यप्रकृतिरिति वोच्येत? अवश्यमेषा परिभाषा कर्तव्या बहून्येतस्याः परिभाषाया प्रयोजनानि"[२७६] इति । अतः भाष्यकारेणापि व्याडिकृतपरिभाषा पर्यालोचिता । केचित्तु व्याख्यानतो विशेषप्रतिपत्तिरित्यादिसर्वपरिभाषा व्याडिमुनिना विरचिता इत्याहुः । वस्तुतस्तु नानाचार्याणामिमानि वचनानि पूर्वोदाहृतलण्सूत्रादिगततात्पर्य–ज्ञापकेभ्य इष्टसिद्धये केवलं पाणिन्यादिमुनित्रयेण उररीक्रियन्ते । अतएवानिष्टप्रसक्तौ नैषामभ्युपगम इति ज्ञापकसिद्धं न सर्वत्रेति परिभाषाया न्यायसिद्धार्थानुवादकत्वमिति न परिभाषावशादनिष्टापादनं सांप्रतिमिति सकलेष्टसिद्धिरिति । आचार्यव्याडिना न केवलं ज्ञापकसिद्धा अपि तु काश्चित् लोकसिद्धाः परिभाषाः स्वीकृताः । तेनोक्तं 'सत्यपि सम्भवे बाधनं भवति कुतः, लोके दृष्टत्वात् । एवं दृश्यते लोके ब्राह्मणेभ्यो दधि दीयताम्, तर्कं कौण्डिन्यायेति सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति । अस्ति च सम्भवः यद्दधिकौण्डिन्यायो दीयते तक्रं च । सत्यपि सम्भवे बाधनं भवति । किमेतस्या ज्ञापने प्रयोजनम् । सर्वनाम्नोऽकज् विधीयमानोऽधिकृतं कं बाधते । अस्ति च सम्भवो यदुभयं पर्यायेण स्यात्"[२७७] इति ।

परिभाषासूचने प्रायः द्वाविंशतिपरिभाषाः इष्टानिष्टप्रयोगाणां याथार्थ्यं सम्पादयति । यथा लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्" इति । एतासु तिस्रः परिभाषाः

---

१३३. महाभाष्यम् – १/१/३९ ।

१३४. परिभाषासूचनम्, परि. – २२ ।

भाष्यातिरिक्ताः तद्यथा 'औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणम्', 'वसुप्रवृत्त्या सह शास्त्रे कार्यं भवति', 'एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य चे'ति । त्रयोदशपरिभाषाः पाणिनिसूत्रैः सिद्धानां शब्दानां विशेषतो विश्लेषणं ग्रहणाग्रहणविषयं ज्ञापयन्ति । 'न वर्णग्रहणेषु', 'कृत्रिमाकृत्रिमयोरुभयगतिर्भवति', अनभिधानलक्षणाः कृत्तद्धितसमासाश्च चेत्यादिपरिभाषाः महाभाष्यकारेण भिन्नशब्दैः प्रकाशिताः । एकादशपरिभाषासूत्राणि सूत्रोक्तशब्दानां स्वसदृशशब्दानाञ्च बोधकत्वं भवन्ति । तेषु 'उच्चरितप्रध्वंसिनोऽनुबन्धाः', 'उदित् स्ववर्गमेव गृह्णाति', 'न सवर्णमात्रम्', 'प्रकृतिग्रहणे यङ्लुङन्तस्यापि ग्रहणम्', 'प्रकृतिग्रहणे णिजन्तस्यापि ग्रहणम्' चेति महाभाष्ये नोच्चारिता । प्रायः चत्वारिंशत् परिभाषाः सूत्राणां बलाबलत्वं प्रकाशयन्ति । तासु प्रायः षड्विंशतिसंख्यकाः परिभाषाः भाष्ये उपस्थिताः । यथा 'समानाश्रयमसिद्धं व्याश्रयं सिद्धं भवति', 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्', 'एकानुबन्धकृतमनित्यम्' चेति ।

व्याडिकृतं परिभाषासूचनं परिभाषापाठञ्चानुसृत्य रचितः शाकटायनपरिभाषापाठः चान्द्रपरिभाषापाठश्चेति प्राचीनतमः । उभयत्र प्रथमा परिभाषा 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'[२७८] इति । तत्र व्याडिः 'अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्तीत्युवाच। तदनुसृत्य अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्तीति शाकटायनपरिभाषापाठेऽस्ति । शाकटायनपरिभाषापाठे 'अर्थवद्ग्रहणे' इति परिभाषायाः अपवादरूपेण 'न वर्णग्रहणेषु' इति व्याडिमतमनुसृत्यापि 'अनिनस्मन्ग्रहणानि' इत्युल्लिखितम् । असंज्ञकव्याकरणत्वात् चान्द्रपरिभाषासूत्रेषु संज्ञाशब्दान् परिर्वत्य व्यवहृता । यथा 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इत्यत्र नामग्रहणे लिङ्गविशिष्टस्यापि इति, भवति च 'बहुव्रीहौ तद्गुणसंविज्ञानमि'ति इत्यत्र अन्यार्थे 'तद्गुणसंविज्ञानमपि' इति, 'संज्ञापूर्वको विधिरनित्यः', 'संज्ञाविधौ तदन्तविधिर्नास्ति' चेत्यत्र क्वापि परिभाषा नोल्लोखिता । 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति चान्द्रपरिभाषायामन्तिमपरिभाषा–मवलोक्य मन्यते तत्र स्वरसम्बन्धिसूत्रमासीत् ।

दुर्गासिंहेन कातन्त्रपरिभाषावृत्तिः रचिता । तत्रादौ 'एकदेशविकृतमनन्यवत्' अन्तिमे च 'व्याख्यानतो विशेषप्रतिपत्तिः . .' इति परिभाषावतारिता । तत्र लौकिकपरिभाषा शास्त्रीयपरिभाषा चेति द्विविधा स्वीकृता । शास्त्रीयपरिभाषा लिङ्गवती विध्यङ्गशेषभूता चेति ।

---

१३५. चान्द्रपरिभाषासूत्राणि, परि. – १ ।

आचार्यभोजदेवः परिभाषासूत्रं रचितवान् । तत्र ११९ संख्यकपरिभाषासूत्राणि सन्ति । तत्रादौ ‘स्वं रूपं शब्दस्याशब्दसंज्ञा’ (भोज – १/२/१८), ‘अन्तिमे च प्रत्ययः परः’ (भोज – १/२/१३५) चेति सूत्रे विद्येते । ‘अर्थवद्ग्रहणे नानर्थकस्य’ (भोज – १/२/३४), ‘व्याख्यानतो विशेषप्रतिपत्तिः’ (भोज –१/२/१३३) इत्येतयोः उल्लेखोऽस्ति । महाभाष्योनुक्तत्वात् नागेशभट्टेन यानि परिभाषासूत्राण्यनुल्लिखितानि तैषु ‘प्रकृतिग्रहणे यङ्लुगन्तस्य’ (भोज–१/२/३८), ‘सर्वेभ्यो लोपः’ (भोज–१/२/११६) इत्यादीनामुल्लेखो विहितः । यानि अतिदेशसूत्ररूपेण पाणिनीये दृश्यन्ते यथा ‘स्थानिवदादेशोऽनल्विधौ’ (भोज–१/२/४३), ‘अचः परस्मिन् पूर्वविधौ’ (भोज–१/२/४४), ‘न पदान्तद्विर्वचन’ (भोज–१/२/४५), ‘द्विर्वचनेऽचि’ (भोज–१/२/५०) चेति परिभाषारूपेण भोजदेवेन स्वीकृताः । आचार्यकात्यायनस्य बहूनि वार्तिकानि परिभाषात्वेन तेन निर्दिष्टानि । तद्यथा ‘न पदान्तस्य’ वार्तिकम् – ‘स्वरदीर्घयलोपेषु लोपः’ (न स्थानिवत्) (भोज–१/२/४६), ‘पूर्वत्रासिद्धे चासंयोगादिलोपलत्वणत्वेषु’ (भोज–१/२/४८) इति चान्द्रव्याकरणस्य सूत्राणि परिभाषारूपेणोपन्यस्तानि । तद्यथा – ‘सप्तम्या निर्दिष्टे पूर्वस्य’ (भोज–१/२/२८), ‘पञ्चम्या परस्य’ (भोज–१/२/२९), ‘शिदेकाल्सर्वस्य’ (भोज–१/२/३४), ‘टकितावाद्यन्तौ’ (भोज– १/२/३५), ‘ऋकोऽणोरलौ’ (भोज–१/२/३७) चेति ।

आचार्यव्याडेः परं पाणिनीयव्याकरण्स्य पुरुषोत्तमदेवकृता लघुपरिभाषावृत्तिः सर्वमान्या । तत्र प्रामुख्येन लौकिकशब्दानामेवालोचना विहिता, वैदिकप्रक्रियास्वरसम्बन्धि–सूत्रमनुवृत्तिज्ञानायोपस्थापितम् । तत्र ललितानाम्नी वृत्तिः उपन्यस्ता । आदौ ‘अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्’ इति परिभाषालोचनावसरे परिभाषाणां वर्गीकरणं विहितम् । तेनोक्तम् – “इह चा काश्चित् परिभाषा न्यायमूलाः । यथेयमेवार्थग्रहणे इति । अर्थप्रतिपादनाय खलु शब्दान्वाख्यानमित्यनर्थकोपादानस्यायुक्तत्वात् । काश्चित्तु वचनमूलाः यथा लुग्विकरणा–लुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति । उभयीनामासां परिभाषाणां पाणिनीय–सूत्राणामिव यद्यपि पृथमेव प्रामाण्यमिष्यते, विधिनिग्रहाविष्टाः सूत्रसूत्रैकदेशान्यथानुप–पत्तिलक्षणेन ज्ञापकेनैव ताः प्रमाणयन्ति”[२७९] इति । तत्रैव परिभाषाविभागाः प्रदर्शिताः ।

पुरुषोत्तमदेवेन परिभाषाश्रयणविषये भणितम् – ‘अगत्या नु परिभाषाश्रीयते’ इति । तत्र पाणिनीये शब्दानुशासने यत्रैव क्वचिदिष्टविषये मुख्यलक्षणेनासिद्धिः तत्रैवैता

१३६. लघुपरिभाषावृत्तिः, परि. – १ ।

गत्यन्तरमपश्यद्भिरश्रीयन्ते, न तु यत्रैतासां समाश्रयणे दोष एव प्रत्युपपद्यते तत्रैताः समाश्रीयन्ते" इति ।

लघुवृत्तौ अन्तिमा परिभाषा 'भवति व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षणम्" इति । कुत्रापि 'भवति' पदं न लक्ष्यते, पुरुषोत्तमदेवकृते परिभाषापाठेऽपि । व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षणमित्येवं पाठः सर्वैराचार्यैः स्वीकृतः । सीरादेवनीलकण्ठ–हरिभास्कर–नागेशाचार्यैः तदीये ग्रन्थे प्रथमापरिभाषारूपेणोल्लेखिता । ललितावृत्तौ परिभाषाणां वर्गीकरणविषये उक्तम् – "इति तावज्–ज्ञापकसिद्धा वचनसिद्धा न्यायसिद्धाश्च काश्चन परिभाषाः, वचनानि च कानिचिद् यथाबोधमस्माभिर्विवृतानि । एवमनया दिशा अन्यान्यपि शब्दक्रियोपयोगन्यायवाक्यानि लिङ्गोदाहरणाभ्यां समनुगन्तव्यानि सन्निहितानि शक्तिशः । तद्यथा । सापेक्षमसमर्थं भवति । नित्यसापेक्षं प्राधानसापेक्षमस्ति'[२८०] इति ।

पुरुषोत्तमदेवपरवर्तिकालिकेनाचार्येण सीरदेवेन बृहत्परिभाषावृत्तिः रचिता । यत्र पुरुषोत्तमदेवेन सारगर्भिता लघुवृत्तिः रचिता, परन्तु सीरदेवेन परिभाषाणां विस्तृतः विचार उपन्यस्तः । तस्य जन्मस्थानादिविषयः सम्यक् न ज्ञायते । नैके मन्यन्ते आसीत् स पूर्वभारतीयः । तदीये ग्रन्थे पूर्वाचार्याणां प्रदत्तं क्रमानुसारं व्याख्यानं विहितम् । महाभाष्ये परिभाषाणां विद्यमानत्वाद् अष्टाध्यायीसूत्रक्रमानुसारं परिभाषासूत्रं पर्यालोचितम् । प्रथमपादः वृद्धिपादः इति नाम्नाभिहितः । तत्र महाभाष्यस्य प्रथमाध्यायस्य प्रथमपादे त्रयोदशपरिभाषाः विद्यन्ते । सीरदेवेन स्ववृत्तौ क्रमेण ता उल्लिखिताः । 'व्याख्यानतो विशेष . . . (१)' इति परिभाषा लण्सूत्रभाष्ये, 'न कार्यी निमित्ततयाश्रीयते'(२) इति 'क्ङिति च' (अष्टा. – १/१/५), 'द्विर्वचनेऽचि' चेति सूत्रे भाष्ये, 'इतरेतराश्रयाण्यपि कार्याणि शास्त्रे प्रकल्पन्ते'(३) इति 'इग्यणः सम्प्रसारणम्'[२८१] इति सूत्रे भाष्ये समुपलभ्यते । अष्टाध्याय्याः प्रथमाध्यायस्य पादचतुष्टयानुसारं वृद्धिपादः, गाङ्कुटादिपादः, भूपादः कारकपादः चेति व्यवस्थिताः । द्वितीयाध्यायस्य समर्थपादः, पूर्वापरपादः, अभिहितपादो, द्विगुपादश्चेति नामकरणं विधत्तम् । भाष्ये अनुपलब्धाः काश्चन प्राचीनपरिभाषा अपि तदीये ग्रन्थे सन्निविष्टाः । तद्यथा[२८२] – 'गौणमुख्य', 'कृत्रिमाकृत्रिम', 'प्रधानाप्रधानयोः प्रधाने

---

१३७. ललितावृत्तिः, परि. – १ ।

१३८. अष्टा. – १/१/५९ ।

१३९. सीरदेवकृतबृहत्परिभाषावृत्तिः ।

कार्यसम्प्रत्ययः', 'उपपदविभक्तेः', 'ज्ञापकसिद्धं न सर्वत्र', 'अगत्या हि खलु पारिभाषाश्चाश्रीयन्ते', 'साहचर्यं', 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' चेति । बृहत्परिभाषावृत्तौ न केवलं महाभाष्यस्य मतमुद्धृतमपि तु काशिकान्यासानुन्यासभागवृत्ति–तन्त्रप्रदीपादिभ्यो मतमुत्कलितम् । बृहत्परिभाषावृत्तेः अनन्तरं नीलकण्ठदीक्षितविरचित–परिभाषावृत्तिः हरिभास्कर–अग्निहोत्रिविरचितः परिभाषाभास्करः चेति समुपलभ्यते । अस्य शोधबन्धस्य चतुर्थाध्याये नागेशकृतपरिभाषेन्दुशेखरस्य पर्यालोचनं करिष्ये ।

# द्वितीयोऽध्यायः

## अन्येषु शास्त्रेषु केचित् पारिभाषिकशब्दाः, तेषाञ्च वैशिष्ट्यम् ।

'परितः सर्वत्र पूर्वत्र परत्र व्यवहिते चानन्तरे च भाष्यन्ते कार्यमनया सा परिभाषा'[२८३], आधुनिकसंकेतः परिभाषा[२८४], परिभाषा तु मर्यादा चेति दृष्ट्या मीमांसान्यायकाव्यादिषु शास्त्रेषु केचित पारिभाषिकाः शब्दाः व्यवह्रियन्ते ये शास्त्रार्थं प्रकाशयितुमवश्यमेव ज्ञातव्याः । परन्तु शास्त्रानुसारि तेषां वैशिष्ट्यं भिन्नम् । अत्र केषाञ्चित् सादृश्यमूलकपारिभाषिकशब्दानां तात्पर्यमुपस्थाप्यते । मीमांसादिशास्त्रे बहवः परिभाषिकशब्दाः सन्निविष्टाः, शास्त्रानुसारं विविधवैचित्र्यार्थं प्रकाशन्ते । तेषु केचिदत्रालोच्यन्ते

**धर्मः**

भ्वादिगणीयात् धृञः मनिनि धर्मशब्दो निष्पन्नः । बह्वर्थकोऽयं धर्मशब्दः सम्प्रदायभेदेन पारिभाषिकः । तथाहि यतोऽभ्युदयनिःश्रेयःसिद्धिः स धर्म इति वैशेषिकाः, सदसत्कर्मणां फलस्वरूपमानववासना धर्मा इति बौद्धाः, देहारम्भपुण्यविशेषेण समुत्पन्नः पुद्गलरूपपरमाणुः धर्म इति जैनाः, विहितकर्मजन्यात्मविशेषगुणः धर्म इति नैयायिकाः । मीमांसकमतन्तु निगदितं लौगाक्षिभास्करेणार्थसंग्रहे 'यागादिरेव धर्मः'[२८५] इति । तत्र एवकारेण बौद्ध्याद्यभिमतस्य चेत्यवन्दनादेः धर्मत्वं व्यवच्छिन्नम् । यजेर्घञि यागशब्दो निष्पन्नः । यज्धातोरर्थो देवपूजादिकम्, तथा 'यज देवपूजासङ्गतिकरणदानेषु' इति धातुपाठे पठितत्वात् । येन यागशब्दस्य देवपूजाद्यनेकार्थकत्वेऽपि मीमांसकमते देवपूजायां रूढः । कुमारिलभट्टेन श्लोकवार्तिके उक्तं –

> 'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।
> तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥

---

१. काशिकापदमञ्जरी, समर्थः पदविधिः – २/१/१

२. न्यायकोशः, शब्दशक्तिप्रकाशिका, उभयावृत्तिधर्मावच्छिन्नसंकेतवती संज्ञा पारिभाषिकी आकाशडित्थादि । उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी । यद्वाधुनिकसंकेतशालि स्यात् पारिभाषिकम् ॥ पृ. – २२–२३ ।

३. लौगाक्षिभास्करकृत – अर्थसंग्रहः । एवमन्यत्र – श्रुतिविरुद्धाचरणजन्योऽधर्मः – तर्कामृतम्, निषिद्धकर्मजन्योऽधर्मः – तत्त्वकौमुदी, निषिद्धक्रियासाध्योऽधर्मः, दुःखासाधारणमधर्मः – तर्कभाषा, नरकादिसकलदुःखानां नारकीयशरीरादीनाञ्च साधनमधर्मः – न्यायसिद्धान्तमुक्तावली ।

श्रेयः साधनता ह्येषा नित्यं वेदात् प्रतीयते ।
तादूप्येण तु धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥'[२८६] इति ।

पार्थसारथिमिश्रेणानुरूपमुदीरितं "यद्यपि गोदोहादि द्रव्यं यागादिक्रिया, नीचैस्त्वादिगुणश्च फलसाधकत्वात् धर्मशब्देनोच्यते, नापूर्वादय इति श्रेयस्करभाष्ये वक्ष्यते, तथापि तेषां फलसाधनत्वेन धर्मत्वात् फलस्य जन्मान्तरादिभावित्वात् धर्मरूपेण प्रत्यक्षविषयत्वं न भवति" इति ।

अर्थसंग्रहे सुष्टु प्रतिपादितम् "अथ को धर्मः, किं तस्य लक्षणमिति चेत् । उच्यते 'यागादिरेव धर्मः' । तल्लक्षणं वेद प्रतिपाद्यः प्रयोजनवदर्थो धर्म इति । प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति । भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति । अनर्थकफलकत्वादनर्थभूते श्येनादावतिव्याप्तिवारणार्थ"[२८७] इति ।

## अनुबन्धः

अनुबन्धः अनु पश्चात् स्वज्ञानोत्तरं बधन्ति आसञ्जयन्ति प्रवर्तयन्तीति इति अनुबन्धाः । पुरुषं अनु पश्चात् बध्नाति स्वज्ञानेन प्रेरयतीति अनुबन्धः । ग्रन्थाध्ययनात् पूर्वं कोऽस्य विषयः? कश्चाधिकारी? न हि प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते का कथा पुनः प्रेक्षवताम् । तदुक्तं कुमारिलभट्टेन मीमांसाश्लोकवार्तिके –

'सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।
यावत् प्रयोजनं नोक्तं तावत् तत्केन गृह्यते ॥
सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥'

अनुबन्धज्ञानाद्धि योग्याधिकारिण्यां ग्रन्थाधीतौ धीः प्रचोदिता भवति । अधिकारी, विषयः, सम्बन्धः प्रयोजनञ्चेत्यनुबन्धचतुष्टयम् ।

व्याकरणशास्त्रे अनुबन्ध इत्संज्ञायोग्यः इत्यर्थकश्चैकः पारिभाषिकशब्दोऽप्यस्ति ।

## विधिः

४. कुमारिलभट्टकृतमीमांसाश्लोकवार्तिकम् ।
५. अर्थसंग्रहः ।

विधीयते कर्तव्यतया बोध्यते अननेति विग्रहेण विपूर्वकात् दुधाङ्धातोः 'उपसर्गे घोः किः'[२८८] इति कौ प्रत्यये विधिशब्दो निष्पन्नः । यः कर्तव्यतया किमपि कर्म विदधाति कर्तव्यत्वेन बोधयति उपदिशति वा स विधिः। स च विधिः अज्ञातार्थज्ञापको भवेत् विधिलक्षणमगादि लौगाक्षिभास्करेण – 'अज्ञातार्थज्ञापको वेदभागो विधिः'[२८९] इति ।

अज्ञातस्य प्रयोजनवतोऽर्थस्य यागादेः ज्ञापकत्वं विधित्वमिति स्वारसिको लक्षणार्थः । अतएव विधिरूपस्य वेदस्य स्वरूपप्रकाशकोऽयं श्लोकः अत्रानुसन्धेयम् –

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥' इति ।

स च विधिः प्रमाणान्तरेणाप्राप्तस्यार्थस्य स्वर्गादिरूपप्रयोजनविशिष्टस्य विधानद्वारा अर्थवान् भवति । तथाहि अग्निहोत्रं जुहुयात् स्वर्गकामः इति यो विधिः स प्रमाणान्तरेणाप्राप्तः । स्वर्गश्च प्रयोजनमिति स्वर्गरूपप्रयोजनविशिष्टस्याग्निहोत्राख्यस्य यागरूपस्यार्थस्य विधानात् विधिलक्षणमत्र सङ्गच्छते । किञ्च, तादृशयागरूपार्थवत्तया सार्थकश्चायं विधिः । स च विधिः बहुविधः तथापि उत्पत्तिविधिः, विनियोगविधिः, अधिकारविधिः, प्रयोगविधिश्चेति प्राधान्येन चतुर्विधत्वं स्वीकृतमर्थसंग्रहे स च विधिरादौ त्रिधा विभक्तुं शक्यः । केवलविधिः, गुणविधिः, विशिष्टविधिश्चेति । केवलविधिर्यथा 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्यत्र विधिमानान्तरेणाप्राप्तं स्वर्गप्रयोजनवद्धर्मं विधत्ते । अग्निहोत्रहोमेन स्वर्गं भावयेत् इति वाक्यार्थः । यत्र कर्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते, स च गुणविधिः । यत्र कर्मभूतस्य यागस्य तथा तत्साधनीभूतस्य होमरूपस्य उभयोरेव प्राप्तिर्नास्ति, तत्र तु विशिष्टं विधत्ते । तथाहि 'सोमेन यजेत' इत्यत्र सोमयागयोरुभयोरेव अप्राप्तत्वात् सोमविशिष्टयागविधानात् । कर्मस्वरूपमात्रबोधको विधिः उत्पत्तिविधिः । यथा 'अग्निहोत्रं जुहोति' अत्र विधौ कर्मणः करणत्वेनान्वयः । 'अग्निहोत्रहोमेन इष्टं भावयेत्' इति । अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः । कर्मजन्यफलसाम्यबोधको विधिः अधिकारविधिः । स च 'यजेत स्वर्गकामः' इति । प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः । यथा 'यजेत स्वर्गकाम' इत्यत्र स्वर्गार्थको यागः प्रमाणान्तरेणाप्राप्तः । नानासाधनसाध्यक्रियायामेकसाधनप्राप्तौ अप्राप्तस्य अपरसाधनस्य प्रापको विधिः नियमविधिः । उभयोश्च युगपत् प्राप्तौ इतरव्यावृत्तिपरो विधिः

---

६. अष्टा. – ३/३/९२ ।

७. लौगाक्षिभास्करकृत – अर्थसंग्रहः ।

परिसंख्याविधिः । यथा 'पञ्च पञ्च नखा भक्ष्याः' इति । इदं हि वाक्यं न पञ्चनखभक्षणपरं तस्य रागतः प्राप्तत्वात् । नापि नियमपरः पञ्चनखभक्षणस्य युगपत् प्राप्ते पक्षे प्राप्त्यभावात् । तदुक्तं कुमारिलभट्टेन –

> विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयाते ॥ इति ।

**भावना –**

भावनाशब्दोऽयं बह्वर्थकोऽपि मीमांसायामर्थविशेषे रूढः । भावनालक्षणमुदीरितमर्थसंग्रहे 'भावना नाम भवितुर्भवनानुकूलो भावयितुं व्यापारविशेषः'[२१०] इति । भवितुः उत्पद्यमानस्य उत्पत्त्यनुकूलो भावनेत्यर्थः । यथा उत्पद्यमानस्य ओदनस्य उत्पत्त्यनुकूलः प्रवर्तकस्य चैत्रस्याभिप्रायविशेषः वैदिकञ्चोदाहरणं 'यजेत स्वर्गकामः' इत्यत्रोत्पद्यमानस्य धात्वर्थस्य स्वर्गस्य उत्पत्त्यनुकूलः स्वर्गकामस्य व्यापारः । उत्पद्यमानायाश्च स्वर्गकामगतायाः प्रवृत्तेः । सा च भावना द्विविधा शाब्दी आर्थी चेति ।

**प्रकृतिविकृतिलक्षणम् –**

व्याकरणमीमांसाशास्त्रयोः प्रकृतिविकृतिशब्दद्वयमुपलभ्यते । व्याकरणदिशा पञ्चमाध्याये व्याख्यायते । मीमांसादिशा 'यत्र समग्राङ्गोपदेशः सा प्रकृतिः । यथा दर्शपूर्णमासादिः । तत्प्रकरणे सर्वाङ्गपाठात् । यत्र न सर्वाङ्गोपदेशः सा विकृतिः । यथा सौर्यादिः'[२११] इति । सौर्ययागे प्रकृतिवद्विकृतिः कर्तव्या इति । अर्थात् दर्शपूर्णमासयागे सर्वेषां अङ्गोपाङ्गानां व्यवहारो दृश्यते । सूर्यादियागे दर्शपूर्णमासयागाङ्गानामुपकर्षणं भवति । अतः नियमानुसारेण तत्र कतिपयसाङ्गानामतिदेशेन प्राप्तत्वात् सौर्यादियागः विकृतिपदवाच्यः ।

**संदंश :**

---

८. लौगाक्षिभास्करकृत – अर्थसंग्रहः ।
९. लौगाक्षिभास्करकृत – अर्थसंग्रहः ।

मीमांसानये एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वं 'संदंशः' इति नाम्नाभिधीयते । तद्धि 'समानयते जुह्वाम् उपभृतस्तेजो वा इत्यादिना प्रयाजानुवादेन किञ्चिदङ्गं विधाय विधीयते 'यस्यैवं विदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भातृव्यान्तुदतेऽभिक्रामं जुहोत्यभिजित्यै इति, तदनन्तरं 'यो वै प्रयाजानां मिथुनं वेद' इत्यादिना किञ्जिदङ्गं विधीयते । अतः प्रयाजाङ्गमध्ये विहितमभिक्रमणं तदङ्गम् । प्रयाजैरपूर्वं कृत्वा यागोपकारं भावयेदिति ज्ञाते कथमेभिरपूर्वं कर्तव्यमिति कथंभावाकाङ्क्षायाः सत्त्वात् । सा च संदंशपठितैरभिक्रमणादिभिः शाम्यति । तथा चोक्तं 'परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः । ज्ञाते पुनश्च तैरेव संदंशेन तदिष्यते' ॥ इति

यज्ञविधौ मन्त्रार्थज्ञानाय उत्सर्गापवादविधिनियमाय शौनकीये ऋग्वेदप्रातिशाख्ये काश्चन परिभाषाः दृश्यन्ते ।

## १. 'न्यायैर्मिश्रानपवादान् प्रतीयात्' ।[२९२] ।

न्याया उत्सर्गाः महाविषया विधयः । अपवादा अल्पविषया विधयः । तान् उत्सर्गैर्मिश्रान् एकीकृतान् जानीयात् । अपवादविषयं मुक्त्वोत्सर्गाः प्रवर्तन्त इत्यर्थः । स्पर्शाः पूर्वे 'व्यञ्जनान्युत्तरान्यास्थापितानामवशं गमः तत्'[२९३] इति सन्धिविषये उत्सर्गः । 'घोषवत्पराः प्रथमस्तृतीयान् स्वान्'[२९४] इत्यपवादः । एष स्य स च स्वराश्च पूर्वे भवन्ति । 'व्यञ्जनमुत्तरं यदेभ्यः'[२९५] इत्युपसर्गः, अस्य स्वयमेवापवादमाह 'मामवशा इति चैवापवादान्'[२९६] इति । अनुलोमानामन्वक्षरसन्धीनाम् अपवादान् इति । एतेनावगम्यते यत् अपवादविधयः साधारणविधिषु अन्तर्यान्तीति सूचयति ।

## २. सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम्[२९७] ।

---

१०.शौनकीयऋग्वेदप्रातिशाख्यम् – १/५३ ।
११. तत्रैव – ४/१ ।
१२.तत्रैव – ४/२ ।
१३. शौनकीय–ऋग्वेदप्रातिशाख्यम्, २/८ ।
१४. तत्रैव – १/६० ।
१५. तत्रैव – १/५४ ।

सर्वं च तच्छास्त्रम् सर्वशास्त्रम् । तस्यार्थः सर्वशास्त्रार्थः । तं सर्वशास्त्रार्थम् उत्सर्गत्वेन पुरस्कृत्य तस्यैवापवादत्वेन प्रतिकण्ठमुक्तं जानीयात् । प्रतिकण्ठशब्देन निपातनमुच्यते । तदुक्तं भाष्ये 'निपातनं नामाचार्योच्चारणमुच्यते'[२९८] । बालमनोरमायामुक्तं प्रातिस्विकविधिं विना सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशो निपातनम्[२९९] इति । 'नू इत्था ते'[३००] इति ऋग्वेदीयमन्त्रः । 'नू + उत्था' 'न्वित्था' इति प्राप्ते क्षैप्यसन्धेरपवादो दीर्घत्वं निपात्यते । अतः 'नू इत्था ते सानो अव्ये वो अस्मे वासौ वेद्यस्याम् । धिष्णयेमे नू अन्यत्रा चित् पादादौ नू इन्द्रोत्यर्वाक'[३०१] इत्यत्र मन्त्रे दृश्यते सूत्रकारः स्वयमेवेत्युक्तम् 'नू इत्था' इति । परि इतः + सिञ्चत इत्यत्र इत सिञ्चत इत्युचितम् । परन्तु 'परीत षिञ्चत'[३०२] इति इतः सिञ्चत इति प्राप्ते विसजर्नीयस्य सौपधस्यौत्वं निपात्यते । परस्य च षत्वम् । यद्यपि शास्त्रे 'न्वित्था इत्येवं स्थातव्यं निपातनात् सन्धिर्न भवति ।

## ३.स्थानप्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे स्वराणां ह्रस्वदीर्घौ सवर्णौ[३०३] ।

'कण्ठोऽकारः'[३०४] इत्यादिस्थानोपदेशः । कण्ठस्थानोऽकारवर्णः प्रत्येतव्यः । 'समानाक्षरे सस्थाने'[३०५] इत्यादि प्रश्लेषोपदेशः । समानाक्षरे समानस्थाने दीर्घमेकमुभे अपि स्वरमापद्येत । एतस्मिन्नुभयरूपे स्वराणामुपदेशे सति यत्र ह्रस्वस्वर आदिश्यते तत्रोभावपि ह्रस्वदीर्घौ सवर्णौ प्रत्येतव्यौ । 'कण्ठोऽकारः' इत्युक्ते ह्रस्वदीर्घावपि गृह्येत । उपलक्षणार्थं चैतत् । तथाहि 'अधः स्विदासी३त्'[३०६] इत्यादीनां प्लुतानां तालुस्थानं भवतीति । तथा 'इकारोदय एकारमकारः सोदयः'[३०७] इत्युक्ते ह्रस्वदीर्घावपि गृह्यते । स्थानप्रश्नेषोपदेश इति

---

१६.. महाभाष्यम्, 'निपात एकाजनाङ्' – १/१/१४ ।
१७. वैयाकरणसिद्धान्तकौमुदी, सूत्रम् – ६५ ।
१८. ऋग्वेदः – १/१३२/४ ।
१९. शौनकीय–ऋग्वेदप्रातिशाख्यम्, – २/७० ।
२०. तत्रैव – ९/१०७/१ ।
२१. शौनकीय–ऋग्वेदप्रातिशाख्यम्, – ९/५५ ।
२२. तत्रैव – १/३८ ।
१३. तत्रैव – २/१५ ।
२४. ऋग्वेद – १०/१२९/५ ।
२५. शौनकीय–ऋग्वेदप्रातिशाख्यम्, – २/१६ ।

किम्? 'ह्रस्वपूर्वस्तु सोऽकारम्'[३०८] इति ह्रस्व एव गृह्यते । अतः स्थान प्रश्लेषोपदेशकाले ह्रस्वे उल्लिखितेऽपि ह्रस्वदीर्घौ ग्रहणीयौ ।

### ४.असावमुमिति तद्भावमुक्तं यथान्तरम्[३०९] ।

असौ इति प्रथमानिर्दिष्टस्य ग्रहणम् । अमुम् इति द्वितीयानिर्दिष्टस्य । यत्रासौ वर्णोऽमुम् इत्येवं वक्ष्यति तत्र तद्भावमुक्तं जानीयात् । तदित्यनेन द्वितीयानिर्दिष्टं परामृश्यते । तेन रूपेण भवनं  तद्भावः । स च प्रथमानिर्दिष्टस्य भवति । तं च तद्भावं यथान्तरं जानीयात् । यो यस्यान्तरः सन्निकृष्टः स्थानकरणानुप्रदानैः स तस्य भवति । यथा 'समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्'[३१०] इति । तव अयम् । 'तवायम्'[३११] इत्यत्रासावमुमिति तद्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्येत । तं च यथान्तरमिति कृत्वा उकारमेवापद्येते । मधु उदकम् । 'मधूदकम्'[३१२] अत्रासावमुम् इति तद्भावमुक्तमिति द्वावकारौ दीर्घमेकं स्वरमापद्येत । तञ्च यथान्तरमिति कृत्वा ऊकारमेवाप्येत । एवम् 'इकारोदय एकारमकारः सोदयः'[३१३] इत्यनेन इकारपरोऽकार एकारमापद्यते । सोदयः सह परेणाकारेण । 'एन्द सानसिं रयिम्'[३१४], 'एमेनं सृजता सुते'[३१५] इति । एवञ्च 'समानाक्षरमन्तस्थां स्वामकण्ठ्यं स्वरोदयम्'[३१६] समानाक्षरमुक्तलक्षणमन्तःस्थामापद्यते । अकण्ठ्यं कण्ठ्यरहितमकारा– काराभ्यां विना । स्वरोदयं स्वरपरम् । यथा 'अभ्यार्षेयं जमदग्निवन्नः'[३१७] ।

**अभिधा –**

---

२६. .तत्रैव – २/२७ ।
२७. तत्रैव – १/५६ ।
२८. तत्रैव – २/१५ ।
२९. ऋग्वेदः – ३/३५/६ ।
३०. तत्रैव – ९/६७/३२ ।
३१. शौनकीय–ऋग्वेदप्रातिशाख्यम्, २/१६ ।
३२. ऋग्वेद – १/८/१ ।
३३. तत्रैव –  १/९/२ ।
३४. शौनकीय–ऋग्वेदप्रातिशाख्यम्,ऋ. २/२१ ।
३५. ऋग्वेद – ९/९७/५१ ।

मीमांसादिसर्वेषु शास्त्रेषु पदमिति परिभाषिकशब्दो व्यवह्रियते । अर्थबोधकारणरूपं हि पदम् । तदुक्तं

'स्वार्थो द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च ।
'अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥' इति ।[३१८]

अतो केषाञ्चिन्मते पदं पञ्चकं, ततोऽधिकमपि मन्यते । पाणिनिनये 'सुप्तिडन्तं पदमि'ति[३१९] । निरुक्तकृतोक्तं "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च[३२०] इति । अपि चोक्तं 'नैकं पदजातं यथा अर्थः पदमैन्द्राणामिति । नापि द्वे, यथा – सुबन्तं तिङ्न्तञ्च । नापि त्रीणि निपातोत्सर्गाविकतः कृत्वा । नापि पञ्च षड् वा, यथा गतिकर्मप्रवचनीयभेदेनेति इति । व्यक्तिविवेके महिमभट्टेन पञ्चविधत्वं स्वीकृतम् । मम्मटविश्वनाथादयः त्रैविध्यं स्वीकृतम् । तदुक्तं 'स्याद्वचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा'[३२१] इति । अपि च

"वाच्योऽर्थोऽभिधा बोधो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥"[३२२] इति ।

प्रत्येकशब्दस्य प्रसिद्धमुख्यार्थो विद्यते । वाच्यार्थस्याभिधया बोधो जायते । 'अभिधा' संकेतेनाप्यभिधीयते । संकेतो नाम शक्तिग्राह्यः 'अस्माच्छब्दादयमर्थो बोधव्य' इत्याकारक ईश्वरेच्छारूपः स्वाभाविको वा[३२३]। प्रभाकरमतानुयायी वाचकः रूढयौगिकभेदेन द्विधा बिभज्यते । जगदीशतर्कालङ्कारनये वाचकः त्रिधा भवति । तदुक्तं

"रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम् ।

---

३६. तुलनीयम् – कौण्डभट्टकृतवैयाकरणभूषणसारः –
'एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकस्तथा ।
नानार्थ इति सर्वेऽमी पक्षाः शास्त्रे व्यवस्थिताः ॥'
व्यक्तिविवेकः, प्रथमविमर्शः – तत्र पदमनेकप्रकारः नामाख्यातोपसर्गनिपातकर्मप्रवचनीयभेदात् ।
काव्यप्रकाशः, उल्लासः २ – स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।
३७. अष्टा. – १/४/१४ ।
३८. निरुक्तव्याख्या, नैघण्टुकाण्डम् ।
३९. मम्मटाचार्यकृतकाव्यप्रकाशः, द्वितीय उल्लासः ।
४०. विश्वनाथकृतसाहित्यदर्पणः, परि. २, का. – ३
४१. अनुरूपं–सिद्धान्तमुक्तावली – 'शक्तिश्च पदेन सहपदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोधव्य
इतीश्वरेच्छारूपा ॥' भर्तृहरिणा – आजानिकश्चाधुनिकः संकेतो द्विविधो मतः । नित्य आजानिकस्तत्र या
शक्तिरिति गीयते ॥

तच्चतुर्था परै रूढयोगिकं मन्यतेऽधिकम् ॥" इति ।

अप्ययदीक्षितेन वृत्तिवार्तिके उक्तं – 'शक्त्या प्रतिपादकत्वमभिधा । सा त्रिधा रूढिर्योगो योगरूढिश्च' इति । लघुमञ्जूषायामुक्तं नागेशाचार्येण – 'शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च' इति । सिद्धान्तमुक्तावल्यां – 'शक्तं पदं तच्चतुर्विधं क्वचिद्यौगिकं क्वचिद् रूढं क्वचिद् योगरूढं, क्वचिद् योगिकरूढम्' आह ।

अथ पृच्छयते संकेतस्य ग्रहः कुत्र भवति । तदुच्यते महाभाष्यकारमतमाश्रित्य विश्वनाथेन जातिः, गुणः, द्रव्यं, क्रिया चेत्येषु उपाधिषु संकेतग्रहो भवति इति । भामहेन काव्यालंकारे उक्तं –

"द्रव्यक्रियाजातिगुणभेदात्ते च चतुर्विधाः ।
यदृच्छाशब्दमप्यन्ये डित्थादि प्रतिजानते ॥" इति ।

तथा च 'गोः शुक्लः चलो डित्थः' इत्यादौ 'चतुष्टयी शब्दानां प्रवृत्तिः' इति भाष्यम् । उपाधिः द्विविधः वस्तुधर्मो वक्तृयदृच्छासन्निवेसितश्च, आद्यो द्विधा सिद्धः साध्यश्च । सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो धर्मः, विशेषाधानहेतुश्चः तत्राद्यो जातिः सामान्यरूपा, यथा गोपिण्डादिषु गोत्वादिका । सा च जातिः पदार्थस्य प्राणप्रदा । गोत्वमेव हि गवां गौरिति व्यवहारयोग्यतां सम्पादयति । तदुक्तं वाक्यपदीये 'न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौरिति' । विशेषाधानहेतुः सिद्धो वस्तुधर्मो हि गुणः, यथा शुक्लादयः शुक्लादिना हि लब्धसत्ताकं वस्तु कृष्णादिभ्यो विशिष्यते । साध्ये हि वस्तुधर्मः क्रियारूपपूर्वापरीभूतावयवः । यथा पचतीति । तेन हि चुल्ल्युपरिधारणात् अधःश्रयणपर्यन्तपूर्वापरीभूतो व्यापार उच्यते । वक्तृयदृच्छासन्निवेशितो वस्तुधर्मस्तावत् हरिहरडित्थडवित्थादिः संज्ञारूपः । अयमेव द्रव्यशब्दवाच्य एकव्यक्तिवाची । एष्वेव व्यक्तेरुपाधिषु संकेतो गृह्यते । तथाहि रामः शुक्लां गामानयतीत्यादौ रामपदेन रामपदवाच्ये द्रव्ये । शुक्लपदेन शुक्ले गुणे गोपदेन गोत्वजातौ, आनयतीत्यनेन च आनयनक्रियायां संकेतः । न च जातेरानयनासम्भवात् तत्र कथं सङ्केत इति वाच्यम् । आक्षेपेण व्यक्तिप्रतीतेः । व्यक्तौ तु न कदापि सङ्केतो गृह्यत्ये । रसगङ्गाधकारस्तु – 'शक्याख्योऽर्थस्य शब्दगतः शब्दस्यार्थगतो वा सम्बन्ध विशेषोऽभिधा' इत्याह ।

**लक्षणा** –

**वैयाकरणमते लक्षणा** – शाब्दिका लक्षणां लक्षणशब्देन न मन्यन्ते, वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवात् । अत एवेयं जघन्या वृत्तिः । 'गङ्गायां घोष' इत्यत्र गङ्गादिपदे शक्तिद्वयम् । भगीरथखातावच्छिन्नार्थ निरूपिता प्रथमा शक्तिः । सामीप्यसम्बन्धावच्छिन्नतटत्वा– वच्छिन्नार्थनिरूपिता शक्तिर्द्वितीया । एवञ्च लक्षणया प्रतिपिपादयिषितस्याप्रसिद्धशक्यैव बोधनिर्वाहे कोऽभिनिवेशो लक्षणायां प्रेक्षावताम् । आलङ्कारिकेष्वपि केचन लक्षणया अन्यत्रान्तर्भावं विदधति । तथाहि वामनः – 'सादृश्याल्लक्षणा वक्रोक्तिः' इति । रत्नाकरस्तु रूपकेऽन्तर्भावयति – "सादृश्यप्रयुक्तः सम्बन्धान्तरप्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्यनिर्देशः स एव रूपकम्" इति ।

**आलङ्कारिकमते लक्षणा** – शक्यसम्बन्धसहकारिणी वृत्तिर्लक्षणा । सा च शब्दव्यापारत्वाच्छब्दनिष्ठामुख्यार्थबाधे सति तत्सम्बधिनमर्थं विषयीकरोति । तदुक्तं काव्यप्रकाशद्वितीयोल्लासे –

"मुख्यार्थबाधे तद्योगं रूढितोऽर्थ प्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥"[३२४] इति ।

तदुक्तं साहित्यदर्पणे –

'मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥'[३२५] इति ।

सम्बन्धश्च मुख्यार्थे प्राधोन्येन वर्तमानोऽपि लक्ष्यार्थमाश्रयति । शक्यसम्बन्धो यद्यपि शब्देऽपि वर्तते तथापि लक्षणायामप्रयोजकः । यद्यपि 'काकेभ्यो दधि रक्ष्यताम्', 'छत्रिणो

---

४२. काव्यप्रकाशः द्वितीय उल्लासः, का. ९ ।

४३. साहित्यदर्पणः, परि. २, का. ५ । रूढावुपादानलक्षणा यथा 'श्वेतो धावति' । प्रयोजने यथा – 'कुन्ताः प्रविशन्ति' । अनयोर्हि श्वेतादिभिः कुन्तादिभिश्चाचेतनतया केवलैर्धावनप्रवेशनक्रिययोः कर्तृतयान्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्च पूर्वत्र प्रयोजनाभावाद् रूढिः। उत्तरत्र तु कुन्तादीनामतिगहनत्वं प्रयोजनम् ।

यान्ति' इत्यादौ न मुख्यार्थस्य बाधः, तथापि वक्तृतात्पर्यविषयवाक्यार्थबोधाभावोऽभिप्रेतः । आद्ये उपघातकत्वनैव मुख्यार्थस्यान्वयो न तु काकत्वेन । अन्त्ये चैकसार्थप्रवृत्तत्वेनैव मुख्यार्थस्यान्वयो न तु छन्नित्वेनैति नाव्याप्तिः । यत्र तु काकमात्रे तात्पर्यं तत्र नैव लक्षणा । एतेन तात्पर्यानुपपत्तिरेव लक्षणाबीजम्, न त्वन्वयानुपपत्तिरिति सूचितम् । यद्यपि 'यष्ठीः प्रवेशय', 'गङ्गायां घोषः' इत्यादावुभयापेक्षादर्शनात् विनिगमनादिविरहः तथापि 'गङ्गायां घोषः' इत्यत्र वक्तृतात्पर्याभावे घोषपदे एव, मीने लक्षणा किं न स्यात् कुतश्च गङ्गापदेऽपि स्वार्थसम्बन्धिनौकादौ न लक्षणा । तावताप्यन्वयानुपपत्तिशान्तेः । अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमित्याहुरालङ्कारिकाः ।

**नैयायिकमते लक्षणा** – शक्यसम्बन्धा लक्षणा । तत्र तात्पर्यानुपपत्तिरेव बीजम् । वाक्ये तु शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नास्ति । यत्र 'गभीरायां नद्यां घोषः' इत्युक्तम्, तत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या महाभेदेनान्वयः, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात् । यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकम् ।

**मीमांसकमतेन लक्षणा** – स्वबोध्यसम्बन्धो लक्षणा[३२६] । 'गङ्गायां घोषः' इत्यादौ गङ्गापदबोध्यस्य प्रवाहस्य सम्बन्धतीरे इति तत्र लक्षणा । गम्भीरायां नद्यामिति वाक्यस्य बोध्या गम्भीराभिन्ना नदी, तत्सम्बन्धस्तीरे इति वाक्येऽपि लक्षणा । एवं समासात्मके चित्रगुरिति वाक्ये चित्रगुपदस्यावयवशक्त्या चित्राभिन्ना गौः स्वबोध्या । स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात् तत्सम्बन्धस्य स्वामिनि सत्त्वादित्याहुः ।

**व्यञ्जना** –

**आलंकारिकमते व्यञ्जना** – मुख्यार्थबाधनिग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बन्धासम्बन्ध–साधारणप्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना[३२७] । मुख्यार्थस्य बाधः

---

४४. लघुमञ्जूषा, पृ. – ११८ ।

४५. तत्रैव, पृ. – १३३ । परमलघुमञ्जूषायां नागेशाचार्य आह – 'यत्तु तार्किका लक्षणयैव गतार्था व्यञ्जनेति न

सा स्वीकार्येत्याहुः । तन्न । लक्षणया मुख्यार्थबोधपूर्वकलक्ष्यार्थबोधकत्वात् मुख्यार्थसम्बद्धार्थस्यैव लक्षणया

परस्परसम्बन्धनिरूपकाणां पदार्थानां तात्पर्यविषयीभूतसम्बन्धेनैकपदार्थेऽपर– पदार्थाभावः तन्निरपेक्षो यो बोधस्तज्जनकः । अस्य 'संस्कारविशेषः' इत्यत्रान्वय मुख्यार्थेन सम्बन्धासम्बन्धौ यौ अर्थो तदुभयसाधारणौ यौ प्रसिद्धाप्रसिद्धार्थौ तौ विषयौ यस्य सः । वक्रादेर्वैशिष्ट्यम्–वैलक्षण्यम्, अन्यव्यावृत्तो धर्म इत्यर्थः । तस्य यज्ज्ञानं, तच्च प्रतिभा च ते आदिनी यस्य निपुणताघटितसमूहस्य, तेनोद्बुद्धा या संस्कारविशेषा सा व्यञ्जना । एवञ्च वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्वं फलितम् । प्रतिभा च वक्त्रादिवैशिष्ट्यसहकारेण जन्मान्तरीयतद्बीजनकत्वप्रकारकज्ञानजन्यसंस्कारोद्बोधजबुद्धिरूपा, वासनाविशेषरूपेति यावत् । सैव 'नवनवोन्मेषशालिनी' इत्युच्यते । एवञ्च शक्तिरेतज्जन्मानुभूतैव बोधजनिका व्यञ्जना तु जन्मान्तरगृहीतापि निष्कर्षः । साहित्यदर्पणे उक्तं –

'विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपरः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥'[३२८] इति ।

**शाब्दिकमते व्यञ्जना** – शाब्दिकमतेन व्यञ्जनानामप्येकां तृतीयां वृत्तिमभ्युपगच्छन्ति। तथा चोक्तं नागेशेन – ''मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बन्धासम्बन्धसाधारण । प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना'[३२९] इति । अतएव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च कैश्चन द्योतकत्वञ्च 'क्वचित् समभिव्याहृतपदीयशक्तिव्यञ्जकत्वम्' इति वैयाकरणानामपि तत्स्वीकार आवश्यकः । एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र तथैवानुभवात् । वक्त्रादिवैशिष्ट्यादिज्ञानं व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्ष्यतेऽन्यत्र विस्तरः ।

---

बोधकत्वात्, व्यञ्जनाया अतथात्वेन तदनन्तर्भावाच्चेति दिक्' ।

४६. साहित्यदर्पणः, परि. – २, 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव' इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु
वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु ययान्योऽर्थो बोध्यते, सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशाविषया व्यञ्जना नाम' ।

४७. वैयाकरणसिद्धान्तलघुमञ्जूषा, पृ. – १३३ ।

**तात्पर्यम् –**

'अस्मात् पदादयमर्थो ज्ञातो भवतु' इति प्रयोक्तरि समवायसम्बन्धेन वर्तमानेच्छा तात्पर्यम् । उच्चरितत्वसम्बन्धेनेच्छाप्रकारकम् तात्पर्यम् । उच्चरितत्वसम्बन्धेनेच्छाप्रकारकम्, पूर्वोक्तेच्छयो– च्चरितत्वप्रकारकं वा पदविशेष्यकं शोतृनिष्टं ज्ञानं शाब्दबोधं प्रति कारणमिति निष्कर्षः । ननु सः अर्थः, परः प्रधानः यस्य पदस्येति व्युत्पत्त्या तदर्थस्मारकत्वमेव तात्पर्यं कथञ्चेति चेत्, न, सैन्धवपदनिष्ठस्य लवणाश्वोभयस्मारकत्वस्याभिमतार्थबोधकत्वाभावात् । अतो लक्षणया तात्पर्यपदं वक्तुरिच्छाबोधकम्, न तु श्रोतुरिच्छाबोधकम् । साहित्यदर्पणे तात्पर्यलक्षणमुक्तं – 'तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने इति । अभिधाया एकैकपदार्थबोधनविरमात् वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः' इति ।

भाषापरिच्छेदे उक्तं 'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्' इति । नागेशाचार्येणाकलितं 'नानार्थस्थले लोके तात्पर्यन्तु एतत् पदं वाक्यं वा एतदर्थप्रत्ययाय मयोच्चार्यते इति प्रयोक्तुरिच्छारूपमि'ति । अपि च 'एतद्वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा । तात्पर्यमिति इत्थञ्च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणम् ।

वैयाकरणसिद्धान्तलघुमञ्जूषायास्तात्पर्यनिरूपणप्रकरणे खले कपोतन्यायः नागेशाचार्येण व्यवहृतः । तदुक्तम् 'अत्र श्रौतं तावत् पदार्थज्ञानानामाकाङ्क्षादिज्ञानानाञ्च नष्टत्वेऽपि तेषां समूहालम्बनस्मरणात् तत्संस्काराद्वान्वयबोधः । अयमेव काले कपोतन्यायेन बोधः इति अत्रायमभिप्रायः – शीघ्रविनाशशालिनीनां पदजन्यपदार्थोपस्थित्यादीनां क्रमेणान्वयासम्भवात् सर्वत्र शाब्दबोधेऽन्वयबोधे वा तासां समूहालम्बनात्मिकैव कारणता स्वीकार्या न तु पृथक् पृथक् क्रमेण ।

**शक्तिग्रहः –**

पदसाधुत्वप्रकारकशास्त्रे 'शक्तिग्रह' इति पारिभाषिकशब्दः । शक्तिर्नाम पदेन सह पदार्थस्य सम्बन्धः । सा चास्माच्छब्दादयमर्थो बोद्धव्यः इतीश्वरेच्छारूपा । नव्यास्तु ईश्वरेच्छां शक्तिं न मन्यन्ते इच्छामेव । शक्तिग्रहे सति पदार्थोपस्थितिर्भवति । शक्तिग्रहो नाम अर्थविषये शब्दस्य शक्तिनिश्चयः । तच्च व्याकरणादितो भवति । तथा चोच्यते –

"शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतः ।
वाक्यस्य शेषात् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः" ॥

अर्थात्, एतेभ्य उपायेभ्यं शक्तिग्रहं वदन्तीति । धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति । यथा 'पाको भवति' इत्यत्र भू सत्तायां वर्तमाने लडित्यादिव्याकरणात् सनाद्यर्थे धातोः समुच्चयाद्यर्थे चादिनिपातस्य पाककर्तृकत्वाद्यर्थे पाचकादिप्रातिपदिकस्य एकत्वाद्यर्थे स्वादिप्रत्ययस्य शक्तिग्रहः ।

'गोसदृशो गवयः' इत्यत्र गवयपदं 'गवयो गवयपदवाच्यम्' इत्युपमानात् शक्तिग्रहः । अजरा निर्जरा देवा इत्यादीनां कोषात् देवताद्यर्थे शक्तिग्रहो भवति ।

कोकिलः पिकशब्दवाच्य इत्यादिशब्दात् पिकादिशब्दानां कोकिले आप्तवाक्यात् शक्तिग्रहो जायते । व्यवहारादर्थादनुमानादपि शक्तिग्रहो भवति । यथा – प्रयोजकवृद्धो घटमानयेत्युक्तवान् । प्रयोज्यवृद्धश्च तच्छुत्वा घटामानीतवान् तद्व्यवहारमवधार्य व्युत्पद्यते पार्श्वस्थो बालः – घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमिति ।

एवं वाक्यशेषात् विवरणात् प्रसिद्धपदस्य सान्निध्यात् शक्तिग्रहो जायते ।

**आकाङ्क्षा –**

आकाङ्क्षात्वञ्च वाक्यसमयग्राहिकात्वम् । वाक्यस्य यः समयः संकेतः, तद्विषयकस्य बोधस्य जनिकात्वमित्यर्थः । यत्किञ्चिद्विषयकेच्छापरपर्यायरूपाया आकाङ्क्षायाः वाक्यसमयग्राहिकात्वं न सम्भवतीति तु न शङ्क्यम्, एकपदार्थज्ञाने तदर्थान्वययोग्यस्यार्थस्य यज्ज्ञानं तद्विषयेच्छा 'अस्यान्वयार्थः कः' इत्येवं रूपाया आकाङ्क्षायाः स्वीकारात् । समन्वयश्च घटपटादिपदार्थज्ञानान्तरं तदर्थनिरूपिततात्पर्य–विषयीभूतसम्बन्धेन सम्बन्धरूपयोग्यतावतोऽर्थस्य यज्ज्ञानं तादृशज्ञानविषयिणी या इच्छा ज्ञानविषयविषयिणीति यावत् । साकाङ्क्षा इति । 'एकपदार्थज्ञानान्तरम्' इत्यस्यैकपदार्थमात्रज्ञानान्तरमित्यर्थः तेन यत्र घटामानय इत्यादौ द्वयोः पदार्थयोः जातं तत्रोक्ताया आकाङ्क्षाया अभावात् बोधो न स्यादित्यापादयितुं न शक्यते । अस्ति च तत्राप्येकपदार्थमात्रज्ञाने सेति न कापि क्षतिरिति । न्यायनये साकाङ्क्षा आत्मनिष्ठेव, इच्छारूपायास्तस्य आत्मनिष्ठैव । इच्छारूपायाः तस्याः आत्मनिष्ठत्वस्यौचित्यात् । तथा चोक्तं बुद्ध्यादिषट्कं संख्यादि पञ्चकं भावना तथा । धर्माधर्मौ गुणा एते ह्यात्मनः

स्युश्चतुर्दश ॥ वेदान्तिमते तु अन्तःकरणधर्मत्वम् आकाङ्क्षायाः । 'यत्पदेन विना यस्याननुभावकता भवेत् साकाङ्क्षा' इति । यथा – क्रियापदं विना कारकपदं न अन्वयबोधं जनयतीति तस्याकाङ्क्षा । तदभावाच्च 'गौरश्च पुरुषो हस्ती' इत्यादौ न शाब्दबोधः । वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थं किन्तु घटगतकर्मताबोधं प्रति घटोत्तरं द्वितीयाकाङ्क्षा शाब्दबोधे कारणम् ।

**योग्यता –**

प्रकृतवाक्यघटकैकपदार्थे निरूपितप्रकृतवाक्यघटकापरपदार्थवृत्तिवक्तृतात्पर्यविषयी–भूतसंसर्गवृत्तिधर्मे संसर्गतावच्छेदकत्वाभावो योग्यता, तस्या ज्ञानञ्च शाब्दबोधे कारणम् । भाषापरिच्छेदे उक्तं 'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता' इति । एकपदार्थे अपरपदार्थसम्बन्धो योग्यतेत्यर्थः । वह्निना सिञ्चतीत्यादौ तज्ज्ञानाभावात् न शाब्दबोधः । ननु एतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न सम्भवति, वाक्यस्यापूर्वत्वादिति चेन्न, तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य क्वचित् निश्चयरूपस्यापि योग्यताया ज्ञानस्य सम्भवात् । चिन्तामणिमते तु योग्यताया ज्ञानं शब्दज्ञाने कारणम् । वह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वाभावरूपयोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः । सेके हि वह्निकरणत्वसम्बन्धस्य नास्ति सम्भवः ।

**आसत्तिः –**

सन्निधानं तु पदस्यासत्तिरुच्यते इति । अन्वयप्रतियोग्यनुयोगिपदयोः अव्यवधानमासत्तिः, तज्ज्ञानं शाब्दबोधे कारणम् । अयम्भावः – यत्पदार्थस्य येन पदार्थेन अन्वयोऽपेक्षितः, तयोरव्यवधानेनोपस्थितिर्हि आसत्तिः । द्वयोः पदयोः परस्परमन्वयबोध–जनकत्वे तात्पर्यं, तयोः पदयोः अव्यवधानासत्तिः । तेन 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इत्यादौ न शाब्दबोधः। अत्र हि गिरिरग्निमान् भुक्तं देवदत्तेन इत्यपेक्षितः अन्वयः । नास्ति चात्रापेक्षितान्वयानां पदार्थानां व्यवधानेनोपस्थितिः पदार्थान्तरैर्व्यवहितत्वात् ।

## काव्यशास्त्रे केचित् परिभाषिकशब्दाः

**रसः** – यद्यपि लोके कटुकषायतिक्ताम्ललवणमधुरा इति षड् रसाः भवन्ति । परन्तु काव्यशास्त्रे रसस्तु भिन्नः । वाक्यं रसात्मकं काव्यमिति काव्यलक्षणं श्रूयते । रस एव काव्यस्यात्मा सारभूततया जीवनाधायकः। अतएव रसादिमद्वाक्यत्वं हि काव्यत्वमिति विश्वनाथमतम् । भरताचार्येण रसस्वरूपः निरूपितः – 'विभावानुभावव्यभिचारिभावसंयोगाद्रनिष्पत्तिरि'ति[३३०] । दर्पणकारेण उक्तं–

"विभावेनानुभावेन व्यक्तं सञ्चारिणी तथा ।
रसतामेति रत्यादिः स्थायी भावः चेतसाम् ॥ इति ।

काव्योपस्थापितविभावानुभावयोगेन रत्यादिस्थायिभावो रूपान्तरपरिणतः परमानन्दचमत्कार – रूपतामापन्नः नायकनिष्ठोऽपि ज्ञानसम्बन्धेन सामाजिकनिष्ठः सन् रसो भवतीति सारविदो वदन्ति । तत्त्वञ्च अम्लसम्बन्धेन दुग्धस्य दधिभाव इव सामाजिकेषु विभावादिज्ञानमेव युगपद्रसरूपेण प्रकाशते इति भावः । तदुक्तं दुग्धमेवाम्लद्रव्ययोगेन दध्यादिरूपतया परिणमति । तन्न्यायेन रामादिरत्यादिरेव विभावादिनिष्ठस्वादनाख्यव्यापारेण सामाजिकरत्यादौ अभेदेनारोप्यमाणः स्वप्रकाशानन्दात्मकज्ञानरूपतया निरूपयति' इत्यर्थः । रसस्य ज्ञानरूपत्वे प्राचामपि सम्मतिरस्ति । तदुक्तं लोचनकारैः 'रसाः प्रतीयन्ते इति त्वोदनः पचतीतिवद्व्यवहारः' इति । पाकसम्बन्धेन यथा उदनरूपं प्राप्तस्य तण्डुलस्योदनत्वेन व्यवहारः तथा प्रतीतिसम्बन्धेन रसरूपं प्राप्तायाः रत्यादितादात्म्येनाध्यवसितायाः सामाजिकवासनायाः रस इति व्यवहारः ।

**ध्वनिः** –

ध्वनिशब्दो भौवादिकध्वनशब्दे धातोर्भावे कर्मणि कर्तरि वा इप्रत्यये कृते निष्पन्नः। व्युत्पत्तयश्च क्रमशः एवं वर्तन्ते, भावे प्रत्यये ध्वननं ध्वनिरित्यनया व्युत्पत्त्या व्यञ्जनाव्यापारो ध्वनिशब्दार्थः, कर्मणि प्रत्यये ध्वन्यते यत् तत् ध्वनिरित्यनया व्यङ्ग्यरूपोऽर्थो ध्वनिपदार्थः, कर्तरि प्रत्यये ध्वनतीति ध्वनिरित्यनया च व्युत्पत्त्या वाच्योऽर्थः, वाचकः शब्दश्च ध्वनिपदार्थः । प्रकारेणानेन चतुष्प्रकारा ध्वनिविषयाः, ध्वनिशब्दस्य पञ्चमो विषयः समुदायरूपकाव्यमस्ति, यतो ह्युक्ताः चतुष्प्रकाराः

---

४८. भरतकृतनाट्यशास्त्रम् ।

समुदायरूपकाव्ये भवन्ति, अतएव काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः । अत्र समुदायरूपकाव्ये ध्वनिशब्दस्य व्यवहारः । ध्वन्यालोके उक्तम् –

"यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सुरिभिः कथितः" ॥

वश्च अर्थश्च तौ स्वार्थो शब्दार्थौ तौ गुणीकृतौ याभ्यां, यथासंख्येन तेनार्थो गुणीकृतात्मा, शब्दो गुणीकृताभिधेयः । तदर्थम् – वस्त्वलंकाररसादिषु च व्यञ्जकस्तथापि अर्थस्यापि सहकारिता न क्रुव्यति, यदि अर्थस्य सहकारिता न स्यात्, तर्हि अज्ञातार्थोऽपि शब्दस्तद्व्यञ्जकः स्यात्, विवक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतां विना तस्यार्थस्याव्यञ्जकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः । यत्रार्थः शब्दो वेति विकल्पाभिधानं प्राधान्याभिप्रायेणार्थात् केवलाः शब्दा अर्था वा व्यञ्जका न भवन्ति, अपि तु मिथः साहाय्येन व्यञ्जका भवन्ति, अनेन प्रकारेण भवार्थः प्राधान्येन व्यङ्ग्यव्यञ्जकस्तदार्थस्य सहकारिता, यदा च शब्दो प्राधान्येन रूपेण व्यङ्ग्यव्यञ्जकस्तदार्थस्य सहकारिता । ध्वनिरवश्यमेव काव्यात्मा, परन्तु तेनैव ध्वनिना काव्यव्यवहारो न सम्भवेत् अपि तु ध्वनिना सहैव शब्दार्थयोर्गुणालङ्कारोपस्कृतमवश्यमेव भवेत् । यदि च ध्वनिमात्रे काव्यव्यवहारो स्यात्, तर्हि मीमांसकप्रणीतेषु शास्त्रेषु यत् प्रसिद्धं श्रुतार्थापत्तेः स्थलं तत्रापि काव्यव्यवहारः स्यात्, यथा पीनोऽयं देवदत्तो दिवा न भुङ्क्ते इत्यत्र श्रुतवाक्येन भोजनं विना पीनत्वानुपपत्त्या रात्रिभोजनमनुमीयते तत्र ध्वनिरस्ति, परन्तु गुणालंकारोपस्कृतशब्दार्थयोरभावस्तेन काव्यव्यवहारो न भवति ।

**गुणः –**

काव्यं रीत्यात्मकम् । विशेषवती पदरचना रीतिः । विशेषश्च गुणात्मकः । तेन प्रकृत्या गुण एव काव्ये उपादेयताप्रयोजकः इति गुणादानं काव्ये आवश्यिकम् । कोऽसौ गुणः तदुक्तं वामनाचार्येण– 'काव्यशोभायाः कर्तारो धर्माः गुणा' इति । यैस्तावत् शब्दार्थयोः स्थिरैः धर्मैः काव्यशोभा विधीयते ते गुणाः, तथाहि यमकोपमादिभिः शब्दार्थयोरस्थिरैः धर्मैः काव्यशोभा न सम्पद्यते ओजःप्रसादादिगुणाभावे सति । सत्येव ओजःप्रसादादिगुणे अलंकाराः काव्यशोभातिशय्यं सम्पादयन्ति परन्तु केवलानामपि ओजःप्रसादादीनां काव्यशोभाकरत्वमस्ति । अतएव मम्मटेनगुणलक्षणं निगदितं

"ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मकः।
उत्कर्षहेतवे ते स्युरचलस्थितयोः गुणाः ॥" इति ।

साहित्यदर्पणे विश्वनाथेन गुणलक्षणं भणितं – 'रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो गुणाः' इति । आचार्यभरतमते गुणो नाम दोषविपर्ययात्मकः । तदुक्तं नाट्यशास्त्रे –

"एते दोषा हि काव्यस्य मया सम्यक् प्रकीर्तिताः ।
गुणा विपर्ययादेषां माधुर्योदार्यलक्षणाः ॥" इति ।

अग्निपुराणमते तु भरतमतमिदमनादृतम् । अग्निपुराणे काव्यस्य चरमसौन्दर्यसम्पादको धर्मो हि गुणः, न तु दोषाभावगुणः । तदुक्तं –

"न च वाच्यं गुणो दोषाभाव एव भविष्यति ।
गुणाश्लेषादयो दोषा गूढार्थाद्याः पृथक् पृथक् ॥
यः काव्ये महतीं छायामनुगृह्णात्यसौ गुणः ॥" इति ।

अतएव वामनोक्तं गुणलक्षणं श्रुतिपर्यायेण अग्निपुराणेनापि समर्थितम् ।

**अलंकारः –**

काव्येऽलंकारस्य प्राधान्यं येन केनापि रूपेण दण्डिप्रभृतीनां स्वीकृतमासीत् । एतत्सम्प्रदायानुसारेण अलंकार एव काव्यस्य जीवनाधायकः। अलंकारहीनं काव्यस्वीकरणम् उष्णतारहिताग्निस्वीकरणमिव उपहास्यस्पतामिति केषाञ्चिन्मतम् । तदुक्तं चन्द्रालोके –

'अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलंकृती ॥ इति ।

विश्वनाथेनोक्तं –

"शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" ॥ इति ।

शब्दार्थयोरित्युपलक्षणम्, रसादिधर्मस्वरूपाणां रसवदाद्यलङ्काराणामपि पश्चादुक्तत्वात् । अस्थिराः काव्ये स्वनियतवृत्तयः, निरलङ्कारयोरपि शब्दार्थयोः बहुलमुपलम्भादिति भावः । धर्माः अनुप्रासोपमादयः न तु गुणास्तेषामस्थिरत्वाभावात् । शोभातिशायिनः काव्यसौन्दर्यातिशयप्रयोजका इत्यर्थः, तेन वाच्यत्वप्रमेयत्वादीनामतद्रूपाणां नालङ्कारत्वम् ।

रीतेः शब्दशोभजनकत्वेऽपि गुणालङ्कारवच्छोभातिशयजनकत्वं नास्तीति न तत्राप्यतिव्यापिः । 'रसादीन्' इत्यादिशब्देन रसाभास–भाव–भावाभास–सन्धिशवलतानां तेषामभावस्थले तयोः शब्दार्थयोरपि ग्रहणम् । अलङ्क्रियते भूष्यते काव्यमेभिरिति अलंकाराः करणव्युत्पत्त्या निष्पन्नोऽलङ्कारः । लौकिककटककुण्डलादयोऽलङ्कारा यथा मनुष्यशरीरादिकं भूषयन्ति तथा काव्यगतानुप्रासोपमादयः काव्यात्मभूतरसादिकमप्युपकुर्वन्तीति । अतएव अस्थिराः शोभातिशायिनो रसादीनुपकुर्वन्तः शब्दार्थयोः ये धर्मास्ते अङ्गादिवदलंकारा इत्यन्वयः । एतेन 'साक्षात् परस्परया वा रसाद्युत्कर्षजनकत्वे सति अनियतशोभातिशायिकाव्यधर्मत्व–मलङ्कारत्वम्' इति वक्तुं शक्यते ।

अतएव काव्यात्माव्यापकत्वे सति शब्दार्थगतसौन्दर्यातिरेकजनकरसाद्युपकारक–शब्दार्थधर्मत्त्वमलङ्कारत्वम् । अथवा रसोपकारकत्वे सति रसावृत्तित्वमलङ्कारत्वम् । रसोपकारकत्वे सति रसानियतस्थितिकत्वमलङ्कारत्वमिति वा । शब्दार्थशरीरं रसात्मशालिकाव्यम् । तत्र शब्दार्थनिष्ठा पुनरनुप्रासोपमादयः काव्यात्मभूतानां शृङ्गारादीनामलङ्कारा इत्यलंकारो व्यपदिश्यते ।

**रीतिः –**

काव्यशास्त्रे रीतिरेका पारिभाषिको शब्दः । रीतिमनुसृत्य रीतिप्रस्थानस्याविर्बभूव । वामनाचार्य एव रीतिवादिनः प्रमुखः । शब्दार्थो तावत् काव्यम् । दण्डिनोक्तं–'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति । शरीरस्य च केनचिदात्मना भवितव्यम् । कस्तावच्छरीरस्यात्मा इति जिज्ञासायां काव्यलंकारसूत्रवृत्तौ वामनाचार्येणोदीरितं 'रीतिरात्मा काव्यस्य' इति । साधारणतः रीतिर्नियम इति अवगम्यते । रीङ्गतौ इति रीङ्धातोः क्तिन्प्रत्यते रीतिरिति । रीणन्ति गच्छन्ति तस्याः गुणा इति रीतिः । एवमर्थकृते तु शब्दार्थयुगलं निष्प्राणं शरीरमिति न कमपि आह्लादयति । तत्र कासौ रीतिरित्यपेक्षायामाह – 'विशिष्टा पदरचना रीतिः' इति । विशेषवती पदानां रचना रीतिः इति वृतिः । अत्र पदानामित्यनेन अर्थेषु औपचारिकी रीतिरित्यङ्गीकर्तव्या । अत्र कोऽसौ विशेष इत्यपेक्षायामाह – 'विशेषो गुणात्मा' इति । अनेन ओजःप्रसादादिगुणविशिष्टपदरचनैव रीतिरिति वामनमतम् । अत्र काव्यस्यात्मा रीतिः, रीतेरात्मा गुणः । दण्डिना 'रीतिस्तु गिरां मार्गः' इति कथितम् । नव्यालंकारिकाणां मते तु 'पदघटना रीतिरि'ति । तत्र रीतीनां

परस्परासम्बन्धेन रसोपकारकं न साक्षादिति । तेषां मते गुणाः साक्षाद्रसधर्माः अव्यभिचारेण रसस्तिष्ठति । अलंकारास्तु शब्दार्थधर्माः ध्वनिकारानन्दवर्धनमते ध्वनिरेव काव्यस्यात्मा । विश्वनाथादीनां मते काव्यस्यात्मा रसः । वक्रोक्तिं काव्यजीवितमिति कुन्तकः । औचित्यं काव्यजीवितमिति क्षेमेन्द्रः । वामनमते रीतिस्तु त्रिविधाः वैदर्भी पाञ्चाली गौडिया चेति ।

**वृत्तिः –**

व्याकरणशास्त्रे वृत्तिरिति परार्थाभिधानत्वेन व्यवह्रियते । कृत्तद्धितसनाद्यन्तधातुरूपाः पञ्चवृत्तयः । परन्तु अलंकारशास्त्रे 'वर्तते रसः अनये'ति विग्रहेण वृतेः करणे क्तिन्प्रत्यये वृत्तिशाब्दो निष्पन्नः । धनञ्जयेन दशरूपके वृत्तिलक्षणमुदीरितं 'तद्व्यापारात्मिका वृत्तिः' इति । तत्र धनिकेन उदीरितम् – 'प्रवृत्तिरूपनेतृव्यापारस्य भावो वृत्तिः' इति । प्रवृत्तेः वाह्यिकी अभिव्यक्तिरेव वृत्तिः । रूपगोस्वामिनानुरूपमुक्तम् – 'नेतृव्यापाररूपास्तु रसावस्थासूचकाः' । वृत्तेः वाचिकाङ्गिकाभिनयात्मकं भरतेन नाट्यशास्त्रे उक्तम् । वृत्तेः रसाभिव्यञ्जकत्वात् एकैकस्य रसस्यातिव्यक्तानुकूलत्वात् एकैका वृत्तिः निर्दिष्टास्ति । तथाहि शृङ्गाररसानुकूलतया कौशिकी वृत्तिः, रौद्रे वीभत्से चारभटी, वीररसे च सात्त्वतीवृत्तिः, अन्यत्र रसान्तरेषु भारतीवृत्तिः अवलम्बनीया ।

**सन्धिः** –

संहिता सन्धेः नामान्तरम् । व्याकरणशास्त्रे 'पर सन्निकर्षः संहिता' इति संहितासंज्ञा भवति । नाट्यशास्त्रे सन्धिस्तु अन्यदेव । नाटकीयवृत्तमुच्चावचेन ख्यातेन प्रवहत् क्रमेण परिणामः भजते । प्रवाहस्यास्य एकैकभागः सन्धिरित्यभिधीयते । सन्धीयते संयुज्यते इति व्युत्पत्त्या सन्धिः संयोग इति व्युत्पन्नार्थो लभते । ननु संयोगस्यानेकनिष्ठत्वात् के तावत् सन्ध्याख्यसंयोगस्य सम्बन्धिन इति पृच्छायामुच्यते विश्वनाथेन साहित्यदर्पणे षष्ठपरिच्छेदे – 'अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति' इति । एकेन प्रयोजनेनान्वितानां कथांशानामवान्तरैकप्रयोजनसम्बन्धः सन्धिः । दशरूपके धनञ्जयेनोक्तम् – 'अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति' इति । यद्यपि भरतस्य नाट्यशास्त्रे सन्धिसामान्यलक्षणं न निगदितं तथापि तद्व्याख्याने अभिनवगुप्ताचार्येण 'अर्थावयवाः सन्धीयमानाः परस्परमङ्गैश्च सन्धय इति समाख्या निरुक्ता, तदेषां सामान्यलक्षणमिति

एतल्लक्षणमपि पूर्वानुरूपम्' । सागरनन्दिनापि निगदितं – 'सन्धिः परस्परकथार्थानां संघटनमि'ति । नाटकस्य शरीरं तावदितिवृत्तम् । इतिवृत्ताख्यस्य शरीरस्य विविधानामङ्गानां संयोगः सन्धिरिति । सन्धिमन्तरेण नाटकशरीरावयवानां योगेन नाटकशरीरमेव निर्मातुं न शक्यम् ।

सूत्रम् –

सर्वेषु शास्त्रेषु सूत्रमिति पारिभाषिकशब्दो व्यवह्रियते । यथा ब्रह्मसूत्रम्, न्यायसूत्रम् चेति । सूत्र्यते इति सूत्रम् । 'सूत्र वेष्टने' इति ण्यन्तात् धातोः 'एरच्' इति सूत्रेण अच्प्रत्यये सूत्रशब्दो निष्पद्यते । केषाञ्चिन्मते घञ्प्रत्ययेनापि भवति, परन्तु 'घञ् जपः पुंसि' इति पुंस्त्वनिर्णयात् घञ्प्रत्ययान्तशब्दः पुंलिङ्गान्तप्रयोगे विधीयते । सूत्रशब्दस्तु नपुंसकलिङ्गे व्यवह्रियते ।

'सीव्यते अनेन' इति व्युत्पत्त्यापि सूत्रशब्दो निष्पद्यते । 'षिवु तन्तु सन्ताने' धातोः 'सिविमुच्योष्टेरु च' इति ष्ट्रन्प्रत्यये टेरुकारे च सूत्रशब्दः सिध्यति । सूचयति सूत्रे सूत्रयति वा सूत्रमिति दुर्गासिंह आह । अयमर्थः लोके तत्तदर्थेषु प्रयुक्तान् शब्दान् यदेतादृशेन नियमरूपावेष्टनेन निबन्धाति, येन तेषु विकारो सा भूत् तत् सूत्रमित्युच्यते । सूत्र लक्षणमुक्तं वायुपुराणे –

"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥" इति ।

"लघुनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वत्र सारभूतानि सूत्राण्याहुर्मनीशिणः॥" इति

महर्षिवररुचिना एवं सूत्रलक्षणं कृतम् –

"अल्पाक्षरमसन्दिग्धं सावरद्गूढनिर्णयम् ।
निर्दोषं हेतुमतथ्यं सूत्रमित्युच्यते बुधैः ॥" इति ।

राजशेखरो लिखति 'सूत्रणात् सूत्रमि'ति । परिभाषासंग्रहे उक्तं

"सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके ।
सूत्रं योनिनिरार्थानां सर्वं सूत्रं प्रतिष्ठितम् ॥" इति ।

'सूत्राणि नरि तन्तवः' इति अमरकोषकारो लिखति । सूचनाकारि ग्रन्थेऽपि सूत्रशब्दस्य व्यवहारो भवति । अनेकार्थसंग्रहकोषे लिखितमस्ति यत् – 'सूत्रं तु सूचनाकारिग्रन्थे तन्तुव्यवस्थयोः' इति ।

हैमेऽपि इत्थं लिखितमस्ति । नागेशोऽपि मतमिदं स्वीकरोति । तथाहि – सूत्रशब्देनाष्टाध्याय्येव । तदेकदेशे तु योगव्यवहार एव इति ।

व्याकरणशास्त्रे याः संज्ञाः सन्ति, तास्तु पारिभाषिक्य एव । सवर्ण–गुण–वृद्धि–सम्प्रसारण–धातु–निपात–पद–टि–उपधा–प्रगृह्य–नदी–घ–घि–घु–इत्–अनुवृत्तिप्रभृतयः पारिभाषिकशब्दा एव । एवं सर्वेषु शास्त्रेषु बहवः पारिभाषिकशब्दाः वर्तन्ते ये तु शास्त्रतात्पर्यानुसारं व्याख्यायन्ते ।

# तृतीयोऽध्यायः
## त्रिमुनिव्याकरणे परिभाषापर्यालोचनम् ।

वेदाङ्गप्रधानस्य व्याकरणशास्त्रस्य पूर्वप्रदर्शितरीत्या ऐन्द्रचान्द्रादिभेदभिन्नस्य बहुविधस्य सत्त्वेऽपि साम्प्रतं पाणिनीयव्याकरणमेव शब्दसाधुत्वसाधने लोके परमोपकारकत्वेन प्राप्तसाफल्यमाद्रियते तदुक्तं –

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन" ॥ इति ।

तदेव पाणिनीयव्याकरणशास्त्रं पाणिन्युपज्ञमस्माकं समक्षमष्टाध्यायीरूपेण चकास्ति । यस्य च शब्दसाधुत्वसाधने परमप्रामाण्यं भारतीयैरेव विद्वद्भिर्न हि, परन्तु वैदेशिकैरपि हृदयेन सादरमभिनन्द्यते । भगवता पाणिनिना ज्ञानप्रदाद् भगवतो महेश्वरादुपासितात् तत्कृपातो लब्धानि 'अइउण्' इत्यारभ्य हल् इत्यन्तानि सूत्राणि माहेश्वराणीति पदेन व्यवह्रियमाणानि भवन्ति । तत्र च तैः सूत्रैः भगवता पाणिनिना प्रणीतैः साधवः शब्दाः साधिता एव । क्वचनासिद्धिर्दशनेन जातोत्साहो वार्तिककार कात्यायनो वार्तिकानि प्रणीय तान् शब्दान् साधयामास । यथा 'सुध्युपास्य' इत्यादिप्रयोगेषु यकारादेः संयोगान्तत्वात् 'संयोगान्तस्य लोपः'[३३१] इति सूत्रेण लोपप्रसक्तः 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन लोपवारणेन शब्दसाधुत्वं प्रसाधितम् । एवमेवान्यत्रापि बहुत्र । तदनन्तरञ्च क्रमते खलु भगवान् पतञ्जलिः महाभाष्यप्रणेता । तेन हि भगवता पतञ्जलिना सूत्राणामुपरि वार्तिकानाञ्चोपरि भाष्यं विधाय यदुपकृतं तस्याधमर्ण्यं सर्वं खलु शाब्दिकजगत् विभर्ति । प्रक्रियाप्रदर्शने दार्शनिकपद्धत्या च सूत्राणां व्याख्यानं प्राञ्जलभाषया अन्यूनाक्षरपदवाक्यगर्भया पद्धत्या कृत्वा शब्दविषये कृतो महान् उपकारः । तथा च त्रयाणां मुनीनां पाणिनिकात्यायनपतञ्जलीनां शब्दसाधुत्वोपपत्तये महान् प्रयत्नः सफलश्च । तत्र पूर्वपूर्वमुनिकृतेऽपि यत्ने संभाव्यमानायां विपरीतायाः प्रतीतेः शब्दानामल्पत्वात् स्पष्टतया तत्राप्रतीतेश्च उत्तरोत्तरमुनीनां शास्त्रप्रणयने प्रयत्नः । अतएव च तत्र तत्रोत्तरमुनितात्पर्य एव पूर्वमुनीनामपि तात्पर्यं प्रकल्प्य 'यथोत्तरं मुनीनां प्रामाण्यमि'ति समुद्घोषयन्ति वैयाकरणाः ।

अस्मिन् अध्याये पाणिनिकात्ययणपतञ्जलीनामाचार्याणां कानिचित् परिभाषासुत्राणि पर्यालोचन्ते । सूत्रकारः पाणिनिः परिभाषासूत्ररूपेण कुत्रापि नोल्लिखितवान् । परवर्तिन आचार्याः सूत्राणां लक्ष्यलक्षणानुसारं षड्विधत्वं दर्शितवन्तः । अष्टाध्यायीग्रन्थे प्रायः

---

१. अष्टा. – ८/२/२३ ।

पञ्चाशत् सूत्राणि सन्ति यानि 'अनियमे नियमकारिणी परिभाषा'[332] इति लक्षणे अन्तर्यान्ति । तेषु कानिचित् क्रमशः अष्टाध्यायीमनुसृत्य उपस्थाप्यन्ते ।

पाणिनेः परिभाषासूत्रं त्रिविधं भवति । यथा – १. परिभाषासूत्रं विधिसूत्रसमीपं गत्वा विधिसूत्रस्यार्थः करोति । यथा 'इको यणचि' इत्यादौ 'षष्ठी स्थानेयोगा'[333] इत्यनेन सूत्रेण इक इति षष्ठ्या स्थानमुच्यते । २. यत्र द्वयोः विधिसूत्रयोः युगपत्प्राप्तिः भवति तत्र समाधानार्थं परिभाषासूत्रं गच्छति । यथा 'मनर् + रथः' इत्यत्र 'हशि च' इत्यनेन सूत्रेण रोरुत्वं भवति । एवञ्च 'रोऽरि' सूत्रेण रस्य लोपो भवति । 'पूर्वत्रासिद्धम्'[334] इति परिभाषासूत्रं गत्वा हशि च इति सूत्रस्य प्रवृत्तिः भवतीति निर्णयति । ३. 'अग्नेर्ढक्' इत्यत्र पर्यायवाचिकशब्दानामपि ग्रहणं भवतीति यदाशङ्का उदेति तदा 'स्वं रूपं शब्दास्याशब्दासंज्ञा'[335] इति परिभाषासूत्रं गत्वा तान् निवावयति ।

## १. इको गुणवृद्धी[336] ।

गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते इति सूत्रार्थः । नेदं संज्ञासूत्रम्, गुणवृद्धिसंज्ञायाः सूत्रान्तरेणैव कृतत्वात् । नापि विधिसूत्रम् 'ओर्गुणः' इत्यादिना पूर्वविधानस्य वैयर्थ्यात् । नापि नियमसूत्रम्, स्वार्थहानिपरार्थकल्पनादिदोषग्रस्तत्वात्, विधिप्रकरणे पठितव्ये इह पाठकरणात् च । नाप्यतिदेशो वतिप्रत्ययेन समानविभक्त्या चानिर्देशात् । नाप्यधिकारः 'न धातुलोप आर्धधातुके' इत्यनेन सहैव पाठतव्ये पृथग्योगकरणसामर्थ्यात् । 'अन्यदेवेदं परिभाषान्तरमसम्बद्धमनया परिभाषया' इति प्रकृतसूत्रभाष्यरूपव्याख्यानात् वा उक्तार्थलाभः । तथा चेयं परिभाषा । काशिकाकारेणोक्तं 'परिभाषेयं स्थानिनियमार्था । अनियम प्रसङ्गे नियमो विधीयते'[337] इति । 'वृद्धिरादैच्', 'अदेङ्गुणः'[338] इति सूत्राभ्यां गुणवृद्धिपदयोरनुवृत्त्या गुणवृद्धिपदार्थस्य लाभेन सूत्रे गुणवृद्धिग्रहणस्य वैयर्थ्यम्, तत्सामर्थ्यात् गुणवृद्धिशब्दाभ्यां यत्र 'गुणवृद्धी' इत्यत्र बोधकं गुणवृद्धिपदमिति कल्प्यते ।

---

२. द्रष्टव्यम् – परिभाषेन्दुशेखरः, लघुशब्देन्दुशेखरः, परिभाषाप्रकरणम् ।

३. अष्टा. – १/१/४९ ।

४. तत्रैव – ८/२/१ ।

५. तत्रैव. – १/१/६८ ।

६. तत्रैव – १/१/३ ।

७. जयादित्यवामनकृतकाशिका – १/१/३ ।

८. अष्टा. – १/१/१, १/१/२ ।

गुणवृद्धिशब्दौ गुणवृद्धिपदबोध्ये लाक्षणिकौ इति भावः । विधीयते इति क्रियापदमध्याह्रियते तथा च विधेयताप्रयोजकं यत् गुणवृद्धिपदं तत्र 'इक' इति षष्ठ्यन्तं पदमुपतिष्ठते ।

विधेयता च अदेङ्, आदैच् निष्ठा गृह्यते । अतः 'अदेङ्गुणः', वृद्धिरादैच्' इति नास्याः परिभाषाया उपस्थितिः । तत्र गुणवृद्धिपदाभ्यां न अकारादयो विधीयन्ते, किन्तु अकारादीन् उद्दिश्य गुणसंज्ञा (गुणपदवत्त्वं) वृद्धिसंज्ञा (वृद्धिपदवत्त्वं) बोध्यते इति न दोषावकाशः । 'त्यदादीनामः', 'पथिमथ्यृभुक्षामात्' इत्यादौ नास्याः प्रवृत्तिः, गुणवृद्धिपदेन तेषामकारादीनां विधानाभावात् । अनुवर्तमानञ्च गुणवृद्धिपदं संज्ञिपरमेव स्यात्, संज्ञाकरणेनान्यत्र संज्ञिपरत्वात् अत्रानुवृत्तौ तस्य स एवार्थः स्यात्, न तद्बोध्यः संज्ञी अकारादिः । अतः संज्ञिबोधाय 'इको गुणवृद्धी' इत्यत्र गुणवृद्धिग्रहणं चरितार्थम् ।

यत्र त्वनुवादो 'वृद्धिर्यस्यामचामादिस्तद्वृद्धम्'[३३९] इत्यादौ अत्रेक इति षष्ठ्यन्तं नोपतिष्ठते । लक्षणप्रतिपदोक्तपरिभाषा तु नात्र निर्वाहः तत्र प्रतिपदोक्तस्य इत्यस्य साक्षादुच्चारितस्येति साक्षात्तत्तच्छब्दानुवादेन विहितस्येति वाऽर्थादिति नागेशाचार्ययुक्त्या गुणत्ववृद्धित्वप्रकारक– ज्ञानप्रयोज्योद्देश्यतानिरूपितविधेयताया एवाभावात् नानेनापि प्रतिपदोक्तत्वसिद्धभावना । अतो गुणवृद्धिग्रहणसामर्थ्याश्रयणं युक्तमेवेति विभावनीयम् ।

'इको गुणवृद्धी' इति सूत्रे भाष्ये गुणवृद्धिग्रहणसामर्थ्याश्रयणेन 'त्यदादीनामः'[३४०] इत्यादौ दोषो वारितः । न तु प्रतिपदोक्तपरिभाषया । यदि अनया व्यावृत्तिः सम्भवेत्, तदा सामर्थ्याश्रयणमसङ्गतं स्यादिति परिभाषया अप्रवृत्तिः ध्वन्यते । नागेशाचार्यः परिभाषायाः लिङ्गमाह – 'अस्याश्च विधेयसमर्पकगुणवृद्धिपदश्रुतिलिङ्गम्'[३४१] इति । अतः 'अदेङ्', 'आदैच्' एतदन्यतरनिष्ठविषयताप्रयोजकत्वेन गृहीतस्य गुणवृद्धिपदस्य यत्र श्रवणं तत्र इयं परिभाषोपतिष्ठते इति भावः । तेन 'मिर्देगुणः'[३४२] इति सूत्रस्थं गुणपदं दृष्ट्वा 'इकः' इति षष्ठ्यन्तं पदमुपतिष्ठते तदा 'मिदेः इकः अङ्गस्य गुणः' एवं सम्पूर्णं सूत्रमुपपद्यते । 'अतो गुणे', 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यादौ अनुवादवाक्ये इक्परिभाषाया उपस्थितिर्न, ताभ्यां सूत्राभ्यां क्रमेण पररूपस्य वृद्धसंज्ञायाश्च विधानेन तत्र श्रूयमाणगुणवृद्धिपदयोः निमित्ततया उद्देश्यरूपत्वेन विधेयसमर्पकत्वाभावात् । अतएव 'भवन्ति' इत्यत्र पररूपं, 'शालीय' इत्यत्र वृद्धलक्षणश्छप्रत्ययश्च सिद्धः । अन्यथा इक्परिभाषोपस्थित्या इकः स्थाने निष्पन्ने गुणे परतः पररूपस्य विधानेन 'एधै' इत्यत्र इक्स्थानिकस्य एकारस्य सत्त्वात् तत्रैव पररूपं स्यात् । एवम् इक्स्थानिकवृद्धेः वृद्धसंज्ञाया 'औपगवः' इत्यत्र स्यात्, शालाशब्दस्य न स्यात्, इकः स्थाने वृद्धेरभावात् ।

---

९. अष्टा. – १/१/७३ ।

१०. तत्रैव. –७/२/१०२ ।

११. लघुशब्देन्दुशेखरः, परिभाषाप्रकरणम् – 'इको गुणवृद्धी' ।

१२. अष्टा. – ७/३/८२ ।

## २. आद्यन्तौ टकितौ[३४३] ।

आदिश्च अन्तश्च आद्यन्तौ टश्च कश्च टकौ, टककारादकार उच्चारणार्थः, टकौ इतौ ययोस्तौ टकितौ । अत्रादिपदार्थस्य टित्पदार्थः, अन्तपदार्थस्य च कित्पदार्थे अन्वयेन एकस्मिन् पदार्थे द्वयोः अन्वयाभावेन एकपदार्थान्वयित्वरूपसहविवक्षायाः अभावेन द्वन्द्वो न स्यात् । आद्यन्तसमुदायस्य टकित्समुदायार्थे अन्वयेन समासोपपत्तावपि प्रत्येकमन्वयो वृत्तस्य विशेषणयोगो न इति नियमेन समाधत्ते–अत्रैव 'यथसंख्यमनुदेशः समानाम्'[३४४] इति सूत्रस्योपन्यासयुक्तः । अत एतत्सामर्थ्यात् शास्त्रे समासोत्तरमपि क्रमिकान्वयः । अर्थात् समासोत्तरमेकदेशान्वयस्य 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इत्यादिन्यायेन एकदेशान्वयो वारितोऽपि सामर्थ्यात् यथासंख्यासूत्रेण भवति । लोके तु नैवं विधः प्रयोगः । तत्र क्रमेणान्वयभावात् । अतएव भाष्यकृता देवदत्तस्य अजा, यज्ञदत्तस्य अविः धनमिति तात्पर्येण लोके 'अजाविधनौ देवदत्तयज्ञदत्तौ इति न भवतीत्युक्तम् । शास्त्रे तु 'दृष्टान्तस्यापि पुरुषारम्भो निवर्तको भवति' इति । अस्ति चेत् कश्चित् पुरुषारम्भः? अस्तीत्याह 'संख्यातानुदेशो नाम' इति भाष्येन समर्थितो भवत्येव ।

'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन स्वस्मात् परस्मिन् बाधनीये प्रथमोपस्थितत्वाद् अनन्तरस्य अव्यवहितोत्तरस्य बाधेन सूत्रे चारितार्थे व्यवहितस्य परस्य बाधे मानाभाव इत्येतन्मूलकेन 'षष्ठी स्थानेयोगा' इत्यस्यैव 'आद्यन्तौ टकितौ' इति सूत्रमपवादत्वात् बाधकं भवति । 'प्रत्ययः', 'परश्च'[३४५] इति सूत्रद्वयं परत्वात् 'आद्यन्तौ' इति सूत्रस्य बाधकम् । अतएव 'चरेष्टः' इति सूत्रेण विहितष्टप्रत्ययो धातोरनन्तरं भवति । न तु टित्त्वाद्धातोः पूर्वम् । 'टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः' इति नियमेन भविता इत्यत्रार्धधातुकस्येड्वलादेः इति सूत्रेण इडागमे, टित्त्वात् आद्यवयवत्वात् 'भू इता' इत्यवस्थायां गुणे, अवादेशे 'भविता' इति रूपं सिध्यति ।

## ३.मिदोऽचन्त्यात्परः[३४६] ।

मकार इत् यस्य स मित् अन्त्यादचः परो भवतीत्यर्थे 'शे मुचादीनाम्'[३४७] इत्यादाविदं न प्रवर्तेत, तत्रान्त्यस्याचोऽभावात् । तदुक्तं नागेशाचार्येण 'अचः इति निर्धारणे षष्ठी' इति । अतः अचां मध्ये योऽन्त्यस्तस्मात् परस्तस्यैवान्तावयवो मित् स्यात् इत्यर्थो

---

१३. अष्टा. – १/१/४६ ।

१४. तत्रैव – १/३/१० ।

१५. तत्रैव. – ३/१/१, ३/१/२ ।

१६. तत्रैव. – १/१/४७ ।

१७. तत्रैव. – ६/१/५९ ।

लभ्यते । एतच्च 'आद्यन्तौ टकितौ' इति सूत्रतः अन्तग्रहणानुवृत्त्या लभ्यते, आद्यन्तशब्दैकदेशस्यान्तशब्दस्य तन्मात्रे स्वरितत्वप्रतिज्ञाबलादनुवृत्तिसम्भवात् । आदिग्रहणमनुवर्त्य परादित्वाभ्युपगमे तु वारीणीति बहुवचने 'सर्वनामस्थाने चासम्बुद्धौ' इति नान्ताङ्गस्य विहितो दीर्घो न सिध्येत् । अभक्तत्वे तु 'वहंलिह' इत्यत्र 'वहाभ्रे लिहः' इति खशि, 'अरुर्द्विषत्' इति मुमि, तस्य 'मोऽनुस्वारः' इति मान्तस्य पदस्य विहितोऽनुस्वारो न स्यात् । यस्य समुदायस्य मित्संज्ञकः प्रत्ययो विहितः, तस्याचां मध्ये योऽन्त्यस्तस्मात् परः, तस्य समुदायस्यैव स प्रत्ययो भवति । अतएव भाष्यकृता 'समुदायभक्तो हि नुम् नोत्सहते अवयवस्येगन्ततां विहन्तुमि'त्युक्तम् । अवयवस्य नुमादीनामवयवत्वात् समुदाये इगन्तत्वव्यवहारो न विहन्यते । समुदायावयवत्वे तु इगन्तव्याघातः स्पष्ट एव । यत्तु कैश्चिदुक्तमभक्तत्वे वारीणीति दीर्घो न स्यादिति, तत् 'तदादिग्रहणं स्यादिनुमर्थम्' इति अङ्गसंज्ञासूत्रस्थवार्तिकेन दूषितप्रायम् ।

महाभाष्ये सूत्रारम्भे वार्तिकरूपेण विज्ञापितः 'मिदोऽचोऽन्तात् पर' इति स्थानपरप्रत्ययापवादः' इति । पतञ्जलिनानुरूपमुक्तम् "मिदोऽचोऽन्तात् परः इत्युच्यते स्थानेयोगत्वस्य प्रत्ययपरत्वस्य चापवादः । स्थानेयोगत्वस्य तावत् कुण्डानि वनानि पयांसि यशांसि, प्रत्ययपरत्वस्य भिनत्ति छिनत्तीति । एतदपि युक्तम् । कथम्? नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति अपवादैरुत्सर्गाः वाध्यन्तामिति । किं तर्हि? लौकिकोऽयं दृष्टान्तः । लोके हि सत्यपि सम्भवे बाधनं भवति । तद्यथा – 'दधि ब्राह्मणभ्यो दीयतां तक्रं कौण्डिन्याय' इति, सत्यपि सम्भवे दधिदानस्य तक्रदानस्य निवर्तकं भवति"[३४८] इति ।

एवमिहापि सत्यपि सम्भवे अचमन्त्यात् परत्वं षष्ठीस्थानेयोगत्वं बाधिष्यते । एवमान्यत्राह महाभाष्यकारो 'विषम उपन्यासः । युक्तं तत्र यदनवकाशं मित्करणं स्थानेयोगत्वं प्रत्ययपरत्वं च बाधते । इह तु पुनरुभयं सावकाशम्' इति ।

## ४. एच इग्घ्रस्वादेशे[३४९] ।

लघुशब्देन्दुशेखरे वैयाकरणसिद्धान्तकौमुद्याञ्चान्यत्रापि परिभाषारूपेणलोचिता । एतत्तु परिभाषासम्वलितनियमसूत्रं वक्तुं शक्यते । आदिश्यते इत्यादेशः ह्रस्वश्चासावादेशश्च ह्रस्वादेशः, निर्धारणे सप्तमी जातावेकवचनम् । सूत्रस्यायमर्थः – 'आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्' इति । अनेनाकारव्यावृत्तिः फलतीति भावः । यद्यपीकश्चत्वारः एचोऽप्येवम् तथापि स्थान्यादेशानां यथासंख्यः न भवति । न ह्यपूर्वविधिः, नियमविधिः । यथाप्राप्तमेव नियम्यते । एचां हि पूर्वभागः अवर्णसदृशः, उत्तरभागस्तु इवर्णोवर्णसदृशः । तत्र

---

१८. महाभाष्यम् – १/१/४७ ।

**१९. अष्टा. – १/१/४८ ।**

पूर्वभागसादृश्यमवर्णस्यास्ति । तस्य च इग्ग्रहणेन निवृत्तौ इवर्णसादृश्यमात्रमादाय एकारस्य ऐकारस्य च इवर्णः उवर्णसादृश्याद् ओकारस्य औकारस्य च उवर्ण इति व्यवस्था न्यायप्राप्ता । यथा प्राप्तमेव नियम्यत इति न यथासंख्यम् । महाभाष्यकारेणास्य प्रयोजनप्रसङ्गे उदीरितम् – "एच इग्वचनं सवर्णाकारनिवृत्त्यर्थम् । एच इग्भवतीत्युच्यते । सवर्णनिवृत्त्यर्थमकारनिवृत्त्यर्थञ्च । सवर्णनिवृत्त्यर्थं तावत् एङो ह्रस्वादेशशासनेषु अर्ध एकारोऽर्ध ओकारो वा मा भूदिति । अकारनिवृत्त्यर्थं च इमावचौ समाहारवर्णौ मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः । तयोर्दीर्घशासनेषु कदाचिदवर्णः स्यात् कदाचिदिवर्णोवर्णौ । मा कदाचिदवर्णं भूदित्येवमर्थमिदमुच्यते"[३५०] इति एकारान्तस्योदाहरणम् इः स्मृतो येन स स्मृतेः इति । शोभनः स्मृते यस्य तत् सुस्मृतीति । वैयाकरणसिद्धान्तकौमुद्यां तत्त्वबोधिनीकारेणोक्तम् 'एतच्च परिभाषासूत्रमप्यर्थकम् । तथा च वार्तिककृतोक्तं 'सिद्धमेङः सस्थानत्वात्', 'एचोश्चोत्तरभूयस्तात्'[३५१] इति । अस्यार्थः शब्दपरविप्रतिषेधेन एङ उत्तरभागान्तरतमौ इउवर्णाविवेति सिद्धम् । नचोश्चेति चकारो भिन्नक्रम उत्तरभूयस्त्वाच्चेति हेतोरनन्तरं बोध्यः । अर्धमात्रा अवर्णस्य, अध्यर्धमात्रा इवर्णोवर्णयोरित्युत्तरभागाधिक्या–न्मल्लग्रामादिवद्भूयसा व्यपदेशेनापि इकारोकारौ भविष्यत इति ।

## ५. षष्ठी स्थानेयोगा[३५२] ।

परिभाषाणामनियमे नियमकारिणीत्याह नागेशाचार्यः । स्थानेयोगा इति पदं महाभाष्यकृता बहुधा व्याख्यातम् । तथाहि स्थाने योगा यस्याः सा स्थानेयोगा इति बहुव्रीहिः। अत्र निपातनान्न सप्तस्याः लुक् । स्थानेन योगो यस्यः सा स्थानयोगा इति विग्रहः। अत्र निपातनादेत्वम् । अथवा स्थाने अयोगा इति च्छेदः । अत्र 'एङः पदान्तादति' इति अकारलोपे स्थानेयोगेति पदनिष्पत्तिः । योगो नाम सम्बन्धः। अत्र योगशब्दात् 'अर्श आदिभ्योऽच्' इति अचि स्त्रियां टापि योगाशब्दो निष्पन्नः । तेन योगा सम्बन्धवती इत्यर्थः । अयोगा नाम सम्बन्धरहिता । किन्तु षष्ठ्याः सम्बन्धो नास्तीति नैवं सम्भवतीति मुख्यार्थबाधे लक्षणया अविशिष्टयोग इत्यर्थ उपलभ्यते । अयोगा नाम अव्यक्तयोगा । यत्र षष्ठ्याः सम्बन्धो न निर्धारितः तत्र स्थाने इत्यर्था बोध्यः। शब्देन्दुशेखरे अस्याः वृत्तौ आह नागेशाचार्यः 'अनिर्धारितसम्बन्धविशेषा षष्ठी स्थानेयोगा भवति'[३५३] इति । बालमनोरमायमाह– 'षष्ठीश्रुतौ स्थाने इति सप्तम्यन्तं पदमुपतिष्ठते इति फलति'[३५४] इति ।

२०. महाभाष्यम् – १/१/४८ ।
२१. सिद्धान्तकौमुदी, तत्त्वबोधिनीटीका – 'एच इग्घ्रस्वादेशः' |
२२. अष्टा. १/१/४९ ।
२२. लघुशब्देन्दुशेखरः, परिभाषाप्रकरणम् – १/१/४९ ।
२४. सिद्धन्तमौमुदी, बालमनोरमाटीका – 'षष्ठी स्थानेयोगा' ।

अथवा नेदं समस्तं पदम् । 'षष्ठी', 'स्थाने', 'योगा' इति पदत्रयात्मकमिदं सूत्रम् । योगा इति च षष्ठ्या विशेषणम् । योगाशब्दोऽच्प्रत्ययान्तः तेन योगा योगवती । अत्र च प्रत्यतो भूम्नि वर्तते । तेनासमर्थो लभ्यते । यत्र षष्ठ्याः बहवः सम्बन्धास्तत्र स्थाने इत्यर्थो बोध्यः ।

महाभाष्यकारेण पतञ्जलिना भाषितं "षष्ठ्याः स्थाने योगवचनं नियमार्थम् । नियमार्थोऽयमारम्भः । एकशतं षष्ठ्यार्थाः यावन्तो वा सन्ति । ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति । इष्यते च व्याकरणे या षष्ठी सा स्थानेयोगैव स्यादिति । तच्चान्तरेण यत्नं न सिध्यतीति षष्ठ्याः स्थानयोगवचनं नियमार्थम् । एवमर्थमिदमुच्यते"[३५५] इति ।

लोकेऽगणिताः सबन्धाः–आर्था यौना मौख्याः स्रोर्वाश्चेति । व्याकरणे तु शब्देन शब्दस्य सम्बन्धः त्रिप्रकारः – 'आनन्तर्यं स्थानं प्रसङ्गः सामीप्यञ्चेति । शब्दस्यापि शब्देनानन्तरा– दयोऽभिसम्बन्धाः'[३५६] इति । अतः काशिकायां प्रकाशितं 'परिभाषेयं योगनियमार्था' इति ।

स्थानशब्दोऽपि बह्वर्थः । तथापि 'शिवस्थानं कैलासः' इत्यत्राधारः, 'श्लेष्मणः स्थाने कटूकमौषधम्' इत्यत्र निवृत्तिः 'गोः स्थाने अश्वो बध्यताम्' इत्यत्रापकर्षः, 'दर्भस्थाने शरैः' प्रस्तरितव्यम्' इत्यत्र प्रसङ्गश्चेति स्थानशब्दार्थाः । व्याकरणे अपकर्षादयः स्थानशब्दार्थाः भवितुं नार्हन्ति, शब्दसम्बन्धस्य नित्यत्वादाधाराधेयभावासम्भवात् । अतः परिशेषात् प्रसङ्गरूपोऽर्थ एव स्थानशब्दवाच्यः । तेन भट्टोजिदीक्षितेनोदीरितं – 'स्थानञ्च प्रसङ्गः' इति ।

तथाहि 'इको यणचि' इत्यत्र इकः इत्यत्र षष्ठ्या आनन्तर्यं वा सामीप्यमुत स्थानमर्थो बोध्यते इति संशीतौ स्थानरूपोऽर्थ एव ग्राह्य इत्यनया परिभाषया लभ्यते । ततश्च सूत्रवृत्तौ दीक्षित आह– इकः स्थाने यण् स्यादचीति । अत्रेदमवधेयं यत् तु षष्ठ्यर्थो निरूपितस्तत्रेयं परिभाषोपतिष्ठते । 'ऊदुपधायाः गोहः' इत्यत्र गोहः इति घटकषष्ठ्या उपधापद– सन्निधानादवयववाचकत्वस्य निश्चयेन तत्र नानेन सूत्रेण स्थाननिरूपितसम्बन्धार्थकत्वस्य बोधनम् । स च निर्धारित एव । अतस्तत्र नेयं परिभाषोपतिष्ठते ।

महाभाष्यकृता तु सूत्रमिदं प्रत्याख्यातम् । "अस्तेर्भूः' इत्यादौ स्थानम् आनन्तर्यं सामीप्यं वेति कोऽत्रार्थ इति सन्देहे लक्ष्यानुरोधात् 'व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षणम्' इति स्थानरूप एवार्थः । अत गृह्यते इति सूत्रमिदं व्यर्थम् । व्यर्थं सत् निर्दिश्यमानस्यादेशा भवन्ति इत्यस्य ज्ञापकं भवतीति महाभाष्यवक्तव्यः । वक्तव्यश्च । किं प्रयोजनम्? षष्ठ्यन्तं स्थानेन यथा युज्यते यतः षष्ठ्युच्चारिता किं कृतं भवति?

---

२५. महाभाष्यम् – १/१/४९ ।

२६. तत्रैव ।

निर्दिश्यमानस्यादेश भवन्ति इत्येषा परिभाषा कर्तव्या भवति"[३५७] इति । यत्रेवमाचार्यकैयट आह 'अस्यैव सूत्रस्य निर्दिश्यमानस्यादेशा भवन्ति इत्ययमर्थः षष्ठीति षष्ठ्यन्तं गृह्यते । तेन षष्ठ्यन्तमेव निर्दिश्यमानं स्थानेन युज्यते, न तु प्रतीयमानमित्यर्थः'[३५८] इति । हरदत्तेनापि महाभाष्यमतं समादृतम् । पुरुषोत्तमदेवसीरदेवनीलकण्ठदीक्षित हरिभास्करशेषाद्रिनाथादिभिः अनुरूपाभिमतं प्रकाशितम् । पुरुषोत्तमदेवेनोक्तम् "अयमपि 'षष्ठी स्थानेयोगा' इत्यस्यैवार्थः परिभाषारूपेण पठ्यते" इति ।

## ६. स्थानेऽन्तरतमः[३५९] ।

'षष्ठी स्थानेयोगा' इति सूत्रात् षष्ठीपदमनुवर्तते । एतत्सूत्रस्थस्थानपदार्थेन सह अनुवृत्तषष्ठीपदस्य सम्बन्धेन यत्र स्थानपदार्थनिरूपितसम्बन्धार्थबोधिका षष्ठी तत्र सूत्रे अन्तरतमपदमुपतिष्ठते इत्यर्थो निष्पन्नः । विधिसूत्रेण सह अस्य पदैकवाक्यतयान्वयः । तथा च विधिसूत्रस्य वाक्यार्थः स्थानेऽन्तरतमपरिभाषया उपस्थानितेन अन्तरतमेन सहैव निष्पद्यते । अतः सदृशतमत्वेन भिन्नानामादेशानां व्यावृत्तिः सिद्धा । एष एव लघीयान् पन्थाः । यथाप्राप्तमादेशान् विधाय तदनन्तरमेतस्य प्रवृत्त्या अनन्तरतमानामादेशानां व्यावृत्तिबोधने तु 'भुक्तवन्तं प्रति मा भुङ्क्थाः इति न्यायो विरुध्येत । परममूले 'प्रसङ्गे सदृशतम' इति फलितार्थकथनपरतया नेयम् । प्राप्यमाणानामादेशानां मध्ये योऽन्तरतमः स भवति, न तु येषां केषाञ्चिदादेशानां मध्ये योऽन्तरतमः स भवतीति भावः । एकस्य स्थानिन अनेकादेशप्रसङ्गे सति य स्थानार्थगुणप्रमाणतः स्थानिना सदृशतम इत्यर्थः । अत्र स्थानशब्देन ताल्वदिस्थानं विवक्षितम् । गुणशब्देन प्रयत्नः, प्रमाणशब्देन एकद्विमात्रादिपरिमाणम् । तत्र स्थानतो यथा–दध्यत्र । तालुस्थानकस्य इकारस्य तालुस्थानको यकारः । अर्थतो यथा 'तृज्वत् क्रोष्टुः' इति क्रोष्टुशब्दस्य उकारान्तस्य तृजन्त आदेशो भवन् अर्थसाम्यात् क्रोष्टृशब्द एव तृजन्त आदेशो भवति । गुणतः 'वाग्घरिः' । अत्र हकारः स्थानी घोषनादसंवारमहाप्राणप्रयत्नवान् । तस्य गकारसवर्णो भवन् चतुर्थो घकारो भवति, तस्य हकारेण स्थानिना घोषनासंवारमहाप्राणप्रयत्नसाम्यात् ।

तमप्पदेनानेकविधमान्तर्यं बोध्यते । सदृशतमस्यादेशो भवति । तदुच्यते महाभाष्ये – 'स्थानिन एकत्वनिर्देशादनेकनिर्देशाच्च सर्वप्रसङ्गस्तस्मात् स्थानेऽन्तरतमं वचनं नियमार्थम् । स्थान्येकत्वेन निर्दिश्यते अक इति । अनेकश्च पुनरादेशः प्रतिनिर्दिश्यते दीर्घ इति । स्थानिन एकत्वनिर्देशादनेकादेशनिर्देशाच्च सर्वप्रसङ्गः सर्वे सर्वत्र प्राप्नुवन्ति इष्यते

---

२७. तत्रैव – २/४/५२ ।

२८. महाभाष्यवार्तिकम् – १/१/४९ ।

२९. अष्टा. – १/१/५० ।

चान्तरतमा एव स्युरिति । तच्चान्तरेण यत्नं न सिध्यति । तस्मात् स्थानेऽन्तरतमवचनं नियमार्थम् । एवार्थमिदमुच्यते' इति । अष्टाध्याय्यां सूत्राणि अविभक्तानि । कालेन व्यवधाय असंहितया न पठितानि । तथा च 'स्थानेऽन्तरतमे उरण्रपरः' अथवा 'स्थानेऽन्तरतमः उरणरपरः' इत्येवमुभयविधस्य पाठस्य सन्दिविच्छेदेन कल्पयितुं शक्यतया सन्देहः । सप्तम्यन्ततया पाठककल्पने अयादेशे लोपे 'स्थानऽन्तरतम उरण्रपरः' इति पाठ उभयस्मिन्नपि पक्षे निर्वहति । अन्तरतमे इत्यवं सप्तम्यन्तपाठे अन्तरतमे इति न प्रथमान्तस्य आदेशस्य विशेषणं सम्भवति अभेदान्वये समानविभक्तेरपेक्षणात्, किन्तु स्थानिनि अन्वियात् । तथा च प्राप्यमाणानां स्थानिनो मध्ये अन्तरतमे स्थानिनि आदेश इत्यर्थः स्वीकारेण अनन्तरतमाः स्थानिनो निवृत्यन्ते, न अनन्तरतमा आदेशाः । सप्तम्यन्तपाठसु दीर्घेषु यणसिद्ध्या दुष्टः ।

प्रथमान्तपाठे तु 'अन्तरतमः' इत्यस्य प्रथमान्ततया अभेदेन आदेशोऽन्वयः । तथा च स्थानिनि प्राप्यमाणानामादेशानां मध्ये योऽन्तरतम आदेश स भविष्यति । एवम्भूतेनार्थेन अनन्तरतमाः असदृशतमा आदेशो व्यावृत्यन्ते, न तु अनन्तरतमाः स्थानिनः । स्थानी अन्तरतमोऽनन्तरतमो वा सर्वोऽपि इक्पदेन संगृहीतः । यण्पदेन तु प्रथमान्तपाठे अनन्तरतमा आदेशा निवारिताः । एवञ्च दीर्घेकाराद् येऽपि स्थानिनो जाताः, तत्र दीर्घेकारस्य स्थाने आदेशान्तरवकाराद्यपेक्षया यकार एवान्तरतमत्वाद्भवति, न तु वकाराद्यादेशः, तेषामनन्तरतमत्वेन व्यावर्तनात् । प्राप्यमाणानामादेशानां मध्ये यकारस्यैवान्तरतमत्वमित्याशयः ।

'षष्ठी स्थानेयोगा' इति सूत्रादेकदेशे स्वरितत्वप्रतिज्ञया समस्तपदैकदेशस्यापि स्थानेपदस्येहानुवृत्तिः तर्हि कथं पुनस्थानग्रहणम् । तदुक्तं महाभाष्यकारेण – 'अतः स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्? यत्रानेकमान्तर्यं तत्र स्थानत एवान्तर्यं बलीयो यथा स्यात् । किं पुनस्तत्? चेता, स्तोता । प्रमाणतः अकारो गुणः प्राप्नोति स्थानत एकारौकारौ । पुनः स्थानग्रहणादेकारौकारौ भवतः'[३६०] इति ।

**७. उरण्रपरः[३६१] ।**

अत्र 'षष्ठी स्थानेयोगा' इति सूत्रात् स्थानग्रहणमनुवर्त्य उः स्थाने इत्यर्थो लभ्यते । स्थानयोगेति समस्तपदादेकदेशस्य स्थाने पदस्यानुवृत्तेरसम्भवात् 'षष्ठी स्थानेयोगा' इति परिभाषासूत्रेणैव अनिर्धारितसम्बन्धविशेषायाः षष्ठ्याः स्थानं स्थानपदार्थनिरूपितसम्बन्धार्थ–

---

३०. महाभाष्यम् – १/१/५० ।

३१. अष्टा. – १/१/५१ ।

कत्वबोधनात् तल्लाभः । न च ‘विधौ परिभाषोपतिष्टते नानुवादे’ इति परिभाषया उरित्यत्र षष्ठ्या उद्देश्यगतत्वेन ‘षष्ठी’ इति सूत्रस्याप्रवृत्त्या स्थानपदार्थनिरूपितसम्बन्धार्थालाभ इति वाच्यम्, तस्याः परिभाषायाः ‘इको गुणवृद्धी’, ‘अचश्च’ इत्येतन्मात्रविषयकत्वेनान्यत्राप्रवृत्तेः । तत्रापि विधीयते इति पदाध्याहारेण दोषाभावात् ‘विधौ परिभाषा’ इत्यस्याः खण्डनेन षष्ठी स्थाने इत्यस्य उपस्थितौ बाधकाभावात् ।

‘उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य’ इत्यनेन उदात्तस्य स्थाने, स्वरितस्य स्थाने च यो यण् ततः परस्य अनुदात्तस्य स्वरितो विधीयते, अनूद्यमाने अनुदात्ते विशेषणीभूते यणि विशेषणीभूतयोः ‘उदात्तस्वरितयोः’ इत्यत्र ‘षष्ठी स्थानेयोगा’ इति परिभाषया स्थाननिरूपितसम्बन्धार्थलाभस्य इष्टत्वात् । तथैव अत्रापि तल्लाभात् ।

‘स्थानेऽन्तरतमः’ इति सूत्रात् स्थाने इति पदमनुवर्तते । स्थानेपदस्य तृतीयान्तेन विपरिणामात् स्थानेन इति करणीयः । स्थानपदस्य लक्षणया प्रसङ्गावस्थायामित्यर्थः उः स्थाने अण् प्रसङ्गावस्थायामेव रपरः इत्यतत्फलितमर्थमाह रपरः सन्नेव प्रवर्तते । अत्र र इति प्रत्याहारो विवक्षितः । ततश्च रेफशिरस्को लकारशिरस्कश्च प्रवर्त्तते इति लभ्यते । तदुक्तं रदाभ्यामिति सूत्रभाष्ये[३६२] – ‘गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिवर्तते इति । उः स्थानेऽण् प्रसज्यमान एव रपरो भवति, पूर्वभक्तश्च रेफ इत्यर्थः’ ।

रेफलकारशिरस्कयोर्मध्ये कृष्णर्द्धिरित्यत्र अर्, तवल्कार इति अलित्यन्वयः । कुत इयं व्यवस्था आन्तरतम्यात् । त्रिषु गुणेषु प्रसज्यमानेषु अकारस्य अणो रेफलकारशिरस्कतया तस्य अर् अल् इत्येवात्मकस्य अकारांशे स्थानिभूतत्वेन अकारेण, रेफांशे ऋकारेण, लकारांशे लृकारेण च स्थानसाम्यादकारऋकारयोः स्थाने अरेव भवति, अकार–ळकारयोः स्थाने अलेव भवति । एकारौकारौ तु गुणौ न भवत एव, तयोः ऋकारेण ळकारेण च स्थानसाम्याभावादित्यर्थः । सन्धि– कार्योपयोगित्वादिदं सूत्रमवश्यमेव परिभाषासूत्रालोचनावसरे पठितव्यम् ।

## ८. अलोऽन्त्यस्य ।

षष्ठी, स्थाने इत्युभयं पदं ‘षष्ठी स्थानेयोगा’ इति सूत्रतोऽनुवृत्तिर्भवति । अनुवर्तमानं षष्ठीपदं तृतीयया विपरिणम्यते । एवं रीत्या निष्पन्नमर्थं सूचयति स्थाने विधीयमानः आदेशः षष्ठ्या निर्दिष्टस्य उच्चारितस्य भवतीति । स्थानषष्ठीनिर्दिष्टस्य य उच्यते सोऽन्त्यस्यालः स्थाने स्यादिति भावः । सूत्रेऽस्मिन् स्थानेपदानुवृत्तिः किमर्था? तथा सति षष्ठ्या निर्देशेन विधीयमानस्य आदेशमात्रस्य ग्रहणे भूधातोस्तृचि ‘आर्धधातुकस्येड्वलादेः’ इत्यनेन

---

३२. महाभाष्यम् – ८/२/४२ ।

विधीयमान इडपि अन्त्यस्य एतत्सूत्रबलादवयवः प्राप्नोति । एतद्वारणाय स्थाने पदानुवृत्तौ स्थाने विधीयमानत्वाभावात् इड्विधौ नास्याः प्रवृत्तिः । इटः इत्संज्ञाकटकारकरणात् अवयवबोधनात् स्थानषष्ठी 'आर्धधातुकस्य' इत्यत्र नास्तीति गम्यते । तदुक्तं भाष्यकारेण – 'किमर्थं पुनरिदमुच्यते? अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहारः । इतरथा ह्यनिष्टप्रसङ्गः । इतरथा ह्यनिष्टं प्रसज्येत । टित्किन्मितोऽप्यन्त्यस्य स्युः । यदि पुनरयं योगशेषो विज्ञायेत । योगशेषे च । किम्? अनिष्टं प्रसज्येत । टित्किन्मितोऽप्यन्त्यस्य स्युः । तस्मात् सुष्ठूच्यते अलोऽन्त्यस्येति स्थाने विज्ञातस्यानुसंहार इतरथा ह्यनिष्टप्रसङ्ग"[३६३] इति ।

न तु अल इति जस्विभक्त्यन्तम् । अल्समुदायबोधकपदोत्तरं यत्र स्थानषष्ठीं तत्र अन्त्यस्याल इत्यस्योपस्थितिः । तदुक्तं पदमञ्जर्य्याम् "अल इति जसन्तं चेयमर्थः स्याद् अलात्मका आदेशा अन्त्यस्येति । तत्र रहोरजसां लोपः सर्वादेशः स्यात् नीरजीकरोतीति । असन्देहार्थं चालन्त्यस्येति वाच्यं स्यात् । अतोऽलन्त्यस्येत्यनेन सामानाधिकरण्यात् षष्ठ्यन्तमिति स्थितम्"[३६४] इति ।

### ९. **ङिच्च**[३६५] ।

अत्रालोऽन्त्यस्येत्यस्यानुवृत्त्या ङिदादेशोऽन्त्यस्यालः स्थाने स्यादिति सूत्रार्थः सम्पद्यते । अनेकाल्शित्सर्वस्येत्यनेनानेकाल्त्वात् प्राप्तस्य सर्वादेशस्यापवादोऽयम् । ननु अलोऽन्त्यस्येत्येव सिद्धे 'अनेकालादेशोऽन्त्यस्यालः स्थाने चेत्तर्हि ङिदेव इति नियमार्थमिदमस्तु । ततश्च ङिद्भिन्नः सर्वोऽप्यनेकालादेशः सर्वस्यैव स्थानिनः स्थाने भविष्यति, 'अनेकाल्शित्सर्वस्य' इति सूत्रे अनेकाल्ग्रहणं व्यर्थमिति चेत्? उच्यते अतो भिस ऐस् इत्यादौ 'आदेः परस्य' इत्यस्य परत्वात् बाधनार्थमनेकाल्ग्रहणस्य चारितार्थ्यमिति बोध्यम् । अयं भावः – शसो न इत्यत्रादेः परस्येति प्रवर्तते, युस्मदस्मद्भ्यां परस्य शसो न स्यादित्यर्थः। 'इदं किमोरीश्की' इत्यत्र किमः स्थाने की इत्यनेकालादेशस्य सर्वादेशार्थमनेकाल्ग्रहणं चारितार्थम् । 'अतो भिस ऐस्' इत्यादौ अनयोर्द्वयोः प्राप्तौ 'विप्रतिषेधे परं कार्यमि'ति परत्वात् सर्वदेशा एव भवति, न तु आदेरलः स्थाने ।

अतः 'अनेकाल्शित्सर्वस्य' इति वक्षमाणस्य सर्वादेशत्वविधेः अयं विधिरपवादः । अपोद्यते बाध्यते अनेनेति अपवादः । येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादो भवति ।

---

३३. महाभाष्यम् – १/१/५२ ।

३४. काशिकापदमञ्जरी – १/१/५२ ।

३५. अष्टा. – १/१/५३ ।

अनेकाल्विशेषेषु विधीयमानेन ङितामन्त्यादेशत्वेन स्वविषये अवश्यं प्राप्तमनेकाल्–सामान्येन विहितं सर्वादेशत्वं बाध्यते, विशेषविहितत्वान्निरवकाशत्वाच्च । विशेषशास्त्रं हि विशेषेषु झटिति प्रवर्तते, विशेषाणां स्वशब्देनोपात्तत्वात् । सामान्यशास्त्रं तु सामान्यमुखेन विशेषेषु प्रवर्तते इति तस्य तेषु मन्दप्रवृत्तिः अतो विशेषशास्त्रं प्रबलम् ।

'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति सूत्रभाष्ये पतञ्जलिनालोचितं 'तातङि ङित्करणं सावकाशम् । कोऽवकाशः ? गुणवृद्धिप्रतिषेधार्थो ङकारः, तातङि ङित्करणस्य सावकाशत्वात् विप्रतिषेधात् सर्वादेशो भविष्यति'[३६६] इति । तत्रैव केयटेनाटीकितं – "ननु अयमपवादः । अनेकाल् शिदित्युत्सर्गः उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः । नैतदस्ति । ङित्त्वस्यान्यार्थत्वसम्भवे सति दौर्बल्यात् सन्दिग्धोपस्थानोऽयं योग इत्यपवादत्वमेवात्र विषयेऽस्य नास्ति"[३६७] इति । दीक्षितोऽपि अनुरूपमाह 'यद्यपि ङिच्च इत्ययमपवादस्तथापि अनन्यार्थङित्त्वेषु अनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वादि'ति[३६८] ।

## १०. आदेः परस्य[३६९]

अलोऽन्त्यस्य इति सूत्रादनुवृत्तान्त्यपदस्य ङिच्च इत्यत्र सम्बन्धादिहापि सम्बध्यते । तथा च परस्य यत् कार्यं तत् अन्त्यस्य आदेरित्यर्थापत्त्या द्विर्गता आपो यत्र तद् द्वीपमित्यत्र 'द्व्यन्तरुपसर्गेभ्योऽप इत्' इति सूत्रेणान्त्यस्य आप्प्रत्ययघटकाकारस्य आदिः आप्समुदायोऽपि इति समुदायस्य ईत्वप्रसङ्गः । अतः अल्पदमनुवर्त्य आदेरल इत्यर्थो निष्पद्यते । तथा च आप्समुदायस्याल्रूपत्वाभावाद् ईत्वं न । अनेन अन्त्यपदस्यासम्बन्धः सूचितः । परशब्द आवर्तते, तृतीया विपरिणम्यते च, तथा च परबोधकशब्देन यत्र परस्य कार्यं तत्रैवानेन आदिरित्यस्योपस्थितिः। तेन 'नित्यं ङितः' इत्यनेन धातोर्विहितस्य ङिदुत्तमस्य सकारान्तस्य लोपो नित्यमित्यर्थकेन सूत्रेण भवाव, भवाम इत्यादौ आदेर्लोपो न, विहितपञ्चम्या आश्रयणेन परबोधकशब्देन अर्थात् परपदमुच्चार्य कार्यविधानाभावात् ।

यत्र यत्र 'आदेः परस्य' इत्यस्य प्राप्तिस्तत्र तत्र 'अलोऽन्त्यस्य' इत्यस्य प्राप्तिरिति द्वयोर्व्याप्यव्यापकभावः। तत्र 'अलोऽन्त्यस्य' इत्युत्सर्गशास्त्रम्, तदीयोद्देश्यतावच्छेदकं स्थानेयोगषष्ठ्या विधीयमानकार्यम् – इदमेव व्यापकम् । 'आदेः परस्ये'त्यस्योद्देश्यताव–

३६.महाभाष्यम् – ७/१/३५ ।

३७. तथैव – वार्तिककारकात्यायनः ।

३८. वैयाकरणसिद्धान्तकौमुदी, सूत्रम् – ४३ ।

३९. अष्टा. १/१/५४ ।

च्छेदकं परत्वेन बोधितस्य स्थानषष्ठ्यन्तबोध्यस्य स्थाने विधीयमानकार्यत्वम् – इदमेव च व्याप्यम् । एतद्धर्मावच्छिन्नातिरिक्तत्वेन व्यापकधर्मावच्छिन्ने सङ्कोचे सति 'आदेः परस्य' इत्यस्य विषयेऽलोऽन्त्यसूत्रस्याप्रवृत्तिः । अतएव 'उदः स्थास्तम्भोः पूर्वस्य', 'शसो न' इत्यादिस्थले 'अलोऽन्त्यस्य' इति सूत्रस्य प्रवृत्त्यभावो जातः ।

## ११. अनेकाल्शित्सर्वस्य[३७०] ।

न एकः अनेकः, अनेकः अल् यस्य स अनेकाल्, शकार इत् यस्य स शित्, अनेकाल् च शित् च इति समाहारद्वन्द्वः। अष्टन् शब्दात् जसि शसि च 'अष्टन आ विभक्तौ' इति आत्वे 'अष्टा अस्' इति स्थिते 'अष्टाभ्य औश्' इति कृताकाराद् अष्टनः परयोर्जश्शसोर्विधीयमान औशादेः, 'अलोऽन्त्यस्य' इति बाधित्वा, 'आदे परस्य' इत्यादरकारस्य प्राप्तः, अनेकाल्त्वात् च सर्वादेशः प्राप्तः । शिदित्यस्यानेकाल्त्वात् कथं पुनः शिद्ग्रहणम्? तदुच्यते महाभाष्यकारेण – 'एवं तर्हि सिद्धे सति यत् शित्सर्वस्येत्याह तज्ज्ञापयति अस्त्येषा परिभाषा नानुबन्धकृतमनेकाल्त्वं भवति'[३७१] इति ।

'अष्टाभ्य औश्' इत्यादौ आदेः परस्येत्येतदपि परत्वादनेन बाध्यत इत्यन्वयः । 'अस्तेर्भूः' इत्यादौ अनेकाल्शिदित्यनेन यथा अलोऽन्त्यस्येति बाध्यते, तथा 'अष्टाभ्य औश्' इत्यादौ आदेः परस्येत्येतदपि बाध्यत इत्यर्थः । ननु 'अस्तेर्भूः' इत्यादौ अलोऽन्त्यस्येति प्राप्ते सत्येवानेकाल्शिदित्यरम्भात् येन नाप्राप्तिन्यायेनापवादत्वात्तेन तत्रालोऽन्त्यस्येत्यस्य बाधो युज्यते, आदेः परस्येत्यस्य तु 'अनेकाल्शित्सर्वस्य' इति नापवादः । 'अष्टाभ्य औश्' इत्यादौ 'आदेः परस्य' इत्येतदपि परत्वादनेन बाध्यते ।

यत्र यत्र अनेकाल्शित्सर्वस्य इति सूत्रस्य तत्र सर्वत्र अलोऽन्त्यस्येत्यस्य प्राप्तिरिति अनेकालिति सूत्रमपवादसूत्रम्, तदीयोद्देश्यतावच्छेदकम् अनेकालादेशशिदादेशान्यतरत्वम् । अलोऽन्त्यस्य सूत्रोद्देश्यतावच्छेदकमनुपदमुक्तमेव । अतः अनेकालिति सूत्रीयोद्देश्यता–वच्छेदकावच्छिन्नातिरिक्तत्वेन अलोऽन्त्यस्यसूत्रीयोद्देश्यतावच्छेदकावच्छिन्ने सङ्कोचे सति 'इदं किमोरीश्की' इत्यादौ अनेकाल्शित्विषये 'अलोऽन्त्यस्य' इति सूत्रस्य प्रवृत्तिः न भवति । एवं 'ङिच्च' सूत्रमपवादो भूत्वा अनेकाल्सूत्रं प्रबाधते ।

---

४०. अष्टा. – १/१/५५ ।

४१. महाभाष्यम् – १/१/५५ ।

## १२. स्थानिवदादेशोऽनल्विधौ[३७२] –

आदेशः स्थानिवत् स्यात् । अनल्विधौ न तु स्थान्यलश्रयविधौ । अत्र 'स्थानिवदादेशोऽनल्विधौ' इति एकमेव सूत्रं यदि विधिनिषेधात्मकवाक्यविभागेन योगद्वयघटितं क्रियते तथा भवत्युत्सर्गापवादभावः। प्रथमं विधिवाक्यमुत्सर्गवाक्यम् । द्वितीयः निषेधवाक्यम् । तत्रापवादशास्त्रीयोद्देश्यतावच्छेदकं स्थान्यलाश्रयविधिकर्तव्यताविशिष्ट–मादेशत्वम् । उपसर्गशास्त्रीयोद्देश्यतावच्छेदकत्वम् । यत्र यत्र स्थान्यलाश्रयविधिकर्तव्यता–विशिष्टमादेशत्वम्, तत्र तत्र सामान्यतो सत्किञ्चिद्विधिकर्तव्यताविशिष्टमादेशत्वमस्त्येवेति भवत्येव द्वयोर्व्याप्यव्यापकभाव इति उत्सर्गशास्त्रस्य बाध्यत्वम् अपवादशास्त्रस्य बाधकत्वं प्रतिफलति । कुत्र नियमोऽन्यत्राप्यनियमे नियमं प्रतिपादयति । धात्वङ्गकृत्तद्धिताव्यय–सुप्तिङ्पदादेशाः। धात्वादेशो धातुवत् भवति । 'अस्तेर्भूः' इति सूत्रेण अस्धातोः 'भू' इति आदेशो भवति । आर्धधातुके विवक्षिते धात्वादेशो धातुवत् तेन 'अचो यत्' इति सूत्रेण यदित्यादिधातुप्रत्यत्यः । भव्यम् इति रूपं जायते ।

## १३. अचः परस्मिन् पूर्वविधौ[३७३] ।

परं निमित्तीकृत्य जायमानोऽच्स्थानिक आदेश स्थानिवद्भवतीति सूत्रार्थः । 'अच् एव आदेशः' इत्यर्थो बोध्यः । अज्झलोरुभयोः स्थाने जातस्य आदेशस्य न स्थानिवत् । 'अच् एव आदेशः' इत्यस्य अच्त्वप्रतियोगिकपर्याप्त्यनुगयोगितावच्छेदकधर्मावच्छिन्नानु–योगिताकपर्याप्तिकस्थानिताक आदेशः स्थानिवत् । 'पटुमाचष्टे' इत्यत्र 'तत्करोति तदाचष्टे' इति सूत्रेण णिचि, णित्त्वाद् 'अत उपधाया' इति वृद्धौ प्राप्तायाम् अल्विधित्वात् 'अचः परस्मिन् पूर्वविधौ' तन्निषिध्य स्थानिवद्भावं नियमयति ।

## १४. प्रत्ययलोपे प्रत्ययलक्षणम्[३७४] ।

प्रत्ययो लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणम् । प्रत्ययस्य लोपे सति प्रत्ययनिमित्तं कार्यं स्यादित्यर्थः। विशेषविहिता अपि लुगादिसंज्ञा लोपसंज्ञां न बाधन्ते । एकसंज्ञाधिकारादन्यत्र संज्ञानां बाध्यबाधकभावानङ्गीकारादिति भाव इति तत्त्वबोधिन्यामलोचितम् । स्थानिवद्भावा– देव सिद्धे अल्विध्यर्थमिदं सूत्रम् । यत्र प्रत्ययस्यासाधारणं रूपं प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवतीति नियमयति । तदुक्तं

४२. अष्टा. – १/१/५६ ।

४३. अष्टा. – १/१/५७ ।

४४. तत्रैव – १/१/६२ ।

भाष्ये 'प्रत्ययं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन यथा स्यात् । शब्दं गृहीत्वा यदुच्यते तत्प्रत्ययलक्षणेन मा भूदिति । किं प्रयोजनम्? शोभना दृषदोऽस्य ब्राह्मणस्य सुदृषद् ब्राह्मणः 'सोर्मनसी अलोमोषसी' इत्येष स्वरो मा भूदिति । प्रत्ययलोपे प्रत्ययलक्षणम्'[३७५] इति । काशिकाकारेणोक्तं "प्रत्ययनिमित्तकार्यमसत्यपि प्रत्यये कथं तु नाम स्यादिति सूत्रमिदमारभते" इति । 'न लुमताङ्गस्य' इति सूत्रेण प्रत्ययलोपे प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते । लुमताशब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति ।

## १५. तस्मिन्निति निर्दिष्टे पूर्वस्य[३७६] ।

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् इति सूत्रार्थः। इको यणचीत्यत्र अचि इकः यण् स्यादित्यवगतम् । तत्र अचो वर्णान्तराधिकरणत्वं न सम्भवतीति सति सप्तम्याश्रयणीया । अचि सति इको यण् स्यादिति । तत्र व्यवहिते अव्यवहिते च इको यण् प्राप्तः । ततश्च समिधमित्यत्र धकारव्यवहिते अकारे सत्यपि मकारादिकारस्य यण् स्यात् । तथा अचि सति पुर्वस्य परस्य वा इको यण् प्राप्तः । तत्र 'अव्यवहित एव अचि भवति न व्यवहिते', पूर्वस्यैव भवति न परस्य' इत्येतदर्थमिदं सुत्रमुपस्थाप्यते । तस्मिन्निति इति सूत्रे इतिकरणविषये न्यासकारेणोक्तम् – 'एवं मन्यते इतिकरणो ह्यत्र कृतः, स च स्वरूपपदार्थकत्वं निरस्य अर्थपदार्थकत्वं तस्मिन्नित्यस्य सम्पादयति, तेनार्थस्यैव ग्रहणं भवति । स तु अर्थः अवश्यं येन केनचिच्छब्देन निर्देष्टव्य इति नानार्थकत्वात् सामान्यवाचिना तस्मिन्नित्यनेन पदेन निर्देष्टव्य इति नानार्थकत्वात् सामान्यवाचिना तस्मिन्नित्यनेन पदेन निर्दिष्ट' इति । अपि च न हि क्वचिच्छास्त्रे सप्तमीनिर्दिष्टः शब्दः श्रूयते येन स्वरूपग्रहणमाशङ्क्येत । सोऽयमल्पेन सूत्रेण सिद्धे यन्महत् सूत्रं करोति तन्महाविषयेयं परिभाषेति सूचनार्थम् । एवञ्च महाविषयेयं भवति यदि सर्वत्र सन्देह विषये अन्यत्र च प्रवर्तते'[३७७] इति ।

## १६. तस्मादित्युत्तरस्य[३७८] –

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयमिति सूत्रार्थः । 'द्व्यन्तरुपसर्गेभ्योऽप ईत्', 'उदः स्थास्तम्भोः पूर्वस्य' इत्यादिसूत्रगतपञ्चम्यन्तस्यानुकरणं तस्मादिति । द्व्यन्तारित्यादि सूत्रेषु पञ्चम्यन्तगम्ये अर्थे द्व्यन्तरादिशब्दे निर्दिष्टे

---

४५. महाभाष्यम् – १/१/६२ ।

४६. अष्टा. – १/१/६६ ।

४७. काशिकावृत्तिः, न्यासकारस्योक्तिः – १/१/६६ ।

४८. अष्टा. – १/१/६७ ।

अव्यवहितोच्चारिते सत्येव ततः परस्यैव ईत्वं भवति, न तु व्यवहितोच्चारिते द्व्यादिशब्दे, नापि ततः पूर्वस्य भवतीति नियमार्थमिदं सूत्रमारभते । तदुक्तं पदमञ्जरीकारेण 'किमर्थमिदम्? तिङ्ङतिङ इति यात्र पञ्चमी सा तु न कारकविभक्तिः। किं तर्हि? दिक्शब्दाञ्चूत्तरपद इति दिग्योगलक्षणा । दिक्शब्दस्तु अध्याहार्यः। तत्र किं पूर्वशब्दमध्याहृत्य अतिङः पूर्वस्य निघातः क्रियते, उत परशब्दमध्याहृत्य परस्येति सन्देहे सति परिभाषेयं नियमार्था आरभ्यते' इति ।

ननु अनियमे नियमकारिणी परिभाषा भवतीति कथमत्र 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'तस्मादित्युत्तरस्य' चेति सूत्रद्वये परिभाषात्वव्यवहारः, 'इको यणचि' इत्यादौ परिभाषोपस्थित्या पदैकवाक्यतया लक्ष्यसंस्कारकवाक्यार्थबोधस्य जायमानत्वाद् व्यवहिते पूर्वस्मिन् परस्मिन् च यणप्राप्तेरभावेन कुतो नियमप्रसङ्गः? इत्याशङ्कायामाह नागेशाचार्यो लघुशब्देन्दुशेखरे – "परिभाषाणां नियमत्वन्तु यदि परिभाषासूत्रं न स्यात्तदा व्यवहितादावपि प्रवृत्तिः स्यादित्येतावतेति' इति ।

## **१७. स्वं रूपं शब्दस्याशब्दसंज्ञा**[४९] ।

शब्दस्य स्वं रूपं संज्ञि, शब्दशास्त्रे या संज्ञा तां विना इति सरलार्थः । 'स्वं रूपम्' इति सूत्रे स्वशब्द आत्मीयवाची, रूपशब्दः रूप्यते बोध्यते अनेनेति व्युत्पत्त्या शब्दवाची । तथा च राजादिशब्दस्यार्थः । एवमानुपूर्वीरूपो यो राजादिशब्द इत्युभयं संज्ञि वाच्यमित्यर्थः । तयोः पदपदार्थयोर्मध्ये अर्थस्य न प्राधान्यम्, उत्पद्यमानप्रत्ययेन सह पूर्वापरीभावस्य प्रतिपदिकादित्यनेन अभेदान्वयस्य चासम्भवात् । किन्तु शब्दस्यानुपूर्वी–रूपस्य प्राधान्यम् । तथा च अर्थवाचकशब्दस्य ग्रहणे सिद्धे अनर्थकशब्दस्य ग्रहणं व्यावृतमिति 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इत्येषा परिभाषा फलिता । स्वं रूपमिति सूत्रे अर्थशब्देन लौकिकः, तथा तस्य सत्त्वे तस्य सत्त्वम्, तस्यासत्त्वे तस्यासत्त्वमित्येवं रूपाभ्यामन्वयव्यतिरेकाभ्यां कल्पितः शास्त्रे कल्पितयोः प्रकृतिप्रत्यययोरर्थश्च गृह्यते । स च लौकिकः शास्त्रीयश्च द्विविधौऽप्यर्थः – मुख्यः प्रसिद्धश्च ग्राह्यौ । एवन्मूलक एव 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति च न्यायः । तदुक्तं नागेशाचार्येण 'अतएवेयं विशिष्टरूपोपादान एव, इदं सूत्रञ्च तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च न तु वर्णग्रहणे इत्याकरे स्पष्टम्' इति । कैयटाचार्य आह 'अर्थस्य शास्त्रीये कार्ये क्वचिदयोग्यत्वात् प्रत्यासत्त्या स एवोपात्तः शब्दो ग्रहीष्यते, न तु विप्रकृष्टं शब्दान्तरमिति भावः' इति ।

स्वं रूपमिति सूत्रं संज्ञा परिभाषा वेति विचार्यते । स्वरूपस्य ग्रहणात् पर्यायस्याग्रहणादनियमे नियमकारित्वमस्मिन् सूत्रे वर्तते तेन परिभाषेयम् । संज्ञासूत्रं

---

४९. अष्टा. – १/१/६८ ।

सामानाधिकरण्येन निर्दिशति यथा 'अदेङ् गुणः' इति, शब्दस्य स्वं रुपमित्येवं वैयाधिकरण्येन निर्देशात् नेदं संज्ञासूत्रम् ।

## १८. अचश्च[३८०] ।

ह्रस्वदीर्घप्लुतशब्दैर्यत्राज्विधीयते तत्र 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते इति सूत्रार्थः । 'ह्रस्वो नपुंसके प्रातिपादकस्य' इत्यत्र ह्रस्वशब्दोच्चारणेन 'अचः' इति षष्ठ्यन्तं पदमुपतिष्ठते । प्रकृतनियमेन 'ह्रस्वो नपुंसके प्रातिपदिकस्य अचः' इति सम्पूर्णसूत्रं भवति । काशिकाकारेण सूत्रपर्यालोचनावसरे उक्तं 'परिभाषेयं स्थानिनियमार्था । ह्रस्वदीर्घाप्लुताः स्वसंज्ञया शिष्यमाणा अचः एव स्थाने वेदितव्याः' इति । तत्र न्यासकारेणोपन्यस्तं 'संज्ञाविधाने नियम इत्यत्र युक्तिमाह अजिति वर्तते इति । अज्ग्रहणे ह्यनुवर्तमाने ह्रस्वादिशब्दा अनुवर्तमाना अच एवोपस्थानं प्रति न व्याप्रियन्ते, तस्य स्वयमेवोपस्थिततत्वात् । ततश्च स्वरूपमात्रपदार्थकाः सन्तो विधीयमानस्याचो विशेषणता–मुपयान्ति । तत्रैवमसम्बन्धः क्रियते अचः स्थाने अज् भवति ह्रस्वदीर्घप्लुत इत्येवं संज्ञया विधीयमान इति ।

जिनेन्द्रबुद्धिहरदत्तादिभिः वैयाकरणैः परिभाषेयं स्थानिनियमार्था, लिङ्गवती पदोपस्थापिका चेति स्वीकृता ।

## १९. यथासंख्यामनुदेशसमानाम्[३८१] ।

समसम्बन्धी विधिर्यथासंख्यं स्यादिति सूत्रार्थः । संख्यमनतिक्रम्य यथासंख्यम् । साम्यमिह संख्यातो विवक्षितम् । अनुदेशो विधानम् । समानामिति यदि कर्मणि षष्ठी, तर्हि स्थान्यादिभिः समसंख्यानां यत्र विधानम्, यथा 'एचोऽयवायावः' इत्यादौ, तत्रैव यथासंख्यकप्रवृत्तिः स्यात् । येन क्रमेण पदज्ञानं यथा 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यनेन नन्द्यादिभ्यो ल्युः ग्रह्यादिभ्यो णिनिः, पचादिभ्योऽच्प्रत्ययो यथासंख्यं भवति । तथा येन क्रमेण पदार्थोपस्थितिः, यथा 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः इत्यत्र परस्मैपदशब्देन 'तिप्तस्झि' इत्यादिसूत्रे क्रमेण निर्दिष्टानां तिबादीनामुपस्थित्या तेनैव क्रमेण णलादय आदेशा यथासंख्येन भवन्ति । एतेन येन क्रमेण पदज्ञानम्, पदादुपस्थितिर्वा, तेनैव क्रमेण वाक्यार्थबोधविषयीभूतः सम्बन्धो ज्ञेय इति फलितम् । 'समूलाकृतजीवेषु हन् कृञ् ग्रहः'[३८२] इत्यत्र न स्यात्, तत्र विधेयस्य नमुल एकत्वात् । अतः समानामिति

---

५०. अष्टा. – १/२/२८ ।

५१. अष्टा. – १/३/१० ।

५२. तत्रैव – ३/४/३६ ।

सम्बन्धसामान्ये षष्ठी । एवञ्च समूलाद्युपपदानां हनादिधातूनाञ्च समसंख्यानामुपदानेन एकस्य प्रत्ययस्य विधिरपि समसंख्याकसम्बन्धी विधिरेवेति तत्रापि यथासंख्यप्रवृत्तिः निर्बाधा ।

यद्यपि स्थानाख्यलौकिकप्रामाण्यादेव सिद्धम्, तथापि 'परस्मैपदानाम्', 'एचोऽयवायावः' इत्यादौ शब्दतः सूत्रान्तरस्थक्रममादाय सम्बन्धबोधार्थम्, 'आद्यन्तौ' इत्यादौ समासनिर्देशे साहित्ये द्वन्द्वविधानादप्राप्तक्रमान्वयबोधनार्थञ्चेदं सूत्रमुपन्यस्तम् । ननु 'ख्यत्यात्परस्य' इत्यत्र 'ख्य', 'त्य' इत्यनयोः 'ङसि, ङस्', इत्येताभ्यां समसंख्यासाम्यात् यथासंख्यमन्वये ख्यशब्दात् परस्याः पञ्चम्या एकवचनस्य त्यशब्दात् षष्ठ्या एकवचनस्यैव उत्वं स्यात्, न तु उभाभ्यां परस्य उभयविभक्त्येकवचनस्य । तथा च स्वरितत्ववति यथासंख्यमिति प्रवर्तते । कुत्र च स्वरितत्वम्, कुत्र न । तदा व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमिति व्याख्यानात् निर्णेयम् ।

## २०. स्वरितेनाधिकारः[५३] ।

अधिकारो व्यापृतिरित्यर्थः । शब्दस्य चोत्तरसूत्रेषु अनुवृत्तिरेव व्यापृत्तिः । स्वरितेनात्र 'इत्थम्भूतलक्षणे' इत्यतेन स्वरितत्वप्राप्तलक्षणे तृतीया । लक्षणमत्र ज्ञानजनकज्ञानविषयत्वम् । यथा स्वरितत्वज्ञाप्योऽधिकारः । तथा च अधिकारज्ञानजनक–त्वज्ञानं स्वरितत्वज्ञानं तद्विषयकं स्वरितस्य । स्वरितत्वविशिष्टोऽधिकारो विनियोग इत्यर्थः। विनियोगो नाम स्वीयसूत्रोत्तरसूत्रैकवाक्यतया विवक्षितवाक्यार्थनिष्पादनम् । यत्र पूर्वत्र विनियोगस्तत्र पूर्वसूत्रैकवाक्यतया इति विवक्षितम् । नागेशाचार्य आह – स्वरितत्वञ्चेदं दोषविशेषरूपमज्झल्साधारणं स्वरूपमधिक्रियमाण पदघटकोऽज्निष्ठं वा । तच्चानु–नासिक्यवत् प्रतिज्ञातम् । विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः । क्वचित् पूर्वत्रापि । अथवा लक्षणया अधिकारशब्दोऽधिकारगतिपरः । गतेर्ज्ञानमित्यर्थः । स्वरितत्वज्ञाप्यमधिकारज्ञानम् । अधिकारशब्दः अधिककार्यं करोतीति व्युत्पत्तिलभ्यार्थकः । तथा च अधिककार्यकारित्व–ज्ञानमित्यर्थः ।

स्वरितेन स्वरविशेषेणाधिकार उत्तरत्रानुवृत्तिरूपव्यापारः प्रत्येतव्यः । यत् पदं शास्त्र–कृता स्वरिताख्यस्वरविशेषविशिष्टमुच्चारितं तदुत्तरसूत्रेष्वनुवर्तनीयमिति बालमनोरमायाम् । महाभाष्यकारेणाधिकारविषये उक्तम् – "किमर्थमिदमुच्यते? अधिकारः प्रतियोगं तस्य अनिर्देशार्थ इति । किमिदं प्रतियोगमिति? योगं योगं प्रतियोगं तस्य ग्रहणं मा

५३. अष्टा. – १/३/११ ।

कार्षमिति"[३८४]। प्रतिसूत्रोपस्थितिरूपार्थः कथं लभ्यते? तदुक्तं भाष्यकारेण – "किं गतमेतदियता सुत्रेण? गतमित्याह कुतः लोकतः। तद्यथा लोके अधिकृतोऽसौ ग्रामे अधिकृतोऽसौ नगरे इत्युच्यते यो यत्र व्यापारं गच्छति । शब्देन चाप्यधिकृतेन कोऽन्यो व्यापारः शक्योऽवगन्तुमन्यदतो योगे उपस्थापात्" इति । काशिकावृत्तौ आह स्वरितो नाम स्वरदोषो (वर्णधर्मः) । इहैव न्यासकारेणादीरितं – 'यदि पारिभाषिकस्येह स्वरितस्य ग्रहणं स्यात्, रषाभ्यां नो णः समानपदे इत्यत्र णकाराणकारस्याधिकारता न स्यात्, पारिभाषिकस्य अज्धर्मत्वात् नकारस्यानच्कत्वादिति मत्वा सर्वेषां वर्णानामचां हलां च स्वरिताख्यो यो वर्णधर्मो गुणः तस्येदं ग्रहणम्, न पारिभाषिकस्येति दर्शयन्नाह स्वरितोनाम स्वरदोषो वर्णधर्म इति । वर्णधर्मस्य तु ग्रहणमधिकारावगमाय । स इह हलि अपि स्वरितसञ्जनाद् विज्ञायते' इति ।

कियद्दूरमधिकारः? व्याख्यानमेव शरणम् । वाक्यार्थबोधे पदार्थान्तरस्य आकाङ्क्षितत्वेन तद्वाचकस्य अश्रुतस्य अनुपस्थितस्य पदस्य कल्पनापेक्षाया अन्याय्यतया पूर्वं श्रुतस्यैवाक्षेपात् तेनैवाकाङ्क्षाशान्तेश्च सम्भवादयमधिकारो व्यर्थ एव प्रारब्ध इत्यपास्तम् । तस्य न केवलमनुवृत्तिमात्रफलकत्वं किन्तु तत्र तत्र कार्यविशेषबोधनमपि प्रयोजनमिति न वैयर्थ्यम् । अस्मिन्नेव सूत्रे अधिककार्यकारित्वरूपमधिकारफलं प्रदर्शितम् । वार्तिककारेण परिभाषारूपेण स्वीकृतम् । तेनोक्तम् – 'अन्यनिर्देशस्तु निवर्तकस्तस्मात् परिभाषा' इति ।

## २१. आकडारादेका संज्ञा[३८५] ।

किमर्थमिदमुच्यते अन्यत्र संज्ञासमावेशान्नियमार्थं वचनम्, अन्यत्र संसमावेशो भवति क्वान्यत्र? लोके व्याकरणे च । लोके तावत् इन्द्रः, शत्रुः पुरुहुतः पुरन्दरः, कन्दुः कोष्ठः कुसुल इति एकस्य द्रव्यस्य बहव्यः संज्ञा भवन्ति । व्याकरणेऽपि कर्तव्यं हर्तव्यमित्यत्र प्रत्ययकृतकृत्यसंज्ञानां समावेशो भवति । पाञ्चालः वैदेहः वैदर्भ इति प्रत्ययतद्धिततद्राजसंज्ञानां समावेशो भवति । अन्यत्र संज्ञासमावेशादेतस्मात्कारणात् आकडारादपि संज्ञानां समावेशो प्राप्नोति । इष्यते चैकैव संज्ञा स्यादिति । तच्चान्तरेण यत्नं न सिद्ध्यतीति नियमार्थं वचनम् । एवमर्थमिदमुच्यते इति भाष्योक्त्या संज्ञासमावेशवारणाय लौकिकनियमवारणाय शास्त्रे संज्ञानियमार्थमिदं सूत्रमुपस्थाप्यते । अत्र प्रदीपकारेण श्रीकैयटाध्यापकेनाध्यापितं किमर्थमिति आकडारात् परा निरवकाशा च संज्ञेष्यते । तत्रान्तरेणापि सूत्रं 'विप्रतिषेधे परं कार्यम्' इति वचनात् परा भविष्यति, न पूर्वा

५४.महाभाष्यम् – १/३/११ ।

**५५. अष्टा. – १/४/१ ।**

निरवकाशापि हि सावकाशां विशेषविहितत्वादेव बाधित्वा भविष्यति, कौण्डिन्ये दधिदानमपि तक्रदानमिति प्रश्नः । अन्यत्रेति । विप्रतिषेधे परं कार्यमुच्यते । न च संज्ञानां विरोधः युगपत्प्रवृत्तिसम्भवात् । न च बाध्यबाधकभावः । भिन्नफलत्वात्, विरोधाभावाच्च । दधितक्रयोरभिन्नं फलमोदनमेक इति तयोः बाध्यबाधकभावः । अस्तु एतावतालोचनेना–वगम्यते पाक्षिके सति नियामकत्वम् । क्वचिदनियमे नियमयतीति ।

## २२. विप्रतिषेधे परं कार्यम्[३८६] ।

तुल्यबलविरोधे परशास्त्रं विहितकार्यं स्यात् । अन्यत्रान्यत्र लब्धावकाशयोः शास्त्रयोरेकत्र युगपत् प्राप्तिः तुल्यबलविरोधः । यथा 'ण्वुल्तृचौ' इति स्वस्वविधानसामर्थ्यात् सर्वेभ्यो द्वयोरेव प्रवृत्तिर्भवति, तद्वत् पूर्वापरशास्त्रयोरपि एकलक्ष्ये प्राप्तौ स्वस्वप्रामाण्यमहिम्ना द्वयोरपि प्रवृत्तिसम्भवे इदं शास्त्रं नियमार्थं भवति परशास्त्रविहितमेव कार्यं स्यादिति । अत्र नियामकता न परिसंख्यारूपा, अपि तु पाक्षिकप्राप्तिमूलिका, व्रीहीनवहन्यादितिवत् । परशास्त्रविहितकार्यस्य योऽयोगो योगाभावः प्राप्तः, तस्य व्यवच्छेदोऽभावो बोध्यते । व्रीहीनवहन्यादित्यत्र यथा नखविदलनादेर्व्यावृत्तिर्भवति, तथैवात्रापि पूर्वशास्त्रविहितकार्यस्य व्यावृत्तिर्भवति । एतन्नियममूलिकैव परिभाषाऽस्ति सकृद्गतौ विप्रतिषेधे यद्बाधितम्, तद्बाधितमेव । यथा भिन्तादित्यत्र परत्वात्तातङादेशेन बाधितो धिरादेशः पक्षे आशीर्द्योतकतया न भवति ।

महाभाष्ये तु पक्षेऽस्य सूत्रस्य विधायकताऽपि स्वीकृतास्ति । तथाहि द्वयोः स्वामिनोर्यदा एक प्रेष्यः भवति, तदा स तयोः पर्यायेण कार्यं करोति, यदा तमुभौ युगपत् प्रेषयतः, नानादिक्षु च कार्यं भवति, तदा स प्रेष्यो द्वयोरपि कार्यं न करोति इति लोके प्रसिद्धो विषयः । एवमिहापि द्वयोः युगपत् प्राप्तौ तन्निवृत्तौ सत्यामिदं विप्रतिषेधे इति सूत्रं परशास्त्रमुत्थापयति, त्वयाऽत्र प्रवर्तितव्यमिति । अतश्चास्य विधायकता सिध्यति । तस्मिन् परशास्त्रे प्रवृत्ते सति यदि पूर्वस्य प्रवृत्तिः सम्भवति, तदा पूर्वशास्त्रमपि तत्र प्रवर्तते एव । एतन्मूलिकैव पुनः प्रसङ्गविज्ञानमिति परिभाषाऽस्ति । ननु विप्रतिषेधसूत्रस्य परिभाषात्वेन 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्' इति न्यायेन 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'तस्मादित्युत्तरस्य' इत्यनयोः परिभाषयोर्विषये प्रवृत्तिर्न स्यादिति चेन्न सूत्रेऽस्मिन् कार्यग्रहणेन कार्यमात्रं गृह्यते । तथा च परिभाषयोरपि एकतरप्रवृत्तेर्व्यवस्थापिका । कार्यग्रहणं सूत्रे कार्यमात्रबोधनाय उपात्तमिति भावः । कार्ययोः विरोधज्ञानोत्तरमेव विप्रतिषेधसूत्रस्य प्रवृत्त्या विरोधप्रतिसन्धानञ्च वाक्यार्थे बाधमेवेति न 'इको गुणवृद्धी'

---

५६. अष्टा. – १/४/२ ।

इत्यादिवत् पदैकवाक्यतया विप्रतिषेधसूत्रस्यान्वयः किन्तु वाक्यभेदेनैव कार्यं व्यवस्थापयति। यथा 'वृक्षेभ्यः' इत्यत्रैत्वदीर्घत्वयोः प्राप्तयोः परत्वमेव प्रवर्तते ।

## २३. समर्थः पदविधिः[३८७] –

पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्य इत्यर्थः । षड्विधेषु सूत्रेषु सूत्रमिदमधिकारः परिभाषा वेति इति जिज्ञासायामुच्यते काशिकावृत्तौ 'परिभाषेयम्' इति । परितो व्यापृता भाषा परिभाषा । तथा चोक्तं परिभाषा पुनरेकस्था सती सर्वं शास्त्रमभिज्बलयति, प्रदीपवत्, यथा वेश्म प्रदीप इति । पुनरेतद्विज्ञायते नाधिकार इति । सूत्रेऽस्मिन् पदविधिग्रहणमेव लिङ्गम् । उत्तरत्र हि सर्वः पराङ्गवद्भावादिरनुकरणसमानः पदविधिरेव । यत्र यद्ययमधिकारो मन्यते तर्हि पदविधिग्रहणमनर्थकं स्यात्, व्यावर्त्याभावात् । परिभाषायां त्वस्याम् परिभाषा ह्येकदेशस्थापि सर्वत्र शास्त्रे व्याप्रियत इत्यसति पदविधिग्रहणे वर्णविधावुपतिष्ठते। ततो विधिनिरसनार्थं क्रियमाणं पदविधिग्रहणमर्थवद्भवति । तस्मात् पदविधिग्रहणाल्लिङ्गात् परिभाषेयं नाधिकार इत्यवसीयते । पदमञ्जरीकारेणाटीकितं 'नाधिकारः, पदविधिग्रहणात्, अन्यथा वक्ष्यमाणानां पराङ्गवद्भावादीनां पदविधित्वाव्यभिचा–रादनर्थकं तत् स्यात् । परितः सर्वत्र पूर्वत परत्र व्यवहिते च, अनन्तरे च भाष्यते कार्यमनया'' इति ।

## २४. परश्च[३८८] –

प्रत्ययः परो भवति इति सूत्रार्थो लभ्यते यतः पूर्वं सूत्रं 'प्रत्ययः'[३८९] इति । प्रत्ययशब्दसंज्ञात्वेनाधिक्रियते आपञ्चमपरिसमाप्तेरधिकायोऽयम् । 'परश्च' इति तृतीयाध्यायास्य द्वितीयसूत्रमेतत् । अयमपि 'परः' इति योग आपञ्चमीपरिसमाप्तेरधिकारः । काशिकाकारेण परिभाषात्वेनापि स्वीकृतम् । तेनोक्तम् 'अयमधिकारो योगो उपतिष्ठते, परिभाषा वा । परश्च स भवति धातोर्वा प्रातिपदिकाद्वा यः प्रत्ययसंज्ञा' इति । भाष्यकारोऽबोधि 'गोधुङ्मान्' इति न सिध्येत् । तत्र हि गां दोग्धि इति गोधुक् (क्विप् च इति क्विप्) ततः गोधुगस्ति अस्य इति विग्रहे 'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रेण मतुप्प्रत्यये सत्यनुबन्धलोपे कृते 'गोदुह् मत्' इत्यवस्थायां 'दादेधातोर्घः' इति दुहो हकारस्य घात्वे कृते 'एकाचो वशो भष्' झषन्तस्य स्ध्वोः इत्यनेन वशो दकारस्य स्थाने भष्भावे धकारे कृते 'गोधुग् मत्' इत्यत्र 'स्वादिष्वसर्वनामस्थाने' इत्यनेन मतुपि परे

---

५७. अष्टा. – २/१/१ ।

५८. अष्टा. – ३/१/२ ।

५९. तत्रैव – ३/१/१ ।

'गोधुघ्' इत्यस्य पदत्वात् 'झलां जशोऽन्ते' इत्यनेन घस्य जश्त्वेन गकारे कृते सति 'गोधुग् मत्' इत्यवस्थायां 'यरोऽनुनासिकेऽनुनासिके वा' इति सूत्रस्थेन प्रत्यये भाषायां नित्यमिति वार्तिकेन गकारस्य स्थानेऽनुनासिके उकारे कृते स्वादिकार्ये च कृते सति गोदुङ्मान् इति रूपं निष्पद्यते । पूर्वत्रासिद्धमित्यधिकारत्वभावात् भष्भावं परत्वात् प्रबाध्य जश्त्वेऽनुनासिके च कृते सति भष्भावो न स्यात्, तेन गोधुङ्मान् इति प्रयोगो न सिद्धेत् । वस्तुतः 'पूर्वत्रासिद्धम्' इति सूत्रं न च विधिसूत्रं न चाधिकारसूत्रम्, अपि तु परिभाषासुत्रमस्ति । परिभाषात्वं नाम संङ्केतग्राहकभिन्नत्वे सति शब्दधर्मिकसाधुत्वप्रकारक–शास्त्रजन्याप्रामाण्यज्ञानास्कदितबोधे सहकारित्वे सति विधिसूत्रैकवाक्यतया लक्ष्यधर्मिक–साधुत्वप्रकारकबोधजनकत्वम् । तच्च पूर्वत्रासिद्धमिति वर्तते अतः सूत्रमेतत् परिभाषासूत्रमेवेति ।

## २५. आद्युदात्तश्च[६०] |

तव्यतस्तु ङित्वात् स्वरितो वक्ष्यते । न च तव्यस्याद्युदात्तत्वे उदात्तादनुदात्तस्य स्वरितः भवत्येव इति चेत् सत्यम् । परन्तु 'आद्युदात्तश्च' इति सूत्रेण अनियतस्वरप्रत्ययप्रसङ्गेऽनेकाक्षु च प्रत्ययेषु देशस्यानियमे सति वचनमादेः उदात्तत्वं प्रतिपादयति । 'अनुदात्तौ सुप्पितौ' उपर्युक्तनियमस्यापवादः । काशिकाकारेण परिभाषारूपेण स्वीकृता । तत्रोक्तम् 'अस्मिन् धात्वधिकारेऽसमानरूपोऽपवादप्रत्ययो वा बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा । 'ण्वुल्तृचौ' इत्युत्सर्गौ, 'इगुपधज्ञाप्रीकिरः' इत्यपवादः, तद्विषये ण्वुल्तृचावपि भवतः' इति ।

## २६. पूर्वत्रासिद्धम्[६१] ।

'पूर्वत्रसिद्धमि'ति सूत्रं विधिसूत्रमधिकारसूत्रं वेति विचारो वैयाकरणसमाजे विशेषेण वर्तते । यतो हि सूत्रमिदं पूर्वं प्रति परशास्त्रस्यासिद्धत्वं बोधयति । तच्चासिद्धं विधानं विधिरेव । अतः 'पूर्वत्रासिद्धमि'ति विधिसूत्रमेव न त्वधिकारसूत्रमिति सिध्यति, किन्तु एतस्य विधित्वस्वीकारे सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा इत्येव सूत्रार्थो भविष्यति । त्रिपाद्यमपि पूर्वं प्रति परशास्त्रस्य असिद्धत्वज्ञापनाय परिभाषासूत्ररूपेण ग्रहणीयम् । 'परश्च' इति सूत्रे तदेव आलोचितम् । लघुशब्देन्दुशेखरस्याभिनवचन्द्रिकाटीकायामेतस्य परिभाषात्वमेव स्वीकृतवान् । विधिसूत्रतास्य तु खण्डितैव । एतस्याधिकारसूत्रत्वेन विषये किञ्चिद् वक्तव्यमस्ति । पाणिनीयव्याकरणशास्त्रे यावन्ति अधिकारसूत्राणि पूर्वत्रासिद्धं

---

६०. अष्टा. – ३/१/३ ।

६१. तत्रैव – ८/२/१ ।

विहाय प्रायः त्रिपञ्चाशत् सूत्राणि सन्ति, तेषां सूत्राणां न किञ्चिन्निषेधकं सूत्रम्, न च नियामकसूत्रं न चापवादसूत्रं वर्तते । तेषां सर्वेषामधिकारसूत्राणां यावदधिकारस्तावत् तानि अव्याहतगतानि सन्ति, किन्तु एतस्य पूर्वत्रासिद्धमिति सूत्रस्य विषये तथा नास्ति । एतस्य निषेधसूत्रं 'न मुने' इति 'श्चुत्वं धुटि सिद्धं वाच्यमि'ति वार्तिकं च वर्तते । तथैव नियामकसूत्रं 'न लोपः' सुप्स्वरसंज्ञा तुग्विधिषु इति सूत्रं वर्तते । तत्र निषेधकशास्त्रीयोद्देश्यतावच्छेदकं निषेध्यशास्त्रीयोद्देश्यतावच्छेदकव्याप्यं च यद्रूपं रूपावच्छिन्नातिरिक्तत्वेन निषेध्यशास्त्रीयोद्देश्यतावच्छेदकावच्छिन्ने संकोचो भवतीति सिद्धान्तः ।

'अदर्शनं लोपः' इति सूत्रं कातन्त्रपरिभाषासूत्रवृत्तौ कातन्त्रपरिपाठे च परिभाषारूपेण पठ्यते । 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं कैश्चिद्वैयाकरणैः परिभाषारूपेण पठ्यते । चन्द्रगोमिणा उक्तं 'स्थानिवदादेशः', कातन्त्रपरिभाषासूत्रवृत्तौ अपि दुर्गासिंहेनानुरूपमलोचितम् । 'अचः परस्मिन् पूर्वविधौ' इति सूत्रानुरूपा कातन्त्रीयपरिभाषा 'स्वरादेशः परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्' इति । तत्र 'न पदान्त' इति सूत्रमपि परिभाषारूपेण पठ्यते । कालापपाठे 'स्थानिवदादेशो ह्यवर्णविधौ' (११), 'स्वरादेशो परनिमित्तकः पूर्वविधिं प्रति स्थानिवत्' (१५), 'न पदान्तद्विर्वचनानुस्वार–प्रथम–चरम–तृतीय–दीर्घ–लुग्विधिषु' (१६) चेति परिभाषाः दर्शिताः । भोजराजेनाप्यनुरूपमालोचितम्। अपि तु 'स्वरदीर्घयलोपेषु लोपः', स्वं रूपं, येन विधिः, प्रत्ययलोपे चेत्यादिपरिभाषा स्वीकृता ।

आचार्यकात्यायनेन केचन वार्तिका उपन्यस्ताः । ते परिभाषाप्राकृतिकवचनरूपाः । तेषां नाममात्रोल्लेखः क्रियते ।

१. 'एकदेशविकृतमनन्यवत्' । (प्र. सू. २/४)
२. 'वर्णैकदेशा वर्णग्रहणेन न गृह्यन्ते' । (प्र. सू. ४)
३. 'प्रत्यवयवं वाक्यपरिसमाप्तिः' । (अष्टा. – १/१/१)
४. 'शचङन्तस्य अन्तरङ्गलक्षणत्वात्' (असिद्धं बहिरङ्गमन्तरङ्गे) (अष्टा. –१/१/५), 'अन्तरङ्गं च' (अष्टा. –७/१/६), 'आङि पररूपवचनं तु ज्ञापकम् – अन्तरङ्गबलीयस्त्वस्य' (अष्टा. –६/१/१०८) ।
५. 'इष्टानुविधित्वाच्छन्दसः' । (अष्टा. – १/१/६)
६. 'अर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते' । (अष्टा. – १/१/२०)
७. 'सिद्धमनुबन्धस्यानेकान्तत्वात् / अनेकान्ता अनुबन्धाः' । (अष्टा. – १/१/२०)
८. 'व्यपदेशिवद्वचनम्' । (अष्टा. – १/१/२१)
९. 'यस्मिन विधिस्तदादित्वे' । (अष्टा. – १/१/२१)

१०. 'इतरथा ह्यसमप्रत्ययोऽकृत्रिमत्वाद्यथा लोके कृत्रिमाकृत्रिमयोः ।
११. 'अनुबन्धोऽन्यत्वकर इति चेन्न लोपात् । (अष्टा. – १/१/२६)
१२. 'सन्निपातो लक्षणो विधिरनिमित्तं तद्विघातस्य । (अष्टा. – १/२/३६)
१३. 'परवचनात् सिद्धमिति चेन्नापवादत्वात्' । (अष्टा. – १/१/४६)
१४. 'अपवादो वचनप्रामाण्यात्' । (अष्टा. – ८/२/१)
१५. 'बहिरङ्गलक्षणत्वात्' । (अष्टा. – १/१/४७)
१६. 'सामान्यातिदेशे विशेषानतिदेशः' । (अष्टा. – १/१/५६)
१७. 'एकदेशविकृतस्योपसंख्यानम्' । (अष्टा. – १/१/५६)
१८. 'नानर्थकेऽलोऽन्त्यविधिः' । (अष्टा. – १/१/६७)
१९. 'उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशः । (अष्टा. – १/१/६७)
२०. 'समासप्रत्ययविधौ प्रतिषेधः' । (अष्टा. – १/१/७२)
२१. 'उगिद्वर्णग्रहणवर्जम्' । (अष्टा. – १/१/७२)
२२. 'अभिधानं पुनः स्वाभाविकम्' । (अष्टा. – १/२/६४)
२३. 'प्रधाने कार्यसम्प्रत्ययात्' । (अष्टा. – ३/१/१)
२४. 'न वर्णग्रहणेषु' । (अष्टा. – ३/४/७७)
२५. 'सम्प्रसारणाश्रयः बलीयः' । (अष्टा. – ६/१/१७)
२६. 'अर्थवद्ग्रहणे नानर्थकस्य' । (अष्टा. – ६/४/११)
२७. 'निर्दिशमानस्यादेशा भवन्ति' । (अष्टा. – ६/४/१३०)

उपरितनवचनानि वार्तिककारकात्यायनमतानि इति प्रायः वैयाकरणानां सिद्धान्तः । कात्यायनकृतपरिभाषाप्राकृतिकवचनानि संगृह्य तथा महाभाष्यकारपतञ्जलिकृताः परिभाषाः नागेशाचार्येण एकत्रीकृत्य तदीये परिभाषेन्दुशेखरे तासां साधुत्वासाधुत्वं प्रतिपादितम् । चतुर्थाध्याये तासां यथामति दिक्दर्शनं करिष्ये ।

# पाणिनीये सूत्रवार्तिकभाष्याणां शैली

पाणिनीयं व्याकरणं त्रिमुनिव्याकरणमिति निगद्यते[३९२] । पाणिनिः कात्यायनः पतञ्जलिः चेति त्रयो मुनयोऽस्य व्याकरणस्य वंश्याः प्रवर्तकाः आकलन्ति । तत्र संस्कृतभाषायाः व्याकरणं प्रणयन् आचार्यः पाणिनिः नाम मुनिः सूत्ररूपेण तत् रचयामास । अष्टाध्यायीसूत्राणां निर्माणादसौ सूत्रकार इत्युच्यते[३९३] । एतेनैव मुनिना अन्ये व्याकरणग्रन्थाः उपदिष्टाः । अष्टाध्यायीसूत्रेषु धातूनां गणानामुणादिसूत्राणाञ्च निर्देशात् तेषां पूर्वं प्रणयनं तेनैव मुनिना विहितमिति साधीयो विज्ञायते[३९४] ।

ननु किं नाम सूत्रमिति जिज्ञासायामत्र विचार्यते । वेष्टनार्थकात् 'सूत्र'धातोः अदन्तात् नित्यचौरादिकण्यन्तात् करणे बाहुलकात् घञ्प्रत्यये सूत्र्यते विशिष्टोऽर्थः परिवेष्ट्यते येन विलक्षणेन शब्दराशिना तत्सूत्रम् । शब्दविशेषे योगरूढोऽयं सूत्रशब्दः 'पत्रपात्रपवित्रसूत्राच्छत्रा पुंसि च बलकुसुमशुल्वपत्तनरणाभिधानानि (लिङ्गानुशासनम् १५८) इति लिङ्गानुशासनीयसूत्रानुसारं पुंनपुंसकोभयलिङ्गः, तत्र नपुंसकमित्यधिकारात् । तथापि अद्यत्वे प्रचुरलोकव्यवहारतः नपुंसक एव प्रयुज्यते । सूत्रशब्दोऽयं नानार्थकः । यथा 'वस्त्वारम्भतन्तुषु' सूत्रशब्दो व्यवह्रियते, एतदेव दार्शनिकनिकाये 'सूत्रात्मा हिरण्यगर्भः' इत्यादिकव्यवहारेण स्थूलसृष्टेः कारणात्मनि सूक्ष्मतत्त्वेऽपि सूत्रशब्दः प्रसिद्धः, परमत्र सूत्रशब्दस्यानेकार्थत्वात् कोऽर्थोऽत्राभिप्रेत इति जिज्ञासायां शब्दार्थविषयके सन्देहे तात्पर्यार्थनिर्णायकत्वेन हेतुतया प्रमाणभूतत्वे नैकार्थनियन्त्रकं भर्तृहरिकाव्यमत्रानुस्मर्यते । यथोक्तं भर्तृहरिणा

"संसर्गो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"[३९५] इति ॥

---

६२. काशिका (न्यासपदमञ्जरीसहिता), २/१/१९ 'त्रिमुनि व्याकरणम्' ।

६३. महाभाष्यम् – २/२/११, 'पाणिनेः सूत्रकारस्य' ।

६४. प्रौढमनोरमा – १/३/३/

'धातुसूत्रगणोणदिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशा प्रकीर्तिताः ॥

६५. वाक्यपदीयवाक्यकाण्डे – २/३१५, २/३१६ ।

उपर्य्युक्तिदिशा प्रकरणादानुरोधात् शब्दराशिविशेष एव सूत्रशब्दस्य तात्पर्यमवगन्तव्यम् । अतश्च विशिष्टार्थविशेषबोधकोऽल्पीयान् शब्दराशिः सूत्रमिति योगरूढ्या निष्पन्नमर्थं ज्ञात्वा सूत्रस्य लक्षणमपि अन्तर्निरूढं वेदितव्यम् ।

शास्त्रेऽपि सूत्रसंज्ञाविषये उच्यते –

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥'[३९६] इति ॥

अपि च –

'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥'[३९७] इति ॥

अत्र लक्षणे असन्दिग्धमित्यनेन संशयभ्रमाद्यजनकत्वमुक्तम् । अत्र प्रमाजनकत्वमर्थत आयाति । अतएव प्रमाणभूतः शब्दः सूत्रमिति लब्धम् । तत्र च यतोऽल्पीयान् शब्दो भवेत्, स एव ग्राह्यः । सारवदित्यनेन गम्भीरार्थबोधकता, विश्वतो मुखमित्यनेन नानार्थकतापि लभ्यते । अस्तोभमित्यनेन स्तोभरहितत्वम्, स्तोभश्चानर्थकः शब्दः, यथा सामवेदा 'हाउइ हाउइ' इत्यादिः । अनवद्यमित्यनेन गर्हितार्थराहित्यमिष्यते, एवञ्च सारवदित्यस्येवेदं विवरणद्वयमस्तोभमनवद्यञ्चेति । न हि स्तोभस्य (प्रमाद्यमुच्चारितस्य) अनवद्यस्य निन्दितार्थकस्य सारवत्ता वक्तुं शक्यते केनचित् मनीषिणा । प्रसक्तगम्भीरार्थविषयप्रमाजनकत्वे सति नानाप्रयोजनकत्वे सति सर्वतोऽल्पीयान् वाक्यविशेषः सूत्रमिति सूत्रलक्षणं पर्यवस्यति । यथा 'इको यणचि' (अष्टा.–६/१/३३) इति व्याकरणसूत्रम् । अत्र अज्व्यवहितपूर्वत्वविशिष्टस्य इकः स्थाने यण् भवति, यण्घटित शब्दः साधुः भवति । स एव प्रयोक्तव्य इत्येवं यः प्रसक्तगम्भीरश्च वाक्यार्थस्तद्विषयकप्रमाजनकत्वमस्य सूत्रस्य दृष्टादृष्टोभयविधप्रयोजनकत्वेन चास्य विश्वतो मुखमिति सिध्यति । 'सुद्ध्युपास्यः मद्ध्वरिः इत्यादिप्रयोगाणां साधुत्वज्ञापनं दृष्टफलम्, 'एकः शब्दः सम्यग् ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति'[३९८] इति श्रुत्युक्तमदृष्टफलम् । सोच्चारणजन्यमपि फलमदृष्टमेव उक्तञ्च महाभाष्ये भगवता पतञ्जलिना – "वेदाङ्गभूतानां व्याकरणादीनां पुनः पुनरुच्चारणेन पुण्यात्मकं फलं बहुत्र,

६६. विष्णुधर्मोत्तरपुराणम् – ३/५/१, वायुपुराणम् – ५९/१४२ ।
६७. भामतीटीका (ब्रह्मसूत्रम्) ।
६८. महाभाष्यम्, पस्पशाह्निकम् ।

यथा पुण्यजननाय साधुभिर्भाषितव्यं पापजननायासाधुभिः"[३९९] इति । एतच्च सूत्रं शिष्टैः षड्विधमुपवर्णितम् । तथाहि –

'संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥'[४००] इत्युक्तेः

सूत्रकारः पाणिनिः स्वकीयसूत्रेष्विमामुक्तिं यथावद् घटयामाम । प्रत्यस्मिन् शास्त्रेऽपेक्षितं लाघवमधिगन्तुं कासाञ्चिच्छाब्दीनामार्थीनां कृत्रिमाणामकृत्रिमाणाञ्च परिभाषिकसंज्ञानां निर्माणमावश्यकं भवति । यतो हि शब्देन संज्ञाकरणं व्यवहारार्थं लोके इति निरुक्ते[४०१] । अर्थाच्छब्दव्यवहारो लघुस्ततोऽपि लघीयो नाम । संज्ञा च नाम यतो न लघीयः, लघ्वर्थं हि संज्ञाकरणं भवतीति महाभाष्ये[४०२] । अत्र कृत्रिमाः संज्ञा अनर्थकाः सत्य आकारदृष्ट्या लघ्व्यः सन्ति, अकृत्रिमाश्च संज्ञा अन्वर्थाः सत्य आकारेण महत्यो दृश्यन्ते । 'सति तात्पर्ये सर्वे सर्वार्थवाचकाः भवन्ति'[४०३] इति परमलघुमञ्जूषायां नागेशेन निगदितम् । अतः सर्वार्थाभिधानयोग्यस्य शब्दस्य शक्तिनियमनमात्रं संज्ञाकरणम्[४०४] । संज्ञायते इति संज्ञा । अथवा संज्ञानं संज्ञा भवति ।[४०५]

यद्यपि सूत्रकारेण पाणिनिना अथ संज्ञा, अथ परिभाषा, अथ विधिप्रकरणमित्यादिनिर्देशेन संज्ञादीनां निर्माणं न विहितं, तथापि परवर्तिवृत्तिकारादिभिः कृतेन तदीयसूत्रव्याख्यानेनेदं स्पष्टम् अध्यवसीयते । भाष्यवार्तिककृद्भ्यां कात्यायन–पतञ्जलिमुनिभ्यां 'वृद्धिरादैजि'ति सूत्रे 'संज्ञाधिकारः संज्ञा सम्प्रत्ययार्थः । अथ संज्ञा इत्येवं प्रकृत्य वृद्ध्यादयः शब्दाः पठितव्याः . . . वृद्ध्यादीनां शब्दानां संज्ञेत्येषः सम्प्रत्ययो यथा स्यादि'ति[४०६] आकलितम् । तस्य परिहारश्चापि तैरेव तत्र विहितः –

६९. महाभाष्यम्, पस्पशाह्निकम् ।
७०. तुलनीयम् – 'अतिदेशोऽनुवादश्च विभाषा च निपातनम् ।
एतच्चतुष्टयं ज्ञात्वा दशधा सूत्रमुच्यते ॥'
७१. निरुक्तम् – १/१ ।
७२. महाभाष्यम् – १/१/२७ ।
७३. नागेशभट्टविरचिता परमलघुमञ्जूषा – लक्षणाप्रकरणे ।
७४. महाभाष्यम्, प्रदीपोद्द्योतसहितम् – वेदव्रतसम्पादितम् १/१/२७, पृ. – २७५ ।
७५. महाभाष्यम्, प्रदीपोद्द्योतसहितम् – वेदव्रतसम्पादितम् १/२/५३, पृ. – २२९ ।
७६. महाभाष्यम्, प्रदीपोद्द्योतसहितम् – वेदव्रतसम्पादितम् १/१/१, पृ. – ३७ ।

'आचार्याचारात् संज्ञासिद्धिः । . . . अथवा पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञा'[४०७] इत्येवमादिभिर्युक्तिप्रयुक्तिभिः ।

सूत्रकारस्येयं शैली यदसौ संज्ञापरिभाषादीनां नामनिर्देशं विनैव सूत्राणि रचयति । संज्ञासूत्रेषु सुपरिज्ञातेयं पद्धतिराचार्येणारचिता यत् सर्वा अपि संज्ञाः प्रायः सर्वत्रैव हि व्याकरणे संज्ञिनः पश्चान्निर्दिष्टाः, संज्ञिनश्च प्राङ्निर्दिष्टाः । अर्थात् पूर्वं संज्ञिनिर्देशः पश्चात् संज्ञानिर्देशः । यथा 'अदेङ् गुणः', 'तुल्यास्यप्रयत्नं सवर्णम्' इत्यादि । अत्र 'अदेङ्' इति प्राङ्निर्देशात् संज्ञी । 'गुणः' इति च पश्चान्निर्देशात् संज्ञा, एवं सर्वत्र संज्ञासंज्ञिविज्ञानं कर्तव्यम् । केवलं 'वृद्धिरादैच्', 'अपृक्त एकाल्प्रत्यय' इति सूत्रद्वयमेवोक्तलक्षणस्यापवादभूतं द्रष्टव्यम् । तदुक्तं महाभाष्यकारेण पतञ्जलिना – "कथं 'वृद्धिरादैच्' इति? एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । वृद्धिशब्दस्य समृद्धिपर्यायस्य मङ्गलार्थत्वात् । येनास्य व्याकरणस्याध्येतारो वृद्धियुक्ता यथा स्युः । यतो हि मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, आयुष्मत्पुरुषाणि च । 'अपृक्त एकाल्प्रत्ययः' इत्यादि तु परिभाषा न संज्ञेति तत्रापि न दोषः"[४०८] इति ।

संज्ञादिषु षड्विधेषु सूत्रेष्वधिकारसूत्रस्य लक्षणं तु सूत्रकारेण पाणिनिना साक्षात् स्वयं व्यधायि 'स्वरितेनाधिकारः' इति । अस्य द्वेधार्थो भाष्यकृद्भिः व्याख्यातः । 'स्वरिते सति नाधिकारः' – अधिकारो न भवति । अधिकारो निवर्तते इत्येकोऽर्थः । स्वरितेन लिङ्गेनाधिकारो भवति । स्वरितं दृष्ट्वाधिकारोऽयमिति विज्ञेयमिति द्वितीयोऽर्थः । पूर्वं स्वरितं दृष्ट्वाधिकारज्ञानं कार्यम् । तदनन्तरमपरं स्वरितं विलोक्य पूर्वाधिकारनिवृत्तिर्ज्ञेयेति, किन्त्वद्यत्वे अष्टाध्याय्यां स्वरितचिह्नमनुदात्तचिह्नमुदात्तचिह्नं वा नोट्टङ्कितं दृश्यते इत्यतः सन्देहे सति व्याख्यानमेव शरणं प्रत्येतव्यम् । 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणमि'ति न्यायात् । यथा 'औतोऽम्शसोः' इत्यत्र 'ओ + औतः = औत' इति सन्धिच्छिद्येत, आहोस्वित् 'आ + ओत = औत' इति वैत्यत्र सन्देहे सति आ + ओत = औत इति सन्धिश्छेद्य इति व्याख्यनादेव विज्ञायते । तेन ओकारान्तस्यैव अम्शसोः परत आकारादेशो भवति–गाम्, गा इति, न त्वौकारान्तस्य ग्लावम्, ग्लाव इति ।

---

७७. महाभाष्यम्, प्रदीपोद्द्योतसहितम् – वेदव्रतसम्पादितम् १/१/११, पृ. – ३८ ।

७८. महाभाष्यम् – १/१/१, पृ. – १२३। 'अपृक्त इति परिभाषा न संज्ञेति नास्ति व्यतिचारः' ।

आचार्यस्य पाणिनेः सूत्ररचनाशैली यथा रुच्या मनोहारिणी चास्ति, तथैव बहुलेन वैचित्र्येणाश्चर्याम्भोधौ चापि निमज्जयति । पाणिनिना यद्यपि यथासम्भवं नियमानां पालनं विहितं तथापि क्वचिन्नियमान् भङ्क्त्वा स्वतन्त्रेच्छायाः प्रयोगेणापि सूत्राणि प्राणायिषत, स्वतन्त्रेच्छस्य महर्षेः नियन्तुमशक्यत्वात्, येषु स्वनिर्मितनियमानामपि पालनं पूर्णतया नाभूत् । एषा खलु महत्तमा विचित्रता यत् स्वयं नियमान् निर्मायापि पाणिनिना तेषां पालने शैथिल्यमौदासीन्यमरुचिर्वा प्रादर्शि । एतदेव वैचित्र्यं सूत्रेषु बाहुल्येन प्रेक्ष्यमाणाः प्रेक्षावन्तो वृत्तिकारा एवमाहुः – 'विचित्रा हि सूत्रस्य कृतिः पाणिनेः'[४०९] इति । पाणिनेः शैलीमिमामभिनन्दता भाष्यकारेणापि बहुधा समुद्गारीयं गिरामुदारा मधुधारा – "एषा ह्याचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयां स्तुल्यजातीयेषूपदिशति अचोऽक्षु हलो हल्सु"[४१०] इति । अन्यत्रापि नावश्यमिहेव, तद्यथा – 'पङ्क्ति–विंशति–त्रिंशत्' इत्यादिसूत्रे पङ्क्ति' इत्यादिवत् सहस्रकोव्यादयोऽपि कुतो न परिगणिता इत्याकङ्क्षायां तत्परिहारं कुर्वन्नाह भाष्यकारः पतञ्जलिः – 'नासूया कर्तव्या यत्रानुगम आचार्येण क्रियते'[४११] इति ।

अत्रायमाशयो यदाचार्यः यदि लोकप्रसिद्धान् स्वतःसिद्धान् पङ्क्तिविंशति प्रभृतिशतसंख्यापर्यन्तान् शब्दानेन स्वसूत्रे स्वयमन्वाचष्टे, सहस्रलक्षादींश्च नान्वाचष्टे, तदयमाचार्यस्य स्खलनं प्रमादो दोषो वा न मन्तव्यः । तदर्थं तस्मै नासूयितव्यम्, न चेर्ष्यितव्यम् । न चासावुपालब्धव्यो यदनेन केषाञ्चित्तु न कृतमिति । एवन्तु मन्तव्यं यदाचार्येणान्वाख्यानमेव विहितम्, न तु प्रत्याख्यानमिति । तच्चाख्यानं लघ्वर्थं सर्वेषामकृत्वा केषाञ्चिदेव कृतमिति तदन्येषामकृतान्वाख्यानानामप्युपलक्षणं भवितुमर्हति । इत्थङ्कारं भाष्यकारः पाणिनेस्त्रुटिकमाकलयन् यथासम्भवं तत्सूत्ररचनां समर्थयत्येव । काशिकाकारादयोऽन्ये प्रेक्षापूर्वकारिणो वृत्तिकारा अपि पाणिनेः सूत्ररचनायां महतीं सूक्ष्मेक्षिकामनुभवन्ति वर्णयन्ति च । तथा चाहुः काशिकाकारो – 'महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य'[४१२] इति ।

क्वचित् क्वचित् वार्तिककारः कात्यायनोऽप्येवं प्रस्खलन् उत्तरकालवर्तिना भाष्यकारेण पतञ्जलिना समाधीयते । तद्यथा – "भवे च । प्रोक्तादयश्च तद्धिताः . . .

---

७९. काशिकावृत्तिः – १/२/३५ ।

८०. महाभाष्यम्, प्रत्याहाराह्निकम्, लण्सूत्रम्, पृ. – ३२ ।

८१. महाभाष्यम् – ५/१/५९, पृ. – ३५५ – ३५६ ।

८२. काशिकावृत्तिः – ८/२/९८ ।

किमर्थमिदमुभयमुच्यते . . . न प्रोक्तादयश्च तद्धिताः इत्येवं भवेऽपि तद्धितश्चोदितः स्यात्? पुरस्तादिदमाचार्येण – दृष्टं – भवे च इति तत्पठितम् । तत उत्तरकालमिदं दृष्टं – प्रोक्तादयश्च तद्धिता इति, तदपि पठितम् । न चेदानीमाचार्याः सूत्राणि कृत्वा निवर्तयन्ति"[४१३] इति । अर्थात् यल्लिखितं तल्लिखितम् । तन्नियमानुकूलं स्यान्मा वा भूत् । आचार्याः पुरस्तात् सकृल्लिखितं न परस्तात् परिवर्तयन्तीति भावः । दृश्यतामत्र भाष्यकारेण कियता सारल्येन श्रद्धाबुद्धिसमन्वितैश्च शब्दैराचार्य अपि गुणपक्षे निक्षिप्तः । यद्यपि सिद्धान्ते, तु भाष्यकारः पाणिनेः सूत्ररचनायामेकमपि वर्णमनर्थकं न मनुते, तथाप्यस्त्येकमेतादृशं स्थलं यत्र भाष्यकारः शिष्यणां सुखबोधाय लाघवं प्रत्यनवधानस्थले प्रमादेन कृतं पाणिनेर्दोषं स्पष्टमकष्टं निदर्शयति, तद्यथा 'तदधीते तद्वेद' इति सूत्रे द्विस्तद्ग्रहणमर्थकं साधयन् भाष्यकार इत्थं वाचां प्रचारमुरीचकार – 'द्विस्तद्ग्रहणं प्रमादकृतमाचार्यस्य शक्यमकर्तुम्'[४१४] इति ।

अष्टाध्याय्यामधिकशतानि संज्ञासूत्राणि सन्ति । न च संज्ञासूत्राणां कश्चिन्नियमो यत्तानि प्रथमयोरेवाध्याययोः स्युः । अष्टमेऽध्यायेऽपि हि संज्ञा क्रियते – 'तस्य परमाम्रेडितम्' इति । संज्ञासूत्रवत् परिभाषासूत्राण्यपि सूत्रकारेण नामग्रहं विनैव गृहीतानि, परिभाषेयं नाम स्थानिनियमार्था चकास्ति । अनियमप्रसङ्गेऽनया नियमो विधीयते । वैयाकरणाः परितो व्यापृतां भाषां परिभाषां प्रचक्षते[४१५] । तद्यथा 'अलोऽन्त्यस्य', 'इको गुणवृद्धी', 'अचश्च', 'समर्थः पदविधिः' इत्येवमादि । का नाम परिभाषा इति लक्षणमपि सूत्रकारेण स्वयं न विहितम्, किन्तु पश्चात् जातैर्वृत्तिकृद्भिः सूत्रार्थं परिस्कुर्वद्भिः परिभाषेयमित्युक्तम् । वाचनिकीपरिभाषास्त्वल्पीयस्य एव सूत्रपाठे निरदिक्षत । सूत्रबहिर्भूता ज्ञापकन्यायसिद्धा अन्याः प्रायः सकला परिभाषा भाष्यान्तर्गताः परिभाविता द्रष्टव्याः ।

विधिप्रकरणस्य निषेध(नियम)प्रकरणस्य वापि भूयांसि सूत्राणि दृश्यन्ते, विधिव्यापारस्यैव मुख्यत्वात्[४१६] । विधिपूर्वको निषेध इति सोऽप्यायासमपेक्षते । 'आद्गुणः', 'वृद्धिरेचि', 'वचिस्वपियजादीनां किति' इत्यादीनि विधिसूत्राणि । 'न वशः', 'न कर्मव्यतिहारे' इत्यादीनि निषेधसूत्राणि । 'धातोस्तन्निमित्तस्यैव', 'पतिः समास एव'

---

८३. महाभाष्यम्, पस्पशाह्निकम्, पृ. – १२ ।

८४. तत्रैव – ४/२/७० ।

८५. तत्रैव – २/१/१ ।

८६. मीमांसाश्लोकवार्तिकम् – १/२३४ – 'विधिरत्यन्तसम्प्राप्तौ नियमः पाक्षिके सतिः' ।

इत्यादीनि च नियमसूत्राणि । तत्रैवकार इष्टतोऽवधारणार्थः, इतरथा विपरीतोऽपि नियमः सम्भाव्येत ।

कतिपयान्यतिदेशसूत्राण्यपि सूत्रकारेण प्रणीतानि । निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपार्थभेदादतिदेशः सप्तधा । तत्र निमित्तोऽतिदेशः – 'पूर्ववत्सनः', इति व्यपदेशातिदेशः – 'आद्यन्तवदेकस्मिन्' इति, तादात्म्यातिदेशः – 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति, शास्त्रातिदेशः – 'चिण्वदिट् च' इति, कार्यातिदेशः – 'स्थानिवदादेशाऽनल्विधौ' इति, रूपातिदेशः – 'तृज्वत्क्रोष्टुः' इति, अर्थातिदेशः – 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ' इति । क्वचिदन्तरेणापि वतिमर्थाद् वत्करणाभावे अपि अतिदेशो गम्यते, तद्यथा – 'गोतो णित्' इति णिद्वदित्यर्थः ।

अधिकारसूत्रं परिभाषासूत्राद् भिद्यते । अधिकारः प्रतियोग्यं तस्यानिर्देशार्थ इति योगे योगे प्रक्रान्त उपतिष्ठते । परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्, यथा प्रदीप एकदेशस्थः सर्वं वेश्माभिज्वलयति[४१७] । 'प्रत्ययः', 'अङ्गस्य', भस्य 'पदस्य' इत्यादीन्यधिकारसूत्राणि। स्वस्मिन्नधिकार एवैषां व्यापारः, न ततः पूर्वं न च ततः पश्चात् । 'समर्थः पदविधिः', इको गुणवृद्धी इत्यादीनि परिभाषासूत्राणि । एतानि हि लक्ष्यानुरोधात् कार्यकालतया यथोद्देशं वा पूर्वत्र परत्र च सर्वत्र व्याप्रियन्ते ।

सूत्रकारो यथा लौकिकशब्दान् साधयति, तथैव वैदिकसंस्कृतशब्दानपि साधु संस्करोति । न सूत्रेषु वैदिकप्रक्रिया स्वरप्रक्रिया वा पृथक् निर्दिष्टा, प्रत्युत लौकिकशब्दसंस्कारेण सहैव वैदिकाः शब्दा अपि यथावत् साधिताः, तद्यता – 'हलः श्नः शानज्झौ', 'छन्दसि शानजपि' इति । छन्दसि व्यत्ययबाहुल्यदर्शनात् 'व्यत्ययो बहुलमिति सामान्येन सूचितमाचार्येण । वस्तुतो मुख्यतया वैदिकशब्दसाधनायैव सूत्रकारस्य प्रयत्नः, आनुषङ्गिकतया नान्तरीयकतया च तु लौकिकाः शब्दा अपि संस्क्रियन्ते । तदुक्तं कैयटेन – सर्ववेदपारिषदं हीदं शास्त्रम्, तत्र नैकः पन्थाः शक्य आस्थातुम्, सर्ववेदाङ्गत्वादस्य व्याकरणस्य सर्ववेदसाधारणं लक्षणं बहुलादिग्रहणोपेतं क्रियते । आनुषङ्गिको लौकिकशब्दसंस्कार इति वेदग्रहणं कृतम्'[४१८] इति । पाणिनिकाले ये शब्दाः प्रयुक्ता आसन्, तेषां साधुत्वं सूत्रकारेण तेन व्यधायि । यतो विचित्रा हि शब्दानां शक्तयो

८७. महाभाष्यम् – २/१/१, पृ. – ३५९ ।

८८. महाभाष्यम् – २/१/५८, पृ. – ४३४ ।

यथादर्शनमभ्युपगन्तव्याः, न सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुं शक्यन्ते । अतः पाणिनिना लक्ष्यस्थित्यपेक्षया सूत्राणि प्रणीतानि । एतस्मिन् हि बहुतर्कमिष्टं सङ्गृह्यते । यद्यपि तेषामपि सर्वेषां पूर्णतया समाधानं न भवति, अल्पज्ञत्वान्मनुष्यस्य सर्वज्ञत्वाभावात्, तथापि दिगित्ययं प्रदर्शिता तेषु । एवमन्येऽपि साधवोऽर्हन्ति सम्भवितुम् । अत्रेदं तु न शङ्कनीयम् – सूत्रकारोऽसमर्थसमासं प्रतिरुन्धन्नपि स्वयं सूत्रेष्वसमर्थसमासं कुतो निर्दिशति, तद्यथा'हल्ङ्याब्भ्यो दीर्घात् सुतिस्य', अत्वसन्तस्य चाधातोः', 'नलोपः सुप्स्वरसंज्ञा' इत्यादि । विषयेऽस्मिन् 'विचित्रा हि सूत्रस्य कृतिः पाणिनेः इत्यार्षेयवचनमवश्यमभ्युपगन्तव्यम् । इदमेव वचनमत्रैतत् समाधानाय साधु क्रमते ।

सूत्रकारशैल्यामनुसन्धीयमानायां संस्कृतभाषाव्याकरणस्येमे विषया अनवयवेन संगृहीता भवन्ति । संज्ञासूत्राणि, परिभाषासूत्राणि, सन्धित्रयसूत्राणि सुबन्तप्रकरणसूत्राणि, तिङन्तप्रकरणसूत्राणि, कृत्प्रकरणसूत्राणि, तद्धितप्रकरणसूत्राणि, स्त्रीप्रत्ययसूत्राणि, स्वरप्रकरणसूत्राणि, वैदिकप्रकरणसूत्राणि – इत्येवं सर्वोऽपि संस्कृतभाषासम्बन्धी प्रयोगविषयः सूत्रकारेण स्वीयया शैल्या संगृहीतः । वर्णानां स्थानप्रयत्नविवेकस्तु शिक्षाग्रन्थादेव बोध्यव्यः । सूत्रेषु स्थानप्रयत्नानां निर्देशो नास्ति । पाणिनेरियं सूत्ररचनाशैली सर्वथा साधुरेवाभ्युपगन्तव्या । यतो हि सर्वस्यापि व्याकरणस्य मूलं सूत्राण्येव 'सूत्रतः एव हि शब्दान् प्रतिपद्यन्ते । आतश्च सूत्राण्येव, यो ह्युत्सूत्रं कथयेन्नादो गृह्यते'[४१९]। नादोऽर्थरहितत्वाद्घोषमात्रमेव गृह्यते । सूत्रमाधरीकृत्यैव वार्तिकं भाष्यं च समुज्जृम्भते । सूत्रनिर्माणं कठिनतमम् । तत्र निर्माणे दोषा अपि सम्भवन्ति । गुणाः प्रयोजनानि च बहुशः सन्ति । गुणगृह्यैः विपश्चिद्भिः गुणाः ग्रहणीयाः । प्रतिविधेयं च दोषेषु । तथा चोक्तं भाष्यकारेण – 'न हि दोषाः सन्तीति परिभाषा न कर्तव्या सूत्रं वा न प्रणेयम् । न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रियन्ते । न हि मृगाः सन्तीति यवा नोप्यन्ते । दोषाः खल्वपि साकल्येन परिगणिताः । प्रयोजनानामुदाहरणमात्रम् । कुत एतत्? न हि दोषाणां

---

८९. तुलनीयम् – प्रत्याहाराह्निकम् ।

'वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते ।
तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते ॥'

लक्षणमस्ति । तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या प्रतिविधेयं च दोषेषु'[४२०] इति ।

पाणिनिसमये यावान् शब्दस्य प्रयोगविषय आविरासीत्, तेन मुनिना सर्वस्यापि शब्दराशेरालोचनं यथामति हितं विहितम् । ये तु प्रयोगास्तदानीं नाभवन् तेषां साधनाय वार्तिककारो भगवान् कात्यायनो मुनिः प्रादुरास । यीशुमहात्मनः प्राक् पञ्चशत्यां समायां पाणिनेः कालः समाम्नायते । तत ऊर्ध्वं प्रायो द्विशत्यामतीतायां वार्तिककारस्य कालः स्वीक्रियते । तस्य काले संस्कृतभाषायाः प्रसारः प्रकाशो नानाभूय वितस्तरे । उदाहरणार्थं यथा – 'दयालुः, श्रद्धालुः' इति रूपे तु पाणिनिकालेऽप्यास्ताम्, तत्सूत्रेणालुचो विधानात्, किन्तु 'शयालुः' इति रूपं त्वद्य श्रूयमाणं पाणिनिसूत्रेण सेद्धुं नार्हति । तदर्थं 'शीङश्चेति वक्तव्यम्' इति कात्यायनमुनिवचनात् शेतेरपि आलुचं विधायोक्तं साधनीयम् । कृपालुशब्दस्य वार्तिककारसमयेऽपि नाभूदिति प्रतीमः । इतरथा शीङा सह कृप्धातोरपि स आलुचं विदध्यात् कृपाशब्दाद्वा तद्धित आलुच् विज्ञेयः । एवन्तु 'दयालुः, श्रद्धालुः' इत्युभे पाणिनिसूत्रेषु यत्र क्वचित् न्यूनमधिकं वा समुचितं शक्येत कर्तुं तदनेन क्रियत इति । 'अशिष्यो वा', 'आनर्थक्यम्', अपरिभाष्यम्', असम्प्रत्ययः', अप्रसिद्धिः', 'अग्रहणम्', 'अप्रतिषेधः', 'अनिर्देशः', 'अप्रसङ्गः', 'अनुपपत्तिः', 'उपसंख्यानम्, वक्तव्यम् इत्यादिवचनैर्वार्तिककारः स्वसूत्राण्युपन्यस्यति । यावती संख्या पाणिनिसूत्राणां वर्तते । तावत्येव प्रायो वार्तिककारसूत्राणामप्यस्ति, इत्युत्प्रेक्षे । तेषु वार्तिकेषु मान्यप्रयोजकानि, अपुष्टार्थानि पुनरुक्तानि वा सन्ति, तेषां प्रत्याख्यानं 'नार्थः', 'शक्योऽवक्तुम्', 'शक्यमकर्तुम्', 'आचार्यप्रवृत्तिर्ज्ञापयति', 'नैतदस्ति प्रयोजनम्', 'किमर्थमिदुच्यते', 'लोकत एतत् सिद्धम्', इत्यादिशब्दैः पतञ्जलिना मुनिना भाष्यकारेण विहितम् । 'यथोत्तरं मुनीनां प्रामाण्यम्'[४२१] इति वचनेन सूत्रवार्तिकभाष्यकारेषु मध्ये भाष्यकारस्यैवोत्तरवर्तिनः प्रामाण्यमभुपगम्यतेऽधिकलक्ष्यदर्शितत्वात् । न हि भाष्यकारादन्यः कश्चन शब्दविषयेऽभि–युक्ततरोऽस्ति । पाणिनेः सूत्ररचनायाम् 'अ इ उ ण्' इत्यादि चतुर्दशभिः सूत्रैरयं चत्वारिंशतः प्रत्याहाराणामतीव बुद्धिकौशलं सूचयति । महतो महतः शब्दौघस्य प्रतिपत्तये प्रत्याहारो नाम लघीयानुपायः प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णा अस्मिन्निति व्युत्पत्तेः । 'अण्'

---

९०. महाभाष्यम् – १/१/३९, पृ. – ९०–१०० ।

९१. वैयाकरणसिद्धान्तकौमुदी – १/१/२९, तुलनीयम् – महाभाष्यम् – ३/१/८० ।
'अनेन सूत्रमतापेक्षया प्रत्याख्यानवादिमतं प्रबलमिति ध्वनितम्' ।

इत्यनेन 'अ इ उ' इतीमे त्रयो वर्णाः संगृहीताः भवन्ति । अल् इत्यनेन च सर्वेऽपि वर्णाः संगृह्यन्ते । अन्यथा प्रतिवर्णमुच्चारणं कर्तव्यं स्यात् । प्रत्याहारेण वर्णानामानुपूर्व्येण सन्निवेशात् शास्त्रप्रवृत्तौ लाघवं सम्पद्यते ।

अत्रावधेयं यत् – आचार्यः पाणिनिः सर्वदा सर्वत्र चैकामेव शैलीं नानुसरति । एषा ह्याचार्यस्य शैली दरीदृश्यते यदयं लक्ष्यानुरोधात् क्वचिदभिधानमाश्रयति क्वचिन्न्यायं क्वचिद्वचनं चेति । लाघवेन लक्ष्याणां सुपरिग्रहणाय अयं यथास्थानं तन्त्रावृत्त्यैकशेषेष्वन्यतमेनापीष्टं साधयति, तद्यथा 'नमुते' इति । एवमेवायं लघ्वर्थं स्वकीयं मनोगतं भावं सदा साक्षात् सूत्रोच्चारणेनैव न प्रतिपादयति, प्रत्युत प्रकारान्तरेणापि ज्ञापयति सूचयति च, यथा चाह भाष्यकारः – 'इहेङ्गितेन चेष्टितेन निमिषितेन महता वा सूत्रनिबन्धनेनाचार्याणामभिप्रायो लक्ष्यते'[४२२] इति । मण्डूकप्लुतिगोयूथगङ्गाप्रवाहादिलोक–न्यायप्रयुक्तानुवृत्तिः(अनुकर्षणम्) सिंहावलोकितन्यायप्रयुक्तमपकर्षणं च पाणिनीयसूत्रशैल्याः प्रधानभूतौ गुणौ चकास्तः । पाणिनेरयमपि स्वभावोऽनुभूयते यदयं गुणा अभेदका भेदका वा, उणादयोऽव्युत्पन्नानि व्युत्पन्नानि वेत्यादिविवादग्रस्तविषयेषु प्रायो मध्यमं मार्गमेवाश्रयमाणो लक्ष्यते 'कालोपसर्जने च तुल्यम्' इत्युक्तेः[४२३] ।

क्वचिद् द्वयोर्योगयोरेकयोगकरणे सम्भवे सत्यपि योगः क्रियते, तेनाचार्यः स्वसूत्रशैल्या वैचित्र्यमेव प्रदर्शयति । यथा चोक्तं काशिकाकारेण – 'ईशीङ्जनां सेध्वयोरित्येकमेव सूत्रं न पठितम्? विचित्रा हि सूत्रस्य कृतिः पाणिनेः'[४२४] इति । आचार्यः पाणिनिः सूत्रनिर्माणं कुर्वन् स्वैरं व्यवहरति, स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वात्[४२५] । फलतः प्रसङ्गेऽस्मिन् अयं सौत्रनिर्देशमपि करोति । ये नियमविरुद्धाः प्रयोगाः केवलं पाणिनेः सूत्रेष्वेव तदुपज्ञप्रज्ञोपज्ञाता दृश्यन्ते, ते सौत्रा इत्युच्यन्ते । परन्तु कर्तुमकर्तुमन्यथाकर्तुं वा सवर्था अलम्भूष्णुर्भगवान् पाणिनिरचार्यो वन्द्य एवास्ति ।

---

९२. महाभाष्यम् – ८/२/३, न्यास – २/२/५
'काला परिमाणिना . . . मात्राधिक्येन . . . इहेङ्गितेन लक्ष्यन्ते' इति ।

९३. अष्टा. – १/२/५७ ।

९४. काशिका – ७/२/७८, तुलनीयम् – न्यासः – १/३/४८ ।

९५. महाभाष्यम् –१/४/३, 'छन्दोवत् कवयः कुर्वन्ति' ।

यत्र तत्र सूत्रोपात्तसंख्यापि पाणिनेः सूत्रशैलीवैचित्र्यं जनयति कलयति वा । तद्यथा 'जक्षित्यादयः षट्' इति । यद्यपि व्याख्याकारैरत्र जक्ष्, जागृ, दरिद्र, शास्, दीधीङ्, वेवीङ्, चकास् इत्येते सप्त धातव इष्यन्ते, तथापि सूत्रे षड्ग्रहणेन भ्रमस्तूपजायते एव, सप्तानां ग्रहणस्य दुर्ज्ञानत्वात् । वस्तुतस्त्वत्र स्पष्टप्रतिपत्तये 'जक्षित्यादयः सप्त' इत्येवं निर्देष्टव्यम् । सप्तानामेव जक्षित्यादीनामभ्यस्तसंज्ञाया इष्टत्वात्, न तु षण्णाम्, तद्यथा 'शमित्यष्टाभ्यो घिनुण्' इतीष्टमष्टग्रहणं करोति । एवमेव 'अव्ययादाप्सुपः' इत्यनुशासनमपि पाणिनेः स्वेच्छया अव्ययेभ्योऽपि सुपो लुकं न मृष्यति । तद्यथा – 'अहंशुभयोरुस्' इत्यत्र 'अहम्', 'शुभम्' इत्यनयोरव्यययोरपि सतोराचार्येण षष्ठीद्विवचनं प्रयुक्तम् । यद्यपि 'युस्' प्रत्ययविधाने 'अहंशुभंभ्याम्' इति निर्देष्टव्यमासीत्, प्रत्ययविधौ पञ्चमी एव न्याय्यत्वात् । अविभक्तिक एव निर्देशः कर्तव्य आसीत्, यथा – 'साक्षाद् द्रष्टारि संज्ञायाम्' इत्यत्र 'साक्षात्' शब्दोऽविभक्तिक एव निर्दिष्टः, अव्ययत्वेन विभक्त्यभावे पञ्चम्यर्थस्तु गम्यत एव, तथापि विचित्रा ह्याचार्यस्य शैली वर्तते यदयं क्वचिद् विभक्तिं निर्दिशति, क्वचिन्न ।

यद्यपि 'तृषिमृषिकृशेः काश्यपस्य' इत्यत्र पाणिनिना पश्चाद्भवस्य कात्यायनस्य 'इक्श्तिपौ धातुनिर्देशे' इति वचनं प्रमाणकृतं परमयमाचार्यः स्वशैल्यनुसारेण बहुत्र स्थलेष्वर्धजरतीयमनुसरति, अर्थात् क्वचिदिका धातुनिर्देशं करोति, क्वचिन्न, तद्यथा – 'शकिसहोश्च' इत्यत्र तु इका निर्देशः कृतः, किन्तु 'वञ्चिलुञ्च्यृतश्च' इत्यत्र द्वयोरेव धात्वोरिका निर्देशो विहितः, 'ऋतेश्च न कृत' इति वैचित्र्यमेतत् । वस्तुतस्तु शैलीयमाचार्यस्य यत्रायं धातोः ग्रहणमिति तत्र सन्देहविच्छेदायावश्यं श्तिपा निर्देशं करोति । यत्र च न सन्देहस्तत्र करोति न करोति च । क्वचिद्वृत्तज्ञ[४२६] आचार्य उच्चरणार्थमनुबन्धमाश्रयति क्वचिन्नेति वैचित्री, तद्यथा – 'सुट् तिथोः' इत्यत्र इकार उच्चारणार्थः, परं दधस्तथोश्च इत्यत्र तु नास्त्येव ।

एषाप्याचार्यस्य शैली लक्ष्यते यदयं बहूनां शब्दानां द्वन्द्वे क्वचित् समाहारद्वन्द्वेनैकवचनं निर्दिशति । यथा – 'पुच्छभाण्डचीवराण्णिङ्', 'द्युप्रागपागुदीचो यत्'[४२७] इत्यादि, क्वचिच्च समाहारविवक्षया द्विवचनबहुवचनाभ्याम्, यथा – 'जातिकालसुखादिभ्योऽनाच्छादनात्', 'यत्तदेतेभ्यः परिमाणे वतुप्' इत्यादि । सूत्रकारः

---

९६. महाभाष्यम् – १/३/९, 'वृत्तज्ञो ह्याचार्योऽनुबन्धानासृजति' इति ।

९७. अष्टा. – ३/१/२०, ४/२/१०१ ।

समाहारद्वन्द्वविवक्षायामेकवचननिर्देशेऽपि नपुंसकलिङ्गमकृत्वा पुल्लिङ्गमेव भूयो निर्दिशति । एतेन न कोऽपि नियम एकान्ततया परिपालितो भवतीति पाणिनेः शैली बहुलं विचित्रा प्रसिद्ध्यति । पाणिनेरिदमपि बहुधा अवलोक्यते यदयं सूत्ररचनालाघवे सम्भवे सत्यपि मन्दबुद्धीनां[४२८] सुखप्रतिपत्तये सर्वानुग्रहाय वा यत्र तत्र सन्ध्यभावादिरूपं गौरवमपि स्वीकरोति, यथा – 'नाजझलौ, (नाग् घलौ), 'पाघ्राध्माधेद्दृशः शः', वृद्धिरादैच्' इत्यादि ।

सूत्रकारस्यायमपि स्वभावो लक्ष्यते यदयं यस्य कस्यापि प्रकरणस्य आधारभूतं सूत्रापरपर्यायमेकं सामान्यं लक्षणं निर्माय पुनरन्यैर्विशेषैः सूत्रैरपि तस्य प्रपञ्चं व्याख्याविस्तरं वा विदधाति, तद्यथा – 'पूर्वापरप्रथमचरम' इत्यादीनि विशेषसूत्राणि 'विशेषणं विशेष्येण बहुलम् इति सामान्यसूत्रस्य प्रपञ्चभूतान्येव सन्ति । नैतत्करणं किञ्चित् दोषावहं मन्तव्यं प्रत्युत सप्रयोजनमेवेदं स्वीकार्यम्, यथा चोक्तं भाष्यकारेण – 'एते खल्वपि विधयः सुपरिगृहीता भवन्ति येषु लक्षणं प्रपञ्चश्च । केवलं लक्षणं केवलं प्रपञ्चो वा न तथाकारको भवति'[४२९] इति ।

किं बहुना पाणिनेः सूत्ररचनाया वैशिष्ट्यं निर्दोषत्वं च सूचयता भाष्यकारेण प्रशस्तिपदमिदमुक्तम् 'सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्'[४३०] इति । लक्षणैकचक्षुष्कैः नवीनैः भट्टोजिदीक्षित प्रभृतिभिः वैयाकरणैः यद्यपि सूत्रकारं प्रति श्रद्धा दधानैरपि लघ्वर्थं स्वबुद्धिप्रकर्षेण पाणिनिसूत्ररचनायां परिवर्तनमुत्प्रेक्षितम्, परन्तु स्फुटबोधाभिप्रायेण तदापातरम्यमेव, तद्यथा – 'अकः सवर्णे दीर्घः', इत्यस्य स्थाने 'अकोऽकि दीर्घः' इति 'नाज्झलौ' इत्यत्र च 'नाऽऽज्झलौ' इत्याकारप्रश्लेष इत्यादि ।

एवमेवायमाचार्यो यत्र प्रथमाद्वितीयविभक्त्योरेकत्र समृद्य ग्रहणमिच्छति तत्र प्रथमयोरिति निर्देशं विदधाति, यथा 'प्रथमयोः पूर्वसवर्णः', 'ङे प्रथमयोरम्' इति । एवमेव अयं खलु आचार्यः चित्रीयति यत् धातूनां क्वचिदनेकानर्थानादिशति, क्वचित्तु एकमिति, क्वचिन्नेति, एकमपि नादिशति, अनेकमार्गमाश्रयतीत्यर्थः । 'दिवादिभ्यः श्यन्' 'तुदादिभ्यः

---

९८. महाभाष्यम् – १/२/३२ (पृ. – २०९) 'अन्वाख्यानमेव तर्हीहं मन्दबुद्धेः' ।

९९. तत्रैव – २/१/५८, 'केवलेन लक्षणेन मन्दबुद्धिर्विषयविभागं नावधारयति । केवलप्रपञ्चेन वा सामान्यलक्षणरहितेन प्रतिपदपाठवच्छास्त्रस्य गौरवप्रसङ्गः' ।

१००. तत्रैव – ६/१/७७ ।

शः’, ‘भृञामित्’ इत्यादिसूत्रेषु धातुपाठस्थधातूनां निर्देशः, ‘सर्वादीनि सर्वनामानि’, ‘पूर्वादिभ्यो नवेभ्यो वा’, लोहितादिकतन्तेभ्यः’ इत्यादिषु सूत्रेषु गणपाठस्थशब्दानां निर्देशात् गणपाठः, ‘उणादयो बहुलम्’, ‘भूतेऽपि दृश्यन्ते’, ‘भविष्यति गम्यादयः’ इत्यादिसूत्रेषूणादिप्रत्ययनिर्देशाच्च उणादिपाठः कृतो विद्यते । एवं रमणीयायामपि रचनायां कानिचित् सूत्राणि निष्प्रयोजनानीव प्रतिभान्ति, तद्यथा – ‘रायो हलि’ इति सूत्रेण हलादौ विभक्तौ विधीयमानं रै शब्दस्यात्वं न कुत्राप्युपलभ्यते, ‘रै’ शब्दस्य कैवलवैदिकगम्यस्य हलादौ विभक्तौ रूपानुपलम्भात् ।

आधुनिकसमालोचकैरयं छन्दोगन्धरूपो विशेषः पाणिनिना पूर्वाचार्यैः गृहीत इति मन्यते इति त्वन्यदेतत् । अद्यत्वे तु कविहृदयैः कैश्चिद्वैयाकरणैः पाणिनिसूत्राणि समाश्रित्य श्लोका अपि प्रणीता दृश्यन्ते, तद्यथा –

“पक्षिमत्स्यमृगान् हन्ति[४३१] परिपन्थं च तिष्ठति[४३२] ।
व्रातेन जीवत्यधुना[४३३] न वशः[४३४] पूर्ववत्सनः[४३५] ॥
राजन् यद्यपि ते वाहू कान्तालिङ्गनलालसौ ।
तथापि समरे भेत्तुं शक्तौ हस्तिकपाटयोः ॥” इति ॥

‘औङ्’ आङ्[४३६] इत्यादयोऽन्येऽपि केचन परिभाषिकाः शब्दा पाणिनिव्याकरणे पठ्यन्ते, पूर्वाचार्यानुरोधेनैव ते प्रयुक्ता मन्तव्याः । अस्तु ‘टिड्ढाणञ्द्वयसच् मात्रच्’, वुञ्छण्कठ इत्यादीनि कर्णकटूनि सूत्राणि तु दुःश्रवत्वदोषं नावहन्ति । ‘वक्त्राद्यौचित्यवशाद् दोषोऽपि गुणः क्वचित्, क्वचिन्नोभौ’[४३७] इति मम्मटभट्टोक्तिदिशा वैयाकरणवक्तुः औचित्यवशात् कर्णकटोरपि शब्दस्य गुणत्वेन दोषानभ्युपगमात्, तद्यथा –

“दीधीङ् वेवीङ्समः कश्चिद् गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद् यन्न सन्निहिते न ते ॥”

इति वैयाकरणवक्तरि सति दुःश्रवत्वं नाम दोषोऽपि काव्ये गुण एव सम्पन्नः । वक्तृबोद्धव्ययोः उभयोरपि रसास्वादनात् । एवं संक्षेपतः पाणिनेः रचनाशैली दिग्दर्शिता ।

---

१०१. अष्टा. – ४/४/१५ ।
१०२. तत्रैव – ४/४/३६ ।
१०३. तत्रैव – ५/२/२१ ।
१०४. तत्रैव – ६/१/२० ।
१०५. तत्रैव – १/३/६२ ।
१०६. तत्रैव – ७/१/१८ ‘औङ आपः’, ७/३/१२० ‘आङो नास्त्रियाम्’ ।
१०७. मम्मटरचितकाव्यप्रकाशः, का. – ५९ ।

एवमेव वार्तिककारस्य वैदुष्यमपि पदे पदे अवगम्यते । सूत्रकारशैलीमनुहरन्त्येव वार्तिककारशैली अपि मनोहरार्थसम्पद्युक्ता चकास्ति । उभावप्याचार्यौ प्रतिस्वमर्थं स्पष्टयन्तावपि न मिथः कलहायेते न मथेते न द्विष्टः, तद्यथा – 'लोहितादिडाज्भ्यः क्यष्' इति पाणिनिसूत्रम् परिवर्तयन् वार्तिककारः प्राह – 'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि इति । तदेतत् संशोधनमुत्तरकालवर्तिना भगवता भाष्यकारेण पतञ्जलिना मुनिनाप्यङ्गीकृतम् । अयमाशयो यत् सूत्रकारो लोहितादिगणेभ्यः सर्वेभ्यः अपि प्रातिपदिकेभ्यो भवत्यर्थे क्यषमिच्छति । वार्तिककारस्तु केवलं लोहितशब्दादेव क्यषमाह, तदितरेभ्यः क्यङमेव इच्छति । भृशादिगणं पठित्वा 'भृशादिभ्यो लुक्' इति पूर्वसूत्रेण क्यङ् भवति । लोहितात्तु क्यष् । तेन 'वा क्यषः' इत्युभयपदम् लोहितायति, लोहितायते इति ।

वार्तिककारौ अपि द्वौ प्रतीयेते, एकः श्लोकवार्तिककारः, अपरः सामान्यवार्तिककारः । श्लोकवार्तिककारः स्वीयं विवक्षितं स्वनिर्मितश्लोकैरेव प्रत्याययति, तद्यथा –

"स्तोष्यम्यहं पादिकमौदवाहिं
ततः श्वोभूते शातनीं पातनीञ्च ।
नेतारावागच्छतः धारणिं रावणिं च
ततः पश्चात् स्रंस्यते ध्वंस्यते च ॥"[४३८] इति ।

केचित्तु भाष्यकारोऽपि श्लोकं ब्रुवन्नन्तरङ्गं तरङ्गयति । तद्यथा –

"जग्धिविधिर्ल्यप्ति यत्तदकस्मात्
सिद्धमदस्ति कितीति विधानात् ।
हि प्रभृतींस्तु सदा बहिरङ्गो
ल्यब्भरतीति कृतं तदु विद्धि" ॥[४३९] इति ।

अपि च – "इकः कित्त्वं गुणो मा भूत्
दीर्घारम्भात् कृत् भवेत् ।
अनर्थकं तु ह्रस्वार्थं
दीर्घाणां तु प्रसज्यते" ॥[४४०] इति ।

---

१०८. महाभाष्यम् –२/४/३६ ।

१०९. महाभाष्यम्– १/२/९ ।

११०. तत्रैव – १/४/५१ ।

इत्ययं श्लोकः श्लोकवार्तिककारस्यापि भवितुमर्हति ।

"उत्तु कृञः कथयो विनिवृत्तौ<br>
णेरपि चेति कथं निविवृत्तिः ।<br>
अब्रुवतस्तव योगमिमं स्याल्<br>
लुक् च चिणा नु कथं न तस्य" ॥[४४१] इति ।

उपर्युक्तोदाहरणानि क्लिष्टस्यापि व्याकरणविषयस्य माधुर्यं व्यञ्जयन्ति । अन्यदप्यस्ति –

"औकारोऽयं शीविधौङिद्गृहीतो<br>
ङिच्चास्माकं नास्ति कोऽयं प्रकारः ।<br>
सामान्यार्थस्तस्य चासञ्जनेऽस्मिन्<br>
ङित्कार्यं ते श्यां प्रसक्तं सदो" ॥[४४२] इति ।

इत्यनेन व्याकरणविषयं स्फुटीकरोति आचार्यो वार्तिककारः ।

आदौ तावद् वार्तिककारः प्रायः सामान्येन प्रत्येकं सूत्राणां प्रयोजनमाश्रित्याभिहितम्, तदनुविशिष्टया सरलया युक्त्या, दृष्टेन तदनुकुलेन लोकव्यवहारेण प्रमाणेन वा सूत्रस्यान्वख्यानं वा करोतीति वार्तिककारस्य शैली भाष्ये प्रतीता भवति । क्वचिन्न्यासानुसारेण लक्षणया, विवक्षया, अनुवृत्त्या, प्रकृत्यन्तरेण, निपातेन, योगविभागेन अभिधानानभिधानेनान्वर्थसंज्ञाविज्ञानेन वा सूत्रस्य प्रत्याख्यानं क्रियते । क्वचिन्न्यूनतापूर्त्यर्थं शिष्यबुद्धिव्युत्पादनाय वार्तिकं प्रणीयते । पुनः स्वयमपि तस्य प्रत्याख्यानं क्रियते । नासौ सूत्रकारं प्रति कमपि द्वेषभावं विधत्ते । नूतनां कामपि कमनीयामुद्भावनां कृत्वाप्ययं न च स्वीयमहङ्कारं प्रकाशयति । उदहरणानि यथा – 'आद्यन्तवदेकस्मिन्' इति सूत्रस्य सामान्येन प्रयोजनमाह – 'सत्यन्तस्मिन्नाद्यन्तवद्भावादेकस्मिन्नाद्यन्तवद्वचनम्' इति भाष्यकार एतस्य वार्तिकस्य व्याख्यानं करोति । पुनः वार्तिककारः सूत्रं प्रयोजनं मत्वापि न्यासान्तरेण तत्प्रत्याचष्टे – 'तत्र व्यपदेशिवद्वचनम्' । भाष्यकारस्तस्य व्याख्यानं करोति, पृच्छति च – "स तर्हि व्यपदेशिवद्भावो वक्तव्यः'? न वक्तव्यः । अवचनाल्लोकविज्ञानात् सिद्धम्' इति वार्तिकं पठित्वा वार्तिककारः स्वयमेव व्यपदेशिवद्भावं प्रत्याख्यातुं लोकव्यवहारं प्रदर्शयति ।

त्रयाणामपि मुनीनां मूलाधारः सूत्रमेव । सूत्रप्रणयने हि साधीयसी मनीषा समुन्मिषितापेक्ष्यते । अतएव पाणिनेराचार्यस्य सिद्धत्वात् पणिनिशब्दो लोके प्रकाशते

---

१११. महाभाष्यम् – ६/४/२२ ।

११२. तत्रैव – ७/१/१८ ।

आकुमारं च यशः पाणिनेः प्रसरति[443]। अत्र सूत्रकारपाणिनिरितराभ्यां द्वाभ्यामपि मुनीभ्यां महीयते । तदेव पाणिनिप्रणीतं सूत्रमुद्दिश्य वार्तिककारः स्वमनीषया तत्प्रत्याख्याने प्रयतते । क्वचित् स सफलीभवति । क्वचिच्चासौ स्ववचनव्याघातेनैव विहन्यते । भाष्यकार उभाभ्यां मुनीभ्यामुत्तरः सन्नपि सर्वेषामुत्तमो लाघवदृष्ट्या क्वचित् स्वप्रतिभया सूत्रकारं खण्डयति, अर्थात् लघ्वर्थं स सूत्रस्यांशं, सकलं वा सूत्रं खण्डयितुं यत्नवान् भवति, तद्यथा 'च्लिः लुङि' इति सूत्रे भाष्यकारः च्लिग्रहणमेव प्रत्याचख्यौ, न तु सम्पूर्णं सूत्रम्, अर्थात् च्लेः स्थाने सिजेव उत्सर्गः कर्तव्यः इति भाष्यकाराभिप्रायः । क्वचित्तु सूत्रमखण्डयित्वा वार्तिककारकृतं न्यासमेव खण्डयति, तद्यथा 'भोज्यं भक्ष्ये' इति सूत्रम् । वार्तिककारो भक्ष्ये इत्यस्य स्थाने अभ्यवहार्ये इति परिवर्त्य 'भोज्यमभ्यवहार्ये' इति न्यासमुपक्षिपति । भाष्यकार उभयोः पक्षयोः निष्पक्षः सन् यदुचितं रुचितं च स्वबुद्ध्या मन्यते यथा निर्णिक्तं वर्णयति । 'यथोत्तरं मुनीनां प्रामाण्यमि'ति वचनाच्च मुनित्रयमध्ये तस्यैव वचनं प्रमाणकोटिमाटीकते । तत्र भाष्यकारः 'भोज्यं भक्ष्ये' इति पाणिनीयं सूत्रमेव साधीयो मन्वानः 'अभ्यवहार्ये' इति वार्तिककारीयं न्यासं न्यासान्तरं वा प्रतिक्षिपति ।

महाभाष्यकारस्य पतञ्जलेरियं विशिष्टा शैली यत् यत्र सूत्रे वार्तिकं भवति तदसौ पूर्वं व्याख्याति । ततः प्रश्नपूर्वकं पृच्छति 'तत्तर्हि वक्तव्यम्' इति । तन्निराकरोति 'न वक्तव्यम्' इति । उदाहरणं 'यङोऽचि च' इति सूत्रे 'अतोऽचि' इति न्यासान्तरेण वार्तिककृता सूत्रस्य प्रत्याख्यानं कृतम् । भाष्यकारस्तद्व्याख्याय वार्तिकं निराकरोति – तत्तर्हि वक्तव्यम्? न वक्तव्यम् । इष्टमेवैतत् संगृहीतम् – सनीस्रंसो दनीध्वंस इत्येव भवितव्यम्' इति । एवमेव 'गातिस्थाघुपाभूभ्यः' इति सूत्रे गापोर्ग्रहणे इण्पिबत्योर्ग्रहणम् इति वार्तिकम् । भाष्यकारस्तद्व्याख्याय पृच्छति – 'तत्तर्हि वक्तव्यम्' । समाधत्ते – 'न वक्तव्यम् । इण्ग्रहणे तावद् वार्तम् । 'गाति' इति निर्देशादेव व्यक्तलुग्विकरणस्य ग्रहणमिति । पाग्रहणे चापि वार्तम् । उक्तमेतत् सर्वत्रैव पाग्रहणे अलुग्विकरणस्य ग्रहणमिति ।

'कृन्मेजन्तः'[444] इति सूत्रे वार्तिककृता प्रोक्तानि सन्निपातपरिभाषाप्रयोजनानि सर्वाण्येव भाष्यकृता समाधानान्तरेण प्रत्याख्यातानि । स्वयं च शकटौ, पद्धतौ इत्यादीनि स्वोपज्ञप्रज्ञोपज्ञातानि प्रयोजनानि प्रोच्य स्वीकृतानि । यद्यपि कैयटेन तानि

---

११३. महाभाष्यम् – १/४/७९ ।

११४. अष्टा. – १/१/३९ ।

निराकृतानीत्यन्यदेतत्[४४५] । 'निकुचित' इति 'न धातुलोप' सूत्रप्रयोजनं सर्वसम्मतमस्ति । भाष्यकृता सन्निपातपरिभाषामाश्रित्य तत् प्रत्याख्यातम् उक्तञ्च वार्तिकम् – 'उदुपधमकित्वस्य निकुचिते' इति । सन्निपातपरिभाषा च 'न धातुलोप' – सूत्रमाश्रित्य प्रत्याख्यातेति 'पक्षान्तरैरपि परिहारा भवन्ति'[४४६] इति न्यासमनुरुध्य भाष्यकारस्य महतीयमद्भुताश्चर्यभूता च शिष्यबुद्धिव्युत्पादनाय परिगृहीता इतरेतराश्रयमूलिका प्रत्याख्यानशैली । यत्र वार्तिकं न भवति, यथा 'षष्ठी स्थानेयोगा' इति, तत्र स्वबुद्धिप्रकर्षेण सूत्रे प्रबलया वाचो युक्त्या भाष्यकारः सूत्रं प्रत्याख्याति, या कामपि कमनीयतामावहति । प्रत्याख्यानञ्च सूत्रं पृच्छति – 'न तर्हीदानीमयं योगो वक्तव्यं? समाधत्ते – 'वक्तव्यश्च । किं प्रयोजनम्? षष्ठ्यन्तं स्थानेन यथा युज्येत, यतः षष्ठ्युच्चारिता । किं कृतं भवति – निर्दिश्यमानस्यादेशा भवन्तीति परिभाषा न कर्तव्या भवति' इति ।

भाष्यकारस्येयमपि शैली दरीदृश्यते यदसौ शिष्यबुद्धिव्युत्पादनाय न केवलं चर्चापदानि पठति । प्रत्युत उदाहरणं प्रत्युदाहरणं वाक्याध्याहार इत्येतत् समुदितं शङ्कासमाधानपूर्वकं सूत्रप्रत्याख्यानं करोति । व्याकरणसदृशं रुक्षं विषयमसौ सौविद्ध्येन सुगमतया चावगमयितुं गुडजिह्विकान्यायेन वार्तिककारवत् यथासम्भवं लोकव्यवहारमपि पृष्ठतोऽनुगच्छति । 'यथा लोके यथा व्याकरणे । यदीदं व्याकरणं लोकाद्भिद्यते ततो यथार्हं स्यादि'त्येवं[४४७] पदे पदे भाष्यकारप्रतिज्ञा सूच्यते ।

यत्र यत्र भाष्यकारः 'अन्यथाकृत्वा चोदितमन्यथाकृत्वा परिहारः' इति वाक्कीलरीतिमनुसृत्य पक्षान्तरेणापि समाधत्ते, 'पक्षान्तरैरपि परिहाराः भवन्ती'त्युक्तेः । एतन्मूलिका शैल्येवोत्तरवर्तिनां व्याख्याकाराणां मते प्रौढवादापरपर्याया एकदेश्युक्तिरुच्यते । 'शब्दप्रामाणका वयम् । यच्छब्द आह तदस्माकं प्रमाणम्'[४४८] इत्युद्घोषयन् लक्ष्यैकचक्षुष्क इष्टिज्ञो वा भाष्यकार आचारतो निवासितश्च शिष्टपदभाजां लोकानां प्रयोगेभ्य एतावन्महत्त्वं प्रददाति । यदयं शिष्टप्रयोगानुपास्यं मनुते[४४९] । प्राप्तिज्ञो लक्षणैकशरणो वा नैवं महत्त्वं प्रतिपाद्येत । नैकेषां प्रयोगाणां साधुत्वविनिश्चायिका भाष्यकारप्रोक्ता

---

११५. महाभाष्यम् – १/१/३९ ।
११६. तत्रैव, प्रत्याहाराह्निकम् – 'ऋलृक्' ।
११७. तत्रैव – १/१/१, १/१/२३ ।
११८. तत्रैव, पस्पशाह्निकम् ।
११९. महाभाष्यम् – १/३/१ – 'स चावश्यं शिष्टप्रयोग उपास्यः' ।

अभिधानानभिधानव्यवस्था इदं शिष्टप्रयोगमेव प्रमाणत्वेनाङ्गीकरोति । कारकाणां विषये तु भाष्यकारो बहुशो विवक्षाशैलीमाश्रीयते, 'विवक्षातः कारकाणि भवन्ति' इत्युक्तेः । लकारार्थप्रक्रियायां भाष्यकारस्यारोपशैली सविशेषं प्रस्फुटिता निदर्शनीया ।

अपि च प्रसङ्गानुरोधात् सूत्राणां क्रमशः सिद्धत्वासिद्धत्वे प्राच्यानां नव्यानां च वैयाकरणानां मतभेदेऽप्यवश्यं द्रष्टव्यो विमर्ष्टव्यश्च भवति, तद्यथा लज्जते, मृज्जति, भृज्जति इत्यत्र क्रमशः 'लस्ज्'–मस्ज्–भ्रस्ज्–धातूनां पूर्वसकारस्य 'झलां जश् झशि' इति जश्त्वेन दकारः । ततः 'स्तोः श्नुना श्चुः' इति श्चुत्वेन दकारस्य जकार इति प्रक्रियाक्रमं प्राच्याः काशिकाकारादयः प्रतिपन्नाः । नव्या भट्टोजिदीक्षितप्रभृतयस्तु 'पूर्वत्रासिद्धम्' इत्यसिद्धत्वात् पूर्वं 'झलां जश् झशि' इति जश्त्वस्य प्रवृत्तिः न भवितुमर्हति । अतः पूर्वं 'स्तोः श्चुना श्चुः' इति श्चुत्वेन सकारस्य शकारः, ततो 'झलां जश् झशि' इति जश्त्वेन शकारस्य जकार इति क्रमं प्रतिपन्नाः ।

वैक्रमशत्या सहस्रद्वयाब्दपूर्वान्तराले विरचितमिदं महाभाष्यं कालान्तरे समुपेक्षितं विलोच्य वैयाकरणानां समक्षे समुद्घोषितवान् पद्यद्वयं कोऽपि विद्वान् –

"कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः ।
कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः ॥
कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः ।
कौमुदी यदि चायाति वृथा भाष्ये परिश्रमः ॥" इति ।

परं कीदृशीयं विडम्बना? क्व च पतञ्जलेः महाभाष्यं क्व च अल्पसम्पत्सम्पन्ना कौमुदी । एतद् हास्यात्मकं वितण्डावादमसहमानः स्वामिवर्यो विरजानन्दसरस्वती घोषणामिमां कृतवान् –

"अष्टाध्यायीमहाभाष्ये द्वे व्याकरणपुस्तके ।
ततोऽन्यत् पुस्तकं यत्तु तत्सर्वं धूर्तचेष्टितम् ॥" इति ॥

# चतुर्थोऽध्यायः
# परिभाषाणां वर्गीकरणे नागेशभट्टस्य स्वतन्त्रता

आर्थिकप्रक्रियाभेदेन स्रोतद्वयसुपलभ्यते पाणिनीये । दार्शनिकविषयविचार आद्येऽन्तर्भवति, प्रक्रिया विषयिणी चर्चा द्वितीयेऽस्मिन् । तत्र वैयाकरणभूषणसारवैयाकरणसिद्धान्तकौमुदी–लघुमञ्जूषादय आर्थिकांशे मुख्या ग्रन्थाः । अष्टाध्यायीव्याख्याभूतैः काशिकावृत्यादिभिः प्रक्रियांशस्य महान् विकाशो जातः । विवक्षितार्थप्रतिपादनसमर्थं पतञ्जलिकृतं महाभाष्यं स्रोतद्वयस्य वारिधिरिव विलसति । महाभाष्याम्भोनिधिदार्शनिकतत्त्वसमुद्धरणे भर्तृहरिकृतं वाक्यपदीयं करदीपिकात्वं भजते । भट्टोजिदीक्षितनागेशभट्टावुभावपि स्रोतद्वये सुप्रतिष्ठितौ ऋषिकल्पौ इत्यत्र नास्ति संशीतिलेशः । तयोर्मध्ये महामहोपाध्यायैः सर्वतन्त्रस्वतन्त्रैः नागेशोपाध्यायैः विरचितं शेखरद्वयं पाणिनीयमधिजिगांसमानानां तत्सिद्धान्तपरिज्ञानाय अत्यन्तमुपकारकमिति निश्चप्रचम् । संज्ञादिषु षड्विधसूत्रेषु परिभाषासूत्राणि अवलम्ब्य अनियमे नियमकारित्वमिति परिभाषासामान्यलक्षणं व्यतिरिच्यापि कुत्रचित् स्वकीयप्रतिभया व्याख्येयपरिभाषास्वरूपं नागेशभट्टेन तदीये परिभाषेन्दुशेखरे महाभाष्योल्लिखितानि परिभाषासूत्राणि दृश्यन्ते, तथापि तासु परिभाषासु कस्याः कुत्रावस्थितिः शास्त्रसिद्धत्वं बाधबीजकत्वञ्च तद्विषये नागेशभट्टेनालोच्यते महामहोपाध्यायेन नागेशभट्टेन परिभाषालोचनात् पूर्वमस्य ग्रन्थस्योद्देश्यमुल्लिखितम् । उक्तञ्च तेन "प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबन्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते"[४५०] इति ।

महामतिना नागेशभट्टेन तदीये परिभाषेन्दुशेखरे त्रयत्रिंशच्छशसूत्रेषु प्रकरणत्रयमुपन्यस्तम्, आदौ शास्त्रसम्पादकं नाम प्रथमं प्रकरणम् २. बाधबीजकथनं द्वितीयम् ३. शेषार्थकथनं तृतीयम् । आदितः एकदेशविकृतमनन्यवदित्यन्ताः ३७ परिभाषाः प्रथमम् । शास्त्रसम्पादकस्य मुख्यत्वात् प्राथम्यम् । अत्रोक्ताः परिभाषाः तत्र तत्र यथावश्यं पदपदार्थपूरणेन सन्देहनिराकरणेन क्वापि कस्यचिद्धर्मस्यारोपेण शास्त्रस्य शास्त्रत्वं यथार्थबोधजनकत्वं सम्पादयति । तदुक्तं बृहच्छास्त्रार्थकलाटीकायां

---

१. परिभाषेन्दुशेखरः, भूतिकारेणोक्तं – 'संकेतग्राहकभिन्नत्वे सति शब्दधर्मिसाधुत्वप्रकारकशास्त्र–जन्याप्रामाण्यज्ञानानास्कन्दितबोधकसहकारित्वेन मुन्युभिप्रेतत्वे सति पाणिन्युच्चरितभिन्नत्वम्' ।

बालकृष्णशास्त्रिणा[४५१] "तत्र तत्र पदमर्थं परिपूर्य वा निराकृत्य कुत्रचित् कश्चिद्धर्मो वारोप्यशास्त्रस्य पारमार्थिकबोधजनकत्वं सम्पादयन्तीभिः परिभाषाभिरुल्लसितं भवतीति लक्षण(शास्त्र) त्वसम्पादनोद्देश्यनामव्यवहार्यत्वमर्हति प्रथममिति"।

द्वितीये बाधबीजकथने च पूर्वपरनित्यान्तरङ्गापवादानामित्यारभ्य उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् इत्यन्ताः ३४ परिभाषा; सन्ति । अत्र द्वितीये प्रोक्ताः परिभाषाः विरुद्धेषु शास्त्रेषु प्राप्तेषु के किं बाध्यतामिति जिज्ञासायां बाध्यबाधकभावस्य बीजमुपन्यस्यन्ति । तदुक्तं बालकृष्णशास्त्रिणा 'विरुद्धानां शास्त्राणां बाध्यबाधकभावे बीजानामुपन्यासात् तद्बाधबीजनिरूपणाख्यामर्हति'[४५२]।

शेषार्थकथने तृतीये प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्यारभ्य अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः इत्यन्ताः ६२ परिभाषा वर्तन्ते । तत्र ताः परिभाषाः निरूप्यन्ते या पूर्वोक्तप्रकरणद्वयनिरूपणशिष्टाः । बृहच्छास्त्रार्थकलाटीकायामाटीकितं[४५३] 'प्रकरणद्वयशेषभूतानां परिभाषाणामुपन्यासात् पराभिमतानां संज्ञापूर्वक इत्यादीनाञ्च परिभाषाणां खण्डनात् तच्छास्त्रशेषपदवीमर्हति । यथा सांख्यैः सांख्यसूत्रषष्ठाध्यायः शास्त्रशेषाख्ययाध्यवह्रियते तत्र पूर्वं सिद्धान्तितार्थशेषोपन्यासात् नास्तिकादिमतनिराकृतेः' इति ।

परिभाषेन्दुशेखरे नागेशभट्टेन प्रकरणानुसारं शास्त्रसिद्धत्वदृष्ट्या परिभाषाशास्त्राण्यालोच्यन्ते । अस्मिन शोधपत्रे त्रिषु प्रकरणेषु इतस्ततः विद्यमानाः परिभाषाः यथाक्रमं १. ज्ञापकसिद्धाः परिभाषाः २. न्यायसिद्धाः परिभाषाः ३. वाचनिकीपरिभाषाः चेति सन्निविष्टाः ता आलोच्यन्ते । पाणिनीयसूत्राणां पदसिद्धे सति किं ज्ञाप्यते तदेवात्रालोच्यते अपि तु अन्येषां वैयाकरणानां मतमत्रोस्थाप्यते । महाभाष्यानुल्लिखितानि कानिचित् परिभाषासूत्राणि अत्रालोच्यन्ते । नागेशभट्टेन बह्व्यः परिभाषाः न स्वीकृताः अत्र ता आलोच्यन्ते । शेखरे यानि परिभाषासूत्राणि विद्यन्ते तेषां विषयानुसारं शोधबन्धे उपस्थाप्यन्ते । कुत्रचित् लोकन्यायसिद्धत्वेऽपि तस्याः परिभाषायाः गुरुत्वं स्वीकृतमेतत् यथामति उपस्थाप्यते । नागेशोक्तायां ज्ञापकन्यायवाचनिकपरिभाषायां कुत्रचित् लौकिकन्यायः प्रकाशते तदप्यस्मिन्नध्याये दिग्दर्शितः ।

---

२. बालकृष्णशास्त्रीकृतबृहच्छास्त्रार्थकलाटीका, प्र. सं, पृ. – २३ ।

३. बालकृष्णशास्त्रीकृतबृहच्छास्त्रार्थकलाटीका, प्र. सं, पृ. – २३ ।

४. तत्रैव, पृ. – २४ ।

परिभाषेन्दुशेखरे प्रायः ऊनपञ्चाशत् ज्ञापकपरिभाषासूत्राणि त्रिषु प्रकरणेषु दृश्यन्ते । सूत्रेषु सूत्रांशे वा प्रतिपादितार्थो यस्मिन् अर्थे न स्वीकृते असंगतिः लक्ष्यते पूर्वसूत्रेण सिद्धेऽपि पुनः ग्रहणम् दृश्यते नूतननियमार्थं तदेव तस्य ज्ञापकं मन्यते । अर्थात् आचार्यपाणिनेः कानिचित् सूत्राणि, सूत्रेषु उक्तानि पदानि प्रकारान्तरेण ज्ञायन्ते, तथापि तेषामुल्लेख आचार्येण महत्कार्यसिद्ध्यर्थमवतारितः । उक्तपदेन कश्चन नियमोऽपि ज्ञाप्यते । परिभाषास्वीकृते सूत्रस्य प्रकृतार्थः सम्यक् प्रकाशते ।

**'अनेकाल् शित्सर्वस्य'[४५४] इत्यत्र शिद्ग्रहणात् ज्ञाप्यते नानुबन्धकृतमनेकाल्त्वमिति ।**

'अनेकाल्शित्सर्वस्य' इति सूत्रेण अनेकाल्त्वात् सर्वादेशसिद्धे पुनः सूत्रस्थमनेकाल्त्वं शिद्ग्रहणं व्यर्थं सज्ज्ञापयति यत् इत्संज्ञायोग्याल्कृतानेकालत्वं न भवति । यद्यनुबन्धा अप्यनेकाल्त्वसम्पादकाः स्युस्तदा श्यादेशस्याप्यनेकाल्त्वादेव सर्वादेशसिद्धे किं पृथक् शिद्ग्रहणेन । तदुक्तम् 'अनेकाल्' इति सूत्रे भाष्ये "एवं तर्हि सिद्धे सति यत् 'शित् सर्वस्य' इत्याह तज्ज्ञापयत्याचार्यः अस्त्येषा परिभाषा 'नानुबन्धकृतमनेकाल्त्वं' भवतीति । डाद्यादेशविषये तु सर्वादेशात् प्राक् प्रत्ययत्वाभावेनेत्संज्ञाया अप्राप्त्या न परिभाषायाः प्रवृत्त्यवसरः"[४५५] इति । परिभाषावृत्तौ पुरुषोत्तमदेवेनोक्तं 'ज्ञापकं चात्रानेकाल्शित्सर्वस्येति शिद्ग्रहणम् । यदि ह्यनुबन्धकृतमनेकाल्त्वं स्यात् व्यतिबभूव इत्यादौ एशादेः शेत्त्वेऽप्यनेकाल्त्वात् सर्वादेशत्वसिद्धे शित्करणं पृथक् न कुर्यात्'[४५६] इति ।

लोकेऽयं न्यायो बहुशः प्रयुज्यते तद्यथा कुत्रचित् द्वावेकाक्षौ स्तः तत्र तयोर्मध्ये यद्येकेन स्वीयं भग्नं नेत्रं प्रस्तरेण निर्मीयते । तथापि स द्विनेत्रभाग् भवितुं नार्हति । कृत्रिमनेत्रेण द्रष्टुमसमर्थत्वात् ।

---

५. अष्टा. – १/१/५५ ।

७. महाभाष्ये, 'अनेकाल्'– १/१/५५ ।

८. परिभाषावृत्तिः, परि. –११ ।

**'उदीचां माङो व्यतिहारे'[४५७] इत्यत्र माङ्ग्रहणात् ज्ञाप्यते 'नानुबन्धकृतमनेजन्ततम्'[४५८] इति ।**

नन्वनुबन्धा एकान्ता इति स्वीकारे अवदातं मुखम् इत्यादौ अवपूर्वकाद् दैप्धातोः पलोपानन्तरम् 'आदेच उपदेशेऽशिति'[४५९] इत्यात्त्वे कृते अदाप्त्वात् 'दाधाघ्वदाप्'[४६०] इति सूत्रेण घुसंज्ञा प्रतिदेशो न स्यात्, दैपः पकारसत्त्वे अनेजन्तत्वेन आत्वाप्राप्तेः दैप्त्वेऽपि दाप्त्वाभावात् । पलोपोत्तरञ्च पकाराभावेन दाप्त्वाभावादिति चेत् सत्यम्, न 'नानुबन्धकृतमनेजन्तत्वमि'ति परिभाषा स्वीकारादनुबन्धहेतुक एजन्तत्वाभावोऽत्र शास्त्रे न स्वीक्रियते । तेन दैपः पकारोऽत्र एजन्तत्वे बाधको न स्यात् । तत्तत्सत्त्वे अपि दैप एजन्तत्वादादेच इत्यात्वे दाप्त्वं सूपपन्नमिति । अत्र ज्ञापक "उदीचां माङो व्यतिहारे" इत्यत्र माङ् इति मेङः कृतात्त्वनिर्देशः । 'आदेच उपदेश' इति उपदिश्यमानस्यैजन्तत्वस्य आत्वविधानादिह मेङि ङकारसत्त्वे एजन्तत्वाभावादात्त्वाप्राप्तेः निर्देशस्यासंगतिः स्पष्टैव । परिभाषास्वीकारे तु ङकारस्यानुबन्धत्वात्तत्कृतस्यानेजन्तस्य अस्वीकारादेजन्तत्वेन निर्देशः संगतः । माङ्ग्रहणमत्र ज्ञापकं भवति ।

**'ददातिदधात्योर्विभाषा'[४६१] इत्यत्र विभाषाग्रहणम् ।**

'ददातिदधात्योर्विभाषा' इति सूत्रस्था विभाषा ज्ञाप्यते इयं परिभाषा 'नानुबन्धकृतमसारूप्यम्'[४६२] इति । अर्थात् अनुबन्धकृताकृतिभेदो न भवतीति । न्यायोऽयं वासरूपोऽस्त्रियाम्[४६३] इति सूत्रे भाष्ये व्याख्यातः । तत्रायमवसरो यदानेन सूत्रेणासरूपप्रत्ययानां विधाने वैकल्पिकत्वं निर्दिश्यते, तदा तेषां प्रत्ययानामनुबन्धकृतमसारूप्यं विद्यते तेषामपि वैकल्पिकत्वापत्तिः स्यादित्याशङ्क्य अनुबन्धानाम् एकान्तत्वं स्वीकृत्य समाहितम् । ततश्च पुनरप्येकान्तत्वपक्षे दोषमुद्भाव्य 'ददातिदधात्योर्विभाषा' इति सूत्रेण विभाषया णशप्रत्यययोर्विधानसामर्थ्येनेयं परिभाषा

---

९. अष्टा. – ३/४/२९
१०. परिभाषेन्दुशेखरः, परि. – ११ ।
११. अष्टा. – ६/१/४५ ।
१२. अष्टा. – १/१/२० ।
**१३. अष्टा. – ३/१/१३९ ।**
१४. परिभाषेन्दुशेखरः, परि. – ८ ।
१५. अष्टा. – ३/१/९४ ।

ज्ञापिता । तथाहि यदि अनुबन्धकृतमप्यसारूप्यं स्यात्तदा णशप्रत्यययोरपि भिन्नरूपत्वात् 'वासरूपोऽस्त्रियाम्' इत्यनेन वैकल्पिकत्वे सिद्धे विभाषाग्रहणं व्यर्थमेव स्यात् । तथा चोक्तं भाष्ये – "ननु चोक्तमनुबन्धभिन्नेषु विभाषाप्रसङ्ग इति परिहृतमेतत् 'सिद्धमनुबन्धस्यानेकान्तत्वात्' इति । अथैकान्तेषु एव । एकान्तेषु न दोषः । आचार्यप्रवृत्तिर्ज्ञापयति, नानुबन्धकृतमसारूप्यं भवतीति । यदयं ददातिदधात्योर्विभाषा शास्ति"[४६४] इति ।
लोकेऽपि न्यायोऽयं प्रयुज्यते तद्यथा – द्वयोः समनियतलम्बायमानयोर्मध्ये यद्येक उपानदुष्णिहाभ्यां लम्बायमानः प्रतीयते, तदा जनैरुच्यते अयमनुबन्धाभ्यां लम्बायमानः प्रतीयते वस्तुतस्तु उभावपि समानौ एवेति ।

**'संख्यायाः अतिशदन्तायाः कन्'[४६५] इत्यत्र अतिशदन्तायाः ग्रहणात् ज्ञाप्यते 'उभयगतिरिह भवति'[४६६] इति ।**

कृत्रिमाकृत्रिमसंख्याशब्दग्रहणविषये 'संख्यायाः अतिशदन्तायाः कन्' इति शास्त्रस्य अतिशदन्तायाः' इति पदमेव ज्ञापकम् । अन्यथा कृत्रिमायाः संख्यायाः त्यन्तशदन्तत्वाभावात् पर्य्युदासो व्यर्थः स्यात् । परिभाषायां स्वीकृतायां सप्ततिचत्वारिंशदित्यादेरपि संख्यापदेन ग्रहणात् साप्ततिकः चत्वारिंशत्क इत्यादौ 'पञ्चक', 'बहुकः' इत्यादाविव प्राप्तस्य कनो वारणाय पर्य्युदासः सार्थकः । तस्मात् सिद्ध्यति 'उभयगतिरिह' इत्यनेन कृत्रिमकृत्रिमयोः शब्दयोः व्याकरणशास्त्रे ग्रहणम् ।

यथा लोके द्विविधा संज्ञा दृश्यते, कृत्रिमा अकृत्रिमा च । तत्र कृत्रिमा यथा – कस्यचित् गोपालकस्यापि गोपालक इति संज्ञा क्रियते । अस्याः संज्ञाया अवयवार्थाः संज्ञिन्यविवक्षिता भवन्ति, केवलं संज्ञिसम्प्रत्ययमात्रमेव प्रयोजनं भवति । अकृत्रिमा च संज्ञा सा यस्यां संज्ञागता अवयवार्थाः संज्ञिन्युपलभ्यन्ते । यथा कस्यचित् गोपालककर्मणि प्रवृतस्य गोपालक इति संज्ञा क्रियते, तथैव शास्त्रेऽपि द्विविधाः संज्ञाः दृश्यन्ते । 'बहुगणवतुडति' इति संख्यासंज्ञासूत्रस्य भाष्ये परिभाषेयं स्पष्टा तथाहि "अक्रियमाणे हि

---

१६. महाभाष्यम् – ३/१/९४ ।
१७. अष्टा. –५/१/२२ ।
१८. परिभाषेन्दुशेखरः, परि. – १० ।

संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्यष सम्प्रत्ययो न स्यात् । किं कारणम्, कृत्रिमत्वात् बह्वादीनां कृत्रिमा संज्ञा । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति . . . यथैव तर्ह्यर्थात् प्रकरणाद्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवत्येवमिहापि प्राप्नोति । जानात्यसौ बह्वादीनामियं संज्ञा कृतेति । न यथा लोके तथा व्याकरणे । उभयगतिः पुनरिह भवति । अन्यत्रापि नावश्यकमिहैव । कर्तुरीप्सिततमं कर्मेति कृत्रिमा कर्मसंज्ञा । कर्मप्रदेशेषु चोभयगतिर्भवति 'कर्मणि द्वितीया' इति कृत्रिमस्य ग्रहणम्, 'कर्तरि कर्म व्यतिहारे' इत्यकृत्रिमस्य"[४६७] इति ।

तत्र यथा लोके प्रकरणस्याभिधानियामकत्वमिति नियमात् 'गोपालकमानय' इत्युक्तेः गाः पालयतीति गोपालः, कटे जातः कटजकः इति व्युत्पत्तिभ्यां गोपालत्वजात्यवच्छिन्नस्य, कटे जातस्य व्यक्तिविशेषस्य वा आनयनं न भवति, अपि तु यस्य 'गोपालकः' 'कटजकः' इति वा कृत्रिमा संज्ञा भवति, स एवानीयते, तथैव शास्त्रेऽपि कृत्रिमाकृत्रिमयोर्मध्ये कृत्रिम एव कार्यं सम्पद्यते ।

**'ज्यादादीयसः'[४६८] इत्यत्रात्ग्रहणस्य सार्थकता, 'भाव्यमानेन सवर्णानां ग्रहणं न'[४६९] इत्यस्यावतरणम्।**

धर्मशास्त्रानुसारं विधीयमानो विवाहसम्बन्धो मातृपक्षे पञ्चवंश्यान् सवर्णान् पितृपक्षे सप्तसवर्णांश्च वंश्यान् न गृह्णाति, तथैव शास्त्रेऽपि कश्चिद् विधीयमानो वर्णः स्वजातीयान् ग्रहीतुमसमर्थः । अतएव 'अत इञ्' इति सूत्रेण विधीयमानो ह्रस्वेकारो दीर्घेकारं न गृह्णाति । अनेन न्यायेन सवर्णसंज्ञया प्राप्तः जातिपक्षेण वा प्राप्तः सर्वोऽपि निषिध्यते । अस्मिन् न्याये ज्ञापकं तु 'ज्यादादीयसः' इति सूत्रे 'आद्' इति दीर्घोच्चारणमेव। प्रकृते अदादेशविधानेऽपि अणुदित्सूत्रबलेनादादेशे सिद्धे आदिति दीर्घविधानेनादेशे सवर्णग्रहणं नेति ज्ञापनेनादेशे दोषाभावः। आद्ग्रहणमावश्यकम् ।

अत्र मूलम् 'अणुदित्सवर्णस्य चाप्रत्ययः'(१/१/६९) इत्यत्राप्रत्यय इति योगविभागः । प्रत्ययः सवर्णग्राहको न भवतीति तदर्थः । यदि चोत्तरयोगेन 'अप्रत्ययः' इत्यनेन पूर्वयोगस्याणुदित्सवर्णस्येत्यस्यैव निषेधः स्यात्तदा योगविभागस्य वैयर्थ्यम् । अतः

---

१९. महाभाष्यम् – १/१/२२ ।

२०. अष्टा. – ६/४/१०७ ।

२१. परिभाषेन्दुशेखरः, परि. – २० ।

'अप्रत्यय' इति योगविभागस्य सामर्थ्यात् 'अणुदित्' सूत्रेण प्राप्तं जातिपक्षेण प्राप्तगुणभेदकत्वेन च प्राप्तमनेन वार्यते । अतएव "अणुदित्' सूत्रे प्रत्ययादेशागमेषु सवर्णग्रहणभावं प्रकारान्तरेणोक्त्वा एवं तर्हि सिद्धे यदप्रत्यय इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा 'भाव्यमानेन सवर्णानां न" इति ।

## 'दिव उत्', 'ऋत उत्'[४७०] इत्यत्र तपरग्रहणस्य सार्थकता ।

'भाव्यमानेन सवर्णानां ग्रहणं न', अथवा भाव्यमानोऽण् सवर्णान्न गृह्णाति इत्यनयोरन्यतरस्याः स्वीकारे 'अदसोऽसेर्दादु दो मः'[४७१] इत्यादिना 'अमू' इत्यादौ यद्दीर्घोकारो विधीयते तन्न स्यात् तत्रोकारस्य विधेयत्वादिति चेन्न "भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति"[४७२] इति परिभाषया शास्त्रेऽपि सर्वेऽपि विधीयमानोऽण् सवर्णान् न गृह्णाति परन्तूकारो विधीयमानोऽपि सवर्णान् गृह्णात्येव । अत्रैव 'दिव उत्' इति सूत्रे तपरग्रहणं ज्ञापकम् ।

तत्र तपरकरणं 'तपरस्तत्कालस्य'[४७३] इत्यनेन समकालानां बोधाय दीर्घादीनां च विधानवारणाय क्रियते । यदि भाव्यमानेन सता उकारेणापि सवर्णा न गृह्येरन् तदा भाव्यमानपरिभाषयैव दीर्घादीनां वारणसिद्धे, तद्वारणार्थं कृतं तपरकरणं व्यर्थं स्यात् । तस्मात् ज्ञाप्यते भाव्यमानेनाप्युकारेण सवर्णानां दीर्घादीनां ग्रहणं प्राप्तं तद्वारणाय तपरग्रहणं चरितार्थम् । तथा च भाष्यं[४७४] – "यदि भाव्यमानेन सवर्णानां ग्रहणं नेत्युच्यते, तदा 'अदसोऽसेर्दादु दो मः' अमूभ्यामित्यत्र न प्राप्नोति । एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति – 'भवत्युकारेण भाव्यमानेन सवर्णानां ग्रहणमिति, यदयं 'दिव उत्' इति उकारं तपरं करोति" इति ।

लोके न्यायोऽयं प्रयुज्यते । धर्मशास्त्रादेशानुसारं विधीयमानो विवाहसम्बन्धो मातृकुले पञ्चवंश्यान् सवर्णान् पितृकुले सप्तवंश्यान् परित्यज्य प्रवर्तते, इत्येष सामान्यविधिः, किन्तु कुत्रचिल्लोके आर्येतरेष्वेवान्त्यजेषु तदितरेषु यवनादिषु वाऽयं सम्बन्धो

---

२२. अष्टा. – ६/१/१३२, ६/१/११ ।
२३. तत्रैव – ८/२/८० ।
२४. परिभाषेन्दुशेखरः, परि. –२१ ।
२५. अष्टा. – १/१/७० ।
२६. महाभाष्यम्, 'तित्स्वरितम्' – ६/१/१८५ ।

निषिद्धानपि गृह्णात्येव । अतः अनया दृष्ट्या 'भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति' इति परिभाषा ज्ञापकसिद्धा लोकसिद्धा चेति ।

## 'अत कृकमिकंस' इत्यत्र कंसग्रहणस्य सार्थकता

'अत कृकमिकंस'[४७५] इति सूत्रस्थं कंसग्रहणमेवास्याः 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति परिभाषायाः याथार्थ्यं प्रतिपादयति । अन्यथा 'वृतृवदि–हनि–कमि–कषिभ्यः सः'(उणादिसूत्रम्–३/६२) इत्यनेन कमेः सप्रत्ययेन निष्पन्नकंसशब्दस्य कमाद्युत्तरपदपरत्वात् कमिग्रहणेनैव सिद्धे कंसग्रहणं व्यर्थं स्यात् । ज्ञापितायान्तु कंसशब्दस्योत्तरस्योणादिनिष्पन्नस्य प्रकृतिप्रत्ययविभागरहितत्वस्वीकारेण तत्र कम्धातुकल्पना न कर्तुं शक्यते । तथाचार्यः 'कंस' इत्यत्र सत्वार्थं कमेः परे सत्वार्थं सूत्रे कंसग्रहणं सार्थक्यं, न तु शङ्क्यमनभिधानात् ।

'प्रत्ययस्य लुक्' इत्यादौ भाष्येऽसौ स्पष्टा । तथाहि – "कंसीयपराशरव्ययोर्विशिष्टनिर्देशात् सिद्धम् । कंसीयपराशरव्ययोर्यञञौ भवतः छयतोश्च लुग्भवतीति । स चावश्यं विशिष्टनिर्देशः कर्तव्यः । क्रियमाणेऽपि वै प्रत्ययग्रहणे उकारसकारयोर्मा भूदिति । कमेः सः कंसः, पवान् शृणोतीति परशुरिति । नैष दोषः – 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि'[४७६] इति ।

## 'सुप्तिङन्तं पदम्'[४७७] इत्यत्र अन्तग्रहणस्य सार्थकता

ननु 'प्रत्ययग्रहणे यस्मात् स' इति परिभाषास्वीकारे 'तरप्तमपौ घः' (अष्टा. १/१/२२) इत्यादौ तरबन्ततदादेर्घसंज्ञायां कुमारी ब्राह्मणितरा इत्यादौ 'घरूपचलेड्' (अष्टा.– ६/३/४३) इति तरबन्ततदादौ ब्राह्मणितरा इति शब्दे परे कुमारीघटकेकारस्य ह्रस्वापत्तिरिति इति चेत्, तदुक्तं 'संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति'[४७८] इति । संज्ञाविधायकसूत्रे यत्र प्रत्ययग्रहणमस्ति, तत्र तदादिं विशेष्यं विधाय प्रत्ययग्रहणपरिभाषया यस्तदन्तविधिः क्रियते स न भवति । अतः 'सुप्तिङन्तं पदम्' इति सूत्रस्थमन्तग्रहणं ज्ञापकम् । अन्यथा

२७. अष्टा. – ८/३/४६ ।
२८. महाभाष्यम् – १/१/६१ ।
२९. अष्टा. – १/४/३४ ।
३०. परिभाषेन्दुशेखरः, परि. – २८ ।

सुप्तिङौ पदमिति सूत्रे कृतेऽपि 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमि'ति परिभाषया तदादेस्तद्विशेष्यकतदन्तस्य चोपस्थितौ सुबन्ततदादिस्तिङन्ततदादिश्च पदसंज्ञकौ स्यातामित्यर्थेनैव पदसंज्ञासिद्धावन्तग्रहणं व्यर्थं स्यात् ज्ञापयति संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति । सुप्तिङन्तं पदमिति सूत्रे भाष्ये वर्णितम् – "अन्तग्रहणं किमर्थम्? 'न सुप्तिङ्पदमि'त्येवोच्येत? केनेदानीं तदन्तानां भविष्यति? तदन्तविधिना । अत उत्तरम् पठति पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थम् । पदसंज्ञायामन्तग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम् ? एतज्ज्ञापयत्याचार्यः अन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न भवतीति । किमेतस्य ज्ञापने प्रयोजनम्? तरप्तमपौ घः तरप्तमबन्तस्य न भवति । किञ्च स्यात्? कुमारी गौरितरा घादिषु नद्या ह्रस्वो भवतीति ह्रस्वत्वं प्रसज्येत"[४७९] इति ।

**'गतिरनन्तर'[४८०] इत्यत्र 'अनन्तर' ग्रहणस्य सार्थकता ।**

ननु 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति' परिभाषया तदादिविशेष्यकतदन्तोपस्थितौ 'क्षेपे'[४८१] इत्यस्य क्तान्ततदादिप्रकृतिकसुबन्तेन सह सप्तम्यन्तं समस्यते इत्यर्थतया 'अवतप्ते नकुलस्थितम्' इत्यत्र नकुलशब्दस्य क्तान्ततदादित्वाभावात् समासो न स्यात्' क्तप्रत्ययो यस्माद् विहितः तस्य स्थाधातोरेवादावविद्यमानत्वेन क्तान्ततदादित्वाभावः स्पष्ट एव, स्थाधातुभिन्न नकुलशब्दस्यापि विद्यमानत्वात् । नकुलेन स्थितमित्यत्र 'कर्तृकरणे कृता बहुलम्'[४८२] इति समासः, इत्यत्र आह – 'कृदग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्'[४८३] इति परिभाषा स्वीकर्तव्येति । अनया नकुलस्थितशब्दस्यापि क्तान्ततदादित्वसिद्धेरत्र 'क्षेपे' इति समासः सिद्ध्यति । अव्यवस्थितत्वप्रतिपत्यात्र निन्दा गम्यते । 'तत्पुरुषे कृति बहुलम्'[४८४] इति सप्तम्या अलुक् कृतः, धातोर्विहितस्य तिङ्भिन्नस्य प्रत्ययस्य ग्रहणे गतिपूर्वकस्यापि कारकपूर्वकस्यापि च

---

३१. महाभाष्यम् – १/४/३४ ।
३२. अष्टा. – ६/२/४९ ।
३३. अष्टा. – २/१/४७ ।
३४. तत्रैव – २/१/३२ ।
३५. परिभाषेन्दुशेखरः, परि. –२९ ।
३६. अष्टा. – ६/३/१४ ।

ग्रहणं भवति । तेन 'नखनिर्भिन्नः' इत्यत्र गतिपूर्वकस्य भिन्नशब्दस्य कृदन्ततदादित्वस्वीकारात् 'कर्तृकरणे कृता बहुलम्' इति समासः ।

ज्ञापकञ्चास्याः 'गतिरनन्तरः' इति सूत्रस्थमनन्तरः इति ग्रहणम् । तेन हि कृदन्तेन क्तान्ते उत्तरपदे पूर्वपदस्यानन्तरस्य गतिस्वरो विधीयते । उद्धृतमवधृतमित्यत्र । न व्यवहितस्य अभ्युद्धृतमिति । तत्र यदीयं कृद्ग्रहणपरिभाषा न अभविष्यत्तदा प्रत्ययग्रहणपरिभाषयैव अप्रत्युद्धृतमिति व्यवहितशब्दसंघाते क्तान्ते प्राप्तिरेव नास्तीति तन्निवृत्त्यर्थमनन्तरग्रहणं नाकरिष्यत् । तत् कृतमस्यार्थस्य ज्ञापकमिति लिङ्गमात्रञ्च । अस्याः सूत्रकारोपगमादेव साधुत्वम् । यतः कारकपूर्वस्यापि ग्रहणे न ज्ञापकम् । तस्मात् कात्यायनपठितत्वादेवैषा प्रमाणमिति । तदुक्तं भाष्ये – "एवञ्च कृत्वा नार्थोऽनन्तरग्रहणेन । कथमभ्युद्धृतमिति । उद् हरति क्रियां विशिनष्टि । उदा विशिष्टामभिविशिनष्टि । तत्र 'गतिरनन्तरः' इति च प्राप्नोति । गतिर्गताविति च । गतिरनन्तर इत्यस्यावकाशः प्रकृतं प्रहृतम् गतिर्गतावित्यस्यावकाशः अभ्युद्धरति, उपसमादधाति । इहोभयं प्राप्नोति – अभ्युद्धृतम्, उपसमाहृतम् । गतिर्गतावित्येतद् भवति विप्रतिषेधेन । एवं तर्हि सिद्धे सति यदनन्तरग्रहणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्"[४८५] इति ।

## 'तिष्यपुनर्वस्वोः'[४८६] इत्यत्र बहुवचनग्रहणस्य सार्थकता ।

घटपटं घटपटावित्यादिसिद्ध्यर्थं परिभाषामवतारयति 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' अर्थात् इतरेतरसमाहारात्मकश्च समासविषयो द्वन्द्वः सर्वो विभाषयैकवद्भवति । तेन एकवद्भावपक्षे 'घटपटम्' तद्विकल्पे घटपटौ इति च सिद्ध्यतः । सर्वत्र समाहारप्राप्तमेकवचनं विकल्प्यते इतरेतरस्य प्राप्तमेव पक्षे विधीयते ।

'चार्थे द्वन्द्वः'[४८७] इत्यनेन समाहारे इतरेतरयोगे च द्वन्द्वः शब्दादिविशेषमनपेक्ष्य विधीयते । तथा च समाहारद्वन्द्वे समाहारस्यैकत्वादेकवचनम्, इतरेतरयोगे च यथायथं द्विवचनादिकं सिद्ध्यतीति न्यायसिद्धेयं परिभाषा, तथापि ज्ञापकत्वापेक्षा चेत् तिष्यपुनर्वस्वोः इति बहुवचनग्रहणमस्याः ज्ञापकमिति गृहाण । तद्धीदं तिष्यपुनर्वस्विति अयं

---

३७. महाभाष्यम् – ६/२/४९ ।

३८. अष्टा. – १/२/६३ ।

३९. तत्रैव – २/२/२९ ।

भावः कृतद्वन्द्वस्य तिष्यपुनर्वसुशब्दस्योद्भूतावयवभेदस्य समुदायस्य बोधकत्वे बहुवचनान्त एव तिष्यपुनर्वसुशब्दो लभ्यते । अतः इदं तिष्यपुनर्वसु इत्यस्य रूपस्यैवाभावेन व्यावर्त्याभावाद् बहुवचनग्रहणं व्यर्थम् । अनुद्भूतावयवभेदविवक्षायां तिष्यपुनर्वसु इत्येकवचनान्तस्येव संभवेन बहुवचनान्तस्यैवासंभवात् सूत्रमेव व्यर्थं सदिमां परिभाषां ज्ञापयतीति । तदुक्तं भाष्ये – "बहुवचनस्येति किमर्थम्? उदितं तिष्यपुनर्वसु । कथं चात्रैकवचनम् । जातिद्वन्द्व एकवद्भवतीति । अप्राणिनामिति प्रतिषेधः प्राप्नोति । एवं तर्हि सिद्धे तद्बहुवचनग्रहणं करोति तज्ज्ञापयत्याचार्यः 'सर्वो द्वन्द्वो विभाषयैकवद्भवति"[४८८] इति । एतस्य ज्ञापने किं प्रयोजनम् – बाभ्रवशालङ्कायना इत्येतत् सिद्धं भवति । अथवा नात्रभवन्तः प्राणिनः, प्राणा एवात्र भवन्तः । एतद्बहुवचनग्रहणमेव 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्यत्र प्राण्यङ्गादीनां समाहार एवेति मूलोक्तनियमाकारेऽपि ज्ञापकम् ।

**'क्षियो दीर्घात्', 'क्षियः' इत्यत्र[४८९] इयङिति निर्देशस्य सार्थकता ।**

ननु 'क्षियो दीर्घात्' 'क्षियः' चेद्यादौ क्षिय इत्यत्र इयङ् न स्यात् अचिश्नुधातुभ्रुवां य्वोरियङुवङौ(अष्टा. ६/४/३३) इत्यनेनेवर्णोवर्णान्तधातोरियङुवङ्विधानात् इह च 'क्षि' इत्यस्यानुकृतस्य प्रातिपदिकत्वात् । अतएव निर्दिष्टा सुब्विभक्तिः संगच्छते इत्यत आह – 'प्रकृतिवदनुकरणं भवति'[४९०] इति । प्रकृतिः अनुकार्यम् अतोऽनुकार्यवृत्तिधर्मवदनुकरणं भवतीति परिभाषार्थः । यथा लोके अश्वाः पैतृकं वृत्तं स्वभावादनुसरन्ति, तथैव शास्त्रेऽपि अनुकरणमनुकार्यवृत्तिधर्मवान् भवति । अतएव 'क्षियो दीर्घात्' इति सूत्रान्तरवर्तिनि शिक्षारूपानुकरणे क्षिधातुरूपप्रकृतिवृत्तिधातुत्वस्य सत्त्वात् 'अचिश्नु' इत्यादिसूत्रेणेयङादेशः सिद्ध्यति । अस्मिन न्याये 'क्षिय' इति इयङ्निर्देशः अस्याः ज्ञापकः । यदि प्रकृतिवदनुकरणं न स्यात् तदा धातुत्वाभावादियङोऽप्राप्त्या निर्देशासंगतिः स्पष्टैव । न्यायश्चायमनित्यः । अतएव 'क्षियः' इति निर्देशे धातुत्वातिदेशे इयङ्सिद्धिः, अनतिदेशे च प्रातिपदिकत्वनिबन्धना स्वाद्युत्पत्तिः । न्यायोऽयं 'क्षियो दीर्घात्' इति सूत्रभाष्ये' प्रयुक्तः ।

---

४०. महाभाष्यम् – १/२/६३ ।

४१. अष्टा. – ८/२/४६, ६/४/५९ ।

४२. परिभाषेन्दुशेखरः, परि. – ३७ ।

तन्नैष प्रसङ्गः – 'अधातुः' इति पर्य्युदासात् 'क्षियः' इत्यत्र कथं प्रातिपदिकसंज्ञेत्याशङ्क्य न चायं धातुः, किन्तु धातोः अनुकरणम् । यद्यनुकरणं तदा धातुत्वाभावात् कथमियङ् इति शङ्कायां प्रकृतिवदनुकरणं भवतीति न्यायेनानुकरणेऽपि आरोपितधातुत्वसत्त्वेन निर्वाहात् । तथा च भाष्यम् – "कथं प्रातिपदिकसंज्ञा? अर्थवत्त्वा प्रातिपदिकम् । ननु चाधातुरिति प्रतिषेधः प्राप्नोति । नैष धातुर्धातोरेषोऽनुकरणम् । यद्यनुकरणमियङादेशो न प्राप्नोति । प्रकृतिवदनुकरणं भवतीतीयङादेशो भविष्यति"[४९१] इति ।

## 'वाह ऊठ्'[४९२] इत्यत्र 'उठ्' ग्रहणस्य सार्थकता

अन्तर् मध्ये अङ्गं निमित्तम् यस्य तदन्तरङ्गम् । बहिः अङ्गं यस्य तद्बहिरङ्गम् । अतो बहिरङ्गशास्त्रीयनिमित्तसमुदायेऽन्तर्भूतान्यङ्गानि यस्य तदन्तरङ्गम् । अन्तरङ्गशास्त्रीय–निमित्तसमुदायबहिर्भूतान्यङ्गानि यस्य तद्बहिरङ्गम् । एवमेव अन्तरङ्गबहिरङ्गयोरनेकानि लक्षणानि लक्ष्यानुरोधात् स्वीकृतानि, तदिह कानिचिदुपलक्ष्यन्ते । पूर्वोपस्थितिनिमित्तकत्वमन्तरङ्गत्वम्, परोपस्थितिनिमित्तकत्वं बहिरङ्गम् अल्पापेक्षकत्वमन्तरङ्गत्वम्, बह्वपेक्षत्वं बहिरङ्गत्वम् इत्यादीनि । अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं भवतीति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषार्थः ।

ज्ञापकं चास्याः 'वाह ऊठि'ति वहेश्छन्दसि ण्विप्रत्ययान्तस्य ऊठादेशविधानम् । 'वाह ऊठ्' इत्यस्य स्थाने 'वाह' इत्येव सूत्रकरणेन सम्प्रसारणमित्यस्यानुवृत्त्या वाहः सम्प्रसारणं स्यादित्यर्थेन 'विश्ववाह् अस्' इति स्थिते वकारस्य उकारे सम्प्रसारणे 'सम्प्रसारणाच्च'[४९३] इति पूर्वरूपे 'विश्व–उह् अस्' इति स्थिते ण्विप्रत्यये आर्धधातुके परे 'पुगन्तलघूपधस्य च'[४९४] इति गुणे 'विश्व ओह् अस्' इत्यत्र 'वृद्धिरेचि' इति वृद्धौ 'विश्वौहः' इत्यादिसिद्धे ऊठ्ग्रहणं ज्ञापयति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति । ज्ञापिते ऊठ्ग्रहणं चरितार्थम् । बहिरङ्गत्वेन विवक्षितस्य सम्प्रसारणस्य भसंज्ञासापेक्षस्य निमित्तम् अस्प्रत्ययपर्यन्तमितिकृत्वा सम्प्रसारणशास्त्रीय– निमित्तान्तर्भूतनिमित्तकत्वादन्तरङ्गे गुणे

---

४३. महाभाष्यम् – ८/२/४६ ।
४४. अष्टा. – ६/४/१३२ ।
४५. अष्टा. – ६/१/१०८ ।
४६. तन्नैव – ७/३/८६ ।

कर्तव्ये बहिरङ्गस्यासिद्ध्या गुणो न स्यात्ततश्च 'आद् गुणः' इति गुणे विश्वोह' इति स्यात् । इष्यते च विश्वौह इति । अतः ऊठ्विधानं सार्थकम् । ऊठ्कृते तु 'एत्येधत्यूठ्सु'[४९५] इति वृद्ध्या रूपं सिद्ध्यति ।

अनित्यत्वं चास्याः 'नलोपः सुप्स्वरसंज्ञातुक्विधिषु कृती'ति[४९६] तुग्विधौ नलोपस्यासिद्धत्ववचनेन ज्ञापितम् । यदि हीयं नित्या स्यादनयैव वृत्रहभ्यामित्यत्रान्तरङ्गे तुकि कर्तव्ये बहिरङ्गस्य नलोपस्यासिद्धत्वं सिद्धमेवेति । अनित्यत्वे तु चास्याः 'अमू' इत्यत्र एकदेशस्य बहिरङ्गस्यान्तरङ्गे उत्वमत्वे कर्तव्ये असिद्धत्वं न भवति ।

लोके न्यायोऽयं प्रयुज्यते । एकस्य जनस्य कृते अनेकानि कार्याणि युगपदुपस्थितानि तदा तेन अन्तरङ्गबहिरङ्गव्यक्तिनिर्णयात् परं कस्य कार्यं पूर्वं कस्य च परमिति निर्णीयते । यथा – कस्यचिद् गृहे कार्यार्थं सुहृद्सम्बन्धिनः समागताः, तस्मिन्नेव काले स्वकीयमपि किञ्चित् कार्यं समुपस्थितम्, तत्र कस्य कार्यं पूर्वं कर्तव्यं कस्य च पश्चादिति द्वैविध्ये समुपस्थिते स प्रथमं स्वकार्यं करोति, ततः सुहृदस्ततः सम्बन्धिनः, उत्तरापेक्षया पूर्वस्यान्तरङ्गत्वात् । तदुक्तं भाष्ये 'प्रत्यङ्गवर्तिलोको लक्ष्यते । तद्यथा पुरुषोऽयं प्रातरुत्थाय यान्यस्य शरीरकार्याणि तानि तावत् करोति । ततः सुहृदाम्, ततः सम्बन्धिनाम्'[४९७] इति ।

## 'षत्वतुकोरसिद्धः'[४९८] इत्यत्र एकदेशस्यासिद्धकथनम् ।

अचोरानन्तर्ये यत् कार्यमन्तरङ्गं बहिरङ्गं वा क्रियते तत्र बहिरङ्गकल्पना नास्ति इति 'नाजानन्तर्ये बहिरङ्गप्रक्ळप्तिः'[४९९] इति परिभाषार्थः । तेनाक्षद्यूरित्यादि सत्यपि क्विपमाश्रित्य प्रवृत्तस्य ऊठो बहिरङ्गत्वे अन्तरङ्गो यणादेशः प्रवर्तते एव । ज्ञापकञ्चात्र 'षत्वतुकोरसिद्धः' इति एकादेशस्यासिद्धवचनम् । यदि ह्यजानन्तर्येऽपि बहिरङ्गासिद्धत्वं स्यात्तदा 'कोऽस्य' 'योऽस्य' इत्यादौ 'इणः' सस्य षत्वेऽन्तरङ्गे कर्तव्ये पदद्वयाश्रयस्य 'एङः

---

४७. तत्रैव – ६/१/९८ ।
४८. तत्रैव – ८/२/२ ।
४९. महाभाष्यम्, 'अचः परस्मिन पूर्वविधौ' – १/१/५७ ।
५०. अष्टा. – ६/१/८३ ।
५१. परिभाषेन्दुशेखरः, परि. –५२ ।

पदान्तादति' इति एकादेशस्यासिद्धत्वं बहिरङ्गमन्तरङ्ग इत्येवासिद्धत्वादसिद्धवचनमिदमनर्थकं स्यात् ।

'षत्वतुकोरसिद्धः' इति सूत्रे तुग्ग्रहणमेतस्या ज्ञापकम् । अधीत्य, प्रेत्य इत्यादौ 'समासेऽनञ् पूर्वे क्त्वोर्ल्यप्'[५००] इति विहिते ल्यपि समासस्याक्षेपणात् समासोत्तरं ल्यप्प्रवृत्त्या पूर्वं समासे तत्र च –

"संहितैकपदे नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥

इत्युक्तिदिशा संहितायाः नित्यतया ल्यबुत्पत्तिपर्यन्तमसंहितयावस्थानसम्भवात् पूर्वं दीर्घे गुणे च जाते ल्यपि तुग्दृष्ट्या पदद्वयसम्बन्धिवर्णद्वयस्यापेक्षैकादेशस्य बहिर्भूतनिमित्तकत्वेन बहिरङ्गत्वादसिद्धौ जातायां तुक्सिद्धौ सूत्रे व्यर्थं तुग्ग्रहणं परिभाषाया ज्ञापकमिति ।

## 'प्रत्ययोत्तरपदयोश्च'[५०१] इत्यत्र मपर्यन्तानुवृत्तिः इत्यर्थस्य सार्थकता

ननु 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषास्वीकारात् 'गोमान् प्रियो यस्येति विग्रहे 'गोमत् सु प्रिय सु' इत्यनयोः 'अनेकमन्यपदार्थे'[५०२] इति समासे प्रातिपदिकत्वे हल्ङ्यादिलोपस्य 'सुपो धातुप्रातिपदिकयोः' इति सुपश्च प्राप्तौ पदद्वयनिमित्तकसमाससापेक्षत्वेन बहिरङ्गलुकं बाधित्वान्तरङ्गत्वात् हल्ङ्यादिलोपे प्रत्ययलक्षणेन सुविभक्तिमादाय 'उगिदचाम्'[५०३] इत्यनेन नुम् स्यादिति चेन्न, 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते'[५०४] इति परिभाषास्वीकारात् अन्तरङ्गानपि नुमादीन् बाधित्वा बहिरङ्गो लुगेव भवति । 'प्रत्ययोत्तरपदयोश्च' इति भाष्ये ज्ञापितोऽयमर्थः । तत्र ह्युक्तं तवायं 'त्वदीयः' इत्यादौ प्रत्यये तव पुत्रः 'त्वत्पुत्र' मम पुत्रः 'मत्पुत्रः' इत्यादौ उत्तरपदे च विभक्तिमात्राश्रयत्वात् पूर्वेणैव त्वमौ भविष्यतः । समासोत्तरकालभावी विभक्तिलुक् बहिरङ्गः पश्चात् भविष्यतः । न च विभक्तिलुकि कृते निमित्ताभावात् प्रवृत्ताभ्यामपि त्वमाभ्यां निवर्त्तितव्यं यतो बहिरङ्गस्य लुकोऽसिद्धत्वात् दृश्यते एव विभक्तिः । ये चापि

---

५२. अष्टा. – ७/१/३७
५३. तत्रैव _ ७/२/९८ ।
५४. तत्रैव – २/२/२४ ।
५५. तत्रैव, 'उगिदचां सर्वनामस्थानेऽधातोः' – ७/१/७० ।
५६. परिभाषेन्दुशेखरः, परि. – ५३ ।

स्वार्थिकास्तरबादयस्ते अपि च असत्यपि समर्थाधिकारे अन्तरङ्गत्वात् कृतायामेव विभक्तौ सुबन्तादेव विधीयन्ते इति त्वत्तरो मत्तर इत्यादौ च 'त्वमावेकवचने' इति सूत्रेणैव त्वमौ सिद्धौ सति किं पुनरावश्यकं 'प्रत्ययोत्तरपदयोः' इति सूत्रपठनेन । तदेतदाचार्यो ज्ञापयति अस्तीयं परिभाषा – अन्तरङ्गानपि विधीन् बहिरङ्गो लुक् बाधते इति । तेन त्वमौ बाधित्वा लुकि कृते विभक्त्यभावात् पूर्वेण त्वमौ न प्राप्नुत इति वचनमर्थवद्भवति । तस्मात् इयं परिभाषा वाचनिकी इति कैश्चन मन्यते । तदुक्तं भाष्ये – "प्रत्ययोत्तरपदयोश्च' किमर्थमिदमुच्यते न त्वमावेकवचने इत्येव सिद्धम्।न सिध्यति किं कारणमेकवचनाभावात्। 'एकवचन' इत्युच्यते । न चात्रैकवचनं पश्यामः । प्रत्ययलक्षणेन । 'न लुमताङ्गस्य' (अष्टा. –१/१/६३) इति प्रत्ययलक्षणस्य प्रतिषेधः । एवं तर्हीदमिह सम्प्रधार्यम् लुक् क्रियतामादेशाविति । किमत्र कर्तव्यम्? परत्वादादेशौ । नित्यो लुक् । कृतयोरप्यादेशयोः प्राप्नोत्यकृतयोरपि । अन्तरङ्गावादेशौ । एवं तर्हि सिद्धे सति यत् प्रत्ययोत्तरपदयोस्त्वमौ शास्ति । . . . अस्त्यन्यदेतस्य वचने प्रयोजनम् । किम्? येऽन्य एकवचनादेशाः प्राप्नुवन्ति तद्बाधनार्थमेतत् स्यात् । तद्यथा तव पुत्रस्त्वत्पुत्रः । तुभ्यं हितं त्वद्धितम् । मह्यं हितं मद्धितम् इति । यत्तर्हि मपर्यन्तग्रहणमनुवर्तयति । यद्यत्रान्य एकवचनादेशाः स्युः मपर्यन्तानुवृत्तिरनर्थिका स्यात्"[५०५] । इति ।

## 'अदो जग्धिर्ल्यप्ति किति'[५०६] इत्यत्र ल्यब्ग्रहणस्य सार्थकता ।

समासे द्विपदाश्रयत्वात् बहिरङ्गो ल्यप् अन्तरङ्गान् विधीन् बाधते । 'अदो जग्धिर्ल्यप्ति किति' सूत्रे ल्यब्ग्रहणाभावेऽपि प्रपुर्वकात् अद् धातोः क्त्वाप्रत्यये 'प्र अद् त्वा' इति स्थिते पदद्वयसापेक्षसमासापेक्षत्वेन बहिरङ्गं 'समासेऽनञ् पूर्वे क्त्वोल्र्यप्' इति ल्यपमसिद्धं विधाय पूर्वं तादिकित्परत्वलक्षणे अदो जग्धादेशे ततो ल्यपि प्रजग्ध्य इति सिद्धे सूत्रे ल्यब्ग्रहणं व्यर्थं सज्ज्ञापयति – 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते' इति । ज्ञापिते तु पूर्वं क्त्वोर्ल्यपि तादिकित्परत्वाभावेन ल्यप् न स्यादतः ल्यब्ग्रहणं ल्यपि परे जग्धादेशविधानाय स्वांशे चरितार्थम् । फलमन्यत्र यथा प्रधाय प्रस्थाय इत्यादौ अन्तरङ्गमपि 'दधातेर्हि'[५०७] इति हित्वमीत्वं च बाधित्वा ल्यब्भवति । अन्यथा

---

५७. महाभाष्यम् – ७/२/९८ ।

५८. अष्टा. – २/४/३६ ।

५९. तत्रैव – ७/४/४२ ।

अन्तरङ्गत्वाद्धित्वादिषु जातेषु असिद्धरूपं स्यात् । एतत्सर्वम् 'अदो जग्धिर्ल्यप्ति किति' इति सूत्रभाष्ये पतञ्जलिना सम्यगालोचितम् । व्याघ्रभूतिनाप्युक्तमनुरूपं –

'जग्धिविधिर्ल्यपि यत्तदकस्मात्
सिद्धमदस्ति कितीति विधानात् ।
हिप्रभृतींस्तु सदा बहिरङ्गो
ल्यब्भरतीति कृतं तदु विद्धि ॥' इति

## 'अभ्यासस्यासवर्णे'[६०] इति सूत्रस्य सार्थकता ।

इण्धातोः लिटि तिपो णलादेशे द्वित्वेऽभ्यासत्वे 'इ + इ + अ' इति स्थिते उत्तरखण्डे 'अचो ञ्णिति' (अष्टा. – ७/२/११५) इति वृद्धौ आयादेशे च कृते 'इ आय' इति स्थिते अभ्यासस्यासवर्णे इति इयङादेशे 'इयाय' इति सिध्यति । यदि अन्तरङ्गपरिभाषा स्वीक्रियते तदा 'इयाय' इत्यादौ द्वित्वे कृते 'इ + इ + अ' इति बहिरङ्गवृद्धिं बाधित्वान्तरङ्गत्वात् सवर्णदीर्घे तत इयङि 'इयाय' इत्यादिरूपासिद्धिः स्यादत 'वार्णादाङ्गं बलीयः'[६१] इति परिभाषामवतारयति । वार्णात् वर्णकार्यात् आङ्गमङ्गकार्यं बलीयस्त्वात् प्रवर्तते । यत्र वर्णाङ्गयोरेकं निमित्तं सोऽस्याः प्रवृत्तिविषयः । अत्र वर्णसम्बन्धिकार्यात् सवर्णदीर्घात् अङ्गसम्बन्धिकार्यस्य वृद्धेरनया प्राबल्यबोधनादन्तरङ्गमपि सवर्णदीर्घं बाधित्वा वृद्धिः सिद्ध्यति । 'अभ्यासस्यासवर्णे' इत्यत्रासवर्णग्रहणे सति वार्णादाङ्गस्य बलीयस्त्वे 'इयाय', 'उवोषे'त्यादौ वृद्धिगुणयोरसवर्णपरोऽभ्यासः सम्भवतीति असवर्णग्रहणमर्थ–वद्भवतीति । अन्यथा गुणवृद्ध्योर्बहिरङ्गत्वात् प्रागेव न भवितव्यमिति निर्विषयमसवर्णग्रहणम् स्यात् । यदि चान्यार्थः स्यात् इयृयादित्यादौ तदार्त्तेरभ्यासस्यैव ब्रूयात् । प्राचीनवैयाकरणैः केवलमसवर्णग्रहणस्य ज्ञापकत्वमङ्गीक्रियते । नवीनैः नागेशभट्टादिभिः वैयाकरणैः सम्पूर्णसूत्रमेव वार्णपरिभाषां विना व्यर्थं स्वीक्रियते । तदुक्तं नागेशाचार्यैः – "न च 'इयर्ति' इत्यादौ तच्चरितार्थम् । तावन्मात्रप्रयोजकत्वे उरित्येव ब्रूयात् । य्वोरित्यनुवर्तते । इणो यणिति साहचर्याद्व्याख्यानाच्च ऋधातोरेव ग्रहणम् । अर्तेरिवर्णस्येयङित्यर्थः । अभ्यासस्यार्तावित्य–भ्यासस्यार्तेरिति वा गुरुत्वान्न युक्तम् । न च 'ए ऐ ओ औ' शब्देभ्य आचारक्विबन्तेभ्यो लिटीयङाद्यर्थं तत्सूत्रमावश्यकं तथा ओण्धातोर्ण्वुलन्तादिच्छाक्यजन्तात्सन्युवोणकीरिषती–

---

६०. अष्टा. – ६/४/७८ ।

६१. परिभाषेन्दुशेखरः, परि. –५६ ।

त्याद्यर्थमावश्यकमिति वाच्यम् । षाष्ठप्रथमाह्निकान्तस्थभाष्यप्रामाण्येन तेषामनभिधानात् । अन्त्ये द्वितीयद्विर्वचनस्यैव सत्त्वेन त्वदुक्तप्रयोगस्यैव दुर्लभत्वात् । एवञ्च सम्पूर्णसूत्रस्य ज्ञापकता युक्ता"[५१०] इति ।

## 'दीर्घोऽकित'[५११] इत्यत्र 'अकित्' ग्रहणस्य सार्थकता

अभ्यासविकारेषु बाध्यबाधकभावो नास्ति इति परिभाषया अभ्यासाश्रयेषु कार्येषु बाधका बाध्यान् विधीन् न बाधन्ते । उत्सर्गापवादशब्दयोरिह बाध्यबाधकोपलक्षणतयान्तरङ्गत्वात् परत्वादपवादत्वाद्वा यद्बाधकं प्राप्नोति सर्वं तदभ्यासविकारे न बाधकमिति मन्तव्यम् । अजीगणदित्यादौ गणरूपस्याभ्यासस्येत्वमित्यर्थकस्य 'ई च गणः'[५१२] इति सूत्रस्य हलादिशेषेण णलोपे कृते गणरूपाभ्यासत्वाभावादचारितार्थ्येन निरवकाशत्वाद्धलादिशेषं बाधित्वा प्रवृत्तौ 'अलोऽन्त्यस्य' इत्यनेन णकारस्येत्वे गुणे अजेगणदित्यनिष्टापत्तिः ह्रस्वे कृते अजिगणदिति वा स्यादिति चेन्न, अभ्यासविकारेषु बाध्यबाधकभावो नास्ति इति परिभाषास्वीकारात् न दोषः । तेन हलादिशेषस्य ईत्वेन बाधाभावात् पुर्वं हलादिशेषेऽवशिष्टस्य गकारस्यैव गणरूपत्वमेकदेशविकृतन्यायेन स्वीकृत्य 'अलोऽन्त्यस्य' इति अकारस्य ईत्वे अजीगणदिति सिद्ध्यति । अस्याः ज्ञापकं 'दीर्घोऽकितः' इति सूत्रेऽकिद्ग्रहणम् तद्धि यंयम्यते, रंरम्यते इत्यादौ नुकि कृते दीर्घाभावार्थं क्रियते । यदि 'अभ्यासविकारेषु'[५१३] इति परिभाषा न स्यात्तदा अकिद्ग्रहणाभावे दीर्घप्राप्तियोग्ये विद्यमानाभावात् नुकोऽनवकाशत्वाद्दीर्घं बाधित्वा नुकि कृते अनजन्तत्वादेव दीर्घो न भविष्यति तर्हि किमकिद्ग्रहणेन? अतोऽकिद्ग्रहणं व्यर्थं सज्ज्ञापयति अभ्यासविकारविधायकेषु एकोऽन्यं न बाधते ।

एवञ्च अचीकृतमित्यादौ अचिकण्वदित्यत्र सावकाशं सन्वदित्वं 'दीर्घो लघोरित्यनेन'[५१४] बाध्यते । तथा मीमांसत इति 'मानबधदानि'ति दीर्घेण 'सन्यतः'[५१५] इत्यनेन इत्वं बाध्यते । महाभाष्ये 'दीर्घोऽकितः' इति सूत्रे एतत् सर्वं प्रातिपादितम् ।

---

६२. परिभाषेन्दुशेखरः, परि. – ५६ ।

६३. अष्टा. – ७/४/८३ ।

६४. तत्रैव – ७/४/९७ ।

६५. परिभाषेन्दुशेखरः, परि. –६७ ।

६६. अष्टा. ७/४/९४ ।

**‘निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञो वुञ्’[५१६] एकाज्धातुग्रहणस्य सार्थकता ।**

ताच्छीलिकाधिकारभवेषु प्रत्ययविधिषु भिन्नार्थाः भिन्नजातीयाः समानार्थाः समानजातीया वा प्रत्ययाः वासरूपविधिना न भवन्ति इति ‘ताच्छीलिकेषु वासरूपविधिनास्ति’[५१७] इति परिभाषार्थः । कथमियमावतरयति । ननु कटकरणशील इत्यर्थे यथा ‘तृन्’ (अषा. – ३/२/१३५) इत्यनेन ‘तृन्’ भवति तथा ण्वुल्तृचौ (अष्टा. – ३/१/१३३) इत्यनेन ण्वुलपि स्यात्, कर्तृसामान्ये विहितस्य ण्वुल्प्रत्ययस्य ताच्छील्यविशिष्टे कर्तरि अर्थेऽपि प्राप्ते, न चापवादत्वात्तृन् ण्वुलो बाधक इति वाच्यो ‘वासरूपोऽस्त्रियाम्’[५१८] इति सूत्रेणासरूपापवादस्य विकल्पेन बाधकत्वनिर्णयात् विकल्पेन ण्वुलपि स्यादिति चेन्न उक्तपरिभाषास्वीकारेणादोषात् । तेनासरूपेणपि तृन्प्रत्ययेन ण्वुलो नित्यबाधो भवति । ‘आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु’[५१९] इत्यत आरभ्य ‘भ्राज्–भास’[५२०] इति सूत्रपर्यन्तं तच्छीलाधिकारः । तत्र वासरूपविधिर्न प्रवर्तते । अतो न विकल्पेन ण्वुल्प्रत्ययः कटकरणशील इत्यर्थे । ‘निन्दहिंस क्लिशखाद...’ इति सूत्रेण ण्यन्तविनाशपरिवादिकण्डवादियगन्तासूयभिन्नेभ्य एकाज्भ्यो वुञ् विधानमत्र ज्ञापकम् । ‘ण्वुल्तृचौ’ इति सूत्रेण ण्वलि सिद्धे ‘निन्दक’ इति प्राप्ते ‘निन्दहिंस्’ इत्यनेन पुनः वुञ्ग्रहणं व्यर्थं स्यात् । न च ण्वुलि कृते असूयक इत्यस्यापि सिद्ध्या सम्पूर्णसूत्रज्ञापकमस्तु, एकाजभ्यो निन्दादिभ्य एव विहितस्य वुञो ज्ञापकप्रदर्शनं न्यूनमिति वाच्यम्, निन्दक इत्यादौ लित्स्वरञित्स्वरयोः विशेषाभावात् उभयथाद्युदात्तत्वात् असूयतेस्तु ण्वुलि ‘लिति’ (अष्टा.–६/१/१९३) इति प्रत्ययात् पूर्वमुदात्तं, वुञि तु ‘ञ्नित्यादिर्नित्यम्’[५२१] इत्यादिरुदात्त इति विशेषस्य सद्भावात् असूयतिभिन्नानां ज्ञापकत्वं बोध्यम् । अनित्येयं परिभाषा । “तच्चानित्यत्वमस्याः ‘सूददीपदीक्षश्च’[५२२] इत्यत्र दीपो युच्प्रतिषेधेन ज्ञापितम् ।

---

६७. तत्रैव – ७/४/७९ ।
६८. अष्टा. – ३/२/१४६ ।
६९. परिभाषेन्दुशेखरः, परि. – ६८ ।
७०. अष्टा. – ३/१/९४ ।
७१. तत्रैव – ३/२/१३४ ।
७२. तत्रैव – ३/२/१७७ ।
७३. तत्रैव ६/१/१९७ ।
७४. तत्रैव – ३/२/१५३ ।

यदि तच्छीलिके वासरूपविधिर्नास्ति तदा 'नमिकम्नी'ति इति दीपो रप्रत्ययेनैव विशेषविहितेन युच् बाधित इति किं तन्निषेधेन । तत् कुर्वाणो ज्ञापयति क्वचिदस्ति समावेश इति । तेन कम्रा कमना युवतिरिति रयुचोः समावेशः सिध्यति । गन्ता गामुक इति तृन्नुकञोः विकत्थी विकत्थन इति युच्घिनुणोः समावेशः सिद्धम्" इत्येवमालोचितः परिभाषावृत्तौ पुरुषोत्तमदेवेन ।

## 'अर्हेकृत्यतृचश्च'[५२३] इत्यत्र कृत्यतृज्ग्रहणस्य सार्थकता ।

ननु ताच्छीलिकेषु वासरूपविध्यभावस्वीकारेऽपि हसितं छात्रस्य हसनमित्यादौ घञ्, इच्छति भोक्तुम् इत्यत्र लिङ्लोटौ ईषन्पानः सोमे भवतेत्यत्र खल् प्राप्नोति 'वासरूपोऽस्त्रियाम्'

इति सूत्रेणासरूपापवादप्रत्ययेन उत्सर्गस्य विकल्पेन बाधात् इति चेन्न 'क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति'[५२४] इति स्वीकारात् । तस्याः ज्ञापकम् – 'अर्हेकृत्यतृचश्च' इत्यत्र कृत्यतृज्ग्रहणम् । तत्र हि समुच्चयार्थचकारेण 'लिङ् यदि'[५२५] इत्यतः समुच्चितलिङा कृत्यतृचोर्बाधा मा भूदिति कृत्यतृचोर्ग्रहणं क्रियते । यदि वासरूपविधिर्नित्यः स्यात्तदा विकल्पेन लिङा बाधेऽपि पक्षे कृत्यतृचोः सिद्धेस्तद्ग्रहणं व्यर्थं सत् वासरूपविधेरनित्यत्वं ज्ञापयति । प्रैषातिसर्गप्राप्तिकालेषु 'कृत्याश्च'[५२६] इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति तेन क्तल्युट्तुमुन्खलर्थेषु नेति सिद्धमिति सिद्धान्तकौमुद्यामुक्तम् । ततः 'लादेशेषु वासरूपविधिर्नास्ति'[५२७] इति ज्ञाप्यते ।

---

७५. अष्टा. – ३/३/१६९ ।
७६. परिभाषेन्दुशेखरः, परि. – ६९ ।
७७. अष्टा. – ३/३/१६८ ।
७८. तत्रैव – ३/३/१७१ ।
७९. सिद्धान्तकौमुदीस्थकृत्यप्रत्यये ।

**समानाधिकरणाधिकारस्थे 'कुमारः श्रमणादिः'[५२८] इति सूत्रे स्त्रीलिङ्गश्रमणादिपाठस्य सार्थकता ।**

'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमि'त्यनेन स्वरूपेण वा संज्ञया वा यत्र प्रातिपदिकमुपादीयते तत्र तस्य लिङ्गविशिष्टस्य लिङ्गाधिक्यस्यापि ग्रहणं भवति । लिङ्गग्रहणेनात्र लिङ्गाभिव्यक्तिहेतवष्टाबादयो दृष्टव्याः अभिधानेऽभिधेयोपचारात् । तेन 'अयसः कुम्भी' इति षष्ठीसमासे सकारस्य रुत्वे विसर्गे 'अयःकुम्भी' इत्यत्र 'अतः कृकमिकंसकुम्भपात्र'[५२९] इत्यनेन कुम्भपदस्योपादनेन सत्वं न स्यादित्यत्राह प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति । तेन कुम्भकंसेति विशेषरूपेण प्रातिपदिकस्योपादानात् अस्याः परिभाषायाः प्रवृत्तौ 'अयस्कुम्भी' इति प्रयोगे सत्वं सिद्ध्यति ।

एवञ्च 'कुमारः श्रमणादिभिः' इत्यत्र स्त्रीलिङ्गश्रमणादिपाठोऽस्याः ज्ञापकः । इह गणे श्रमणा, प्रव्रजिका, कुलटा, गर्भिणी, तापसी, दासी, बन्धकी, अध्यापक, पण्डित, पटु, मृदु, कुशल, चपल निपुणशब्दाः पठ्यन्ते । अत्र श्रमणादिबन्धक्यन्तस्त्रीलिङ्गशब्दैः सह कुमारशब्दस्य समानाधिकरण्याभावात् समासाप्राप्त्या तेषां तत्र पाठो व्यर्थः सन् परिभाषां ज्ञापयति । ततः कुमारशब्देन कुमारीशब्दस्यापि ग्रहणसम्भवात् 'कुमारी चासौ श्रमणा कुमारश्रमणा' इत्यादौ सामानाधिकरण्यात् समासविधानाय गणे तेषां पाठश्चरितार्थः । कुमारीश्ब्दस्यैव सामानाधिकरण्यम्, न तु कुमारशब्दस्येति ततेतज्ज्ञापकम् । अतएव 'युवा खलतिपलितवलिनजरतीभ्यः'[५३०] इत्यत्र जरतीग्रहणं चरितार्थम् । अन्यथा जरतीति स्त्रीलिङ्गेन युवेति पुंलिङ्गस्य सामानाधिकरण्याभावात् समासाप्राप्त्या जरतीशब्दपाठो व्यर्थः स्यात् । परिभाषासत्त्वे तु अनया युवेत्यनेन युवतीस्यापि ग्रहणात् 'युवतीः जरती युवजरती' इत्यत्र समासविधानाय तस्य पाठः सम्यगस्ति ।

अच्प्रकरणे शक्ति लाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुष्षु इति वार्तिके[५३१] घटात् पृथक् घटीग्रहणेन परिभाषेयमनित्येति ज्ञाप्यते ।

---

८०. अष्टा. – २/१/७० ।

८१. अष्टा. – ८/३/४६ ।

८२. अष्टा. – २/१/६७ ।

८३. तत्रैव – ३/२/९, सूत्रवार्तिकम् ।

## 'उपपदमतिङ्'[५३२] इत्यत्रातिङ्ग्रहणस्य सार्थकता ।

व्याजिघ्रतीति विग्रहे वि आङ् पूर्वकात् घ्राधातोः आतश्चोपसर्गे[५३३] इति कप्रत्ययः 'पाघ्राध्माधेड्दृशः शः'[५३४] इति शस्तु संज्ञायां न भवति, 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (अष्टा. – २/१/५६) इत्यत्र व्याघ्रादिभिरिति निर्देशात् । 'आतो लोप इटि च' (अष्टा. – ६/४/६४) इत्याकारलोपे वि + आ + घ्र इति स्थिते यणि व्याङोर्घ्रशब्देन सुबुत्पत्तेः प्रागेव 'कुगतिप्रादयः' इति गतिसमासे व्याघ्र इत्यस्य जातिवाचकत्वेन 'जातेरस्त्रीविषयादयोपधात्'[५३५] इति ङीषि व्याघ्रीति । यद्यप्यत्र उपपदसमासेऽपि कर्तुं शक्यते, तथापि गतिग्रहणमाङो घ्रशब्देन समासे पश्चादाघ्रशब्देन विशब्दस्य समासार्थमावश्यकमेव ।

सुप्सुपेत्यधिकारेऽपि 'कुगतिप्रादयः', 'कर्तृकरणे कृता बहुलम्', 'उपपदमतिङ्' इति च यत् गतीनां कारकाणामुपपदानाञ्च कृदन्तेन समासवचनं तत् सुबुत्पत्तेः प्रागेव ज्ञातव्यमिति 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः'[५३६] इत्यनया सूचयति । व्याघ्रीरूपसिद्धिः भवति ।

परिभाषायां ज्ञापकत्वं दर्शयति–उपपदमिति सूत्रे अतिङ्ग्रहणम् । अतिङ्ग्रहणाभावेऽपि 'सह सुपा'[५३७] इति सूत्रात् सुपेत्यनुवृत्त्या उपपदं सुबन्तं समर्थेन सुबन्तेन सह समस्यते इत्यर्थेन 'मा भूत्' इत्यत्र 'माङि लुङ्'[५३८] इत्यत्र माङीति सप्तमीनिर्देशात् 'मा' इत्यस्य "तत्रोपपदं सप्तमीस्थम्" (अष्टा.–३/१/९२) इति उपपदत्वेऽपि 'भूत्' इत्यस्य सुबन्तत्वाभावेन समामाप्राप्त्या अतिङ्ग्रहणं व्यर्थं सज्ज्ञापयति सुपेत्येतन्नेहानुवर्तते । इत्थमुपपदं सुबन्तं समर्थेन सह नित्यं समस्यते इत्यर्थे मा भूत् इत्यत्र समर्थेन 'भूत्' इत्यनेन उपपदस्य माङः समासवारणाय अतिङ्ग्रहणं स्वांशे चरितार्थम् । तत्रोपपदमित्युपपदसंज्ञकसुबन्तं द्विविधेनैव समर्थेन सहोपलब्धुं शक्यते तिङन्तरूपेण कृदन्तरूपेण च । तत्रातिङ् इत्युक्तेः तिङन्तेन समासाप्राप्त्या कृदन्तरूप एव

---

८४. अष्टा. – २/२/१९ ।

८५. तत्रैव – ३/१/१३६ ।

८६. तत्रैव – ३/१/१३७ ।

८७. तत्रैव. – ४/१/६३ ।

८८. परिभाषेन्दुशेखरः, परि. – ७६ ।

८९. अष्टा. २/१/४ ।

९०. तत्रैव – ३/३/१७५ ।

समर्थोऽवशिष्टः । इत्थं सिद्धं यदुपपदस्य कृदन्तेन समर्थेन सह सुबुत्पत्तेः प्रागेव समासो भवतीति ।

### ‘अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ’[५३९] इति सूत्रस्य सार्थकता ।

ननु ‘वदः सुपि क्यप् च’[५४०] इत्यत्र ‘अचो यत्’[५४१] इति सूत्रादनुकृष्टस्य यत्प्रत्ययस्य ‘भुवो भावे’[५४२] इत्यत्राप्युनुवृत्तिः स्यादतः परिभाषा स्वीक्रियते ‘चानुकृष्टं नोत्तरत्र’[५४३] इति । अर्थात् चकारेणानुकृष्टमुत्तरं नाधिक्रियते ।

अत्र ज्ञापकम् ‘अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ’ इत्यस्य स्थानेऽव्ययेऽयथाभिप्रेताख्याने क्त्वा चेति न्यासे कृतेऽपि चकारेण ‘स्वादुमि णमुल्’ इति सूत्राण्णमुलोऽनुकृष्टिसंभवे णमुलः पुनर्ग्रहणम् । तद्धि ‘तिर्यच्यपवर्गे’[५४४] इत्याद्युत्तरत्र सूत्रेषु क्त्वाणमुलोः उभयोरनुवृत्त्यर्थं क्रियते । तेन ‘उच्चैःकृत्य’, ‘उच्चैःकृत्वा’, ‘उच्चैःकारम्’ अप्रियमाचष्टे, नीचैःकृत्य, नीचैःकृत्वा नीचैःकारं प्रियः ब्रुते इत्यादावव्ययपूर्वककृञो यथा क्त्वाणमुलावुभौ भवतस्तथा तिर्यक्कृत्य, तिर्यक्कृत्वा, तिर्यक्कारं गत इत्यादावपि जायेत । यदि चानुकृष्टस्योत्तरत्राप्यनुकृष्टिर्भवेत् तदा ‘क्त्वा चे’ति कथनेऽपि चानुकृष्टस्य णमुल उत्तरत्रानुवृत्तिसिद्धे णमुल्ग्रहणं पुनः कृतं व्यर्थं स्यात् । अतः चकारेणानुकृष्टमुत्तरत्र नाधिक्रियते इति । अनित्या चेयं परिभाषा । अनित्यत्वमस्याः ‘प्रातिपदिकान्तनुम्विभक्तिषु चे’ति[५४५] चानुकृष्टमपि विकल्पं ‘निवर्त्तयितुम् ‘एकाजुत्तरपदे णः’[५४६] इति सूत्रे पुनर्णग्रहणादवसीयते ।

---

९१. अष्टा. – ३/४/५९ ।
९२. तत्रैव – ३/१/१०६ ।
९३. तत्रैव – ३/१/९७ ।
९४. तत्रैव – ३/१/१०७ ।
९५. परिभाषेन्दुशेखरः, परि. – ७९ ।
९६. अष्टा.– ३/४/६० ।
९७. तत्रैव – ८/४/११ ।
९८. तत्रैव – ८/४/१२ ।

**‘वामदेवाङ्ड्यड्ड्यौ’[५४७] इत्यत्र डित्करणस्य सार्थकता ।**

ननु ‘पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन’[५४८] इति षष्ठीसमासनिषेधः तव्यान्तशब्दयोगे विहितस्तव्यदन्तशब्दयोगेऽपि स्यात् तकारस्य लक्ष्येऽविद्यमानतया तव्यरूपस्य तत्रापि सत्त्वात् । ‘यतोऽनावः’[५४९] इत्यनेन विहित आद्युदात्तो यथा ‘युञ्जन्त्यस्य काम्या’ इत्यत्र ण्यन्तात् कमेः ‘अचो यत्’ इति यत्प्रत्ययनिष्पन्ने काम्येत्यत्र भवति तथा ‘ईड्यो नूतनैरुतः’ इत्यत्र ण्यत्यपि स्यात् । पूर्वोक्तदोषनिराकरणाय परिभाषाद्वयं[५५०] स्वीक्रियते ‘निरनुबन्धकग्रहणे न सानुबन्धकस्य’, ‘तदनुबन्धकग्रहणे नातदनुबन्धकस्य’ चेति । ‘पूरणगुणसद’ इत्यनेन षष्ठीसमासनिषेधे निरनुबन्धकतव्योपादाने तव्यतो ग्रहणं न भवति । ‘यतोऽनावः’ इत्येकानुबन्धकस्य ग्रहणे ण्यतो ग्रहणं न भवति । ‘वामदेवाड्ड्यड्ड्यौ’ इति सूत्रे ड्यत्ड्योर्डित्करणमत्र ज्ञापकम् । तद्धि डित्त्वं ‘ययतोश्चातदर्थे’[५५१] इत्यत्र तयोर्ड्यतो ड्यस्य चग्रहणार्थं क्रियते । तेन ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात् परस्यान्त उदात्त इत्यर्थकेन ‘ययतोश्चातदर्थे’ (पा. ६/२/१५६) इत्यनेन ‘अवामदेव्यम्’ इत्यत्रान्तोदात्तो न भवति किन्तु ‘तद्पुरुषे तुल्यार्थतृतीया’[५५२] इति अव्यये नञ्कुनिपातानामव्ययपूर्वपदप्रकृतिस्वर एव । यदीमे परिभाषे न स्याताम्, तर्हि ‘ययतोश्चातदर्थे’ इति विधीयमानमुत्तरपदन्तोदात्तत्वम् अवामदेव्यशब्दे स्यादेव, डकारे लुप्ते ययद्रूपत्वानपायात् । इत्थं डित्करणं व्यर्थं सज्ज्ञापयति परिभाषाद्वयम् । ज्ञापिते तु परिभाषाद्वये निरनुबन्धकेन ‘य’ इत्यनेन सानुबन्धकस्य ड्यस्य ग्रहणं न, तेन तकाररूपेणानुबन्धेन विशिष्टस्य यतो ग्रहणेन तदनुबन्धेतरानुबन्धकस्य ड्यतो ग्रहणं न जायते इति अवामदेव्ये दोषाभावः ।

लोके यथा देवालये देवसन्निधौ छत्रोपानहादिरहितस्यैव जनस्य प्रवेशो धर्मशास्त्रादिना विहित इति न तत्र तद्युक्तस्य प्रवेशो दृश्यते । अथवा यथा पुस्तकालये

---

९९. अष्टा. – ४/२/९ ।

१००. तत्रैव – २/२/११ ।

१०१. तत्रैव – ६/१/२१३ ।

१०२. परिभाषेन्दुशेखरः, परि. – ८१, ८३ ।

१०३. अष्टा. – ६/२/१५६ ।

१०४. अष्टा. – ६/२/२ ।

छत्रस्यूतादिरहितस्यैव जनस्य प्रवेशो न्यायसिद्ध इति न तद्युक्तस्य प्रवेशो जायते, तथैव शास्त्रेऽपि सत्कार्यमनुबन्धरहितस्य विहितं न तदनुबन्धयुक्तस्य क्रियते ।

लोके कस्मिंश्चिद्यात्रादिशुभकार्यप्रसङ्गे एकाक्षकर्मकदर्शनस्य निषिद्धत्वान्न द्व्यक्षकर्मकदर्शनस्य निषेधो जायते । अथवा कस्मिंश्चिद् राज्ये तस्करौ स्तस्तयोरेक एकगदुकः, अन्यश्च गडुकद्वययुक्तः । यदा राजापुरुषाधिपतिना राजपुरुष एकगडुकस्य चौरस्य निग्रहाय आदिष्टस्तदा स तमेव गृह्णाति, न तु गडुकद्वययुक्तम् । एवं परिभाषाद्वयं लौकिकत्वं भजते ।

### 'णचः स्त्रियामञ्'[५५३] इत्यत्र स्त्रियामित्यस्य सार्थकता ।

'ह्रस्वा कुटी कुटीरः' इत्यत्र 'कुटीशमीशुण्डाभ्यो रः'[५५४] इति स्वार्थे रप्रत्ययो भवति तत्र च न्यायप्राप्तत्वात् स्वार्थिकानां प्रकृतितो लिङ्गवचनानि अनुवर्तन्ते इति कृत्वा कुटीशब्दगतस्त्रीलिङ्गत्वेन भाव्यमिति पुंस्त्वानुपपत्तिः, एवम् ईषदूना आपः अप्कल्पमित्यत्रापि 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः'[५५५] इति कल्पप्प्रत्यये प्रकृतिगतेन लिङ्गेन भाव्यमिति नपुंकत्वानुपपत्तिरिति चेन्न 'क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते'[५५६] इति परिभाषास्वीकारात् । क्वापि स्वार्थिका प्रत्यया अपि प्रकृतिगतलिङ्गवचनान्यतिक्रम्य वर्तन्ते । अर्थात् स्वार्थे जातप्रत्ययान्तशब्दादपि तदेव लिङ्गं वचनं च न भवतः यत् किल स्वार्थिकप्रत्ययस्य प्रकृतेरासीत् ।

'णचः स्त्रियामञ्' इति सूत्रे स्त्रियामिति परिभाषायाः ज्ञापकम् । अन्यथा 'कर्मव्यतिहारे णच् स्त्रियाम्'[५५७] इत्यनेन णच् स्त्रियामेव विधीयते । तत्र स्त्रियामिति कथनं विनापि अञ्प्रत्ययस्य च स्वार्थिकत्वादौचित्याद् औत्सर्गिकप्रकृत्यर्थगतस्त्रीलिङ्गत्वे सिद्धे 'स्त्रियामि'ति कथनं व्यर्थं सत् परिभाषां ज्ञापयति । परिभाषयानया प्रकृत्यर्थभिन्नलिङ्गत्वे प्राप्ते इष्टे स्त्र्यर्थे विधानलाभाय स्त्रियामिति स्वांशे चरितार्थम् ।

---

१०५. अष्टा. – ५/४/१४ ।
१०६. तत्रैव – ५/३/८८ ।
१०७. तत्रैव – ५/३/६७ ।
१०८. परिभाषेन्दुशेखरः, परि. – ८४ ।
१०९. अष्टा. – ३/३/४३ ।

तदुक्तं भाष्ये – 'स्त्रीग्रहणं किमर्थम्? न स्वार्थिकोऽयम्? स्वार्थिकाश्च प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते । एवं तर्हि सिद्धे यत् स्त्रीग्रहणं करोति तज्ज्ञापयत्याचार्यः – स्वार्थिका अतिवर्तन्ते अपि लिङ्गवचनानीति । किमेतस्य ज्ञापने प्रयोजनम्? गुडकल्पा द्राक्षा, तैलकल्पा प्रसन्ना, पयस्कल्पा यवागूरित्येतत् सिद्धं भवति'[५५८] इति ।

**'बिल्मकादिभ्यश्छस्य लुक् च'[५५९] इत्यत्र छग्रहणस्य सार्थकता ।**

'पञ्चेन्द्रान्यो देवता अस्य इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे, समासत्वात् प्रातिपदिकसंज्ञायां विभक्त्योर्लुकि गुणे 'पञ्चेन्द्राणी' इत्यस्मात् 'सास्य देवता'[५६०] इति जातस्य अण्प्रत्ययस्य 'द्विगोर्लुगनपत्ये'[५६१] इति लुकि 'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययस्य ङीषो लुक्यपि 'इन्द्रवरुण . . .'[५६२] इति विहितस्यानुकः श्रवणापत्तिः इति चेन्न, 'सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपायः'[५६३] इति परिभाषास्वीकारात् सन्नियोगशिष्टयोः ङीषः आनुकश्चोभयोरन्यतरस्य ङीषः 'लुक्तद्धितलुकि' इति लुकापाये उभयोरप्यपायात् ।

सन्नियोगेन साजात्येन एकशास्त्रप्रयुक्तत्वेन, यौ शिष्टौ विहितौ तौ सन्नियोगशिष्टौ, ते सन्नियोगशिष्टाः, तेषां सन्नियोगशिष्टानां, सन्नियोगशिष्टानामित्यत्र बहुत्वमविवक्षितम् । अतः सन्नियोगशिष्टयोर्मध्येऽन्यतरस्य एकस्य, अपाये अभावे उभयोरपि द्वयोरपि अपायः अभाव इत्यर्थः । लोके यथा – केनचित् राष्ट्रेण निमन्त्रितः कश्चिद् राष्ट्रनायकः स्वसहयोगिभिस्तस्मिन् राष्ट्रं गतवान् । ते च तेष्वेकस्याप्यपमानेन निवृत्तौ सत्यां सर्वे प्रतिनिवृत्ता अवलोक्यन्ते, तथैव शास्त्रेऽपि यत्र समुदितानां मध्ये एकस्याभावस्तत्र तेनैव सह तदतिरिक्तस्याप्यभावः प्रवतते, प्रकृतन्यायात् ।

न्यायोऽयं – 'बिल्वकादिभ्यश्छस्य लुक् च' इति सूत्रे छग्रहणेन ज्ञापित इति तत्सूत्रे भाष्ये एवोक्तम् । तत्रैष प्रसङ्गः – 'बिल्वकादिभ्यो लुक्' इत्येतावन्मात्रसूत्रकरणेऽपि

---

११०. महाभाष्यम् – ५/४/१४ ।
१११. तत्रैव – ६/४/१५३ ।
११२. तत्रैव – ४/२/२४ ।
११३. तत्रैव – ४/१/८८ ।
११४. अष्टा. – ४/१/४९ ।
११५. परिभाषेन्दुशेखरः, परि. – ८७ ।

सूत्रे 'भस्ये'त्यस्याधिकारात् अर्थात् विभक्तिविपरिणामे सति 'नस्तद्धिते'[५६४] इत्यतस्तद्धिते इत्यस्य 'हलस्तद्धितस्य'[५६५] इत्यतस्तद्धितस्येत्यस्य चानुवृत्तौ सत्यां – भसंज्ञकादङ्गात् परस्य तद्धितप्रत्ययस्य लुक् स्यात् तद्धितप्रत्यये परे इत्यर्थस्वीकारे छप्रत्ययस्यैव लुक् सत्त्वात् सर्वत्र दोषाभावेन सम्भवव्यभिचाराभ्यां स्याद् विशेषणमर्थवदिति न्यायात् सूत्रे छग्रहणं व्यर्थमित्याशङ्कितम्। ततश्च सूत्रे छग्रहणाभावे 'नडादीनां कुक् च'[५६६] इत्यकेनैव योगेन छप्रत्ययस्य कुगागमस्य च विहितत्वात् सन्नियोगशिष्टन्यायेन छप्रत्ययस्येव कुकोऽपि निवृत्त्यापत्तिः स्यात् । कृते तु छग्रहणे केवलं छस्यैव निवृत्तिर्भवति, न तु कुकोऽपीति । तथा च भाष्यम् –

"छग्रहणं शक्यमकर्तुम् । इह कस्मान्न भवति बिल्वकेभ्यः? भस्येति वर्तते । एवमपि बिल्वकायेत्यत्र प्राप्नोति । तद्धितस्येति वर्तते । एवमपि बिल्वकस्य विकारः, अवयवो वा बैल्वकः, अत्र प्राप्नोति । तद्धिते तद्धितस्येति वर्तते । एवमपि बिल्वकीयायां भवो बैल्वकः, बैल्वकस्य किञ्चिद् बैल्वकीयम् अत्र प्राप्नोति । न स बिल्वकात् । बिल्वकादिभ्यो विहित इत्युच्यते । न चासौ विल्वकशब्दाद् विहितः" इति ।

पुरुषोत्तमदेवेनास्याः अनित्यत्वमेव प्रतिपादितम्[५६७] – "अनित्यत्वञ्चास्याः 'भस्याढे तद्धित' इति (अष्टा. – ६/३/३४) 'अढ' इति पुंवद्भावनिषेधेन ज्ञापितम् । अत्र हि आढ इति किं श्यैनेयो रौहिणेय इति प्रत्युदाहृतम् । यदि चेयं नित्या स्यात्तदा 'यस्येति च' (अष्टा. – ६/४/१४८) इति लोपे कृते नकारोऽपि निवृत्त इति श्यैतेयो रौहितेय इति स्यादिति" ।

## "दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेय – हिरण्मयानि"[५६८] इत्यत्र भौणहत्ये तत्वनिपातनस्य सार्थकता ।

कंसपरिमृड्भ्यामित्यादौ विभक्तिमाश्रित्य मृजेरिको वृद्धिः स्यात् प्रत्यये परे 'मृजेर्वृद्धिः' इत्यनेन, परिपूर्वकात् मृज्धातोर्जातस्य क्विपः प्रत्ययलक्षणेन 'क्ङिति च' इति

---

११६. अष्टा. – ६/४/१४४ ।
११७. तत्रैव – ६/४/१५० ।
११८. तत्रैव – ४/२/९१ ।
११९. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ६५ ।
१२०. अष्टा. – ६/४/१७४ ।

न निषेधो वक्तव्यः किन्निमित्तायाः ङिन्निमित्ताया एव वृद्धेः निषेधात् । न चात्र क्विपं निमित्तं कृत्वा वृद्धिः प्राप्नोति किन्तु 'भ्याम्' निमित्तं कृत्वेति तस्य निषेधस्याप्रवृत्तेः इति चेन्न 'धातोः कार्यमुच्यमानं तत्प्रत्यये भवति'[५६९] इति परिभाषास्वीकारात् धातुमुद्दिश्यं कृत्वा विहितं कार्यं तस्मात् धातोर्विहिते प्रत्यये एव भवति । 'मृजेर्वृद्धिः' इति वृद्धिः मृज्धातुमुद्देशीकृत्यात्र विधीयते । अतः सा मृज्धातोर्यः प्रत्ययो जातस्तस्मिन् परे एव भवतीति परिभाषयानया बोधनादत्र यस्मिन् 'भ्याम्' प्रत्यये परे वृद्धिरिष्यते, परन्तु 'कंसपरिमृज' इत्यवस्थायां 'मृजेर्वृद्धिः' इत्यनेन न वृद्धिः, 'मार्ष्टि' इत्यादौ धातोर्विहिते तिप् प्रत्यये च वृद्धिर्जायते इति ।

'दाण्डिनायन . . . भ्रौणहत्य . . . हिरण्यमयानि' इति सूत्रेण भ्रौणहत्ये तत्वनिपातनमस्याः परिभाषायाः ज्ञापकम् । भ्रूणघ्नो भावो भ्रौणहत्यमित्यत्र 'भ्रूणहन्' शब्दात् ष्यञि तकारान्तादेशोऽनेन निपात्यते । तत आद्यचो वृद्धौ भ्रौणहत्यमिति जायते । तत्र 'ष्यञि हनस्तोऽचिण्णलोः'[५७०] इत्यनेनैव हन्तेस्तत्वे रूपसिद्धे तकारनिपातनं "धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति ज्ञापयति । 'हो हन्तेरिति'[५७१] कुत्वनिषेधार्थमिदं निपातनं न ज्ञापकमिति न वाच्यम् । कुत्वनिषेधार्थस्य 'न क्वादेरित्यत्र (अष्टा. – ७/३/५९) 'न' इति योगविभागेन साध्यत्वात् । इह तु 'नियौ' 'निय' भुवौ भुव इत्यत्र 'क्षिपः' इनि निर्देशात् ज्ञापकादिधातुप्रत्ययेष्वपि इयङुवङाविति ।

'मृजेर्वृद्धिः' इति सूत्रे भाष्येऽसौ दृश्यते – "मृजेर्वृद्धिविधौ क्विप्रतिषेधः' (वार्तिक) मृजेर्वृद्धिविधौ क्व्यन्तस्य प्रतिषेधो वक्तव्यः । कंसपरिमृड्भ्यां, कंशपरिमृड्भिः । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात् सिद्धम् । धातुप्रत्यये कार्यं भवतीत्येषा परिभाषा कर्तव्या । कान्येतस्याः परिभाष्यायाः प्रयोजनानि? प्रयोजनं सृजिदृशिमस्जिनशिहन्तिगिरत्यर्थमि"ति[५७२] ।

---

१२१. परिभाषेन्दुशेखरः, परि. – ८९ ।

१२२. अष्टा. – ७/३/३२ ।

१२३. तत्रैव – ७/३/५४ ।

१२४.महाभाष्यम् – ७/२/११४ ।

**‘नेदमदसोऽकोः’[५७३] इत्यत्र ‘अकोः’ इति प्रतिषेधस्य सार्थकता । ‘तन्मध्यपतितस्तद्ग्रहणेन गृह्यते’ इत्यस्या यौक्तिकता ।**

यस्य मध्ये यः पतितो भवति स तद्ग्रहणेन गृह्यते एव इति ‘तन्मध्यपतितस्तद्ग्रहणेन गृह्यते’[५७४] इति परिभाषार्थः । यथा लोके जलप्रवाहे गङ्गायां पतितो मत्स्यो गङ्गाग्रहणेन गृह्यते, तद्यथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते तथैव शास्त्रेऽपि ‘अव्ययसर्वनाम्नामकच् प्राक् टेः’[५७५] इति सूत्रेण प्रागकचि ‘सर्वकैः’, ‘उच्चकैः’ इत्याद्युदाहरणेषु विहितोऽकच्प्रत्ययः सर्वनामग्रहणेन अव्ययग्रहणेन च ग्रह्यते एव ।

न्यायोऽयं ‘येन विधिस्तदन्तस्य’ इति सूत्रे भाष्ये व्यवहृतः, तत्रायमवसरः – अकच्श्नमवतः सर्वकैः उच्चकैः, भिनत्तीत्यादौ कार्यकालपक्षे सर्वनामाव्ययधातुसंज्ञाविधौ तदन्तसंज्ञा कार्या, अन्यथा पूर्वोक्तोदाहरणेषु यथासंख्येन शीभावः, सुब्लोपः, धातोरन्तोदात्तत्वं न स्युः । तस्यान्तः तदन्तः, तदन्तोऽन्तः यस्य तं तदन्तान्तम्, तस्य तदन्तान्तस्य इति विगृहीतम् । अत उत्तरसूत्रे तथा निर्देशः कर्तव्यः, इत्याक्षिप्य न कर्तव्यः, उष्ट्रमुखमिव मुखमस्य उष्ट्रमुख इत्यादिवदत्रापि तदन्तोऽन्तो यस्य स तदन्तः, तस्य तदन्तस्येत्युत्तरपदलोपिसमासेनैव निर्वाहात् । पूर्वोक्तामेव शङ्कां समादधद्भिः भाष्यकारैरुक्तम् – “तदेकदेशविज्ञानाद्वा सिद्धम् । तदेकदेशविज्ञानाद्वा सिद्धमेतत् । तदेकदेशभूतस्तद्ग्रहणेन गृह्यते । तद्यथा – गङ्गा, यमुना, देवदत्तेति । अनेका नद्यो गङ्गा यमुनां च प्रविष्टा गङ्गायमुनाग्रहणेन गृह्यते, तथा देवदत्तास्थो गर्भो देवदत्ताग्रहणेन गृह्यते”[५७६] इति ।

तन्मध्यपतितत्वञ्चात्र तन्निष्ठोद्देश्यतानिरूपितविधेयताश्रयत्वमेव । अतएव लोके गङ्गाया धाराद्वयमध्ये उद्भूतो भूखण्डो गङ्गाप्रवाहेण न गृह्यते ।

अत्र ‘नेदमदसोरकः’ इति सूत्रस्थः अकोरिति प्रतिषेधो ज्ञापकः । स हि ‘इमकैः’, ‘अमुकैः’ इत्यत्र भिसः ऐस्प्रतिषेधवारणाय क्रियते । साकच्–कस्य शब्दान्तरत्वे इदम् अदस् शब्दग्रहणे तयोरग्रहणे स्वत एव सिद्धेः व्यर्थः सन् स प्रतिषेधः

---

१२५. अष्टा. – ७/१/११ ।

१२६. परिभाषेन्दुशेखरः, परि. – ९० ।

१२७. अष्टा. – ५/३/७१ ।

१२८. महाभाष्यम् – ७/१/११ ।

'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इत्यस्याः ज्ञापकः । भाष्ये 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति पाठो दृश्यते तात्पर्यं तुल्यमेव ।

## 'ओर्गुणः'[५७७] इति सूत्रस्थं गुणपदं सूचयति संज्ञा पूर्वकविधेरनित्यता ।

संज्ञा पुरस्कृत्य प्रवर्तमानो विधिरनित्यो भवतीति 'संज्ञापूर्वकविधेरनित्यत्वम्'[५७८] इति परिभाषार्थः । तद्यथा इदं कार्यं देवदत्ताख्येन जनेन सम्पादनीयम् इति केनचिदुक्ते यदि देवदत्ताख्यो जन उपलभ्यते तदा तत्कार्यं सम्पादितं भवति, अनुपलब्धौ तु नैव भवति । तत्कार्यं तु येन केनापि जनेन सम्पादनीयं तत्तु एकस्यानुपलब्धावन्येनापि सम्पाद्यते एव ।

शास्त्रेऽस्य नियमस्य ज्ञापने तु 'ओर्गुणः' इत्यत्र गुणग्रहणमुल्लेखितम् । 'ओर्गुणः' इत्यत्र ओरोदित्येव वाच्यम्, गुणग्रहणं कृत्वा तन्मुखेन विधानेऽप्यान्तरतम्यादुकारस्य स्थाने ओकारस्यैव विधानेन प्रक्रियालाघवात् तस्यैवोचित्यात् । तथा अकृत्वा, यत्कृतं गुणग्रहणं तदेव व्यर्थं सञ्ज्ञापयति संज्ञापूर्वकविधेरनित्यत्वमिति । परिभाषास्वीकारादेव स्वायम्भुवमित्यत्र गुणाभावे उवङ्सिद्धिः । व्याडिपुरुषोत्तमदेवसीरदेवैरेषा परिभाषा स्वीकृता, लोके स्वायम्भुवमिति प्रयोगस्यासिद्धत्वात् भाष्यानुक्तत्वात्न्नागेशेन न स्वीकृता ।

## 'आनि लोट्'[५७९] इत्यत्र 'आनि' ग्रहणात् 'आगमशास्त्रमनित्यमित्यस्य'[५८०] यौक्तिकता ।

आगमशास्त्रेण विधीयमानं कार्यमनित्यमिति परिभाषार्थः । लोके दृश्यते यद्देहिनां शरीरे जायमाना गड्वादय आगमाः कस्यचिदेव शरीरे जायन्ते, न तु सर्वेषाम् । अथ च देहिनो जीवने गम्यमाना निवर्तमाना च धनादयो रोगादयो वा आगमा अप्यनित्या एव । अतएव कश्चिज्जनः कदाचिद्धनाभावात् भिक्षामटति, कुट्यां निवसति, अनश्नन् तिष्ठति; किन्तु स एव जनः कदाचित् धनागमे सति परेभ्यो दानं वितरति, प्रासादे निवसति, पायसादीन्नुत्तमोत्तमानपि पदार्थान् अनिच्छन् परित्यजति एवमेव कदाचित् कश्चन जनो

---

१२९. अष्टा. – ६/४/१४६

१३०. परिभाषेन्दुशेखरः, परि. – ९४ ।

१३१. अष्टा. – ८/४/१६ ।

१३२. परिभाषेन्दुशेखरः, परि. – ९५ ।

रोगागमे सति असमर्थः सन्न किञ्चित् कुर्वाणः शय्यायां रुदन् समयं यापयति; किन्तु रोगापगमे स्वास्थ्यलाभे तु स एव जनः संग्रामेऽन्यान्यान् महभटानपि हत्वा स्वर्गं प्रेषयति ।

'निलोट्' इत्येव सिद्धे 'आनि लोट्' इत्यत्र आनिग्रहणात् आगमशास्त्रमनित्यमिति ज्ञाप्यते। 'प्रभवाणि' इत्यादौ निलोडित्येव वक्तव्ये आङ्ग्रहणं व्यर्थं सदागमशास्त्रमनित्यमिति ज्ञापयति । न चैवमुपसर्गस्य नेर्ग्रहणं स्यादिति तद्व्यावृत्त्यर्थमाङ्विशिष्टस्य ग्रहणमिति वाच्यम्, 'नेर्गद . . .'[५८१] इति सूत्रे पुनर्ग्रहणात् । व्याडिपुरुषोत्तमदेवसीरदेवैरेषा स्वीकृता । परन्तु भाष्येऽनुक्तत्वान्नागेशेन न स्वीकृता ।

## 'लोटो लङ्वत्'[५८२] इत्यतिदेशस्य सार्थकता ।

'लोटो लङ्वत्' इत्यत्रातिदेश 'आतिदेशिकमनित्यम्'[५८३] इति परिभाषामेतां ज्ञापयति । लङ्लोडिति विधानेनैव लोटः तामाद्यादेशसलोपरूपे ङित्कार्ये सिद्धे लङ्वदित्यतिदेशविधानं व्यर्थं स्यात् । 'जुत्वतु' इत्यत्र हुधातोः लोट्लकारे झ्यादेशे सार्वधातुकसंज्ञायां शपि तस्य श्लौ द्वित्वे च 'लोटो लङ्वत्' इत्यस्यानित्यत्वात् ङित्त्वातिदेशाभावे 'सिजभ्यस्तविदिभ्यश्च[५८४] इति सूत्रेण जुस् न । तन्नेति नागेशः "विदो लटो वा"[५८५] इत्यतो वाग्रहणमनुवृर्त्य व्यवस्थितविभाषाश्रयणान्न जुस् ।

वस्तुतस्तु 'सिजभ्यस्तविदिभ्यश्च' इति सूत्रेण विधीयमानो जुस् सिच् साहचर्यादभ्यस्तादप्यनतिदिष्टङित्त्ववतो लकारस्यैव स्थाने स्यादिति स्वीकारे नास्य किञ्चित् प्रयोजनमस्ति ।

लोकेऽप्ययं व्यवहारोऽनित्य एव, तद्यथा 'मातृवत् परदारेषु इत्याद्यारोपवाक्यैरारोपितायां मातरि स्वमातृवद्व्यवहारो नोपलभ्यते । अतएव न हि कोऽपि जनः स्वाध्यवसायेन धनमुत्पाद्य परदारेभ्यो मातृबुद्ध्या प्रयच्छति, नापि स्वमातृवत् तस्याः शरीरकी शुश्रूषैव विदधाति । यद्युच्यते अत्रातिदेशविधायकवाक्यस्य नायमभिप्रायो यद् धनादिदानेन शुश्रूषया वा परदाराः स्वमातृवद् व्यवहर्तव्याः, किन्तु यथा स्वमाता

---

१३३. अष्टा. – ८/४/१७ ।
१३४. अष्टा. – ३/४/८५ ।
१३५. परिभाषेन्दुशेखरः, परि. –९९ ।
१३६. अष्टा. –३/४/१०९ ।
१३७. तत्रैव – ३/४/८३ ।

कामादिवासनाशान्तिदृष्ट्यातिनिषिद्धा पूज्या पवित्रा चेति, तथैव परदारापीत्येवाभिप्रायस्तस्य वाक्यस्य तदा तदपि व्यवहारो नित्य एव ।

अथवा कश्चनानपत्यो जनो यथाशास्त्रं दत्तकं पुत्रं गृह्णाति स्वोपार्जितं धनादिकमपि तस्मै प्रयच्छति, तथापि यथा औरसः पुत्रः समातृपितृभ्यो व्यवहरति, न तथा दत्तकपुत्र इत्यपि प्रायशो लोकेऽनुभूयते । क्वचिद् दत्तकपुत्रोऽपि औरसपुत्रवत् व्यवहरतीत्यातिदेशिकः पुत्रत्वव्यवहारो नित्यः । महाभाष्येऽनुक्तत्वान्नागेशेन नाङ्गीक्रियते ।

**'विधौ परिभाषोपतिष्ठते नानुवादे'[५८६] इति नियमस्य ज्ञापकं 'उदीचामातः स्थाने य–क पूर्वायाः'[५८७] इत्यत्र स्थानप्रतिपत्यर्थं स्थानग्रहणम् ।**

सीरदेवनीलकण्ठदीक्षितहरिभास्करप्रभृतिभिरियं वर्णितास्ति परिभाषा । तेन 'क्ङिति च' इत्यत्र[५८८] 'क्ङिति' इत्यस्य गुणवृद्धिभ्यां सम्बन्धात् 'तस्मिन्नि निर्दिष्टे पूर्वस्य' परिभाषा नोपतिष्ठते । तेन क्ङिन्निमित्ते प्रत्यये निषेधात् भिन्नमित्यत्रापि निषेधः सिद्ध्यति । प्रधानाप्रधानन्यायलभ्योऽयमर्थः । 'उदीचमातः स्थाने . . .' इत्यत्र स्थानप्रतिपत्यर्थं स्थानग्रहणम् । अन्यथा 'षष्ठी स्थानेयोगा' इत्यनेनैव स्थानार्थलाभसिद्धेः 'स्थाने' ग्रहणं व्यर्थं स्यात् । अव्यापिका चेयं "संख्याव्ययादेर्ङीप्"[५८९] इत्यत्रादिग्रहणात् ।

नीलकण्ठदीक्षितस्तु स्वपरिभाषावृत्तौ प्राह[५९०] – "अनूद्यमानविशेषणेषु नोपतिष्ठते किन्तु विधावेवेत्यर्थः । इयञ्च–साक्षाद्विध्यङ्गभूतानां साक्षाद्विधेयेनासिद्धत्वादन्वयासम्भवे तद्विशेषण– व्यवस्थापकत्वेन चरितार्थानां तद्विशेषणव्यवस्थापकत्वे मानाभाव इति तर्कमूलेयमित्येके" इति ।

हरिभास्करोऽप्याह – "तत्र परिभाषोपतिष्ठते यथा सार्वधातुकाधधातुकयोः (अष्टा. – ७/३/८४) इत्यादौ इकोगुणवृद्धी' (अष्टा. १/१/३) । अनूद्यमानविशेषणे तु न । यथा वृद्धिर्यस्याचामादिस्तद्वृद्धम् (अष्टा. १/१/७३) इत्यत्र तेन शालीयादिसिद्धिः" इति ।

---

१३८. परिभाषेन्दुशेखरः, परि. – १०२ ।

१३९. अष्टा. – ७/३/४६ ।

१४०. तत्रैव – १/१/५ ।

१४१. तत्रैव – ४/१/२६ ।

१४२. नीलकण्ठदीक्षितकृतबृहत्परिभाषावृत्तिः, परि. – ८५ ।

परिभाषान्दुशेखरे प्रथमं परिभाषास्वीकर्तॄणां मतं नागेशेनोपस्थापितं पश्चात्खण्डितम् । तदुक्तम् – "उदात्तस्वरितयोर्यण इत्यादौ 'ष्यङः सम्प्रसारणम्' इति सूत्रभाष्योक्तरीत्या 'अल्लोपोऽनः' इत्यादौ चैतस्या व्यभिचरितत्वात्, भाष्यानुक्तवाच्च"[५९१] इति ।

स्थाने ग्रहणस्य 'उदीचामातः स्थाने' इति सूत्रस्थस्य परिभाषाज्ञापकत्वं यदुक्तं तदपि न 'षष्ठी स्थानेयोगा' इति सूत्रं तु निर्दिश्यमानस्यादेशाः भवन्तीति परिभाषासिद्धिकारकमिति 'षष्ठी स्थानेयोगा' इति सूत्रे भाष्ये स्पष्टमुक्ततया स्थानार्थलाभस्य 'षष्ठी स्थानेयोगा' इति परिभाषासाध्यत्वाभावेन ज्ञापितेऽपि तस्य चारितार्थ्यासम्भवात् ।

### लुङ्लङ्लृङ्क्ष्वडुदात्तः[५९२] इत्यत्र उदात्तग्रहणेन 'अभेदका गुणाः'[५९३] इति नियम्यते ।

उदात्तादयो धर्मा उच्चारणेन शब्दं न भिन्दन्तीत्यर्थः । यत्र रूपादिगुणभेदेऽपि स एवायमित्यादिरूपेणाभेदव्यवहारस्तत्रायं न्यायः प्रयुज्यते । अर्थात् लोके हि गुणाः भेदकाः दृश्यन्ते । यथैकमुदकमिदं शीतलमुष्णमिति गुणभेदात् भिद्यते । अभेदकाश्च यथा देवदत्तो मुण्ड्यति जट्यपि शिख्यपि स्वामाख्यां न जहाति तथा बालो युवा वृद्ध इति ।

न्यायोऽयं 'वृद्धिरादैच्' इति सूत्रभाष्ये प्रयुक्तः । तत्र पूर्वं सूत्रे 'आत्' इत्यत्र तपरग्रहणस्य प्रयोजनप्रतिपादनाय 'गुणा भेदकाः' इत्युक्तम् । ततश्च प्रसङ्गात् न्यायोऽयं प्रदर्शितः । उदात्तानुदात्तस्वरितानां सवर्णानां ग्रहणार्थमिति तपरकरणं क्रियते । अन्यथा य उदात्ते कर्तव्येऽनुदात्तं करोति, खण्डितोपाध्यायस्तस्मै चपेटां ददाति–अन्यत्त्वं करोषीत्युदाहरणेन स्वरस्य भेदकत्वप्रतीतेस्तेषां ग्रहणं न स्यादित्युक्त्वा भोः अभेदका अपि गुणा दृश्यन्ते तद्यथा देवदत्तो मुण्ड्यति जट्यपि शिख्यपि स्वामाख्यां न जहाति । बालो युवा वृद्धः, वत्सो दम्यो बलीवर्द इति ।

न्यायोऽयं परिभाषेन्दुशेखरे विशेषेणोल्लिखितः । तत्र हि असति यत्ने स्वरूपेणोच्चरितो गुणो भेदको न भवतीत्यर्थः प्रतिपादितः । तेन गुणरहितस्योच्चारणाभावान्नान्तरीयकतयोच्चार्य– माणोऽपि गुणः प्रयत्नमन्तरेण विवक्षितो न भवतीत्यर्थः । अतः 'यूस्त्र्याख्यौ नदी' इत्यत्र नान्तरीयकत्वेनोच्चारितोऽपि गुणो विवक्षितो न

---

१४३. परिभाषेन्दुशेखरः, परि. – १०२ ।

१४४. अष्टा. – ६/४/७१ ।

१४५. परिभाषेन्दुशेखरः, परि. –११८ ।

भवति । तेनोदात्तादिगुणविशिष्टानां सर्वेषां नदीसंज्ञायां ग्रहणं भवति । यत्र तु प्रतिपदोक्तमुदात्तादयो गुणा उच्चार्यन्ते, तत्र तु तेषां विवक्षिततत्वात् तदतिरिक्तगुणविशिष्टानां ग्रहणं नैव भवति । अतएव 'अनुदात्तादेरञ्'[१४६] इति सूत्रे अनुदात्तपदोपादानेनोदात्तादेरञ्-प्रत्ययो न क्रियते । लोकेऽपि यदा केवलं गामानय इत्यादिश्यते तदा यस्याः कस्या अपि गोरानयनं भवति, किन्तु यदा 'कृष्णां गामानय' इत्युच्यते, तदा तदतिरिक्तवर्णविशिष्टायाः गोरानयनं नैव जायते । तदुक्तं भाष्ये – "आश्रीयमाणो गुणो भेदको भवति । तद्यथा 'शुक्लमालभेत' 'कृष्णमालभेत' । तत्र यः शुक्ल आलब्धव्ये कृष्णमालभते न हि तेन यथोक्तं कृतं भवती"ति[१४७] ।

१४६. अष्टा. – ४/२/४४

१४७. महाभाष्यम् – ६/४/७१ ।

# न्यायसिद्धा

न्यायसिद्धा परिभाषा द्विविधा

१. लोकन्यायसिद्धा

२. न्यायसिद्धा युक्तिसिद्धा वा

आदौ लोकन्यायसिद्धा परिभाषा परिभाषेन्दुशेखरतः पर्यालोच्यते ।

**व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम् । १ ।**

व्याख्यानं नाम संशयनिवर्तकज्ञानजनकवाक्यकर्मकोच्चारणम् । प्रकृतशास्त्रप्रवृत्ति–निवृत्त्युपयोगित्वेन प्रतिज्ञानविशिष्टमिति भूतिकाराः । तथा च शिष्टकृतव्याख्यानादन्यतरार्थ–रूपस्य विशेषस्य निश्चयः कार्यः, सन्देहाच्छास्त्रमननुष्ठापकम्, अर्थात् शब्दधर्मिकसाधुत्व–प्रकारकनिश्चयजनकत्वाभावान्न इति न्यायार्थः ।

अत्रायमाशयः यथा कञ्चिच्छब्दं श्रुत्वा विरुद्धार्थावगतिः प्रतिपत्तिर्वा प्रसक्ता भवति, तदानीमेवायं न्यायः प्रयुज्यते । तथा चाभियुक्तानामभिलेखः ‘अप्रतिपत्तौ अतिप्रतिपत्तौ वा व्याख्यानं कुर्वन्ति सन्तः’ इति ।

तथा चायं न्यायो बहुशो व्याकरणे व्यवह्रियमाणोऽपि नितरां लौकिकतामाहवति । दृश्यते च लोके कश्चिद् वक्ता ‘कुण्डली तिष्ठत्यत्र’ इति वाक्यमुच्चारयति तत्र कुण्डलीपदस्य अनेकार्थोपस्थापकत्वेन शिष्टत्वाद् विपरीतार्थप्रतिपादकत्वे उपस्थिते वक्ता विवक्षितार्थविषयकं विवरणं विधाय शोतृसमवेतसंशयमपाकरोति, तथैव व्याकरणशास्त्रेऽपि ‘अ इ उ ण्’ इति सूत्रेऽपि ण्काररूपोऽनुबन्धं क्रियते, ‘लण्’ सूत्रेऽपीति केनानुबन्धेनाण्प्रत्याहारो ग्राह्यः केन ‘इण्’ प्रत्याहारश्चेति सन्देहे व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षणम्’ इति न्यायमूलकेन व्याख्यानेन सन्देहो निवार्यते । तथा चात्र नागेशाचार्य आह परिभाषेन्दुशेखरे “ननु ‘लण्’ ‘अइउण्’ सूत्रयोर्ण्कारद्वयस्यैवोपादानेनाणिण्ग्रहणेषु सन्देहादनिर्णयोऽत आह – व्याख्यानतो विशेषप्रतिपत्तिर्न सन्देहादलक्षणमिति” ।

**'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते'**[५९६] **। २ ।**

यस्यागमाः यदागमाः उद्देश्यत्वं षष्ठ्यर्थः । तद्गुणीभूताः आरोपितावयवत्वविशिष्टाः तद्ग्रहणेन आगमीग्रहणेन गृह्यन्ते । अतो यमवयविनमुद्दिश्यारोपितावयवत्वेनागमो विहितः, स अवयवीभूत आगमोऽवयवबोधकशब्देन बोध्यते । तदुक्तं नागेशाचार्यैः – 'यमुद्दिश्यागमो विहितः स तद्गुणीभूतः शास्त्रेण तदवयवत्वेन बोधितः । अतस्तद्ग्रहणेन तद्ग्राहकेण तद्बोधकेन शब्देन गृह्यते बोध्यते इत्यर्थः'[५९७]। यतः ततः इति पदद्वयञ्चाध्याहार्य्यमेवं परिभाषार्थः फलति – य आगमो यमागमिनमुद्दिश्य विहितः स आगमस्तस्यागमिनो गुणीभूतः अर्थात् शास्त्रेण 'मिदचोऽन्त्यात्परः'[५९८], 'आद्यन्तौ टकितौ'[५९९] इत्यादिना तदवयवत्वेन बोधितः, यतस्तदवयवत्वेन बोधितः अतस्तद्ग्रहणेन तद्ग्राहकेण अर्थात्तद्बोधकेन शब्देन गृह्यते बोध्यते इति । अतएव दारुपां प्रकृतिमुद्दिश्य विधीयमानः पुक् दाग्रहणेन गृह्यते इति पुग्विशिष्टस्यापि 'दाप्' इत्यस्य 'दाधाघ्वदाप्' इत्यनेन घुसंज्ञा सिध्यति । प्रणिदारयतीत्यत्र रेफस्य तु दारूप प्रकृतिमुद्दिश्य विहितत्वाभावेन न तद्विशिष्टस्य घुसंज्ञा ।

यथा लोके देवदत्तस्याङ्गाधिक्येऽपि देवदत्त इति कथनेन तद्विशिष्टोऽभिहितो भवति तथा 'दा' इत्यनेन पुग्विशिष्टस्य दापो ग्रहणेन 'प्रणिदापयति' इत्यादौ घुसंज्ञा तन्मूलकं णत्वञ्च सिद्ध्यति ।

न्यायोऽयं शास्त्रेऽनित्यः – 'आने मुक्'[६००] इति सूत्रेण मुग्विधानसामर्थ्यात् । नित्यत्वे तु पचमान इत्यत्र मुग्विशिष्टस्याकारस्याकारग्रहणेन ग्रहणात् सवर्णदीर्घे 'पचानः' इति मुग्रहितस्यैव सिद्धौ तद्विघातस्य वैयर्थ्यमेव स्यात् । न्यायोऽयं दाधाघ्वदाप् (अष्टा. – १/१/२०) इति सूत्रे भाष्ये व्याख्यातः । तत्र हि प्रणिदापयतीत्यादाविव प्रणिदारयतीत्यत्रापि घुसंज्ञा प्राप्नोति, तद्वारणय समानशब्दप्रतिषेधः कर्तव्य इत्याशङ्क्य अर्थवद्ग्रहणपरिभाषया 'दारघटकदा' इत्यस्यानर्थकत्वात् प्रतिषेधं विनैव घुसंज्ञाया अभावे प्रतिषेधोऽनर्थक इति

---

१४८. परिभाषेन्दुशेखरः, परि. – १२ ।

१४९. तत्रैव ।

१५०. अष्टा. – १/१/४७ ।

१५१. तत्रैव – १/१/४६ ।

१५२. तत्रैव – ७/२/८२ ।

समाहितः । ततश्च 'दाप्घटकदा' इत्यस्याप्यनर्थकत्वात् घुसंज्ञाया अप्राप्तिः स्यादित्याशङ्क्य प्रकृतन्यायेन वारितम् ।

तथा च तत्रत्यं भाष्यं – "यद्येवम्, इहापि तर्हि न प्राप्नोति प्रणिदापयति, प्रणिदारयतीति । अत्रापि नेतौ दाधावर्थवन्तौ,नाप्येतौ दाधौ इति प्रति क्रियायोगः । न वार्थवतो ह्यागमस्तद्– गुणीभूतस्तद्ग्रहणेन गृह्यते, यथाऽन्यत्र । न वा एष दोषः । किं कारणम्? अर्थवत आगमस्तद्गुणीभूतोऽर्थवद्ग्रहणेन गृह्यते"[६०१] इति ।

अत्र कैयटेनालिखितम्[६०२] – "लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचयौ व्यपदेशहानिं न कुरुतः । यथा देवदत्तस्याङ्गाधिक्याङ्गच्छेदौ । इहाप्यन्तरङ्गत्वात् कृतायां दाधोर्घुसंज्ञायां पश्चादुपपन्नः पुगागमो घुव्यपदेशं न निवर्तयति" इति ।

पुरुदोत्तमदेवेनाकलितम् – "अवयवस्यावयविग्रहणेन ग्रहणमिति यद्यपि न्यायसिद्ध एवायमर्थस्तथाप्यत्र 'न क्त्वासेडि'ति (अष्टा. – १/२/१८) कित्त्वप्रतिषेधं ज्ञापकमाहुः । यदि हीट् क्त्वाग्रहणेन गृह्यते तदा इटा व्यवधनादेव 'क्ङिति च' (अष्टा. १/१/५) इति गुणप्रतिषेधो नास्तीति किं प्रतिषेधेन । अपरे तु क्ङितीति निमित्तमप्तमीत्वात् ज्ञापकमिदं दुर्लभं मन्यमाना न्यायसिद्धत्वमेवास्याश्रयन्ति"[६०३] इति ।

**'गौणमुख्ययोमुख्ये कार्यसम्प्रत्ययः' । ३ ।**

शब्दानां द्विविधोऽर्थः – मुख्यो गौणश्च । तत्र मुखमिव प्रधानत्वात् मुख्यः । अर्थान्तरप्रतीतिनिरपेक्षता प्रतीयमानत्वात् मुख्य इत्यर्थः । शब्दश्रुतिमात्रेण प्रतीयमानोऽर्थात्मा मुख्यः। गुणादागतो गौणः । गुणशब्दात् "तत आगतः[६०४] इत्यण् प्रत्ययः । आङ्पूर्वकस्य गम्धातोरिह ज्ञानमित्यर्थः । तेन गुणयोगात् सोऽर्थः ज्ञायते स गौणार्थः । यथा 'गौः जल्पति' इत्यादौ जाड्यमान्द्यादिगुणयोगादिह प्रतीयमानो वाहीकार्थो गोशब्दस्य गौणर्थः । अभिधया प्रतीयमानोऽर्थो मुख्यः, लक्षणया च प्रतीयमानो गौणः । प्रयत्नोपपादितस्तु गौणः । गौणार्थे प्रयुज्यमानः शब्दो मुख्यार्थारोपेण प्रवर्तते । तेन 'सिंहो माणवकः इत्यत्रारोपितसिंहत्ववान् माणवक इत्येवार्थः प्रतीयते । तत्र शास्त्रीये कार्ये कर्तव्ये

१५३. महाभाष्यम् – १/१/२० ।
१५४. महाभाष्यप्रदीपटीका – १/१/२० ।
१५५. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि.– १८ ।
१५६. अष्टा. ४/३/७४ ।

गौणार्थवाचकमुख्यार्थवाचकशब्दयोर्मध्ये मुख्यार्थवाचकस्यैव ग्रहणम् । अतएव अगौः गौः सम्पद्यते 'गोऽभवत्' इत्यत्र गोशब्दस्यारोपितगोत्ववान् इत्येवं विधगौणार्थवाचकत्वेन 'ओत्'[६०५] इति सूत्रेण न प्रगृह्यसंज्ञा ।

न्यायोऽयम् 'ओत्' इति सूत्र भाष्ये व्याख्यातः । तत्र हि पूर्वं हि 'अदोऽभवत्' इत्यत्र प्रगृह्यसंज्ञाया आपत्तिरुत्पदिता, 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमि'ति न्यायेन समाहिता च । ततश्च 'गोऽभवत्' इत्यत्र गोशब्दस्यापि प्रतिपदोक्तत्वेन प्रगृह्यत्वापत्तिरुत्पादिता, प्रकृतन्यायेन समाहिता च । तथा च तत्रत्यं भाष्यं – "'गौर्वाहीकः' गां पाठयेत्यादौ गौणमुख्यन्यायप्रवृत्त्या णित्वप्रयुक्तवृद्धेरात्त्वस्य चाभावमाशङ्क्य" अर्थाश्रये एतदेवं भवति शब्दाश्रये तु वृद्ध्यात्वे इति समाधानं कृतम् । एवं हि अगौः गौः सम्पद्यते 'गोऽभवत्' अत्र प्राप्नोति । एवं तर्हि 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः' इति । तद्यथा गौरनुबन्ध्योऽग्नीसोमीय इति न वाहीकोऽनुबध्यते"[६०६] इति । लोकेऽप्ययं न्यायः प्रवर्तते – अतएव गामानय इति केनचिदुक्ते न हि तत्र वाहीक आनीयते, नापि सिंह इत्युक्ते माणवक आनीयते, अपि तु गौरेव, सिंह एवानीयते ।

परिभाषावृत्तौ व्याख्यातम् – "तद्यथा आग्नेय इति अग्नेर्ढक (अष्टा. – ४/२/३३) इति । अत्राग्निशब्दादग्न्यर्थात् ढक्, न पुनरग्निर्माणवक इत्यादावुपचरितार्थवृत्तेर्गौणात् इति । न्यायमूला चेयं परिभाषा । तदुक्तं लौकिक एवायं न्यायः लोके हि गौरनुबध्यतामिति न वाहीके भवति कार्यसम्प्रत्ययः । लक्ष्यवशात् क्वचिद्गौणोऽप्यर्थः शास्त्रे स्वीक्रियते । यथा 'शीतोष्णाभ्यां कारिणि' (अष्टा. – ५/२/७२) इति कन्विधौ शीतकोऽलसः उष्णको दक्षः"[६०७] इति ।

## 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'[६०८] ॥ ४ ॥

कस्मिन् योगे एकस्मिन् कार्ये निर्दिष्टानां विनियुक्तानां सहैव प्रवृत्तिनिवृत्तिर्वा जायते । अत्र वा शब्द एवकारार्थकः । अर्थात् एकवाक्यनिर्दिष्टानां पदानां प्रवृत्तिर्वा निवृत्तिर्वा एकदैव स्यात् न त्वेकस्य प्रवृत्तिरन्यस्य निवृत्तिरिति ।

---

१५७. अष्टा. – १/१/१५ ।
१५८. महाभाष्यम् – १/१/१५ ।
१५९. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ५ ।
१६०. परिभाषेन्दुशेखरः, परि. – १८ ।

यथा लोके – एकं विषयमवलम्ब्य एकस्यां कक्षायामेकस्मिन्नेव विद्यालयेऽधीयानां सहाध्यायिनां सहैव विद्यालयेऽध्ययने प्रवृत्तिः । अवकाशरूपा निवृत्तिरपि जायते, तथैव शास्त्रेऽपि एकस्मात् सूत्रात् परस्परमन्वितार्थकपदानामेकस्मिन् सूत्रे सहैव अनुवृत्त्यननुवृत्तिरूपे प्रवृत्तिनिवृत्ती दृश्येते । 'उश्च'[६०९] इत्यत्र सूत्रे 'लिङ्सिचावात्मनेपदेषु'[६१०] इत्यतः अतिसन्निहितत्वादात्मनेपदे– ष्वित्यस्यानुवृत्तिः स्यान्न एकयोगनिर्दिष्टानामिति न्यायेन कित्त्वेऽन्वितानां लिङ्सिजात्मनेपदानां सहैवानुवृत्तिर्भवति । परस्परान्वितार्थकपदानां सहैवानुवृत्तिनिवृत्ती इति परिभाषार्थः । लोके एककार्यनियुक्ताः कर्मचारिणः यथा सहैव कार्ये प्रवर्तन्ते निवर्तन्ते च तथैव शास्त्रेऽपीति युक्तिरस्यां परिभाषायां मूलमेवं नागेशाचार्येणालोचितम् । अतः लोकसिद्धा परिभाषेयम् ।

**'व्यपिदेशिवदेकस्मिन्'**[६११] ॥ ५ ॥

मुख्यव्यवहारनिमित्तसत्तायां यथा व्यपदेशः – मुख्यव्यवहारो भवति । तथैव मुख्यव्यवहारनिमित्ताभाववत्येकस्मिन् असहायेऽपि मुख्यव्यवहार इति न्यायार्थः ।

यथा लोके त्रिपुत्रो जनोऽयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनिष्ठ इति व्यवहरति, तथैव एकपुत्रोऽपि अयमेव ज्येष्ठः, मध्यमः, कनिष्ठश्चेति व्यवहरति । अतो लोकव्यवहारसिद्धोऽयं न्यायः । एवमेव शास्त्रेऽपि 'अत इञ्'[६१२] इति सूत्रेण यथा दक्षरूपान्तात् प्रातिपदिकात् इञ्प्रत्यतो विधीयते, तथैव केवलाद् अशब्दादपि । न्यायोऽयं महाभाष्ये बहुशः प्रयुक्तः । यथा पस्पशाह्निके व्याकरणपदार्थनिर्वचनावसरे य एव व्याकरणपदार्थः स एव सूत्रपदार्थ इत्युभयोरप्यैक्याद् व्याकरणस्य सूत्रमिति विग्रहे षष्ठ्यर्थस्यानुपपत्तिराशङ्किता, प्रकृतन्यायेन सा अनुपपत्तिर्वारिता च । तथा च तत्रत्यं भाष्यम् – "अथवा पुनरस्तु सूत्रम् । ननु चोक्तम् – सूत्रे व्याकरणे षष्ठ्यर्थोऽनुपपन्न इति । नैष दोषः व्यपदेशिवद्भावेन भविष्यति"[६१३] इति ।

---

१६१. अष्टा. – १/२/१२ ।

१६२. तत्रैव – १/२/११

१६३. परिभाषेन्दुशेखरः, परि. – ३२ ।

१६४. अष्टा. – ४/१/९५

१६५. महाभाष्येव्याकरणपदार्थनिर्वचनावसरे इयमुक्तिः ।

अत्रेदं तत्त्वम् – यथा 'राहोः शिरः' इत्यत्र य एव राहुपदार्थः स एव शिरपदार्थ इत्युभयोरप्यैक्यात् षष्ठ्यर्थस्यानुपपत्तौ सत्यामनेकावस्थायुक्तं शिरो राहुपदार्थः, एकावस्थायुक्तञ्च शिरः शिरपदार्थ इत्यारोपितभेदमादाय षष्ठ्यर्थोपपत्तिस्तथैव व्याकरणस्य सूत्रमित्यत्राप्यनेकावस्था– युक्तस्य व्याकरणस्य व्याकृतिक्रियाकरणावस्थापन्नावयवः, एवम्भूतस्यावयवस्यायं सूत्रसमुदाय इत्यर्थे षष्ठ्यर्थोपपत्तिः । अत एव केवलेऽप्यकारे दन्तत्वव्यवहारः । तदुक्तं नागेशभट्टेन परिभाषेन्दुशेखरे[६१४] – "तस्मादेकस्मिन् तत्तद्धर्मारोपेण युगपद्यथा जेष्ठ्यत्वादिव्यवहारो यथा च शिलापुत्रकस्य शरीरमित्यादावेकस्मिन् आरोपितानेकावस्थाभिः समुदायरूपत्वाद्यारोपेणैतस्य शरीरमित्यादिव्यवहारस्तथात्रैकाच्त्वादि व्यवहारोपपत्तिरिति लोकन्यायसिद्धेयम्" इति ।

यथा लोके नैकेषु पुत्रेषु मत्सु नैकस्मिन्नेव जेष्ठ्यत्वादिव्यवहारो भवति, तथैव शास्त्रेऽपि अनेकवर्णघटितपदावयवे वर्णे नादित्वादिव्यवहारः । अतएव सभासन्नयनशब्दघटकीभूतस्या– कारस्यादित्वाभावाद् 'वृद्धाच्छः'[६१५] इत्यनेन छप्रत्ययो न भवति ।

'आद्यन्तवदेकस्मिन्' (पा. १/१/२१) इति सूत्रस्थभाष्ये न्यायोऽयं बहुशः चर्चितः । तत्र हि वार्तिककारेण पूर्वं सत्यन्यस्मिन् यस्मात् पूर्वं नास्ति परमस्ति स आदिः, अथ च सत्यन्यस्मिन् यस्मात् परं नास्ति पूर्वमस्ति सोऽन्त इति, आद्यन्तयोर्लक्षणमुक्त्वा एकस्मिन्नाद्यन्तोपदिष्टानि कार्याणि न सिद्ध्यन्तीति तदर्थं सूत्रस्यावश्यकत्वं प्रदर्श्य सामान्यरूपेण सर्वकार्यसिद्ध्यर्थं तत्स्थाने 'व्यपदेशिवदेकस्मिन्' इत्येव वक्तव्यमित्युक्तम् । ततश्चाद्यन्तयोः यस्मात् पूर्वं नास्ति स आदिः, यस्मादुत्तरं नास्ति स अन्त इति लक्षणं विधायासहायेऽपि दोषाभावं संसाध्य सूत्रम्, 'व्यपदेशिवदेकस्मिन्' इति वचनं चोभयमपि प्रत्याख्यातम् ।

भाष्यकारमते तूभयमप्यावश्यकम् अत एवोक्तम् – "गोनर्दीयस्त्वाह – सत्यमेतत्, सति त्वन्यस्मिन्निति" । भाष्यकर्तुरयमभिप्रायः – यद्यपि लोके यथा एकस्मिन्नपि मुख्यवदाद्यन्तवद्वा व्यवहारो भवतीति, तथैव शास्त्रेऽपि भवितुमर्हति, तथापि गौणमुख्यन्यायेन मुख्ये एव कार्यं न तु गौणे इति यदा भ्रान्तिस्तदा वचनमावश्यकम् । अपि च लोके 'अयमादिः' अयमन्तः इत्युक्ते अवशिष्टमपि किञ्चिदस्तीति नियमेन प्रतीतेः, उभयोर्लक्षणेन

---

१६६. परिभाषेन्दुशेखरः, परि. – ३१ ।

१६७. अष्टा. – ४/२/११४ ।

सत्यन्यस्मिनित्यंशोऽवश्यं देयः । दन्ते च तस्मिन्नसहायेऽपि वचनमावश्यकम् । अथ च यदि वचनं क्रियते, तदेव धुग् इत्यत्र भष्भावसिद्धिः । अथवा गर्दभयतेः क्विपि णिलोपे च कृते ‘गर्धप्’ इत्यादौ भष्भावार्थम् ‘एकाचो बशो भष्’[६१६] इति सूत्रे वैयाधिकरण्यस्यावश्यकत्वेन ‘धुग्’ इत्यत्र भष्भावो न स्यात् । यतो हि ‘दुघ्’ इति समुदायस्य यः पूर्वावयवो ‘दु’ इत्येकाच् तस्य झषन्तत्वाभावात्, उघ् इत्युत्तरावयवे तु बशो भावात् । व्यपदेशिवद् वचनस्वीकारे तु धातोरपि धात्ववयवत्वान्न कश्चिद्दोषः ।

**‘एकदेशविकृतमनन्यवत्’[६१७]। ६ ।**

एकदेशो विकृतो यस्मिन्, तदेकदेशविकृतम्, स्वावयवविकारघटितम् अनन्यवत् अन्यसादृश्याभाववत् स्ववद्भवति इति परिभाषार्थः ।

लोके यथा यस्य शुनः पुच्छं छिन्नं सोऽपि श्वेत्युच्यते छिन्नत्वात् पुच्छस्य स कुक्कुर एकदेशेन पुच्छदेशेन विकृतोऽपि अन्यपशुवत् गर्दभादिवन्न मन्यते, तथैव शास्त्रेऽपि एकदेश विकारयुक्तोऽपि शब्दः स्वभिन्नो न भवति । अतएव कृप्धातोः क्तप्रत्यये ‘कृपो रो ल’[६१८] इत्यनेन ऋकारघटकरेफभागस्य लत्वे कृतेऽपि प्रकृतन्यायबलेन ऋकारबुद्धौ सत्याम् अजुद्देश्यकानि कार्याणि साधितानि ।

न्यायोऽयं ‘ऋलृक्’[६१९] ति सूत्रभाष्ये पठितः । तत्र हि लृकारावयवस्य रेफस्य लत्वेन लृकारोपदेशस्यान्यथात्वं प्रतिपाद्यते, तदा तस्य रेफस्य सिद्धत्वात् तस्मिन्नजुद्देश्यकानि प्लुतादीनि कार्याणि न भविष्यन्तीत्याशङ्कितम् । ततश्च रेफस्य सिद्धत्वेऽपि प्रकृतन्यायेनाच्त्वात्तदुद्देश्यककार्याणां सिद्धिः प्रदर्शिता । तथा च भाष्ये भाषितम्[६२०] – ‘एकदेशविकृतमनन्यवद्भवति, इति प्लुतादयोऽपि भविष्यन्ति’ इति ।

अत्रायमभिप्रायः – यथा लोके पुच्छरूपावयवापगमेऽपि शिष्टावयवसन्निवेशेन श्वत्वजातेरपि व्यक्तिर्भवत्येव, तथैव ऋकारघटकरेफस्य विकारेऽपि ऋत्वबुद्धिः स्यादेव । लोकसिद्धायाः तस्याः शास्त्रे समुपादानं शास्त्रीयं प्रमाणमपेक्षते । ‘प्राग्दीव्यतोऽण्’ इति

---

१६८. अष्टा. – ८/२/३७ ।

१६९. परिभाषेन्दुशेखरः, परि. – ३८ ।

१७०. अष्टा. – ८/२/१८ ।

१७१. प्रत्याहारसूत्रम् – २ ।

१७२. ‘ऋळक्’ इति सूत्रभाष्यम् ।

सूत्रे निर्दिष्टं दीव्यत इति 'तेन दीव्यति खनति जयति जितम्'[६२१] इत्यत्रत्यदीव्यतीत्यस्यानुकरणमिति भाष्ये प्रोक्तं तच्च न संगच्छते परिभाषास्वीकारं विना, 'अनुकरणेनानुकार्यसमानापूर्वीकेण भवितव्यमिति' नियमाद्दीव्यत इति दीव्यतिशब्दानुकरणं न भवितुमर्हति । एकदेशविकृतमिति परिभाषास्वीकृते दीव्यदित्येकदेशविकृतं शब्दस्वरूपं न दीव्यतितो भिन्नवदिति बोधनात् न दोषः ।

अत्रेदं भाव्यम् – विकृतावयवनिबन्धकार्ये त्वयं न्यायो न प्रवर्तते । लोकेऽपि छिन्नपुच्छे शुनि पुच्छवत्त्वव्यवहारस्य दुरुपदानत्वात् । एवमेव परिच्छिन्नपरिमाणेऽप्ययं न प्रवर्तते । तेन संख्यात्वव्याप्यधर्मानयने वैतदप्रवृत्तिः । एवमेव अर्धविकारेऽर्धाधिकविकारे वाऽयं न्यायो न प्रवर्तते । जातिव्यक्तिव्यञ्जकभूयोऽवयवदर्शनाभावेन तत्त्वाप्रतीतिरिति शिवम् ।

'असिद्धं बहिरङ्गमन्तरङ्गे' इति लोकन्यायसिद्धा तथैव ज्ञापकसिद्धा । तस्मात् ज्ञापकसिद्धापरिभाषापर्यालोचनावसरे उपन्यस्ता ।

## 'सूत्रे लिङ्गवचनमतन्त्रम्'[६२२] । ७ ।

सूत्रे निर्दिष्टं लिङ्गवचनमविवक्षितमस्तीति परिभाषार्थः । अर्थात् प्रवक्ता पाणिनिः येन लिङ्गेन येन वा वचनेन किमपि सूत्रं व्यरचयत्तल्लिङ्गवचनविषय एव तत्सूत्रं प्रवर्ततामिति न तस्य तात्पर्यमिति भावः । लिङ्गवचनयोरतन्त्रत्वात् पुंलिङ्गस्त्रीलिङ्गयोः द्विवचनबहुवचनयोः च सूत्रप्रवृत्तौ बाधाभावः ।

लोके यथा केवलं धान्यार्थिना जनेन पलालं विना धान्यादानेच्छापूर्तेरभावात् पलालमप्यादीयते, तथैव लिङ्गविशेषसंख्याविशेषबोधतात्पर्यरहितेनापि पाणिनिप्रभृत्याचार्येण लिङ्गसंख्ये विना शब्देन प्रातिपदिकार्थमात्रबोधस्यासम्भवतया तयोरुपादानं कृतमिति भावः ।

'तस्यापत्यम्'[६२३] इति सूत्रे अपत्यमिति एकवचनेन नपुंसकेन च निर्देशः, तस्येत्यपि एकवचनेन निर्देशोऽस्ति अतः गर्गस्यापत्यं पुमान् गार्ग्य इति पुमर्थे यञ्प्रत्ययो दुर्लभः, एवं गर्गयोरपत्ये पुमांसौ गार्ग्यावित्यत्रापि 'गर्गादिभ्यो यञ्' (अष्टा. – ४/१/१०५)

---

१७३. अष्टा. – ४/४/२ ।

१७४. परिभाषेन्दुशेखरः, परि. – ७४ ।

१७५. अष्टा. – ४/१/९२ ।

इति द्वित्वविशेष्टे पुमर्थे च यञ्प्रत्ययो दुर्लभ इति चेन्न, सूत्रे लिङ्गवचनमतन्त्रमिति न्यायेन गाग्यः, गार्गी, गाग्यौं गाग्र्या इत्यादयः सिद्ध्यन्ति ।

अत्र ज्ञापकम् 'अर्धं नपुंसकम्'[६२४] इति सूत्रस्थं नपुंसकग्रहणम् । यदीयं परिभाषा न स्यात्तदा अर्धमित्यत्र कृतस्य नपुंसकेन निर्देशस्य बलादेव नपुंसकेनार्धशब्देन समांशवाचिनैव समासः स्यात्तेन अर्धपिप्पलीत्यत्र समासः, ग्रामार्ध इत्यादौ पुंलिङ्गेनार्धशब्देन समासविधानार्थकृतं कृतं नपुंसकग्रहणं व्यर्थं सत् परिभाषां ज्ञापयति । परिभाषायां ज्ञापितायां तु अर्धमिति लिङ्गस्याविवक्षिततत्वेन पुंलिङ्गार्धशब्देनापि समासः प्राप्नोति तद्वारणाय नपुंसग्रहणं स्वांशे चरितार्थम् ।

परिभाषावृत्तौ पुरुषोत्तमदेवेन सुष्टूक्तम् – "औचित्यादेवैतदुच्यते । सूत्रं हि लक्ष्यपराधीनं सूचकमात्रं वस्तुसंज्ञावत् उपलक्षणमित्युच्यते । न चावश्यं लक्षणे लक्ष्यं प्रवर्तते । तस्य लक्ष्यपरत्वाल्लिङ्गलक्षणं वचनलक्षणं च सूत्रेष्वकिञ्चित्करं न प्रवर्तते । ततो येन केनचिल्लिङ्गेन येन केनचिद् वचनेन च निर्देशः कर्तव्यः, न तस्य तन्त्रता अवसेया । यथा 'बन्धुनि बहुव्रीहाविति' नपुंसकलिङ्गेन निर्देशोऽतन्त्रः 'ग्रीवाभ्योऽण् चे'ति बहुवचननिर्देशोऽतन्त्रः"[६२५] इति ।

## 'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः । ८ ।

नञ्युक्तमिवयुक्तं च यत्किञ्चिद्दृश्यते तत्र तस्मात् भिन्ने तत्सदृशेऽधिकरणे कार्यं विज्ञायते यतः तथार्थगतिः तथार्थस्य गतिरवगतिर्बोधो जायते लोके ।

यथा लोक नञ्युक्तादब्राह्मणादिशब्दात् ब्राह्मणभिन्नब्राह्मणसदृशमानवार्थस्य प्रतीतिर्भवति तथैव शास्त्रेऽच्वेरित्यादावपि च्यन्तभिन्नच्व्यन्तसदृशार्थबोधादभूततद्भाव इत्यर्थलाभात् अभूततद्भावे एव क्यङ्प्रत्ययो विधीयते । अतः अभृशो भृशो भवतीत्यादौ क्यङ्प्रत्ययो जायते ।

'औषधेश्च विभक्तावप्रथमायाम्' (अष्टा.–६/३/१३२) इत्यादौ विभक्तिग्रहणं ह्येतन्न्यायसिद्धार्थानुवाद एव । एतेन विभक्तावित्याद्यस्यानित्यत्वे ज्ञापकमिति वदन्तः परास्ताः।

---

१७६. अष्टा. – २/२/२ ।

१७७.पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ११७ ।

अनित्यत्वे भाष्यसम्मतफलाभावात् । अतएव 'कर्तरि च' इति कारकग्रहणं भाष्ये प्रत्याख्यातमिति बोध्यम्" इति । एवं नागेशाचार्येण लोकन्यायोऽयं प्रतिपादितः ।

'भृशादिभ्यः' (अष्टा. ३/१/१२) इति सूत्रे भाष्ये भाषितं भाष्यकारेण "ननु चोक्तमिह कस्मान्न भवति क्व दिवा भृशा भवन्तीति । नञिवयुक्तमन्यसदृशाधिकरणे यथा ह्यर्थगतिः । नञ्युक्तमिवयुक्तं वा यत्किञ्चिदिह दृश्यते तत्रान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते। तथा ह्यर्थो गम्यते" इति ।

परिभाषावृत्तौ तु नित्यानित्या चेति प्रतिपादिता – "प्रायिकत्वं चास्याः 'अकर्तरि च कारके' (अष्टा. ३/३/१९) इति निर्देशेन ज्ञापितम् । नित्ये ह्येतस्मिन् नञ्युक्तकर्तृसादृश्यादेव कारकप्रतीतिः स्यात् । प्रायिकत्वेन चास्य प्रसज्यप्रतिषेधो नञर्थोऽस्तीति अपुनरुक्तमपुनर्गेयमित्यादीनां सिद्धिः । अनित्यत्वमस्याः 'औषधेश्च विभक्तावप्रथमायाम्' (अष्टा. ६/३/१३२) इत्यत्र विभक्तिग्रहणाद्विज्ञायते । यदि हि सा नित्या स्यात् प्रथमायाः प्रतिषेधादन्यत्र विभक्तावेव भविष्यतीति विभक्तिग्रहणं न कुर्यात्। कृतञ्च तज्ज्ञापयति अनित्यैषा परिभाषेति" इति ।

## 'साम्प्रतिकाभावे भूतपूर्वगतिः'[१७८] । ९ ।

वर्तमानस्याभावे भूतपूर्वस्याश्रयणं भवति इति परिभाषार्थः । 'अञ्चु गतिपूजनयोः' इति भ्वादिगणीयो धातुरुगितः । एवञ्च 'उगिदचां सर्वनामस्थानेऽधातोः'[१७९] इति सूत्रेऽधातुग्रहणाभावे 'प्राङ्', 'प्राञ्चौ' इत्यादावुगित्त्वादेव नुम्सिद्धौ अञ्चतेर्ग्रहणेन धातोश्चेदुगित्कार्यं तर्हि अञ्चतेरेवेति नियमादेव स्रत्, ध्वद् इत्यादौ नुमोऽभावे सिद्धेऽधातुग्रहणं व्यर्थमिति चेन्न, 'साम्प्रतिकाभावे भूतपूर्वगतिः' इति स्वीकारान्न दोषः । न चाञ्चतिग्रहणम् 'यद्यञ्चतेरुगित्कार्यं क्रियते तर्हि नलोपिनोऽञ्चतेरेवेति' विशेषापेक्षनियमं विधाय चरितार्थम् । एवञ्च वृक्षैरित्यत्र 'बहुवचने झल्येत्'[१८०] इति एत्वे कृते "अतो भिस ऐस्"[१८१] इत्युच्यते । यदुक्तं एत्वे कृते भौतपूर्व्यादेस्तु नित्यस्तथा सतीति । तथा

---

१७८. परिभाषेन्दुशेखरः, परि. – ७७ ।

१७९. अष्टा. – ७/१/७० ।

१८०. तत्रैव – ७/३/१०३ ।

१८१. तत्रैव – ७/१/९ ।

पञ्चभिस्त्रपुभिः क्रीतेन पञ्चत्रपुणा इत्यादौ 'इगन्तकालकपालभगालशरावेषु द्विगौ'[६३०] इति इगन्ते उत्तरपदे पूर्वपदप्रकृतिस्वरो नुमि कृतेऽनिगन्तत्व्येऽपि भूतपूर्वगत्या भवति ।

लोकेऽपि साम्प्रतिकाभावे भूतपूर्वस्याश्रयणं भवति । तद्यथा कस्या अपि संस्थाया उद्घाटनादिकार्याय यदा वर्तमानो मन्त्र्यादिर्नोपलभ्यते तदा भूतपूर्वो मन्त्र्यादिस्तदर्थं प्रार्थ्यते इति । इत्थं लौकिकन्यायसिद्धेयम् उगिदचामिति सूत्रस्थाधातुग्रहणसामर्थ्यादिह शास्त्रे आश्रीयते । लोके यथा काकोड्डयनेऽपि काकवन्तो देवदत्तस्य गृहा इत्यत्र भूतपूर्वगतिराश्रियते यथा वा वटवृक्षे नष्टेऽपि वटग्रामेति नाम्नः सार्थक्यं भूतपूर्वगत्या साध्यते तथा शास्त्रे तत्त्वाभावे भूतपूर्वगत्या तद्व्यवहारः साध्यः । एतत्सर्वं 'नामि'[६३१] इति सूत्रभाष्ये पठितः ।

**'बहुव्रीहौ तद्गुणसंविज्ञानमपि'[६३२] । १० ।**

गुणो विशेषणमुपलक्षणम् च चित्रगुत्वादिः । स गुणो यस्यासौ तद्गुणः । बहुव्रीहौ समासे तद्गुणस्य विशेषणसहितस्यार्थस्य संविज्ञानं संप्रत्ययः कार्यः । ते 'सर्वादीनि सवनामानि' इत्यत्र सर्वशब्दस्यापि सर्वनामसंज्ञा सिद्ध्यति । 'तसौ मत्वर्थे'[६३३] इति उपलक्षणभूते मतुप्यपि भसंज्ञा भवति । संविज्ञानशब्दार्थ उक्तो नागेशेन – 'तेषां गुणानामवयवपदार्थानां संविज्ञानं विशेष्यान्वयित्वमिति तदर्थः । यत्र समवायसम्बन्धेन सम्बन्ध्यन्यपदार्थस्तत्र प्रायस्तद्गुणसंविज्ञानम्'[६३४] इति । अस्यायमभिप्रायः – नित्यसम्बन्धः समवायः । अयुतसिद्धयोर्यो सम्बन्धः स समवायः । ययोर्द्वयोर्मध्ये एकमविनश्यद–पराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः विशेषनित्यद्रव्ययोश्च यः सम्बन्धः सः समवायः । एतादृशेन समवायसम्बन्धेन सम्बन्धीतरपदार्थः यत्र भवति तत्र प्रायेण तद्गुणसंविज्ञानबहुव्रीहिः भवति । यथा 'लम्बकर्णं पुरुषमानय' इत्यत्र कर्णपुरुषयोः अवयवावयवितया समवायसम्बन्धेन सम्बन्ध्यन्यपदार्थो वर्तते । मूले 'अपि' इत्यनेने अतद्गुणसंविज्ञानमपि क्वचिद्बोध्यव्यम् ।

---

१८२. अष्टा. – ६/२/२९ ।

१८३. तत्रैव – ६/४/३ ।

१८४. परिभाषेन्दुशेखरः, परि. – ७८ ।

१८५. अष्टा. – १/४/१९

१८६. परिभाषेन्दुशेखरः, परि. – ७८ ।

'एकाचो द्वे प्रथमस्य'[६३५] सूत्रस्य भाष्येऽपि दृश्यते तत्र बहुव्रीहिनिर्देशे अकच्कस्य द्विर्वचनमन्यपदार्थत्वात् । तत्र बहुव्रीहिनिर्देशेऽनच्कस्य द्विर्वचनं प्राप्नोति । आटतुः आटुः किं कारकम्? अन्यपदार्थत्वाद्बहुव्रीहेः । अन्यपदार्थबहुव्रीहिर्वर्तते, तेन यदन्यदचस्तस्य द्विर्वचनं स्यात् । तद्यथा चित्रगुरानीयतामित्युक्ते यस्य ता गावः सन्ति, स आनीयते न गावः इत्याशङ्क्य समाहितम् – "सिद्धं तु तद्गुणसंविज्ञानात्' पाणिनेर्यथा लोके सिद्धमेतत्– कथम्? तद्गुणसंविज्ञानाद्भगवतः पाणिनेराचार्यस्य यथा लोके तद्यथा लोके । शुक्लवाससमानय, लोहितोष्णीषा ऋत्विजः प्रचरन्ति इति तद्गुण आनीयते, तद्गुणाश्च प्रचरन्ति"[६३६] इति

## 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य'[६३७] । ११ ।

सन्निपातः सम्बन्धः, लक्षणम्–निमित्तं यस्मिन् विधावसौ सन्निपातलक्षणो विधिः । अतो यादृशं सम्बन्धमुद्दिश्य यो विधिः कुत्रचित् प्रवर्तते स एव विधिस्तादृशस्य सम्बन्धस्य विनाशे निमित्तं न भवति । तदुक्तं नागेशेन – 'सन्निपातो द्वयोः सम्बन्धस्तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्यानिमित्तमि'ति ।

लोकेऽयं न्याय 'उपजीव्यविरोधोऽयुक्त' इति नाम्ना प्रसिद्धः । उपजीवयतीति उपजीव्यः, तस्य विरोधः विनाशकव्यापारस्तस्य अयुक्तत्वम्, उपजीविता उपजीवयतुः विनाशं न कुर्यात्, पितुरुत्पन्नः पुत्रः पितरं न हन्यादिति न्याय एवास्या मूलम् । अथवा उपजीवयितुं योग्यः उपजीव्यः कर्मण्येव यत् । उपजीव्यः पुत्र उपजीवकः पिता । जन्यो जनकस्य, पाल्यः पालकस्य हननं न कुर्यादिति भावः । अर्थात् पित्रोः जन्यजनकभाव–रूपसम्बन्धेन जायमानः उपकार्योपकारकभावरूपसम्बन्धेन प्रवर्धमानश्च पुत्रः तयोः सम्बन्धयोः विघाते निमित्तत्वं नासादयति, तथैव शास्त्रेऽपि 'शतानि', सहस्राणि' इत्यादौ 'नपुंसकस्य झलचः'[६३८] इति सूत्रेण विभक्तिनिमित्तको जायमानो 'नुम्' नान्तोद्देश्यकषट्संज्ञामाध्यमेन विभक्तेः लुकि निमित्तं नादधाति ।

---

१८७. अष्टा. – ६/१/१ ।
१८८. परिभाषेन्दुशेखरः, परि. – १५ ।
१८९. तत्रैव – ८६ ।
१९०. अष्टा. – ७/१/७२ ।

न्यायोऽयं 'कृन्मे जन्तः'[६३९] इति सूत्रभाष्ये उद्धृतः । तत्रायमवसरः – 'आधये' चिकीर्षवे, इत्यादावेजन्तत्वनिमित्तका प्रकृतसूत्रेणाव्ययसंज्ञा स्यादिति तद्वारणाय 'कृन्मेजन्तश्चानिकारोकारप्रकृतिः' इति वार्तिकम्, अन्यप्रकृतिरिति वा वार्तिकं कर्तव्यमित्याशङ्क्य 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इति न्यायेनोक्तसंज्ञायाः वारणं कृत्वा उभयोरपि वार्तिकयोरनावश्यकत्वं प्रदर्शितम् । तथा च तत्रत्यं भाष्यम् – "कृन्मेजन्तश्चानिकारोकारप्रकृतिरिति वक्तव्यम् । इह मा भूत् – आधये, आधेः, चिकीर्षवे चिकीर्षोरिति। 'अनन्यप्रकृतिरिति वा' अथवा अन्यप्रकृतिः कृदव्ययसंज्ञा भवतीति वक्तव्यम् । किं पुनरत्र ज्यायः? इदमपि सिद्धं भवति कुम्भकारेभ्यो नगरकारेभ्य इति । तत्तर्हि वक्तव्यम्? न वा सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न वा वक्तव्यम् । किं कारणम्? सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य इति । एषा परिभाषा कर्तव्या"[६४०] इति ।

नागेशेन यद्यप्यत्र ज्ञापकत्वं न दर्शितं तथापि ज्ञापकजिज्ञासायां 'न तिसृचतसृ'[६४१] इति सूत्रमस्याः परिभाषायाः ज्ञापकमिति कैश्चिन्मतम् ।

इयं परिभाषा अव्यापिका । तदुक्तं परिभाषावृत्तौ – 'ङीपा तु व्यवधानान्नामी'ति दीर्घाप्राप्ते ङीपश्च दीर्घादीर्घाभ्यामविशेषात् तत्प्रतिषेधवचनमनर्थकं स्यात् अव्यापिका चेयं परिभाषा । यदि हि नित्या स्यात्तदा दाक्षिः, प्लाक्षिरित्यत्राकारसन्निपातलक्षणः 'अत इञ्' इत्ययं लोपस्य निमित्तं न स्यात्"[६४२] इति ।

'सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपाय' इति परिभाषा ज्ञापकसिद्धा अपि च लोकन्यायसिद्धा । ज्ञापकसिद्धायामियं पर्यालोचिता ।

## 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' । १२ ।

कस्मिंशित् समारोहे अनेकैः राजनेतृभिः सह प्रधानमन्त्री समागतश्चेत् तत्रान्येषां समागमनेऽपि प्रधानमन्त्री समागत इति तस्य स्वागतं कर्तव्यमित्येवोच्यते जनैः, न त्वन्यः समागत इत्युच्यते, उक्तन्यायात् । अतएव सेवकैः सह समागतेऽपि गुरौ मम गुरुरागत इत्येवोच्यते लोकैः, न तु सेवक आगत इति ।

---

१९१. अष्टा. – १/१/३९ ।

१९२. महाभाष्यम्, – १/१/३९ ।

१९३. अष्टा. – ६/४/४ ।

१९४. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – १० ।

एवमेव शास्त्रेऽपि प्रधानाप्रधानयोर्मध्ये प्रधानस्यैव ग्रहणं भवतीति परिभाषार्थः । यद्यपि 'पुमान् स्त्रिया' (अष्टा. – १/२/६७) इति सूत्रस्य स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेदित्यर्थः । तथा च ब्राह्मणवत्सा च बाह्मणीवत्सश्चेत्यादौ तेन सूत्रेणैकशेषः प्राप्नोति, उभयत्र स्त्रीत्वपुंस्त्वातिरिक्तकृतविशेषाभावेन तल्लक्षणमात्रकृत– विशेषस्य सत्त्वात् तथापि "प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः" इति परिभाषास्वीकारेण 'पुमान् स्त्रिया' इत्यादेः प्रधानस्त्रीत्वपुंस्त्वमात्रकृतविरूपरूपविशेष एव प्रवृत्तेरदोषः, 'ब्राह्मणीवत्सा', ब्राह्मणवत्सः' इत्यादौ तु अप्रधानब्राह्मणशब्दगतं यदप्रधानं स्त्रीत्वादिकं तत्कृतस्यापि वैरूप्यरूपविशेषस्य सत्त्वात् नैकशेषापत्तिरिति । तदुक्तं नागेशेन 'प्रधाना स्त्रीत्वपुंस्त्वातिरिक्ताप्रधानस्त्रीत्वपुंस्त्वकृतविशेषस्यापि सत्त्वेन न दोषाः इति । यद्यपि लिङ्गं सर्वत्र प्रकारतयैव भासते इति सर्वत्र स्त्रीत्वादेरप्रधानतयैव तथापि अप्रधानशब्दगतस्य तस्याग्रहणमनया साध्यते इति न दोषः' इति ।

यद्यपि नागेशभट्टेनास्य लोकन्यायसिद्धत्वं नोक्तं तथापि 'नपुंसकमनपुंसकेन'[६४३] इति सूत्रस्य प्रदीपे कैयटेन तत्स्वीकृतम् । अस्य न्यायसिद्धत्वं च पतञ्जलिनापि 'प्रत्ययः'[६४४] इति सूत्रभाष्ये प्रतिपादितम् ।

## 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी'[६४५] । १३ ।

शाखाद्यवयवसमुदाय एव वृक्षपदेन व्यवह्रियते । तत्र वृक्षच्छेदनप्रसङ्गे न केनचिदुच्यते शाखादिसमुदायान् छिनत्तु, अपि तु वृक्षं छिनत्त्वित्येवोच्यते ।

अथवा कश्चन रुशदेशान्तर्वर्तिषु नगरेषु जिगमिषुरहं रुशदेशं गच्छाम्येव वक्ति, न तु मास्कोनगरम् इत्यादिलौकिकोदारहणैर्यथा लोकेऽवयवप्रसिद्ध्यपेक्षया समुदायप्रसिद्धि–र्बलीयसी, शास्त्रेऽपि ।

अतएव व्युत्पत्तिलभ्यावयवार्थस्य परिच्छेतृवाचकमातृशब्दे सत्त्वेऽपि समुदायार्थोपलब्ध– जननीरूपार्थवाचकस्यैव मातृशब्दस्य ग्रहणं भवति । तेन 'न षट् स्वस्रादिभ्यः'[६४६] इतिसूत्रेण जननीवाचकमातृशब्दस्यैव ग्रहणं भवति ङीप्टापोः

---

१९५. अष्टा. – १/२/६९ ।

१९६. तत्रैव – ३/१/१ ।

१९७. परिभाषेन्दुशेखरः, परि. – १०७ ।

१९८. अष्टा. – ४/१/१० ।

निषेधसिद्धिः । तदुक्तं परिभाषेन्दुशेखरे – "ननु स्वस्रादित्वप्रयुक्तो मातृशब्द ङीब्निषेधः परिच्छेतृवाचकमातृशब्देऽपि स्यादत आह – 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी" इति ।

परिभाषावृत्तौ तु एवमुक्तम् – "युक्तिसिद्धञ्चैतत् समुदायस्य सर्वानुग्राहित्वेन प्रधान्यात् तेनावयवाश्रयणात् समुदायाश्रयमेव कार्यं प्रवर्तते"[६४७] इति ।

**'प्रत्येकं वाक्यप्रिसमाप्तिः'**[६४८] **। १४ ।**

व्याकरणशास्त्रे वाक्यानि विशेष्यविशेषणानि प्रत्येकं परिसमाप्यन्ते । 'वृद्धिरादैच्', 'अदेङ् गुणः' चेत्यादौ आदेचमुद्दिश्य विधीयमाना वृद्धिसंज्ञा समुदायस्यादेचः स्यात्, अदेङमुद्दिश्य विहिता गुणसंज्ञा च अदेङ् इति समुदायस्य स्यात् । 'न लोपः सुप्स्वरसंज्ञातुग्विधिषु कृति'[६४९] इत्यत्र विधिशब्दः प्रत्येकं सुबादिभिः सम्बध्यते । लौकिक एवायं न्यायो 'वृद्धिरादैच्' इति सूत्रभाष्ये दर्शितः । देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामित्युक्ते प्रत्येकं भुजिः परिसमाप्यते तथा 'वृद्धिरादैच्' इत्यादौ अपि आति एचि प्रत्येकं वृद्धिसंज्ञा परिसमाप्ता भविष्यतीति ।

परिभाषावृत्तौ अस्य न्यायस्य लौकिकत्वं प्रतिपादितम्, ज्ञापकञ्चात्र 'णलुत्तमो वा'[६५०] इति उत्तमपदं णल्विशेषणम् । यदि हि प्रत्येकं सम्बन्धो न स्यात्, उत्तमसंज्ञायास्त्रयाणां समुदायेन सम्बन्धेन णलिति विशेषणं न स्यादिति ।

**'क्वचित्समुदायेऽपि'**[६५१] **। १५ ।**

ननु 'प्रत्येकं वाक्यपरिसमाप्तिः' इति स्वीकारे 'हलोऽनन्तरा संयोगः'[६५२] इति संयोगसंज्ञा, 'प्राक्कडारात् समासः'[६५३] इति समाससंज्ञा, 'उभे अभ्यस्तम्'[६५४] इति

---

१९९. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – १०१ ।
२००. परिभाषेन्दुशेखरः,परि. – ११६ ।
२०१. अष्टा. – ८/२/२ ।
२०२. अष्टा. – ७/१/९१ ।
२०३. परिभाषेन्दुशेखरः, परि. – ११७ ।
२०४. अष्टा. – १/१/७ ।
२०५. तत्रैव. – २/१/३ ।

अभ्यस्तसंज्ञा च प्रत्येकं स्युरिति चेन्न, 'क्वचित्समुदायेऽपि' इति परिभाषास्वीकारात् । गर्गाः शतं दण्ड्यन्ताम् अर्थिनः च राजानो हिरण्येन भवन्ति न च प्रत्येकं दण्डयन्ति इत्यादौ यथा समुदायो दण्ड्यते तथा संयोगादिसंज्ञापि समुदायस्य क्रियते । इयमुभयविधव्यवस्था लक्ष्यानुरोधेन सम्भवति ।

ज्ञापकञ्चात्र 'प्रथमयोः पूर्वसवर्णः'[६५५] इत्यत्र प्रथमाद्वितीययोर्वचनषट्करूपयो– रित्यस्मिन्नर्थे प्रयुक्तं प्रथमयोरिति पदम् । प्रथमशब्दो हि यदि सुपां त्रिकस्य सु औ जसित्यस्य समुदायस्य संज्ञा स्यात् सामीप्याच्चामौट् शसिति त्रिके प्रवर्तते तदा प्रथमयोरिति निर्देशः साधीयान् स्यात् । यदि तु प्रत्येकं प्रथमाशब्दः स्यात्तदा सोरित्येकस्य प्रथमशब्देन ग्रहणं सामीप्याच्चाम इति लाघवार्थं स्वमोरित्येव निर्देश कुर्यात् । तस्मात् प्रथमयोरिति निर्देशेन समुदायेन वाक्यपरिसमाप्तिं बोधयति । परिभाषेयम् 'वृद्धिरादैच्' इति सूत्रभाष्ये स्पष्टम् ।

**'पर्जन्यवल्लक्षणप्रवृत्तिः'[६५६] ॥ १४ ॥**

इह शास्त्रे पर्जन्यवत् मेघवत् लक्षणं प्रवर्तते इति परिभाषार्थः । ननु उख धातोर्लिटि तसि तस्यातुसादेशे द्वित्वेऽभ्यासत्वे हलादिशेषे 'उ उख् अतुस्' इति स्थितेऽभ्यासोकारस्य स्वत एव ह्रस्वत्वात् फलाभावेन 'ह्रस्वः'[६५७] इति ह्रस्वाप्राप्त्या सवर्णदीर्घे 'ऊख् अतुस्' इति स्थिते ह्रस्वापत्तिरिति चेन्न पर्जन्यवल्लक्षणप्रवृत्तिरिति स्वीकारात् । यथा पर्जन्यस्य मेघस्य प्रवृत्तिः असंभवत्स्वकार्यकृतविशेषे पूर्वतो जलपरिपूर्णे जलाशयेऽपि भवति तथा लक्षणस्य प्रवृत्तिः पुर्वतः तल्लक्षणक्रियमाणं ह्रस्वादिकं यत्र विद्यमानं तत्रापि भवति । दृश्यते मेघो जलेऽपि वर्षति स्थलेऽपि च । यत्र जलं पूर्वतो विद्यमानमस्ति तत्र तात्कालिकजलवर्षणोपयोगशून्येऽपि पर्जन्यो यथा वर्षति तथा तात्कालिकलाभाभावस्थलेऽपि लक्षणं प्रवर्तते । तथैव शास्त्रमपि स्वीयोद्देश्यतावच्छेदकाक्रान्ते भेदबुद्धिं परित्यज्य फलविशेषाभावेऽपि प्रवर्तते, उक्तन्यायात् ।

---

२०६. अष्टा. – ६/१/५ ।
२०७. तत्रैव – ६/१/१०२ ।
२०८. परिभाषेन्दुशेखरः, परि. – १२० ।
२०९. अष्टा. – ७/४/५९ ।

एवञ्च सवर्णदीर्घात् पूर्वमाङ्गत्वात् 'वार्णादाङ्गं बलीयः' इति परिभाषयानया ह्रस्वो ततो दीर्घे लक्ष्ये लक्षणं सकृदेव प्रवर्तते इति न्यायेन पुनर्ह्रस्वप्रवृत्त्या न दोषः ।

'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च'[६५८] इति सूत्रभाष्ये एवमालोचितम् – 'कृतकारि खल्विदं शास्त्रम् मेघवत् नाकृतकारि दहनवत् । यदि ह्यकृतकारि स्यात् दीर्घस्य दीर्घो न भवति दहनोऽपि दग्धं न दहति । यदा तु कृतकारि तदा कृतमपि कारयति' इति ।

न्यायस्यास्य ज्ञापकत्वं प्रतिपादितं परिभाषावृत्तौ । तत्रैवमुक्तं "ज्ञापकञ्चात्र 'प्रवाहणस्य ढे" इत्यनेन प्रवाहणस्यापत्यं प्रावाहणेय इति शुभ्रादित्वाड्ढकि उभयपदवृद्धिविधानम् । तत्र अपूर्वपदस्य प्रशब्दस्य विभाषोत्तरपदस्य तु वाहणशब्दस्यापि नित्यं वृद्धिः । न च प्रवाहणेयीभार्य इति 'वृद्धिनिमित्तस्य च तद्धितस्ये'ति पुंवद्भावप्रतिषेधार्थमिदं वृद्धिविधानं स्यात् । जातेश्च इत्यनेनैव प्रतिषेधस्य सिद्धत्वात्"[६५९] इति ।

## **'निषेधाश्च बलीयांसः'[६६०] । १६ ।**

कस्यचित् सम्पन्नस्य गृहे सर्वे भोज्याः पदार्थाः प्राचुर्येण सन्ति सामान्यतया सर्वे भोज्याः पदार्थाः सवैरेव भोक्तव्या इति सर्वेषां सर्वभक्षकत्वमापतति, किन्तु यदि चिकित्सकेन ज्वराक्रान्ताय दध्यादिभक्षणं निषिध्यते, तदा निषेधस्य बलवत्त्वात् तस्मै दध्यादिकं नैव दीयते । एवञ्च लोकेऽपि यस्योन्मूलनाय यस्य प्रसक्तिर्भवति, ततस्तस्य बलवत्त्वं स्वीक्रियते एव यथा कृष्णस्य कंसादिति ।

शास्त्रेऽपि न्यायोऽयं बहुशं प्रयुज्यते । तद्यथा – स्यन्दधातोर्लृटलकारे तिबादिकार्ये चतुरग्रहणरहितेन 'न वृद्भ्यश्चतुर्भ्यः' इत्यनेनेड्निषेधेऽन्तरङ्गत्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा'[६६१] इत्यनेन वैकल्पिके इडागमे च प्राप्ते 'निषेधाश्च बलीयांसः' इति न्यायबलेन निषेधे स्यन्त्स्यतीति सिध्यति ।

---

२१०. अष्टा. – ६/१/१२७ ।
२११. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ८६ ।
२१२. परिभाषेन्दुशेखरः, परि. – १२२ ।
२१३. अष्टा. – ७/२/४४ ।

न्यायोऽयं 'न लुमताङ्गस्य'[६६२] इति सूत्रभाष्ये व्यवहृतः । तत्र हि प्रत्ययलोपे प्रत्ययलक्षणमित्यस्य प्रवृत्तौ 'परमवाक्' इत्यस्य सर्वनामस्थानपरकत्वात् 'स्वादिष्वसर्वनामस्थाने'[६६३] इत्यत्र च सर्वनामस्थानेत्यस्य प्रसज्यप्रतिषेधार्थकत्वात् पदसंज्ञाया अभावे कुत्वाप्राप्तिराशङ्किता, सुबन्तत्वप्रयुक्तपदत्वेन साधितञ्च कुत्वम् । ततश्च लुप्ते प्रत्यये द्वयोरपि पदसंज्ञायाः समानावधिकत्वमतः 'निषेधाश्च बलीयांसो' भवन्ति इति न्यायेनासर्वनामस्थाने इत्यनेन निषेधे पदत्वाभाव उपपादितः ।

तथा च तत्रत्यं भाष्यम् – "सत्येतत् प्रत्यय आसीत् अनया भविष्यत्यनया न भविष्यतीति । लुप्त इदानीं प्रत्यये यावत एवावधेः स्वादौ पदमिति पदसंज्ञा तावत एतावधेः सुबन्तं पदमिति । अस्ति च प्रत्ययलक्षणेन सर्वनामस्थानपरतेति कृत्वा 'प्रतिषेधाश्च बलीयांसो भवति' इति प्रतिषेधः प्राप्नोति"[६६४] इति ।

---

२१४. अष्टा. – १/१/६३ ।

२१५. तत्रैव – १/४/१७

२१६. महाभाष्यम् – १/१/६३ ।

# न्यायसिद्धा तथा युक्तिसिद्धा परिभाषा

**'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्'**[६६५] **। १ ।**

अर्थवद्ग्रहणे अर्थविशिष्टस्य शब्दस्योपलव्धौ, अनर्थकशब्दस्य ग्रहणं न भवतीति परिभाषार्थः । अतएव 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन विधीयमाना 'वृद्धिः प्रौढ इत्यत्रार्थवद् ऊशब्दावयवोकारस्यैव, न तु प्रोढवान् इत्यत्रोढवान्शब्दैकदेशस्थानार्थक-स्योढशब्दावयवस्य, तत्र हि ऊढवान् एवार्थवान्, तु तदेकदेशः । न्यायोऽयं विशिष्टरूपोपादान एव प्रवर्तते, न तु वर्णकार्ये । अतएव पठते इत्यादावनर्थकस्यापि टेरत्वं भवत्येव । अयं च न्यायः 'स्वं रूपं शब्दस्याशब्दसंज्ञा'[६६६] इति सूत्रे रूपग्रहणेन ज्ञापितः । तत्र हि रूपग्रहणं विनापि स्वशब्देनैवात्मीयत्वेन शब्दरूपस्य ग्रहणे सिद्धे रूपग्रहणेन ज्ञाप्यते शब्दस्य शब्दादप्यतिरिक्तोऽर्थः स्वकीयो विद्यते इति निर्गतोऽयं न्यायः – 'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्' इति । तथा च तत्रत्यं भाष्यं – ''रूपग्रहणं किमर्थम्? न स्वंशब्दस्याशब्दसंज्ञा भवति इत्येवं रूपं शब्दस्य संज्ञा भविष्यति । न ह्यन्यत् स्वंशब्दस्यास्ति अन्यदतो रूपात्? एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः – अस्त्यन्यद्रूपात् स्वंशब्दस्य । किं पुनस्तदर्थः? किमेतस्य ज्ञापने प्रयोजनम्? अर्थवद्ग्रहणे नानर्थकस्य इत्येषा परिभाषा न कर्तव्या भवति । किमर्थं पुनरिदमुच्यते? किमर्थमिति । शब्देनार्थगतेरर्थे कार्यस्य असम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वरूपवचनम्''[६६७] इति ।

पूर्वोक्तयुक्तिमूलकत्वस्वीकाराद् वरमस्याः सूत्ररूपत्वप्रतिपादनम् । 'गोतो णित्'[६६८] इत्यादौ गोशब्देनानेकार्थके नानेकेषामर्थानामुपस्थितौ 'सकृदुच्चारितः शब्दः सकृदेवार्थं गमयति' इति न्यायेन सर्वाधिकप्रसिद्ध्या सास्नालाङ्गूलककुदाद्यर्थवाचके सूत्रस्य प्रवृत्त्या चारितार्थ्येन भूकिरणाद्यर्थवाचिनि गोशब्दे प्रवृत्तये सूत्रस्यावृत्तिकल्पना कर्तव्येति गौरवमत्र सूत्ररूपत्वमस्याः स्वीकारे न भवति ।

---

२१७. परिभाषेन्दुशेखरः, परि. – १५ ।

२१८. अष्टा. – १/१/६८ ।

२१९. महाभाष्यम् – १/१/६८ ।

२२०. अष्टा. – ७/१/९० ।

गामानय गामुच्चारयेत्यादौ अर्थस्य शब्दस्य च क्रमशः प्रतीत्या शब्दानामर्थे शब्दे च खण्डशः शक्तिः स्वीकार्या । गामानयेत्यादौ गोशब्दवाच्यसास्नादिमन्तमानयेति बोध गामुच्चारयेत्यादौ सास्नादिमदर्थबोधकं गोशब्दमुच्चारयेति बोधो जायते । तत्र शब्दविशिष्टेऽर्थेऽर्थविशिष्टे शब्दे च शब्दानां शक्तिकल्पने शक्यतावच्छेदके गौरवाल्लाघवाच्छब्दानां खण्डशः शक्तिः कल्प्यते । लोके आनयनादिकार्यं शब्दस्य कर्तुं न शक्यते । तेन च व्यवहारासिद्धेः अर्थस्य विशेष्यतया शब्दस्य च विशेषणतया बोधः । तदुक्तं नागेशेन 'विशिष्टरूपोपादाने उपस्थितार्थस्य विशेषणतयान्वयसम्भवे त्यागे मानाभावोऽस्या मूलम् । अत्रार्थः कल्पितान्वयव्यतिरेककल्पितः शास्त्रीयेऽपि गृह्यते' इति ।

शास्त्रकल्पितस्याप्यर्थस्यात्र ग्रहणे 'संख्याया अतिशदन्तायाः कन्'[६६९] इति सूत्रस्थं भाष्यं प्रमाणम् । तत्रैव कैयट एवमाह – 'शास्त्रव्यवस्थाहेतुरन्वयव्यतिरेकगम्यार्थवत्ताश्रीयत इत्यर्थः । अतएव शेऽर्थवद्ग्रहणात् काशे कुशे इत्यादौ ग्रहणाभावः, उपसर्गाणामपि केवलानां प्रयोगाभावाल्लौकिक्या अर्थवत्ताया अभावादन्वयव्यतिरेकव्यवस्थाप्यैवासावा–श्रीयते'[६७०] इति ।

लोकेऽस्य न्यायस्य प्रवृत्तौ तु अर्थशब्दः प्रयोजनवाचकः । अतः प्रयोजन–साधकस्य वस्तुना उपलब्धौ सत्यां नानुपयोगिनो वस्तुनो ग्रहणमिति परिभाषार्थः । अतएव गोक्रयणार्थमादिष्टः कश्चिज्जनो दुग्धदाने समर्थाया एव गोरानयनं करोति, न तु केवलाया दर्शनमात्रफलिकायाः दुग्धदानेऽसमर्थायाः इति । उपर्युक्तव्याख्यानेनावगम्यते परिभाषेयं न्यायसिद्धा विविधयुक्त्या प्रतिपाद्यते ।

'सर्वो द्वन्द्वो विभाषयैवद्भवति' इति परिभाषा ज्ञापकसिद्धा इति पूर्वे पर्यालोचिता । पुनः न्यायसिद्धा परिभाषा । 'चार्थे द्वन्द्वः'[६७१] इत्यनेन समाहारे इतरेतरयोगे च द्वन्द्वः शब्दादिविशेषमनपेक्ष्य विधीयते । तथा च समाहारद्वन्द्वे समाहारस्यैकत्वादेकवचनम्, इतरेतरयोगे च यथायथं द्विवचनादिकं सिद्ध्यतीति न्यायसिद्धेयम् ।

---

२२१. अष्टा. – ५/१/२२ ।

२२२. महाभाष्यप्रदीपटीका – ५/१/२२ ।

२२३. अष्टा. – २/२/२९ ।

**'परान्नित्यं बलवत्'[६७२] । २ ।**

परशास्त्रापेक्षया नित्यशास्त्रं बलवद्भवतीत्यर्थः । पूर्वपरशब्दयोः परस्परं नित्यसाकाङ्क्षत्वात् परशब्दात् पूर्वशब्दस्याक्षेपः । अतः परशास्त्रस्य नित्यशास्त्रस्य युगपत् प्राप्तौ नित्यशास्त्रस्यैव प्रवृत्तिः । नित्यशास्त्रस्य बलवत्त्वे हेतुः तस्य कृताकृतिप्रसङ्गित्वम् । कृतेऽपि तत्प्राप्नोति अकृतेऽपि च नित्यस्य बलवत्त्वे औचित्यं हेतुः । तदुक्तं नागेशाचार्येण – 'तत्राक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावकस्यैव तत्कल्पनमुचितमिति नित्यस्य बलवत्त्वे बीजम्'[६७३] इति । यथा 'तुदति' इत्यत्र तुद्धाताः तिप्रत्ययकृते पुगन्तेति गुणः प्राप्नोति शप्रत्ययश्च, तत्र शप्रत्ययः गुणे कृतेऽपि प्राप्नोति अकृतेऽपि च । गुणस्तु शप्रत्यते कृते न प्राप्नोति शप्रत्ययापित्सार्वधातुकत्वेन ङिद्वद्भावेन 'क्ङिति च' इति निषेधात् । इत्थं कतरस्य बाधः कल्प्य इति प्रस्तावे एकत्रे कृते यदन्यन्न प्राप्नोति तस्यैवाभावो बाधो वोचितः कल्पयितुं न तु तस्य बाधो यस्य हि प्रसक्तिः कुतेऽप्यस्तीति परोऽपि गुणः शप्रत्यये कृते प्रसक्तिरहितः कृतेऽकृतेऽपि प्रसक्तेन नित्येन शप्रत्ययेन बाध्यते । तस्मात् परिभाषेयं न्यायसिद्धा ।

लोकेऽप्येवमेव दृश्यते । तथा हि कस्यचित् पितुः द्वौ पुत्रौ स्तः, तयोरेको निर्बलो निर्धनश्च । द्वितीयश्च स्वस्थो धनिकश्च । किन्तु यो निर्बलो निर्धनश्च स नित्यं पितृसेवी, अन्यश्च कदाचिदेव सेवते । तत्र पितुः दृष्ट्या तयोर्मध्ये निर्धनोऽपि नित्यसेवी धनिकापेक्षया अधिकमान्यो भवति । अतएव तयोर्विवादे समुपस्थिते पिता नित्यसेविन एव साहाय्यं विदधाति ।

**'पुरस्तादपवादा अनन्तरान् विधीन बाधन्ते नोत्तरान्'[६७४] । ३ ।**

यथा लोके आम्रवृक्षे स्थितः कश्चिदाम्रबुभुक्षुः पुरुषः सत्सु व्यवहिताव्यवहितेषु फलेषु अव्यवहितान्येवाम्रफलानि भोक्तुं यतते, प्रथमोपस्थितत्वेनाल्पायाससाध्यत्वात्, न तु व्यवहितानि अन्तरोपस्थितत्वेन बह्वायाससाध्यत्वात् । एवमेव व्याकरणशास्त्रेऽपि अपवादसूत्रं

२२४. परिभाषेन्दुशेखरः, परि. – ३५।
२२५. परिभाषेन्दुशेखरः, परि. – ३५ ।
**२२६.** तत्रैव – ६०  ।

स्वाव्यवहितानेव विधीन् बाधितुं यतते, न तु तदुत्तरान् उक्तयुक्तेः । अर्थात् प्रागुच्यमाना अपवादा निकटान् एवोत्सर्गान् बाधन्ते, न व्यवहितान् इति परिभाषार्थः ।

'अव + आङ्' पूर्वकादिण्धातोरदादिकाल्लोटि सिपि शपो लुकि सिपः स्थाने ह्यादेशे 'अव + आ + इहि' इति स्थिते 'आद् गुणः' इति गुणे 'अव + एहि' इति स्थिते 'एत्येधत्यूठ्सु'[६७५] इति वृद्धिः प्राप्नोति, 'अन्तादिवच्च' इति परादिवद्भावेन 'एहि' इत्यस्य इण्त्वादेजादित्वस्य स्वतः श्रूयमाणत्वात्, 'एङि पररूपम्'[६७६] इति पररूपं प्राप्नोति, 'अन्तादिवच्च' इति गुणैकदेशस्य पूर्वान्तवद्भावेनाङ्त्वाद् 'ओमाङोश्च'[६७७] इति पररूपं च प्राप्नोति, तत्र येन नाप्राप्तिन्यायमाश्रित्य येनेत्यनेन लक्षणेन कार्येण वेत्यर्थकरणे पररूपत्वावच्छिन्ने कार्ये आरभ्यमाणाया वृद्धेः सकलपररूपकार्यस्य बाधकत्वे निर्णीतेऽपि केन शास्त्रेण विहितस्य पररूपस्य वृद्धिः बाधिकेति बाध्यविशेषचिन्तायां 'पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति परिभाषया वृद्धिः 'एङि पररूपमिति विहितं पररूपमेव बाधते, न तु 'ओमाङोश्च' इति विहितमपि । अत्र नागेशाचार्य आह – "अवश्यं स्वपरस्मिन् बाधनीये प्रथमोपस्थितानन्तरबाधेन चारितार्थ्ये पश्चादुपस्थितस्य ततः परस्य बाधे मानाभावः । आकाङ्क्षानिवृत्तेः विप्रतिषेधशास्त्रबाधे मानाभावाच्चेत्येतस्य बीजम्" इति ।

यदा च सोऽव्यवहितपरविधिं बाधित्वा साफल्यमवाप्तुं शक्नोति, तदा तदुत्तरान् विधीन् कथं बाध्यताम्, केन शास्त्रेण विहितं पररूपम् 'एत्येध्यत्युठ्सु' इति वृद्ध्या बाध्यतामित्याकारिकाया आकाङ्क्षाया 'एङि पररूपमिति पररूपबाधनेन निवृत्तेः । तस्या बाधनाकाङ्क्षाया अभावेन तदुत्तरशास्त्रेण 'ओमाङोश्च' इत्यनेन विहितं पररूपं कथं तया बाध्यताम् । यदा वृद्धिशास्त्रम् 'एङि पररूपम्' इति बाधित्वा चारितार्थं तदा समाप्तनिरवकाशबलां तां 'विप्रतिषेधे परं कार्यमि'ति (अष्टा. – १/४/२) इत्यनेन परं पररूप'मोमाङोश्च' इति बाध्यते । विप्रतिषेधशास्त्रबाधे प्रमाणाभाव इत्येतस्यां परिभाषायां बीजम् । सूत्रेण युक्तिसिद्धत्वात् परिभाषेयं युक्तिसिद्धा परिभाषा ।

परिभाषावृत्तौ तस्य ज्ञापकत्वं दर्शितम् । तत्रैवमाह "ज्ञापकञ्चास्याः 'परिमाणाख्यायां सर्वेभ्यः' (अष्टा. – ३/३/२०) इति सर्वग्रहणम् । तद्धि द्वौ कारौ त्रयः

---

२२७. अष्टा. –६/१/८९ ।

२२८. तत्रैव – ६/१/९४ ।

२२९. तत्रैव ।

कारा इत्यत्रापो बाधनार्थं क्रियते । अन्यथा पुरस्तादपवादन्यायेन निकटस्य 'एरज्' (अष्टा.–३/३/५६) इत्यस्यैव बाधनं स्यादिति" ।

## 'मध्येऽपवादा पूर्वान् विधीन् बाधन्ते नोत्तरान्'[६७८] । ४ ।

बाध्यविशेषचिन्तायाः फलितार्थपरां परिभाषामवतारयति–मध्येऽपवादा इति । 'नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च' इत्यनेन नासिकादिशब्देभ्यो विकल्पेन ङीष् विधीयते । तत्र नासिकोदरयोः तुङ्गनासिकी, तुङ्गनासिकेत्यादौ 'पुरस्तादपवादाः' इति पूर्वोक्तन्यायेन 'न क्रोडाहिबह्वचः' इति बह्वज्लक्षणो निषेधो बाध्यते । ओष्ठादीनां पञ्चानां तु विम्बोष्ठा इत्यादौ 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इत्यत्रासंयोगोपधादित्युक्त्या तत्पर्युदासान् ङीषो निषेधं दृष्ट्वा सूत्रेऽस्मिन् तेषां ग्रहणं क्रियते । तत एभ्यः पञ्चभ्यः प्राप्तस्य सर्वविधङीष्निषेधस्येदं सूत्रं बाधकमिति मत्वापि बाध्यविशेषचिन्तया केन शास्त्रेण विहितो निषेध इति जिज्ञासायां "मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् इत्यनेन ओष्ठादिषु पञ्चसु विम्बोष्ठी, विम्बोष्ठा इत्यादौ असंयोगोपधादिति निषेध एव बाध्यते, न तु 'सहनञ्विद्यमानपूर्वाच्च्' इति निषेधोऽपि । तेन 'विद्यमानोष्ठा' इत्यादौ न ङीष् विकल्प्यते किन्तु नित्यनिषेधः एव । 'नासिकोदर' इत्यस्य सहनञ्' इत्यनेन परत्वबाधात् ।

एवञ्च 'कर्मण्यण्' इति सूत्रभाष्ये प्रयुक्तः । तत्रायं संक्षिप्तः प्रसङ्गः – क प्रत्ययः कस्य प्रत्ययस्य बाधको भविष्यतीति विचारप्रसङ्गे 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजि चेति साहिभ्यश्च' इति सूत्रेणानुपपदात् विधीयमानशप्रत्ययस्यावकाशो 'लिम्पः' इत्यत्र, 'कर्मण्यण्' इत्यस्य 'कुम्भकार' इत्यादौ 'कुड्यलेप' इत्यत्र तूभयोरपि प्राप्तिमाशङ्क्य विप्रतिषेधन्यायेन 'अणः' प्रबलत्वं साधितम् । तदनन्तरं विप्रतिषेधन्यायप्रवृत्तेरयुक्तत्वमुक्त्वा शप्रत्ययेन कप्रत्यय इव अण्प्रत्ययस्यापि बाध्यत्वमापाद्य 'मध्येऽपवादा' इति न्यायेन शप्रत्ययो कप्रत्ययमेव बाधिष्यते, न तु अण्प्रत्ययम् ।

तथा च भाष्ये भाषितम् – अनुपपदस्यावकाशः लिम्पतीति लिम्पः । कर्मोपपदस्य स एव । इहोभयं प्राप्नोति कुड्यलेप इति कर्मोपपदो भवति विप्रतिषेधेन । नैष युक्तो विप्रतिषेधः । अनुपपदस्तृतीयः । ण्वुल्तृजयः । तेषां कः कस्य शः । स यथैव शः कं

---

२३०. परिभाषेन्दुशेखरः, परि. – ६१ ।

बाध्यते एवं कर्मोपपदमपि बाधेत । या तर्हि गतिः? 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्' इत्येवं शः कं बाधिष्यते, कर्मोपपदं न बाधिष्यते"[६७९] इति ।

लोकेऽयं न्यायः प्रयुज्यते – यथा कस्यचिद्बुभुक्षितस्य सिंहस्य पुनः पश्चाच्चोभयत्रापि भक्ष्या जीवाः तिष्ठन्ति । तत्र सः सिंहः क्षुन्निवृत्तये पुरःस्थितानेव जीवान् भोक्तुं प्रवर्तते । ततः क्षुन्निवृत्तः सन् पृष्ठस्थितान् जीवान् भोक्तुं न प्रवर्तते, विगततृष्णत्वात् । एवमेव शास्त्रेऽपि यदा अपवादशास्त्रस्य पूर्वं पश्चाच्चोभयत्र बाध्यशास्त्रे स्तः तदा मध्येऽपवादशास्त्रं पूर्ववर्तिनमेव बाध्यं बाधते, न तूत्तरम् । तदुक्तं नागेशाचार्येण 'पूर्वोपस्थितबाधेन नैराकाङ्क्ष्यमस्या बीजम्' इति ।

**'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा'[६८०] । ५ ।**

'सेर्ह्यपिच्च' इत्यनेन सूत्रेण विहितस्यापित्त्वस्यैव हेरपि 'वाश्छन्दसि' इति विकल्पः स्यात् तथा 'नेटि' इति सूत्रेण निषेधो यथा 'वदव्रजहलन्तस्याचः' इत्यनन्तरोक्तया वृद्धेर्भवति तथा 'सिचि वृद्धिः परस्मैपदेषु' इति विहिताया 'मृजेर्वृद्धिः' इति विहितायाश्च स्यादतः परिभाषामवतारयति 'अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति । अर्थात् अनन्तरस्यैव शास्त्रस्य विधिः प्रतिषेधो वा भवति । तेन 'नेटि' इति सूत्रेण वृद्धेः विधीयमाननिषेधोऽनन्तरस्यैव 'वदव्रजहलन्तस्याचः' इत्यनेन प्राप्तस्य भवति, न तु सिचि वृद्धिः परस्मैपदेषु' इत्यनेन प्राप्तस्य ।

न्यायोऽयं महाभाष्ये बहुशः प्रयुक्तः । यथा 'शि सर्वनामस्थानम्', 'सुडनपुंकस्य' इत्यभयोः[६८१] सूत्रयोर्यदि संहितापाठः, तदा अनपुंसकस्येत्यत्र नञः प्रसज्यप्रतिषेधार्थकत्वेन कुण्डानि 'वनानि' क्रियते इत्यादावपि सर्वनामस्थानसंज्ञाया निषेधः स्यादिति दोष उद्भावितः । ततश्च नञः पर्युदासार्थकत्वं स्वीकृत्य नपुंसकभिन्नस्य तत्सदृशस्य च सर्वनामस्थानसंज्ञा विधीयत इति यदि केनचित् सूत्रेण नपुंसकस्यापि प्राप्ता चेत्तर्हि भवतु नाम । अथवा प्रसज्यप्रतिषेधपक्षेऽपि न दोषः, प्रकृतन्यायबलेन अनन्तरस्य सुट् एव नपुंसकस्येत्यनेन प्रतिषेधा भविष्यति, न तु 'शि सर्वनामस्थानम्' इत्यस्य ।

---

२३१. महाभाष्यम्, 'कर्मण्यण्' – ३/२/१ ।

२३२. परिभाषेन्दुशेखरः, परि. – ६२ ।

२३३. अष्टा. – १/१/४२, १/१/४६ ।

तदुक्तं महाभाष्ये पतञ्जलिना – 'नाप्रतिषेधात्' नायं प्रसज्यप्रतिषेधो नपुंसकस्य नेति । किं तर्हि पर्युदासोऽयम् – यदन्यन्नपुंसकादिति । नपुंसके न व्यापारः यदि केनचित् प्राप्नोति, तेन भविष्यति । पूर्वेण च प्राप्नोति । 'अप्राप्तेर्वा' अथवा अनन्तरा या प्राप्तिः सा निषिध्यते । कुत एतत्? अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा इति । पूर्वाप्राप्तिरप्रतिषिद्धा तथा भविष्यति"[६८२] इति ।

नागेशाचार्येण न्यायविषये उक्तं[६८३] – "प्रत्यासत्तिमूलकोऽयम् । लक्ष्यानुरोधाच्च व्यवस्थेत्यपि पक्षान्तरम् । तत्र क्वचित् स्वरितत्वप्रतिज्ञानात् सामर्थ्येन वा बाध्यतेऽयं न्यायः । यथा टिड्ढेति सूत्रेण डापा व्यवहितस्यापि ङीपो विधिः" इति ।

लोकेऽयं न्यायो बहुशः प्रयुज्यते – लोके यथा 'गावो निवेशितव्याः', 'गावो बहिर्नेतव्याः इति केचिदादिष्टे सन्निहितानामेव गवां निवेशनं नयनं वा भवति, प्रथमोपस्थितत्वात्, न तु दूरस्थानामसन्निहितत्वात् ।

अथवा पार्श्ववर्तिभिः सहैव स्नेहः कलहो वा भवति, सन्निहितोपस्थितत्वात् । अतएव राजनीतौ 'स्वदेशाव्यवहितो यो देशस्तेन सह अवश्यं मैत्री विधेया' इत्युक्तम् । यतो हि यदि स देशो मित्रं स्यात्तदा तदव्यवहितोत्तरो यो देशः सोऽपि मित्रं स्यात्तदा मित्रस्य मित्रं स्वमित्रं भवतीत्यनुभवसिद्धत्वात् । अन्यथा पार्श्ववर्तिदेशः स्वशत्रुः स्यात्तदा तदव्यवहितोत्तरवर्ती अपि शत्रुः स्यात्, शत्रोः मित्रं स्वशत्रुः स्यादिति दर्शनात् । एवमेव व्याकरणशास्त्रे अनन्तरस्यैव शास्त्रस्य विधिः प्रतिषेधो वा भवति ।

**'अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेन बाध्यते'।[६८४] ॥ ६ ॥**

अपवादः वाचकः, यद्यन्यत्र अन्यस्मिन् लक्ष्ये, चरितार्थस्तदा अन्तरङ्गेण बाध्यते इति परिभाषार्थः ।

'अयजे इन्द्रम्' इति वाक्यसंस्कारकाले यज्धातोः लङि उत्तमपुरुषैकवचने इटि इन्द्रशब्दादमि च कृते शपि, अटि 'अयज इ इन्द्र अम्' इति स्थिते 'अ + इ' इत्यनयोः गुणे 'इ + इ' इत्यनयोः सवर्णदीर्घे च प्राप्तेऽन्तरङ्गत्वात् गुणे अमि पूर्वरूपे 'अयजे इन्द्रम्' इति सिध्यति, तन्न सिद्धेत् अन्तरङ्गस्यापि गुणस्यापवादेन सवर्णदीर्घेण

---

२३४. महाभाष्यम्, – १/४/४६ ।
२३५. 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' ।
२३६. परिभाषेन्दुशेखरः, परि. – ६६ ।

बाधादपवादस्य चान्तरङ्गादपि प्रबलत्वस्य परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषया बोधितत्वादिति चेन्न 'अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते' इति परिभाषास्वीकारात् । निरवकाशत्वमेवापवादस्य प्राबल्यप्रयोजकम् । तदेव च तस्य बाधकत्वे बीजम् । यदि स चरितार्थस्तर्हि येनान्यच्छास्त्रमन्तरङ्गं बाध्यते तस्य बीजस्याभावादन्तरङ्गं बाधितुं स नैव प्रभवेदिति लोकानुभवसिद्धोऽयः न्यायः ।

यथा लोके नियुक्तये कस्मिंश्चित् साक्षात्कारे एकोऽन्तरङ्गः समागतस्तदन्यश्चैकश्च तदपेक्षया योग्यः समागतः । तत्र योग्यतारूपादपवादबीजादन्तरङ्गापेक्षया योग्यस्यैव चयनं न्यायप्राप्तम्, तथापि यदि योग्योऽन्यत्र लब्धवृत्तिकश्चेत्तदा तदपेक्षयान्तरङ्गस्यैव चयनमुचितम् । अथवा कस्यचिद्गृहे जनौ समागतौ एकोऽन्तरङ्गः अपरश्चातिथिः । अतिथिः यदि भग्नाशो भवति तर्हि पापं भवेदिति स्मृत्वा तस्यैव सेवादौ कर्तव्या परन्तु यद्यतिथिरन्यत्र कृतभोजन एव समागतश्चेत् तदा तदपेक्षया अन्तरङ्गायैव भोजनादिकं दीयते ।

**'उभयोनिर्देशे पञ्चमीनिर्देशो बलीयान्' । ७ ।**

'ङमो ह्रस्वादचि ङमुण्णित्यम्'[६८५] इत्यत्र 'ङम' इति पञ्चमी । तेन तस्मादित्युत्तरस्य इत्यस्य प्रवृत्त्या अव्यवहितपरस्योपस्थित्या अचीत्यस्य षष्ठीप्रकल्पनेन ह्रस्वात् परो यो ङम् तदन्तं यत् पदं तस्मात् परस्याचो ङमुट् इति सूत्रार्थो भवति । अचीति च सप्तमी । तेन 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यस्य प्रवृत्त्याव्यवहितपूर्वस्योपस्थित्या ह्रस्वात् परस्थितङमन्तपदस्य ङमुट् इति सूत्रार्थः पर्यवस्यति । अनयोः कस्यार्थो ग्रहणीयः तदुच्यते 'उभयनिर्देशे पञ्चमीनिर्देशो बलवान्'[६८६] इति । अचीति सप्तमीनिर्देशः 'मय उञो वो वा' इत्युत्तरसूत्रे चरितार्थः । ङम इति पञ्चमीनिर्देशस्तु अनवकाशः अतः तस्मादित्युत्तरस्यैव प्रवृत्तिः ।

परिभाषावृत्तौ आह – "अयञ्च 'विप्रतिषेधे परं कार्यमि'त्यस्यैवार्थः परिभाषारूपेण पठ्यते । तथाहि 'तस्मान्नुडची'त्यत्र पञ्चमीसप्तम्योरनवकाशत्वात् विरोधे सति 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यतः 'तस्मादित्युत्तरस्ये'ति परत्वात् विप्रतिषेधे परमिति पञ्चमीनिर्देश एव

---

२३७. अष्टा. – ८/३ ३२ ।

२३८. परिभाषेन्दुशेखरः, परि. – ७१ ।

कार्यभाग् भवति । 'आमि सर्वनाम्नः सुडि'त्यत्र आदिति पञ्चमी आज्जसेरसुगि'ति असुग्विधौ चरितार्था'[६८७] इति ।

महाभाष्ये पतञ्जलिना सम्यगालोचितं[६८८] – "यत्रोभयं निर्दिश्यते किं तत्र पूर्वस्य कार्यं भवति । अहोस्वित् परस्यैति? उभयनिर्देशे विप्रतिषेधात् पञ्चमी निर्देशः (वा) उभयनिर्देशे विप्रतिषेधात् पञ्चमीनिर्देशो भविष्यति । किं प्रयोजनम्? प्रयोजनमतो लसार्वधातुकानुदात्तत्वे . . . । बहोरिष्ठादीनामादिलोपे, . . . गोतो णित्, रुदादिभ्यः सार्वधातुके, आने मुगीदासः . . . आमि सर्वनाम्नः सुट् . . . घेर्ङित्याण् नद्याः . . ., याडापः ङमो ह्रस्वादचि ङमुण्नित्यम् . . ., ङम् उत्तरस्याचः अचि परतो ङम इति सन्देहः । ङम उत्तरस्याचः" इति । अपि चोक्तं "विभक्तिविशेषनिर्देशानवकाश–त्वादविप्रतिषेधः" इति ।

## प्रकृतिग्रहणे यङ्लुगन्तस्यापो ग्रहणम् ॥ ८ ॥

हन्धातोः यङ्लुकि आशीर्लिङि 'हनो वधो लिङि' इत्यनेन वधादेशे वध्यादिति जायते, लुङि तु 'लुङि च' इति वधादेशे 'अवधात् इति रूपं सिद्ध्यति । परन्तु हन्धातोः विहितस्य यङ् 'यङोऽचि च' इति लुकि प्रत्ययलक्षणेन यङन्तत्वात् 'सन्यङोः इति द्वित्वेऽभ्यासकार्ये 'जहन्' इत्यवस्थायां 'नुगतोऽनुनासिकान्तस्य' इति सूत्रेण नुकि 'अभ्यासाच्च' इति हस्य कुत्वे नुगित्यनुस्वारोपलक्षणम् तस्य च स च पदान्तवद्वाच्य इति पदान्तत्वे 'वा पदान्तस्य' इत्यनेन परसवर्णे 'जङ्घन्' इति स्थितायां यङ्लुगन्तसमुदायस्य हन्रूपत्वाभावात् पूर्वखण्डस्य चानर्थकत्वादुत्तरखण्डेन व्यवधानाच्च इति चेन्न, 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्'[६८९] इति परिभाषास्वीकारात् । तेन 'हनो वध लिङि' इत्यादौ हन्प्रकृतिग्रहणे यङ्लुगन्तस्य 'जङ्घन्' इत्यस्यापि ग्रहणाद् वधादेशः सिद्धः । अपिग्रहणादर्थापत्त्या मूलप्रकृतेर्हन्त्यादेस्तु ग्रहणं सुतरां सिध्यति ।

परिभाषेयं न्यायसिद्धा । षाष्ठद्वित्वस्य द्विःप्रयोगत्वसिद्धान्तेन प्रयोगद्वयरूपे समुदाये प्रकृतिरूपत्वबोधनस्य औचित्यात् । अर्थात् षष्ठाध्यायस्थसूत्रैः 'लिटि धातोः', 'सन्यङोः'[६९०]

---

२३९. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ६३ ।

२४०. महाभाष्यम् – १/१/६६ ।

२४१. परिभाषेन्दुशेखरः, परि. – १०१ ।

२४२. अष्टा. – ६/१/८, ६/१/९ ।

इत्यादिभिर्द्वित्वविधायकैः न किमपि नूतनं वर्णजातं सस्यद्यते, किन्तु तत्र विद्यमानस्यैव द्विःप्रयोगः क्रियते अतः प्रयोगद्वयसमुदाये प्रकृतित्वमौचित्यादेव सिद्ध्यतीति सिद्धमस्या न्यायमूलत्वम् ।

नागेशाचार्येण महाभाष्येऽस्याः परिभाषायाः अदर्शनान्नाङ्गीकृता । तेनोक्तं – "किञ्च तेन सिद्धान्तेन प्रत्येकं द्वयोस्तत्त्वबोधनेऽपि समुदायस्य तत्त्वबोधने मानाभावः । अतएव दयतेर्दिगि इति सूत्रेऽस्तेः परत्वाद्द्वित्वे कृते परस्यास्तेर्भूभावे कृते पूर्वस्य श्रवणं प्राप्नोतीत्याशङ्क्य विषयसप्तम्याश्रयणेन परिहृतं भाष्ये"[६११] इति ।

इयं परिभाषा व्याडिचन्द्रगोमिपुरुषोत्तमदेवसीरदेवादिभिः स्वीकृता । परिभाषावृत्तौ आह "तेन विदो लटो वेति णलादिविकल्पो यङलुगन्तस्यापि भवति । वेवेद, वेविदतुः, वेविदुः । वेवित्ति, वेवित्तः, वेविदतीति । ज्ञापकञ्चात्र 'ऊदुपधाया गोहः' इत्युपधाग्रहणम् । ऊद्गोह इति लाघवार्थं कर्तव्ये यदुपधाग्रहणं तद् यङ्लुगन्ते जोगूह इत्यभ्यासौकारे भूदित्येवमर्थम् । एतदर्थता च तदा स्यात् यदि प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणं भवेदिति । 'निष्ठाशीङ्' इत्यत्र पुनरनुन्यासकृता न्यायसिद्धत्वमेवास्या दर्शितम्"[६१२] इति ।

## 'विधिनियमसम्भवे विधिरेव ज्यायान्' । ९ ।

प्रत्यक्षादिप्रमाणान्तरेणाप्राप्तस्य प्रापको विधिः । अर्थात् यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः सोऽपूर्वविधिः । तदुक्तं कुमारिलभट्टेन श्लोकवार्तिके –

'विधिरत्यन्तसप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते' ॥[६१३] इति

विधिर्यथा–स्वर्गकामोऽश्वमेधेन यजेत इति । व्याकरणशास्त्रे केनापि सूत्रेणाप्राप्तस्य गुणस्य विधायकत्वात् 'मिदेर्गुण' इति सूत्रं विधिसूत्रम् । स विधिर्यः पक्षे प्राप्तमर्थः नियमयति नियमविधिरित्युच्यते । यथा 'व्रीहीन् अवहन्ति' इति ।

---

२४३. परिभाषेन्दुशेखरः, 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्' ।
२४४. पुरुषोत्तमदेवकृता परिभाषावृत्तिः, परि. – ७२ ।
२४५. कुमारिलभट्टकृतमीमांसाश्लोकवार्तिकम् ।

एवमेव शास्त्रेऽपि शास्त्रस्य विधित्वमुचितमुत नियमत्वमिति जिज्ञासायां विधिनियमयोरुभयोः सम्भवे विधिरेव ज्यायानिति । नियमे हि अश्रुतायाः अन्यनिवृत्तेः सामर्थ्यात् परिकल्पनं यथा – 'नलोपः सुप्स्वरः'[६९४] इत्यत्र सूत्रेऽश्रुतायाः सवर्णदीर्घनिवृत्तेः सामर्थ्यात् परिकल्पनं कर्तव्यं भवति । तेन तत्र राजाश्व इत्यत्र नलोपासिद्धतायाः निवृत्तिर्जायते । उक्तानुवाददोषश्च सुबादिविधावेवासिद्धिरिति सूत्रोक्तस्यानु–वादश्च करणीयो भवतीति नियमे गौरवम् । अतः लाघवाद्विधिरेव ज्यायान् । अत्र कैयटाचार्य आह – "अपूर्व एव विधिरिति प्रतीकमुपादाय प्रोक्तवान् – नियमे हि श्रुतार्थत्यागेनाश्रुताया अन्यनिवृत्तेः सामर्थ्यात् परिकल्पनमुक्तानुवाददोषश्च प्राप्नोति"[६९५] इति ।

एवमेव 'इजादेः सनुमः' इत्यत्र भाष्येऽस्या उल्लेख उपलभ्यते । तदुक्तं "किमर्थमिदमुच्यते न 'कृत्यचः' इत्येव सिद्धम् । नियमार्थोऽयमारम्भः । इजादेरेव सनुम्कान्नान्यस्मात् सनुम्कादिति । क्व मा भूत्? प्रमङ्कनम्, परिमङ्कनम् । सनुमो णत्वेऽवधारस्याप्राप्तिः । किं कारणम्? विधेयभावात् । कैमर्थ्यान्नियमो भवति? विधेयं नास्तीति कृत्वा । इह चास्ति विधेयम् किम्? ण्यन्ताद् विभाषा प्राप्ता । तत्र नित्यं णत्वं विधेयम् । तत्रापूर्वो विधिरस्तु, नियमोऽस्त्विति, अपूर्वो विधिर्भविष्यति न नियमः"[६९६] इति । अत्र कैयटाचार्यैरालोचितः सनुमो णत्वमिति प्रतीकमुपादाय नियमे यद्गौरवं भवति तदाह– नियमे प्राप्तबाधः, सिद्धस्य पुनरुपादानादनुवाददोषश्च । विधौ तु न प्राप्तबाधो नाप्यनुवाददोष इति विधिनियमसम्भवे विधिरेव ज्यायानिति भावः ।

लोकेऽयं न्यायो बहुशः प्रयुज्यते – कस्मिंश्चिद् ग्रामे कश्चिज्जनो यज्ञं कुर्वनास्ते, तत्र भोजनविषये सोऽचिन्तयत् यदत्र यज्ञे केवलैर्ब्राह्मणैरेव भोक्तव्यमुतान्यैरपि । बहुपरिशीलनानन्तरं स निर्णीतवान् यद्यहं केवलं ब्राह्मणानेव भोजयिष्यामि तदा तदतिरिक्ता अप्रसन्ना भवेयुः अपि च सर्वे ग्रामीणा मम यज्ञे भोजनार्थमाशान्विताः सन्ति, केवलं ब्राह्मणानामेव भोजने तु अन्येषामाशाया व्यापातो भविष्यतीति सत्यां पर्याप्तायां सामग्र्यां सर्वे भोज्यन्ताम्, न केवलं ब्राह्मणा एव । अत्र केवलं ब्राह्मणभोजनं नियमयति । विधिनियमसम्भवे विधिरेव ज्यायान् इति ।

---

२४६. अष्टा. – ८/२/२ ।

२४७.महाभाष्यप्रदीपटीका – ८/२/२ ।

२४८. महाभाष्यम् – ८/४/३२ ।

**‘सामान्यातिदेशेविशेषानतिदेशः’ । १० ।**

सामान्यार्थकसामान्यशब्देन यत्कार्यमतिदिश्यते तत्सामान्यस्यैव स्यात्, न तु विशेषस्य तस्याशब्दार्थत्वादिति न्यायार्थः ।

‘आशंसायां भूतवच्च’[६९७] इति सूत्रेण भविष्यति काले भूतवदतिदिश्यते प्रत्ययादिकम्, तेन देवश्चेदवर्षीत् धान्यमवाप्स्म इत्यत्र यथा लुङ्लकारो भवति, भविष्यतिकाले देवश्चेद् वर्षिष्यति धान्यं वप्स्याम इत्यर्थे लङ्लिटोरप्यतिदेशः कुतो नेति तदुच्यते इयं परिभाषा ‘सामान्यातिदेशे विशेषानतिदेशः’[६९८] इति । सामान्यभूतसादृश्या–तिदेशेन तत्र विहितस्य लुङ एव विधानं सम्भवति, न तु अनद्यतनपरोक्षभूतयोर्विहितस्य लङो लिटश्च, तयोर्विशेषधर्मत्वात् । भूतत्वं सामान्यधर्मः अनद्यतनभूतत्वं परोक्षभूतत्वञ्च विशेषधर्म इति स्पष्टमेव । अर्थात् सूत्रस्थं भूतवदिति पदं भूतसादृश्यमर्थः । सामान्यस्योपस्थितिकाले नियमेन विशेषोपस्थितिर्न जायते, विशेषस्योपस्था–पकसामग्र्याभावात् । अतएव सामान्यातिदेशे नियमेन विशेषोपस्थित्यभावोऽस्याः परिभाषायाः बीजम् । परिभाषावृत्तौ पुरुषोत्तमदेवेनानुरूपमालोचितं – “तद्यथा ‘गाङ्कुटादिभ्यः’ इत्यादौ गाङ्कुटादिभ्यः परस्याञ्णित्प्रत्ययस्य ङित् सामान्यम् । तेन ‘क्ङिति च’ इति गुणप्रतिषेधादिकेऽतिदिश्यते ङिद्विशेषस्य यङादेर्यत् कार्यं द्विर्वचनादिकं तन्नातिदिश्यते । लोकसिद्ध एवायमर्थः तथाहि लोके ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति ब्राह्मणत्वसामान्यकार्यमेव पादबन्दनादिकमतिदिश्यते । न तु माठरादिप्रयुक्तं तक्रभक्षणादि विशेषकार्यमिति”[६९९] ।

‘हशश्वतोर्लङ् च’[७००] इति सूत्रस्थं लङ्विधानमस्या ज्ञापकम् । इयमनित्या ‘न ल्यपि’[७०१] इति लिङ्गात् । ल्यपि परे घुमास्थादेरीत्त्वं नेति तदर्थः । यदि सामान्यातिदेशे विशेषस्यातिदेशो न स्यात्तदा ‘प्रदाय’ इत्यादौ ‘स्थानविदादेशोऽनल्विधौ’ इत्यनेन क्त्वास्थानिके ल्यपि क्त्वागतस्य सामान्यधर्मस्य प्रत्ययत्वादिधर्मस्यातिदेशे सत्यपि तदगतविशेषधर्मस्य कित्त्वस्यातिदेशाभावेन कित्परत्वभावादेव ‘घुमास्था’ इतीत्त्वाप्राप्त्या ‘न

---

२४९. अष्टा. – ३/३/१३२ ।

२५०. परिभाषेन्दुशेखरः, परि. – ११० ।

२५१. पुरुषोत्तमदेवकृतपरिभाषावृत्ति, परि. – ६४ ।

२५२. अष्टा. – ३/२/११६ ।

२५३. तत्रैव – ६/४/६९ ।

ल्यपी’ति सूत्रं व्यर्थं स्यात्तदस्या अनित्यत्वं ज्ञापयति । तेन ‘स्थानिवत्’ सूत्रेण विशेषातिदेशोऽपि भवति ।

तदुक्तं भाष्ये पतञ्जलिना – “सामान्यातिदेशे विशेषानतिदेशः । सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति । तद्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यम् इति सामान्यं यद्ब्राह्मणकार्यं, तत् क्षत्रियेऽतिदिश्यते । यद्विशिष्टं माठरे कौडिण्ये वा, न तदतिदिश्यते, यद्विशिष्टं वलादेरिति न तदतिदिश्यते । . . . अनल्विधाविति पुनरुच्यमाने इहापि प्रतिषेधो भविष्यति प्रदीव्य प्रसीव्येति, विशिष्टं ह्येषोऽलमाश्रयते वलं नाम । इह च प्रतिषेधो न भविष्यति अग्रहीदिति, विशिष्टं ह्येषोऽलमाश्रयते इटं नाम”[७०२] इति । एतेन भाष्येण स्थानिवदादेशोऽनल्विधौ इत्यत्र यत्नाद् विशेषातिदेशो भवतीति बोधितमेवेति ।

## ‘श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्’ । ११ ।

श्रुतशब्दः प्रत्यक्षार्थवाचकः । अतः प्रत्यक्षानुमानयोः प्रत्यक्षस्यैव प्रबलत्वमिति न्यायार्थः । पूर्वमस्माकं देशे राजानः अतीव सम्पन्ना आसन् । ते च तदा स्वीयभवनादि–कमतीवोत्कृष्टं निर्मितवन्तो यानि च साम्प्रतमपि तथैव दृश्यन्ते; किन्तु तेषां सुखादीनां मूलं तेषां प्रजाख्याः सम्पत्तय आसन्, ताश्च सम्पत्तयस्तेभ्यो निगृहीता इति ते साम्प्रतमतीव दारिद्र्यमुपगताः । अधुना तेषां सन्निधौ गतः कश्चन जनो भवनादीनां दर्शनेन तानैश्वर्यशालिनः सम्पन्ना इमे इति यद्यनुमिनोति, तदा तदसङ्गतमप्रामाणिकं च स्यात्, यतो हि राज्याद्यपहरणेन ते प्रत्यक्षमेव दारिद्र्यमुपगता अवलोक्यन्ते ।

एवमेव शास्त्रेऽप्यनुमीयमानापेक्षया प्रत्यक्षमवलोक्यमानो बलवान् भवति । प्रियसक्थ्ना ब्राह्मणेत्येत्यत्र ‘अस्थिदधिसक्थि’[७०३] इति सूत्रेणानङ् न स्यादङ्गस्य नपुंसक–त्वाभावादिति चेन्न ‘श्रुतानुमितयोः श्रुतसम्बन्धो बलीयान्’[७०४] इति परिभाषास्वीकारेणादोषः । ‘श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्’ इति जैमिनीयसूत्रानु–सारम् औचित्याच्च श्रुत्यपेक्षया लिङ्गादीनां दुर्बलत्वबोधनेन सूत्रेऽस्थ्यादीनां श्रुतत्वेन प्रथममुपस्थित्या नपुंसकपदार्थस्य तेनैवास्थ्यादिनान्वयः, न त्वनुमितेन लिङ्गप्रकरणादिना । इत्थं सक्थिशब्दस्य नपुंसके विद्यमानतयाऽङ्गस्य प्रियसक्थीत्यस्य नपुंसकेऽविद्यमानत्वेऽपि

---

२५४. महाभाष्यम्, स्थानिवत्सूत्रे – १/१/५६ ।

२५५. अष्टा. – ७/१/७५ ।

२५६. परिभाषेन्दुशेखरः, परि. – ११७ ।

अनङ् सिद्ध्यति । श्रुतेनैव सम्बन्धो नानुमितेन प्रकरणादिप्राप्तेन इति परिभाषातात्पर्यम् । न्यायसिद्धेयं परिभाषा । तथाहिलोके ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविष्टामिति माठरकौण्डिन्ययोः साक्षात् श्रुतेन परिवेषणेन ब्राह्मणत्वादनुमितं भोजनं बाध्यते ।

**'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' । १२ ।**

लक्षणं सूत्रं तच्चेह तात्पर्यानुपपत्त्या लक्षणया लक्षणनिष्पन्नार्थबोधकम् । तदाह 'लक्षणं लाक्षणिकमुपचारात्' इति । तेन लक्षणनिष्पन्नप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषार्थः ।

व्याकरणशास्त्रे केनचित् सूत्ररूपलक्षणेन क्रियमाणरूपापेक्षया पूर्वतः प्रतिपदोक्तरूपेण सिद्धस्यैव रूपस्य ग्रहणं भवति । 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु'[७०५] इति सूत्रेण गा–स्था–घुसंज्ञक–पा–भूधातुभ्यः परस्य सिचो लुक् स्यात् परस्मैपदेषु इति सूत्रार्थः । भ्वादिगणीयपठितस्य 'पा पाने' इत्यस्य लुङि निष्पन्नरूपे 'अपात्' इत्यत्र 'गातिस्थाघुपा' इति सिचो लुग् भवति तथा भ्वादौ पठितात् 'पै पोषणे' इत्यस्मादपि लुङि अपासीदित्यत्रापि प्राप्नोतीति चेन्न 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति स्वीकारात् 'पै पोषणे' इत्यत्र 'आदेच उपदेशेऽशिति' इत्यनेनात्वे कृते निष्पन्नस्य 'पा' इत्यस्य लाक्षणिकत्वान्न ग्रहणं 'गातिस्था' इति सूत्रे किन्तु प्रतिपदोक्तस्यैव 'पा' इत्यस्य । तदुक्तं नागेशाचार्येण – ''तत्तद्विभक्तिविशेषाद्यनुवादेन विहितो हि समासादिः प्रतिपदोक्तस्तस्यैव ग्रहणं शीघ्रोपस्थितिकत्वात् । द्वितीयो हि विलम्बोपस्थितिकः । पै इत्यस्य पा इति रूपं लक्षणानुसन्धानपूर्वकं विलम्बोपस्थितिकं पिबतेस्तु शीघ्रोपस्थितिकम् । इदमेव ह्येतत्परिभाषाबीजम्'[७०६] इति ।

न्यायोऽयं 'ओत्'[७०७] इति सूत्रभाष्ये प्रयुक्तः । तत्र हि यदि प्रकृतसूत्रेण ओदन्तनिपातस्य प्रगृह्यसंज्ञा क्रियते, तदा–अनदः अदः अभवत् – अदोऽभवत् इत्यादीनामप्योदन्ततया प्रगृह्यसंज्ञापत्तिराशङ्किता, प्रकृतन्यायेन समाहिता च । तथा च तत्रत्यं भाष्यम् – ओदन्तो निपात इत्यत्र तदन्तस्य प्रतिषेधो वक्तव्यः । अनदः अदः अदोऽभवत्,

२५७. अष्टा. – ४/२/७७ ।
२५८. परिभाषेन्दुशेखरः, 'लक्षणप्रतिपदोक्त' परि. – ११४ ।
२५९. अष्टा. – १/१/१५ ।

अतिरः तिरः अभवत् तिरोऽभवत् । न वक्तव्यम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवं भविष्यति”[७०८] इति ।

लोकेऽयं न्यायः प्रयुज्यते चिकित्सको रुग्णानां रोगस्य निधारणं द्विधा कर्तुं प्रयतते, नाडिनेत्रनखादीनां यस्मिन् रोगे यादृशं लक्षणं चिकित्साशास्त्रे वर्णितमस्ति तस्य पर्यालोचनेन, अपि च व्याधिपीडितस्य प्रतिपदोक्तकथनेन च । तत्र यदि तयोर्भेदः प्रतीयते चेत्तदाङ्गानां लक्षणेनानुमीयमाननिदानापेक्षया रोगिमुखेन प्रतिपदोक्तस्यैव प्राधान्यं स्वीक्रियते ।

अतएव रजतादिवच्चाकचिक्यादिलक्षणेनानुमितापि शुक्तौ रजतबुद्धिः, प्रत्यक्ष–दर्शनानन्तरं शुक्तिरियमित्युक्तौ शुक्तिबुद्ध्या रजतबुद्धेर्बाधोऽनुभवसिद्धः ।

**‘अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे’ । १३ ।**

‘प्रत्ययः’ इति सूत्रभाष्ये पतञ्जलिराह – ‘प्रत्यय इति महती संज्ञा क्रियते । संज्ञा च नाम यतो न लघीयः, कुत एतत् । लघ्वर्थं हि संज्ञाकरणम् । तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनमन्वर्थसंज्ञा यथा विज्ञायेत’[७०९] इति । प्रत्यायतीति प्रत्ययः । यदि प्रत्यायतीति प्रत्ययः, अविकादीनां प्रत्ययसंज्ञा न प्राप्नोति, न हि ते किञ्चित् प्रत्याययन्ति । एवं तर्हि प्रत्याय्यत इति प्रत्यय’ इति । एवं तर्हि उभयसाधनोऽयं कर्तृसाधनं कर्मसाधनश्च । प्रत्याययतीति प्रत्ययः तेन इच्छार्थकसनादिसंग्रहः, तृजादयस्तु कर्त्र्यर्थं प्रत्याययन्त्येव, प्रत्याय्यते इति प्रत्यय इति व्युत्पत्त्या च स्वार्थिकप्रत्ययसंग्रहः । उभयत्रापि निपातनाण्णिचोऽचि लुक् इति ।

कर्तृसाधनस्य प्रत्ययशब्दस्य स्वीकारे प्रत्यायतीति व्युत्पत्त्या यः किञ्चिदर्थं प्रत्याययति स एव प्रत्ययः स्यात् तथा चाविक इत्यत्र कस्यात्यन्तस्वार्थिकस्य प्रत्ययसंज्ञा न स्यात् इति चेन्न ‘अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे’[७१०] इति परिभाषा स्वीकारात् । अर्थात् येषामर्थाः न निर्दिष्टाः सूत्रादिना, ते स्वार्थे स्वीयप्रकृत्यर्थे भवन्ति यस्यार्थः प्रकृत्या प्रत्याय्यते सोऽपि प्रत्यय इति कर्मसाधनस्यापि प्रत्ययशब्दस्य स्वीकारादत्यन्तस्वार्थिकस्यापि प्रत्ययत्वम् । महासंज्ञाबलादर्थाकाङ्क्षायामन्यानुपस्थितिः अस्या बीजम् ।

---

२६०. महाभाष्यम्, ‘ओत्’ – १/१/१५ ।

२६१. महाभाष्यम्, ‘प्रत्ययः’ – ३/१/१ ।

२६२. परिभाषेन्दुशेखरः, परि.– १२३ ।

'सुपि स्थः' इति सूत्रस्थं भाष्यं यथा – "न चान्यस्मिन्नर्थे आदिश्यते । अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थे भवन्तीति । तद्यथा 'गुप्तिज्किद्भ्यः सन्', यावादिभ्यः कन्"[७११] इति ।

**'योगविभागादिष्टसिद्धिः' । १४ ।**

योगस्य सम्बन्धस्य विभागो विच्छेदो योगः, तस्माद्योगविभागाद् इष्टस्य समीहितार्थस्य सिद्धिर्निष्पत्तिः । अथवा योगस्य सूत्रस्य विभागः । शब्दसाधुत्वार्थं महर्षिपाणिनिना व्याकरणशास्त्रे बहूनि सूत्राणि प्रणीतानि । तत्र यदि कस्यचित् प्रयोगस्य महर्षिकृतसम्बन्धविशिष्टेन सूत्रेण न जायते तदा तं योगं विभज्य योगान्तरेणापि साधुत्वं सम्पाद्यते । तद्यथा – 'सुपि स्थः'[७१२] इति सूत्रस्य योगविभागेन 'आखूत्थः' इति सिध्यति । तत्र चेत्थं – 'सुपि स्थः' इत्येकस्मिन् योगे सति 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुवर्तनात् कर्तरि कप्रत्यये समस्थः इत्यादीनां सिद्धत्वेऽपि आखूत्थः इत्यादीनां भावप्रत्ययान्तानाम–सिद्धिरेव स्यात् । अतः सुपीति प्रथमो योगः, 'स्थः' इति द्वितीयः । प्रथमे च योगे कर्तरि कृदित्यतः कर्तरीत्यनुवर्तनात् तस्मिन् कप्रत्यये द्वाभ्यां पिबतीति 'द्विपः' इत्यादीनां सिद्धिः । द्वितीये च योगे योगविभागसामर्थात् कर्तरीत्यस्यानुवर्तनात् भावे कप्रत्यये आखूनामुत्थामिति विग्रहे 'आखूत्थ' इत्यस्यापि सिद्धिः । न्यायोऽयं 'सुपि स्थः' इति सूत्रभाष्ये प्रयुक्तः । तथा च तत्रत्यं भाष्यम् – "'सुपि स्थः' इत्यत्र भावे चेति वक्तव्यम् । इहापि यथा स्याद् आखूत्थो वर्तते, श्येनोत्थः शलभत्थः । तत्तर्हि वक्तव्यम्? न वक्तव्यम्, योगविभागः करिष्यते – 'आतोऽनुपसर्गे कः' आतोऽनुपसर्गे को भवति । ततः सुपि चातः को भवति । कच्छेन पिबति कच्छपः । कटाहेन पिबति कटापः द्वाभ्यां पिबति द्विपः । ततः 'स्थः' स्थश्च को भवति । किमर्थमिदम्? भावे यथा स्यात्"[७१३] इति ।

पूर्वयोगस्य यत् कार्यं तदेवोत्तरयोगेन सम्पाद्यते, पूर्वयोगस्य विषयो व्यापको भवति, उत्तरयोगस्य च व्याप्य इति सर्वत्र योगविभागस्थले उत्तरयोगो व्यर्थः सन् पूर्वयोगस्य नियामकः । अतएव पूर्वयोग इष्टस्थले एव प्रवर्तते नानिष्टस्थले इति सिद्धं योगविभागादिष्टसिद्धिरिति नानिष्टे तस्यातिप्रसङ्गः । तदुक्तं नागेशाचार्येण – "इष्टसिद्धिरेव न

---

२६३. महाभाष्यम्, 'सुपि स्थः' – ३/२/४ ।

२६४. तत्रैव ।

२६५. महाभाष्यम् – ३/२/४ ।

त्वनिष्टापादानं कार्यमित्यर्थः । तत्तत्समानविधेयकद्वितीययोगेन विभक्तस्यानित्यत्वज्ञापन-मेतद्बीजम्"[२६६] इति ।

लोके त्वस्य न्यायस्य महानुपयोगो दृश्यते । अतएव यत्रातिप्रबलः शत्रुः सामदानदण्डरूपोपायेभ्यो न पराजयते, तदा तत्र भेदनीतिरेवान्तिमोपायरूपेण व्यवह्रियते । इयञ्च नीतिः कुशलनेतृभिः प्रयुक्ता प्रायः सफलैव परिलक्ष्यते । यथा भारतवर्षः चिरात् सैन्यबलेभ्यः पाकदेशस्य पराजये प्रवृत्तोऽपि न तथा पूर्वं सिद्धिमवाप यथा गताब्दे भेदनीत्या । पाकिस्थानदेशस्य बङ्गलाख्येन योगविभागेन शत्रुशक्तिः समूला विनष्टेति क्षीणशक्तिकः पाकदेशो भारतोपरि तथाचरितुं न शक्नोति यथा पूर्वं तेनाचरितम् । अधुना राजनीतौ योगविभागादिष्टसिद्धिः प्रायश्चः दृश्यते ।

**'ज्ञापकसिद्धं न सर्वत्र' । १५ ।**

ज्ञापकसिद्धस्यासार्वत्रिकत्वे युक्तिः का? यदि ज्ञापकसिद्धं सार्वत्रिकं स्यात्तदा तत्स्पष्टं साक्षात् शब्देनैव पठितव्यं स्यात्, तथा अपठित्वा इङ्गितेन तत्तदनुमानसूचकचिह्नेन बोधनमेव तस्यानित्यत्वं सूचयति । इत्थं यत्र ज्ञापकसिद्धपरिभाषाया अप्रवृत्तिः । इत्थं ज्ञापकसिद्धं परिभाषयानिष्टं नापादनीयम् इति ।

अत्र पुरुषोत्तमदेव आह– 'इदमप्युचितमेव । ज्ञापकं हि नाम न वाचकं, किं तर्हि इङ्गितेन सूचकं क्वचिदेव इष्टसिद्धावाश्रीयते न सर्वत्रेति । युज्यते ज्ञापकसिद्धं न सार्वत्रिकमिति । तेन ज्ञापकसाधितमात्मनेपदानित्यत्वादि न सर्वत्र प्रयोज्यम् । किन्तु विशिष्टप्रयोगदर्शनात् क्वचिदेव'[२६७] इति ।

शास्त्रे अस्य न्यायस्य बहुशः प्रयोगः सम्भवति । तद्यथा 'यासुट्परस्मैपदेषूदात्तो ङिच्च' इति सूत्रे कृतेन ङिद्ग्रहणेन ज्ञाप्यते यत् 'क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेधः प्रवर्तते' इति । ज्ञापिते च वचने ङिद्ग्रहणस्य स्वांशे चारितार्थ्यं जायते । फलञ्च 'वक्षमाणा' इत्यत्र टिलादुगित्त्वाच्च ङीपः प्रवृत्तिरूपम्; किन्तु इदं ज्ञापनं सर्वत्र न प्रवर्तते । अतएव 'न ल्यपि' इतीत्वविधायकं सूत्रं साफल्यमावहति । अन्यथा तत्रापि ल्यपि कित्त्वानयने स्थानवद्भावस्य निषेधात् कित्त्वाभावादेवेत्वाप्राप्त्या निषेधविधायकसूत्रस्य वैयर्थ्यमेव स्यात् ।

---

२६६. परिभाषेन्दुशेखरः, परि. – १२४ ।

२६७. परिभाषावृत्तिः, परि. – ११८ ।

लोकेऽयं न्यायो बहुशः प्रयुज्यते – लोके यथा पूर्वं वङ्गदेशस्य पाकदेशेन सह महान् युद्ध समजनि । तस्मिन् च युद्धे वङ्गदेशस्य सर्वतोभावेन विनाशः सञ्जात इति तद्देशस्य नायकाः दारिद्र्यवशात् स्वराष्ट्रोत्थानं कर्तुमसमर्थाः सन्तो विश्वस्य सर्वेभ्यो देशेभ्य

इदं विज्ञापितवन्तो यदस्माकं देशः साम्प्रतमतीव विपन्नः स्वशक्त्या स्वोत्कर्षं कर्तुमसमर्थ इति सर्वे देशाः मदीयं साहाय्यं कुर्युः । यद्यपीदं विज्ञापनं सर्वेभ्यो देशेभ्यः सामान्यरूपेण सञ्जातम्, तथापि भारतसदृशानि यानि मित्रराष्ट्राणि तान्येव साहाय्यमकुर्वन्, न तु पाकसदृशाः शत्रवो नाप्युदासीनाः । अथवा जटाधारिणं पुरुषं दृष्ट्वा जटाभिश्च तापसत्वं परिज्ञाय तापसोऽयमिति सामान्यधिया जनाः पूजयन्ति । परम् यत्र तत्र जटाधारित्वं तत्र तत्र तापसत्वमिति नात्र नियमः, क्वचिद्गुप्तचरेषु धूर्तेष्वपि तद्दर्शनात् तापसत्वस्य चाभावदर्शनात् । एवं शास्त्रेऽपि 'ज्ञापकसिद्धं न सर्वत्र' इति सिध्यति ।

**'एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति' ॥ १६ ॥**

'स्वामीश्वराधिपति'[७१६] इत्यनेन स्वामीश्वरादिभिः सप्तभिः शब्दैर्योगे षष्ठीसप्तम्यौ विधीयेते । तेन गवां स्वामी देवदत्तः गोषु वा स्वामीति प्रयोगो जायते । यदि च द्वयोर्वस्तुनोः स्वामीति विवक्ष्यते तदा गवामश्वानाञ्च स्वामी गोष्वश्वेषु स्वामीति प्रयोगो जायते । किन्तु यदानेन षष्ठीसप्तम्योरुभयोर्विधानमस्ति तदा सहप्रयुक्ते एकत्र षष्ठी, अपरत्र च सप्तमी कथं न? गोष्वश्वेषु स्वामीति यथा प्राप्नोति गवामश्वेषु च स्वामीति प्रयोगश्चेत् न 'एकस्या आकृतेश्चरितः प्रयोगो द्वितीयस्यास्तृतीयस्याश्च न भविष्यति'[७१७] इति परिभाषास्वीकारात् । चरितः प्रयोगः सहप्रयोग एकस्या आकृतेर्भरिष्यति । द्वितीयस्यास्तृतीयस्याश्च आकृतेः प्रयोगो न भविष्यति । यादृशाकृतिकः शब्दः यदर्थबोधनाय पूर्वमुपक्रान्तस्तदाकृतिभिन्नाकृतिकः शब्दस्तदर्थबोधनाय प्रयुक्तो न भविष्यति इति परिभाषार्थः । परिभाषयानया स्वस्वामिभावसम्बन्धो गवां स्वामीति षष्ठ्या प्रतिपादयि–तुमुपक्रान्ते, अश्वस्वामित्वप्रतिपादनाय षष्ठ्येव भवति अश्वानाञ्चेति ।

अत्राचार्यकैयट आह – 'वेदलोकेप्रसिद्धोऽयं न्यायः । यथाहि खादिरे बध्नाति, पालाशे बध्नाति इत्यादौ विकल्पितेषु साधनेषु येनैव साधनेनोपक्रान्ता क्रिया तेनैव निर्वाह्यते । तत्र यदि कदाचित् खदिरस्य भ्रेषो भवति तदा तत्सदृशः बुबुरः सादृश्यात्

---

२६८. अष्टा. – २/३/२९ ।

२६९. परिभाषेन्दुशेखरः, परि. – १२८ ।

खदिरबुद्ध्या प्रतिनिधीयते न तु पलाशः परिगृह्यते । साधनभेदेन क्रियान्यत्वादुप– क्रान्तक्रियानिर्वाहप्रसङ्गात् । लोकेऽपि यदा स्वस्वामिभावप्रतिपादनाय गवां स्वामीति षष्ठ्युपक्रम्येत, तदाश्वानां चेत्यत्रापि तत्प्रतिपादनाय सैव निर्वाह्यते'[२७०] इति ।

# वाचनिकी परिभाषा

वाचनिकी परिभाषा द्विधा विभक्तुं शक्यते –

१. वचनरुपेण पठिता परिभाषा,

२. सूत्रविश्लेषणविशेषसाधिता परिभाषा चेति । आदौ वचनरूपेण पठिता परिभाषा विचार्यते ।

**'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं बोधयन्ति' । १ ।**

'अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमि'त्यस्या अपवादरूपेण इयं परिभाषावतरति । अर्थवता अनर्थकेनेत्युभयत्र 'प्रकृत्यादिभ्य उपसंख्यानम्' इत्यभेदे तृतीया । तेन प्रकृत्या चारुरित्यत्र यथा प्रकृतिश्चारुरिति शक्यते वक्तुं, तथा अनिनस्मन्ग्रहणनि सार्थवन्ति चानर्थकानीति । तदन्तविधिमित्यस्य ते प्रत्ययाः अन्ता येषां तानि तदन्तानि तेषु विधिस्तमिति विग्रहः । अनिनस्मन्ग्रहणानि सार्थकानि अर्थरहितानि वा भवन्तु उभयविधान्यपि अन्नन्तेन्नन्तासन्तमन्नन्तानि मन्यन्ते तत्प्रयुक्तानि कार्याणि च लभ्यन्ते इति परिभाषार्थः । अर्थात् शब्दशास्त्रेऽनिनस्मन्नन्तपदघटका अनिनस्मनः सार्थका अनर्थकाश्चोभयविधा ग्राह्याः एतद्विषयेऽर्थवद्ग्रहणपरिभाषा न प्रवर्तते इति तात्पर्यम् । यद्यपि अन्नादयः सर्वे लोके निरर्थका एव तथाप्येषामर्थवत्ता व्याकरणशास्त्रसम्मता अस्त्येव । यथा 'राजते' इति विग्रहे राज्धातोः 'कनिन् युवृषितक्षिराजि' इत्युणादिसूत्रेण कनिन्प्रत्ययेन निष्पन्ने राजन् शब्देऽन्प्रत्ययः अर्थवान्, सोधाताः 'सर्वधातुभ्यो मनिन्' इत्युणादिसूत्रेण मनिन्प्रत्ययेन निष्पन्ने सामशब्देऽन् अनर्थकः अनया परिभाषया उभयोः 'अल्लोपोऽनः' इति सूत्रेणान्नन्तपदेन ग्रहणाद् राज्ञा साम्ना इत्यभयत्रानोऽकारस्य लोपो जायते । इन् यथा दण्डी वाग्मी । उभयत्रापि 'इन् हन् पुर्षार्यम्णाम्' इत्यनुवृत्तौ 'सौ च' इत्यनेन दीर्घः । असन्तं

---

२७०. महाभाष्यप्रदीपे, 'कृञ्चानुप्रयुज्यते लिटि' – ३/१/४० ।

यथा सुपयाः सुश्रोताः । 'सर्वत्रात्वसन्तस्ये'त्यनेन दीर्घः । मनन्तं यथा सुपामा, सुप्रमिथा । सार्थके च निरर्थके च मनि 'मनः' इति सूत्रेण ङीप्प्रत्ययनिषेधः ।

परिभाषेयं 'येन विधिस्तदन्तस्य' इति सूत्र भाष्ये वचनरूपेण पठिता विलोक्यते । तथाहि "अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति । अन्–राज्ञेत्यर्थवता, साम्नेत्यनर्थकेन । इन्–दण्डीत्यर्थवता, वाग्मीत्यनर्थकेन । अस्–सुपया इत्यर्थवता, सुस्रोता इत्यनर्थकेन । मन्–सुशर्मेत्यर्थवता, सुप्रथिमेत्यनर्थकेन"[७१९] इति ।

इयमर्थवद्ग्रहणपरिभाषाया बाधिका, अपवादत्वात् । यद्यपि वचनरूपेण पठिता तथाप्यत्र 'कार्मस्ताच्छील्ये'[७२०] इति कार्मनिपातनमस्या एकदेशानुमत्या ज्ञापकमन्वेष्यम् । तच्च निपातनम् 'अन्' इति प्राप्तप्रकृतिभावबाधनार्थं क्रियते । यदि चेयं परिभाषा न स्यात्तदात्रानो निरर्थकत्वाद्ग्रहणाभावादन् इति प्रकृतिभावाप्राप्त्या 'नस्तद्धिते' इति टिलोपेनैव सिद्धे तन्निपातनाय रचितं सूत्रं व्यर्थं स्यात् ।

परिभाषावृत्तौ इयं परिभाषा स्वीकृता । तत्रोक्तं "लक्ष्यस्थित्या व्याप्तिन्यायाश्रयमूलकं कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते । अर्थवत्परिभाषाया अनित्यत्वमस्याः मूलम् । तच्चाप्त्रादिसूत्रे 'तुरिष्ठेमेयःसु' इति वत् तृ इति सामान्यग्रहणेन सिद्धे 'अवर्णस्रसावि'ति अर्वादेशतृशब्दपरिहारार्थं कृतेन तृन्तृचोर्भेदेनोपादानेन ज्ञापितम् । यदि हि अर्थवत् परिभाषा नित्या स्यात्तदा तयैवार्वादेशतृशब्दनिरासे सिद्धे तदर्थं तृण्तृचोर्भेदेनोपादानमनर्थकं स्यादिति । अत्रान्ग्रहणं तावदर्थवदनर्थकञ्च तदन्तविधिं प्रयोजयन्ति"[७२१] इति ।

**'क्वचिदेकदेशोऽप्यनुवर्तते' । २ ।**

एकत्र योगः सम्बन्धस्तेन निर्दिष्टानामन्वितानां क्वचिदेकदेशोऽपि अनुवर्तते । यत्रैकदेशानुवृत्यैव लक्ष्यसिद्धिः अव्याप्त्यतिव्याप्त्यसम्भवदोषाश्च न भवन्ति तत्र तावत्येवांशे स्वरितत्वप्रतिज्ञा कियते । तेन तावदंशस्यैवैकदेशानुवृत्तिः सम्भवतीति तात्पर्यम् । अस्मिन्न्याये 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः' इति न्यायात् एकयोगनिर्दिष्टानाम् इत्यस्यानुवृत्तिः क्रियते । एकस्मिन् विशेष्यविशेषणभावापन्न–

२७१. महाभाष्यम्, 'येन विधिस्तदन्तस्य' – १/१/७२ ।

२७२. अष्टा. – ६/४/१७२ ।

२७३. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ७७ ।

त्वेनार्थसम्पादने, योगः सम्बन्धो येषां तेष्वेकदेशोऽप्यनुवर्तते इति न्यायार्थः । अत्र कैयटेनोक्तं परिभाषार्थं कुर्वता–एकस्मिन्नर्थे योगः सम्बन्धस्तेन निर्दिष्टयोः समुदायाभि–धायिद्वन्द्वनिर्दिष्टयोः इत्यर्थः द्वन्द्वस्य तदर्थस्य चैकत्वादेकदेशानुवृत्तिर्न सम्भवतीति भावः । एकसूत्रनिर्दिष्टानां त्वेकदेशानुवृत्तिर्दृश्यते । अर्थाधिकारपक्षेऽर्थस्यैकत्वाद् विच्छेदाभावान्न स्यादेकदेशानुवृत्तिः । शब्दाधिकारपक्षे तु यस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातं तत्सदृशशब्दान्तरसन्निधानं योगोत्तरं प्रतीयते इति दोषाभावः । अत्र कैयटग्रन्थे 'समुदायाभिधायिद्वन्द्वनिर्दिष्टयोरित्यर्थकरणं न युज्यते 'अलुगुत्तरपदे' इत्यवतरणभाष्य–विरोधात्'[७२२] इत्याह । समासरहितेभ्यः सूत्रेभ्यस्तु अर्थाधिकारपक्षे शब्दाधिकारपक्षे वा लक्ष्यानुसारं स्वरितत्वप्रतिज्ञाबलाश्छब्दानुवृत्तिर्भवत्येव इति ।

लोकेऽप्यस्य न्यायस्य समन्वयो यथा – एकस्मादविभक्तपरिवारादपि कस्मिंश्चिद् विवाहाद्युत्सवे सति निमन्त्रणे एक एव गच्छतीति, सतीर्थेष्वन्तेवासिषु यं गुरुरुपदिशति स एव कस्मिंश्चित् कर्मणि प्रवृत्तो भवति । न्यायोऽयं 'दामहायनान्ताच्च' इति सूत्रभाष्ये प्रयुक्तः । तत्र एष प्रसङ्गः – प्रकृतसूत्रेण 'द्विदाम्नी' इत्यादावेव ङीपः प्रवृत्तिः स्यान्न तु उद्दामा इत्यादावित्येतदर्थं 'संख्यादेरि'ति इति वक्तव्यमित्याशङ्कितम् । ततः 'संख्याव्ययादेर्ङीप्' इति सूत्रतस्तदनुवृत्तिं स्वीकृत्य संख्यादेर्ग्रहणस्यानावश्यकत्वं प्रतिपदितम् । एतदग्रे यदि संख्यादेरित्यनुवर्तते तदा एकयोगनिर्दिष्टानामित्यादिनियमेना–व्ययादेरप्यनुवृत्तौ अनिष्टापत्तिराशङ्किता । ततश्च प्रकृतन्यायेनैकदेशानुवृत्तिं स्वीकृत्यानिष्टापत्तिर्वारिता । तथाहि तत्रत्यं भाष्यम् – 'दामहायनान्तात्संख्यादेः' दामहायनान्तात्संख्यादेरिति वक्तव्यम् । इह मा भूत् उद्दामा वडवेति । तत्तर्हि संख्यादेरिति वक्तव्यम्? न वक्तव्यम्, प्रकृतमनुर्वर्तते । क्व प्रकृतम्? 'संख्याव्ययादेर्ङीपः' इति । यदि तदनुवर्तते, अव्ययादेरपि प्राप्नोति । नैष दोषः । संख्यादेरित्यनुवर्तते, अव्ययादेरिति निवृत्तम् । कथं पुनरेकयोगनिर्दिष्टयोरेकदेशोऽनुवर्तते, एकदेशो न? एकयोगनिर्दिष्टानामप्येकदेशानुवृत्तिः भवति । तद्यथा तस्य पाकमूले 'पील्वादिकर्णादिभ्यः कुणब्जाहचौ'' 'पक्षात्तिः' इत्यत्र मूल इत्यनुवर्तते पाक इति निवृत्तम्'[७२३] इति ।

---

२७४.महाभाष्यप्रदीपे, 'पक्षात्तिः' – ५/२/२५ ।

२७५. महाभाष्यम् – ४/१/२७ ।

परिभाषावृत्तौ ज्ञापकत्वेनेयं प्रतिपादिता –"ज्ञापकञ्चात्र तस्मिन्निति निर्दिष्टे पूर्वस्य इति इतौ प्रकृते पुनरितिकरणं 'तस्मादित्युत्तरस्य' इति । यदि हि सहैव पदानामनुवृत्तिर्भवति तदा निर्दिष्टग्रहणवदितिकरणमपि पूर्वसूत्रादेवानुवर्तिष्यत इति किमितिकरणेन । तत् कुर्वन्नाचार्यो ज्ञापयति क्वचिदेकदेशोऽप्यनुवर्तते एव । तेन निर्दिष्टग्रहणमेव केवलमनुवर्तते नेतिकरणमिति"[७२४] इति ।

**'प्रत्ययग्रहणे चापञ्चम्याः' । ३ ।**

येन विधिस्तदन्तस्य इति सूत्रस्यास्याः परिभाषायास्तदादितदन्तेतिविधेयांशद्वये तदन्तांशस्यापवादः पठितः 'प्रत्ययग्रहणे चापञ्चम्याः'[७२५] इति । 'प्रत्ययग्रहणे यस्मात्स विहित' इति सिद्धे तदन्तविधावपञ्चस्या इति प्रतिषेधार्थं वचनम् । प्रत्ययग्रहणे सति तदन्तविधिः अपञ्चम्याः भवति न पञ्चम्या इत्यक्षरार्थः । यत्र पञ्चम्यन्तात् परः प्रत्ययः कार्यान्तरविधानाय परिगृह्यते तत्र तदन्तविधिर्मा भूत् । अतएव 'दृषत्तीर्णा' इत्यादौ धातुतकारस्य 'रदाभ्याम्' इति न नत्वम्, रदाभ्यामिति पञ्चम्यन्तात् परः प्रत्ययः निष्ठातकारः नत्वरूपकार्यान्तरविधानाय गृह्यते । अतएवात्र प्रत्ययग्रहणे चापञ्चम्या इति तदन्तांशोपस्थितिर्निषिध्यते । अन्यथा 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमि'ति परिभाषया यथा तदादिरित्युपतिष्ठते तथा तदादिविशेष्यकतदन्तोपस्थितौ अर्थात् तदादितदन्तोभयांशोवस्थितौ निष्ठा यस्मात् विहिता तदादि तदन्तं यच्छब्दस्वरूपं तदवयवीभूतो यस्तकारः रेफदकाराभ्यां परस्तस्य नत्वं स्यादिति सूत्रार्थो जाते तृधातोः क्तप्रत्यये 'ऋत इद्धातोः' इतीत्वे 'हलि च' इति दीर्घे 'दृषत् तीर् त' इति स्थिते 'दृषत्तीर्त' इति तदवयवीभूतस्तकार उभयत्रापि वर्तते, तत्र प्रथमो दकारात् परो, द्वितीयश्च रेफात् पर इति उभयस्यापि नत्वं स्यात् । 'प्रत्ययग्रहणे चापञ्चम्याः' इति परिभाषायाः स्वीकारे तु अनया तदन्तांशस्य निषेधात् निष्ठा यस्मात् विहिता तदादिरेफान्तं यच्छब्दस्वरूपं तस्मात् परो यस्तकारस्तस्य नत्वमित्यर्थे प्रत्ययतकारस्यैव नत्वं भवति ।

यत्र पञ्चम्यन्तात् प्रत्ययो भवति तत्र तदन्तविधिर्न भवति । एवं हि व्याख्यायमाने ञितश्च तत्प्रत्ययादित्यत्र तत्प्रत्ययादञि विधीयमाने तस्यैवाङ्गसंज्ञायां वृद्धिस्वरौ स्यातां न तु

---

२७६. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – २५ ।
२७७. परिभाषेन्दुशेखरः, परि. – २५ ।

तदन्तस्येतीति । तत्र गार्ग्यायण इत्येवोदाहरणम् । गार्ग्यशब्दाद्यञन्ताद् फग्विधानात् । न त्वत्र परमगार्ग्यशब्दात् प्रत्ययस्तस्य यञन्तत्वाभावात् । तस्माच्च फकि विधीयमाने 'परमगार्ग्यायण' इत्यनिष्टरूपप्रसङ्गः । तस्मादेतन्न्यायव्युत्पादनार्थं भाष्ये परमगार्ग्यायण इत्युपन्यस्तम् । 'स्यतासी लृलुटोरि'त्यत्र धातोरित्यधिकारादपञ्चम्या इति निषेधात् लृलुटोर्वा प्रधान्येनाश्रयणात्तदन्तविध्यभावः ।

## 'स्त्रीप्रत्यते चानुपसर्जने न' । ४ ।

यत्र लक्ष्येऽनुपसर्जनस्त्रीप्रत्ययस्तमादाय प्रवृत्तिकाले शास्त्रे तदादिनियमो न भवति किन्तु तदेव शास्त्रं यदा यत्र लक्ष्ये उपसर्जनस्त्रीप्रत्ययस्तत्र तादृशं स्त्रीप्रत्ययमभिलक्षीकृत्य प्रवर्तते तदा तदादिनियमो भवतीति । अथवा अनुपसर्जनस्त्रीप्रत्ययविषयकवाक्ये तदादिविधिर्न, उपसर्जनस्त्रीप्रत्ययविषयकवाक्ये तदादिविधिर्भवत्येवार्थः । तदुक्तं नागेशाचार्येण – "स्त्रीप्रत्यय इति विषयसप्तमी । यः स्त्रीप्रत्ययः स्त्रियं प्राधान्येनाह तत्र तदादिनियमो न । यस्त्वप्राधान्येनाह तत्र तदादिनियमोऽस्त्येवेत्यर्थः । प्रत्यासत्त्या यस्य समुदायस्य स्त्रीप्रत्ययान्तत्वमानेयं तदर्थं प्रत्यनुपसर्जनत्वमेवैतत्परिभाषाप्रवृत्तौ निमित्तम्"[२७८] इति । "येयं प्रत्ययग्रहणपरिभाषा सा हि स्त्रीप्रत्ययेन अनुपसर्जनेन ग्राहिका न भवति । अतः स्त्र्यधिकारविहिते प्रत्यये संघातोऽपि गृह्यते न तु यतः स्त्रीप्रत्ययस्तदादेरिवेति वाक्यार्थः"[२७९] इत्येवं परिभाषावृत्तावलोचितम् ।

ननु परमकारीषगन्धीपुत्र इत्यत्रैव अतिकारीषगन्ध्यापुत्र इत्यत्र 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे' इत्यनेन सम्प्रसारणं कुतो न भवतीत्यत आह 'स्त्रीप्रत्यते चानुपसर्जने न' इति ।

करीषस्यैव अथवा करीष इव गन्धो यस्येति विग्रहे बहुव्रीहौ 'उपमानाच्च' इति समासान्त इकारे कृते निष्पन्नात् करीषगन्धिशब्दात् करीषगन्धेरपत्यं स्त्रीत्यर्थे अण्प्रत्यये आद्यचो वृद्धौ 'अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे'[२८०] इत्यणः ष्यङादेशे भसंज्ञायां 'यस्येति च' इति इकारलोपे चापि कारीषगन्ध्या इति स्थिते परमा चासौ कारीषगन्ध्या इति

---

२७८. परिभाषेन्दुशेखरः, 'स्त्रीप्रत्यते चानुपसर्जने न', परि. – २७ ।

२७९. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ४५ ।

२८०. अष्टा. – ४/२/७८ ।

विग्रहे 'सन्महत्परमः' इति कर्मधारयसमासे कृते सिद्धस्य परमकारीषगन्ध्याशब्दस्य इत्यवस्थायां 'ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे'[७२९] इति सम्प्रसारणेन इकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'सम्प्रसारणस्य' इति दीर्घे परमकारीषगन्धीपुत्र इति सिध्यति । एवं कारीषगन्ध्या इत्यवस्थायां ततस्तामतिक्रान्तेत्यर्थेः 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासेन अतिकारीषगन्ध्या, ततः अतिकारीषगन्ध्यायाः पुत्रः 'अतिकारीषगन्ध्यापुत्रः' इति रूपं भवति । अत्र तु न सम्प्रसारणम् । अनुपसर्जने नेति वचनात् उपसर्जनस्त्रीप्रत्ययान्तस्य प्रत्ययग्रहणपरिभाषैव प्रवर्तते अतिकारीषगन्ध्यापुत्रः अतिकारीष–गन्ध्यापतिरिति । हल्ङ्यादिसूत्रे दीर्घग्रहणात् तु क्वचिदुपसर्जनस्त्रीप्रत्ययान्तेऽपि प्रत्ययग्रहणपरिभाषा नापक्ष्यते ।

इयं परिभाषा न न्यायसिद्धा न वा ज्ञापकसिद्धा किन्तु भाष्ये वचनरूपेण पठितत्वाद् वाचनिक्येव । तथा च 'ष्यङः सम्प्रसारणमि'ति सूत्रभाष्ये इमां परिभाषां एवमालोचयति – "इहापि तर्हि न प्राप्नोति कारीषगन्धीपुत्रः कारीषगन्धीपतिरिति । किं कारणं पूर्वं पदमित्युच्यते । न ह्यत्र ष्यङ् पूर्वपदमस्ति । ष्यङन्तमेतत् पूर्वपदम् । कथम्? । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति। यदि प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीत्युच्यते । परमकारीषगन्धीपुत्रः परमकारीषगन्धीपतिरिति न सिद्ध्यति । प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवत्यस्त्रीप्रत्ययेनेति । यद्यस्त्रीप्रत्ययेनेत्युच्यतेऽतिक्रान्तः कारीषगन्ध्यामति–कारीषगन्ध्यस्तस्य पुत्रोऽतिकारीषगन्ध्यपुत्रोऽतिकारीषगन्ध्यपतिरित्यत्रापि प्राप्नोति अस्त्री–प्रत्ययेनेत्युपसर्जने न । यो ह्युपसर्जनं स्त्रीप्रत्ययो भवत्येषा परिभाषा प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवति"[७३०] इति ।

अन्ये वैयाकरणाः[७३१] अङ्गसंज्ञासूत्रे 'नेयङुवङ्स्थानावस्त्री' इत्यतोऽस्त्रीपदस्य सम्बन्धं ज्ञापकत्वेन मन्यन्ते । तस्य च स्त्रीबोधकभिन्न इत्यर्थः । प्रत्यये च तदन्वयः । एवञ्चानुपसर्जनस्त्रीबोधकभिन्नप्रत्यये गृह्यमाणे तदादिरित्युपतिष्ठते इत्यर्थे कृतेऽनुपसर्जन–स्त्रीप्रत्यते तदादिनियमालाभादियं परिभाषा फलति ।

---

२८१. तत्रैव – ६/१/१३ ।

२८२. महाभाष्यम् – ६/१/१३ ।

२८३. व्याडिपुरुषोत्तमदेवसीरदेवादिभिः वचनमिदम् ।

**'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' ॥ ५ ॥**

'उगिद्वर्णग्रहणं वर्जमि'ति तदन्तविधिप्रतिषेधके वार्तिके समासप्रत्ययविधौ प्रतिषेध इत्यत्र प्रत्ययग्रहणेन कृतस्य तदन्तविधिप्रतिषेधस्यानुवाद एव 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति'[284] इति परिभाषा । समासप्रत्ययविधाविति निषेधः उगिद्ग्रहणं वर्णग्रहणञ्च वर्जं वर्जं प्रवर्तते । तेन 'उगितश्च', 'अत इञ्', इत्यादौ तदन्तविधिर्भवत्येव । अतएव 'अतिभवती' दाक्षिरित्यादि सिध्यति । समासप्रत्ययविधौ तदन्तविधिर्न भवत्युक्तौ कस्मामिति जिज्ञासायां प्रातिपदिकादिति लभ्यते । सूत्रे यस्य प्रातिपदिकस्य ग्रहणमुच्चारणं वर्तते, तादृशात् प्रातिपदिकात् प्रत्ययविधौ तदन्तविधिर्न इति परिभाषार्थः । गर्गादेर्ग्रहणं 'गर्गादिभ्यो यञ्' इत्यत्र कृतं वर्तते । अतस्तत्रानया तदन्तविधिप्रतिषेधात् परमगर्गशब्दात् दोषाभावः ।

परिभाषेयं समासप्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणवर्जमिति वार्तिकस्थप्रत्ययांशानुवादः । वार्तिकस्थप्रत्ययांशानुवादत्वादेवायं प्रत्ययविधावेव प्रवर्तते । तस्मात् परिभाषेयं वाचनिकी । 'येन विधिस्तदन्तस्य' इत्यत्र भाष्ये दीर्घविधायके प्रत्ययविधिभिन्ने ग्रहणवता प्रातिपदिकेनापि तदन्तविधिं विधाय स्वसा इत्यादिवत् परमस्वसा परमस्वसारावित्यदावपि दीर्घः संसाधितः । अतएव तदन्तविधिसूत्रे भाष्ये समासेत्यादिनिषेधस्य कथनवदस्य न कथनम् । सोऽपि निषेधो विशिष्य तत्तद्रूपेण गृहीतप्रादिपदिकसूत्र एव, न तु 'प्राग्वतेष्ठञ्' इत्यादौ विशेषरूपेणागृहीतप्राकृतिके सूत्रे । इदं ध्वनितम् 'असमासे निष्कादिभ्यः' इति सूत्रभाष्ये । तथाहि "'असमासे निष्कादिभ्यः' – असमास इति किमर्थम्? परमनिष्केण क्रीतम् परमनेष्किकम् । नैतदस्ति निष्कशब्दात् प्रत्ययो विधीयते तत्र कः प्रसङ्गो यत्परमनिष्कशब्दात् स्यात् । नैव प्राप्नोति । नार्थः प्रतिषेधेन । तदन्तविधिना प्राप्नोति । ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते" इति । अत उत्तरं पठति – 'निष्कादिष्वसमासग्रहणं क्रियते पूर्वत्र तदन्ताप्रतिषेधस्य । निष्कादिष्वसमासग्रहणं क्रियते ज्ञापकार्थम् । किं ज्ञाप्यम्? एतज्ज्ञापयत्याचार्यः पूर्वत्र तदन्तविधेः प्रतिषेधो न भवतीति । किमेतस्य ज्ञापने प्रयोजनम् । 'प्राग्वतेष्ठञ्' इत्यत्र

२८४. परिभाषेन्दुशेखरः, परि – ३२ ।

तदन्तविधिः सिद्धो भवति । नैतदस्ति प्रयोजनम् । ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते न च ठञ्विधौ काचित्प्रकृतिर्गृह्यते । इदं तर्हि प्रयोजनम्"[२८५] इति ।

अत्र च ज्ञापकं 'सपूर्वाच्च'[२८६] इति सूत्रम् । अन्यथा 'पूर्वादिनिः' इत्यत्र तदन्तविधिनैव सिद्धे किं तेन 'सपूर्वाच्च' इति सूत्रावतारणेन ।

**'यस्मिन् विधिस्तदादावल्ग्रहणे' । ६ ।**

यस्मिन्निति सप्तमीनिर्देशे अल्ग्रहणे सति तदादौ समुदाये कार्ये भवतीति परिभाषार्थः । 'वान्तो यि प्रत्यये' इत्यादौ यीति प्रत्यये इत्यस्य विशेषणम् । 'येन विधिस्तदन्तस्य' इति सूत्रेण विशेषणेन तदन्तविधौ यान्ते प्रत्यये ओदौतोरवावौ स्त इत्यर्थ एव युक्त, यादौ प्रत्यये इत्यर्थः कथं लभ्यते । तदुच्यते 'येन विधिस्तदन्तस्य' इति तदन्तविधेरपवादभूताया 'यस्मिन् विधिस्तदादावल्ग्रहणे'[२८७] इति परिभाषास्वीकारात् यादौ प्रत्यये इत्यर्थलाभात् ।

न च यान्ते प्रत्यये परे इत्यर्थस्वीकारे सूत्रं व्यर्थमिति वाच्यम्, यान्तप्रत्ययपरकयोरोदौतोरभावादिति । गोमयमत्तीति गोमयात् 'तमाचष्टे' गोमययति इति टिलोपे गोमयि इत्यस्मात् क्विप्प्रत्यये णिलोपे च गोमय् इत्यत्र यान्तप्रत्यय परकौकारस्य सम्भवात्, तथापि 'गव्यम्', 'नाव्यम्' इत्यादावव्याप्तिवारणार्थं 'गोमय्' इति पूर्वोक्ते रूपेऽतिव्याप्तिनिवृत्त्यर्थं च 'येन विधिस्तदन्तस्य तदन्तविधेरपवादरूपेयं परिभाषा स्वीक्रियते । तदुक्तं भाष्यकारेण पतञ्जलिना – "यस्मिनविधिस्तदादावल्ग्रहणे' । यस्मिन् विधिस्तदादाविति वक्तव्यम् । किं प्रयोजनम्? 'अचि श्नुधातुभ्रवां य्वोरुयङुवङौ' इति इहैव स्यात् – श्रियो भ्रुवौ । श्रियो भ्रुव इत्यत्र न स्यात्"[२८८] इति । तदन्तविधेरपवादरूपेण भाष्ये पठितत्वात् परिभाषेयं वाचनिकीति ।

भाष्ये वचनरूपेण पठिताया अपि ज्ञापकत्वान्वेषणे कृते ज्ञापकत्वं सम्भवत्येव 'गुणोऽपृक्ते' इत्यत्र तु वामनेनापृक्तग्रहणात् परिभाषेयं व्याख्यातम् । 'तदुक्तम् उतो

---

२८५. महाभाष्यम्, 'असमासे निष्कादिभ्यः', – ५/१/२० ।

२८६. अष्टा. – ५/२/८७ ।

२८७. परिभाषेन्दुशेखरः, परि. – ३४ ।

२८८. महाभाष्यम्, 'येन विधिस्तदन्तस्य' – १/१/७२ ।

वृद्धिर्लुकि हलीत्यतो हलित्यनुवर्तते एव किमपृक्तग्रहणेन । एवं तर्हि ज्ञापयति भवत्येषा परिभाषा 'यस्मिन् विधिस्तदादावल्ग्रहणे'[२८९] इति । ततश्च हलीत्यनुवृत्तौ हलादौ स्यात् ।

**'विभक्तौ लिङ्गविशिष्टाग्रहणम्' । ७ ।**

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति परन्तु विभक्त्याश्रयेषु कार्येषु न प्रवर्तते । अर्थात् प्रातिपदिकपरिभाषा स्वीकारे युवतीः पश्येति न स्यात् तत्र 'युनस्तिः' इति तिप्रत्ययेन सिद्धस्यापि युवतिशब्दस्याप्यनया युवशब्देन ग्रहणसम्पादनात् 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणापत्तिरिति चेन्न विभक्तौ लिङ्गविशिष्टाग्रहणमिति नियमात् । विभक्तौ परतः विहितकार्यविधानाय प्रातिपदिकग्रहणे लिङ्गविशिष्तस्य ग्रहणं न भवतीति । श्वयुवेति सूत्रेण श्वन् युवन् इत्यादीनां भसंज्ञकानां सम्प्रसारणं विधीयते, भसंज्ञा अजाद्यसर्वनामस्थाने परतो विधीयते । अतः असरूपाजाद्यसर्वनाम- स्थानरूपविभक्तौ परतः विहितसम्प्रसारणरूपकार्याय गृहीतस्य युवन्निति प्रातिपदिकस्य ग्रहणे लिङ्गविशिष्टस्य युवतीत्यस्यानया ग्रहणाभावबोधनात् न सम्प्रसारणापत्तिः । अतः यूना यून इत्यत्र 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणमुक्तं युवती पश्य युवतीत्यादौ न भवति । एवञ्च शुना, शुन इत्यत्र 'न गोश्वन्साववर्णराड्ङक्रुङ्कृद्भ्यः'[२९०] इत्यादिना श्वन्शब्दात् तृतीयाविभक्तेरुदात्तप्रतिषेध उच्यमानो गौरादिङीषि शुन्या, शुन्यै इत्यत्र न भवति । 'उदात्तयणो हल् पूर्वादि'ति विभक्तेरुदात्ततैव भवति । 'उगिदचां सर्वनामस्थानेऽधातोः'[२९१] इति सूत्रेण 'गोमान्' इत्यत्र नुमागमः, न तु 'गोमती' इत्यत्र । पर्यालोचनेनैतदवगम्यते यत् विभक्त्याश्रयेषु कार्येषु लिङ्गविशिष्टस्याग्रहणं न भवतीति ।

इयञ्च परिभाषा 'युवोरनाकौ' इत्यत्र भाष्ये वचनरूपेण पठिता तस्माद्वाचनिकी एव । तथाहि – "न वा विभक्तौ लिङ्गविशिष्टाग्रहणात् । न वा वक्तव्यम् । किं कारणम्? विभक्तौ लिङ्गविशिष्टग्रहणं नेत्येषा परिभाषा कर्तव्या । वहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि? 'प्रयोजनं शुनः स्वरे' । यथेह भवति शुना शुन एवं शुन्या शुन्यै इत्यत्रापि प्राप्नोति । 'यूनः

२८९. काशिकावृत्तिः – ७/३/८९ ।

२९०. अष्टा. – ६/१/१८२ ।

२९१. तत्रैव – ७/१/७० ।

सम्प्रसारणे' । यूनः सम्प्रसारेण प्रयोजनम्"[७४०] इति । घटघटीग्रहणेन लिङ्गविशिष्ट–परिभाषाया अनित्यत्वात् विभक्तौ तस्याः अप्रवृत्तित्वात् वाचनिक्येवेति नैके मन्यन्ते ।

**'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' । ८ ।**

या विभक्तिः कञ्चित्पदविशेषमाश्रित्योपपद्यते, सोपपदविभक्तिः । यथा 'नमः' आदिपदविशेषमाश्रित्योत्पद्यमाना 'नमःस्वस्ती'ति चतुर्थीविभक्तिः, 'अन्यारादितरर्ते' इत्यादिसूत्रेण उत्पद्यमाना पञ्चमीविभक्तिश्च । या च विभक्तिः क्रियामाश्रित्य उत्पद्यते, सा कारकविभक्तिः । यथा 'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञाद्वारिका द्वितीयाविभक्तिः । अथवा क्रियाजनकत्वमात्रार्थकविभक्तित्वं कारकविभक्तित्वम् । प्रथमाया अपि क्रिया–जनकत्वात् पुत्रेण सहागतः पिता इत्यादौ तृतीयां बाधित्वा अनया पितृशब्दात् प्रथमविभक्तिं साधयित्वा 'सहयुक्तेऽप्रधाने' इति सूत्रेऽप्रधानेग्रहणं भाष्ये प्रत्याख्यातम् । तेन च भाष्येण प्रथमायाः कारकविभक्तित्वं ध्वनित्वम् । अतः क्रियाजनकार्थविभक्तित्वं कारकविभक्तित्वं स्वीकार्यम् ।

यत्र तु कारकविभक्तेरुपपदविभक्तेश्च उभययोः प्राप्तिः स्यात्तदा कारकविभक्तिः बलीयसी । तेन नमस्करोति देवानिति 'नमःस्वस्ती'त्यादिना नमोयोगे चतुर्थीं बाधित्वा द्वितीया भवतीति कारकविभक्तिरिति । चतुर्थी तु नमोऽस्तु देवेभ्य इति कारकादन्यत्र शेषे चरितार्था । एवं हा पितः क्वासि, हे सुभ्र इत्यत्र हाशब्दयोगे द्वितीयां बाधित्वा प्रथमा भवति कारकविभक्तिरिति । अन्तरा त्वाञ्च माञ्च कमण्डलुरिति अन्तरायुक्तस्य कमण्डलोः प्रथमैव भवति ।

इयञ्च वाचनिक्येव भाष्ये वचरूपेण पठितत्वात् । दृश्यते च 'सहयुक्तेऽप्रधाने' इत्यत्र भाष्ये वार्तिकरूपेणास्याः पाठः 'नमोवरिवश्चित्रङः क्यच्' इत्यत्र चास्य भाष्यवचने सत्ता । तथाहि भाष्यम् – "नमसः क्यचि द्वितीयानुपपत्तिः । नमसः क्यचि द्वितीया नोपपद्यते । नमस्यति देवान् । किं कारणम्? नमः शब्दयोगे चतुर्थी विधीयते इति प्राप्नोति । प्रकृत्यन्ततरत्वात् सिद्धम् । नमः शब्दयोगे चतुर्थी विधीयते नमस्यतिशब्दश्चायम् । ननु च नमस्यतिशब्दे नमः शब्दोऽस्ति तेन योगे प्राप्नोति । नैष दोषः, अर्थवतो नमः

२९२. महाभाष्यम्, 'युवोरनाकौ' – ७/१/१ ।

शब्दस्य ग्रहणम्, न च नमस्यतिशब्दे नमः शब्दोऽर्थवान् । अथवोपपदविभक्तेः कारकविभक्तिर्बलीयसीति द्वितीयाविभक्तिर्भतिष्यति" इति । परिभाषावृत्तौ न्यायमूलकत्वेनापि स्वीकृता । तदुक्तम् – "न्यायमूला चेयं परिभाषा । तथा ह्युपपदविभक्तीनां सर्वासां षष्ठ्यपवादत्वात् सम्बन्धः प्रवृत्तिनिमित्तम् । कारकभावस्य विवक्षाकाले सम्बन्ध एव नास्तीति कुतस्तद्द्योतका विभक्तय इति दुर्बलत्वमुपपदविभक्तीनाम् । बहिरङ्गाश्चोपपदविभक्तयोऽपि द्विपदाश्रयत्वात्"[७४१] इति ।

**'अनन्त्यविकारेऽन्त्यसदेशस्य' । ९ ।**

अनन्त्यस्य ये विकारास्ते अन्त्यसमानदेशस्यान्त्यनिकटवर्तिनो भवन्तीति परिभाषार्थः। अमुम् अञ्चति इत्यत्र अदस्पूर्वात् अञ्च्धातोः क्विन् प्रत्यये 'विष्वग्देवयोश्च इत्यनेन टेः 'अद्रि' इति आदेशे 'अदद्रि अञ्च्' इत्यवस्थायाम् 'अदसोऽसेर्दादु दो मः' इत्यनेन पूर्वदकारस्य मत्वे रेफस्योत्वे कृते अदमुयङ् इति जायते । नन्वत्र अदसोऽसेरित्यनेन पूर्वदकारात् परस्य अकारस्योत्वे तस्य च दस्य सत्वे मत्वे 'अमुमुयङ्' इति स्यादिति चेन्न 'अनन्त्यविकारेऽन्त्यसदेशस्त'[७४२] इति परिभाषास्वीकारात् । अन्त्यस्य विकारोऽन्त्यविकारः, नान्त्यविकारो येन तस्मिन् शास्त्रेऽन्त्यसदेशस्येत्युपतिष्ठते इति व्युत्पत्तिलभ्यार्थः । अत्र फलितार्थमाह – अन्त्यसदेशानन्त्यसदेशयोः एकप्रयोगे युगपत्कार्यप्राप्तावन्त्यसदेशस्यैव कार्यं भवति । 'अदद्र्य् अञ्च्' इति स्थिते अन्त्यसदेशस्य द्रघटकरेफस्य दकारस्य अनन्त्यसदेशस्य पूर्वदकारस्याकारस्य चोत्त्वमत्वकार्यस्य युगपत्प्रात्पौ सत्यामन्त्यसदेशस्य द्रघटकरेफस्याकारस्य च मत्वमुतञ्च जायते । एवञ्च विद्धमिति सम्प्रसारणं यकारस्य भवति न वकारस्य । यशांसीति 'सान्तमहतः संयोगस्य' इति दीर्घः यशब्दाकारस्य न भवतीति । तक्ष्णा, तक्ष्णि इत्यत्र 'अल्लोपोऽनः' इत्यकारलोपः तकाराकारस्य न भवति ।

एषा परिभाषा वाचनिक्येव, न न्यायसिद्धा न वा ज्ञापकसिद्धा । स्पष्टा चेयं 'ष्यङः सम्प्रसारणम्' इति सूत्रे 'अदसोऽसेरि'ति सूत्रे च । तत्रोच्यते – "ष्यङन्ते यावन्तो यणस्तेषां सर्वेषां सम्प्रसारणं प्राप्नोति । वाराहीपुत्रः, तार्णकर्णीपुत्रः तत्राप्रत्ययस्थस्य प्रतिषेधो वक्तव्यः । यथागृहीतस्यादेशवचनादप्रत्ययस्थे सिद्धम् । निर्दिश्यमानस्यादेशा भवन्तीत्येवम–

---

२९३. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ४८ ।
२९४. परिभाषेन्दुशेखरः, परि. – १०४ ।

प्रत्ययस्थस्य न भविष्यति । अनन्त्यविकारेऽन्त्यसदेशस्य वा । अर्थवानन्त्यविकारेऽन्त्य–सदेशस्य कार्यं भवतीत्येषा परिभाषा कर्तव्या । कः पुनरत्र विशेषः? एषा वा परिभाषा क्रियेताप्रत्ययस्थस्य वा प्रतिषेध उच्यते । अवश्यमेषा परिभाषा कर्तव्या । बहून्येतस्याः परिभाषायाः प्रयोजनानि । कानि? प्रयोजनं 'न सम्प्रसारणे सम्प्रसारणम्' । न सम्प्रसारणे सम्प्रसारणम् इत्येतन्न वक्तव्यं भवति । कथम्? व्यधेर्विद्ध इति । अनन्त्यविकारेऽन्त्य–सदेशस्य कार्यं भवतीति न दोषो भवति"[७४३] इति ।

**व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ १० ॥**

विभाषा नाम 'न वेति विभाषा'[७४४] इति सूत्रकृता संज्ञा, निषेधविकल्पयोः सा विधीयते । तत्र विभाषा चतुर्धा । १. प्राप्तविभाषा, २. अप्राप्तविभाषा, ३. उभयत्र विभाषा ४. व्यवस्थितविभाषा चेति । तत्र प्रथमा यथा – 'विभाषा ङिश्योः' इति । 'अल्लोपोऽनः' इति प्राप्तस्यानोऽल्लोपस्यानेन विकल्पनात् । अप्राप्तविभाषा यथा – 'शश्छोऽटि' इति । केनाप्यप्राप्तस्य छत्वस्य विकल्पनात् । उभयत्र विभाषा यथा – 'विभाषा श्वेः' इति श्वयतेः सम्प्रसारणं वा स्यात् लिटि यङि चेत्यर्थे लिडंशेऽतुसादौ 'वचिस्वपियजादीनां किति'[७४५] इति नित्यं प्राप्तस्य णलादावप्राप्तस्य सम्प्रसारणस्य विकल्पनात् । व्यवस्थिता चासौ विभाषा व्यवस्थितविभाषा या विभाषा क्व नित्यं क्व च विकल्पेनेति व्यवस्थया युक्ता भवति सा व्यवस्थितविभाषा भवति । इह शास्त्रे व्यवस्थितविभाषयापि कार्याणि क्रियन्ते । तेन अवङादिकार्यं लक्ष्यानुरोधाद्व्यवस्थीयते – क्व नित्यं क्व च विकल्पेन इति निश्चित्य विधीयते ।

गावः किरणाः अक्षिशब्दश्च रन्ध्रवाची । गवामक्षीव इति विग्रहे षष्ठीसमासः 'गो + अक्षि' इति स्थिते 'अक्ष्णोऽदर्शनात्' इति समासान्तोऽच्प्रत्ययः 'यस्येति च' इति लोपः 'गो + अक्ष' इत्यास्थायाम् 'अवङ् स्फोटायनस्य'[७४६] इति अवङ्, गवाक्ष इति जायते । वातायने रूढोऽयम् । पुंस्त्वं लोकात् । अत्र 'अवङ् स्फोटायनस्य' इत्यस्य वैकल्पिकत्वादवङो विकल्पे 'सर्वत्र विभाषा गोः' इति प्रकृतिभावे 'गो अक्ष' इति तस्य

---

२९५. महाभाष्यम् – ६/१/१३, ८/२/८० ।

२९६. अष्टा. – १/१/४४ ।

२९७.तत्रैव – ६/१/१५ ।

२९८. अष्टा. – ६/१/१२३ ।

विकल्पेन 'एङः पदान्तादति' इति पूर्वरूपे 'गोऽक्ष' इत्यादिरापद्येत । ततश्च वातायनार्थस्याप्रतीत्या विकल्पस्वभावासिद्धिः वैकल्पिकरूपैः समानार्थप्रत्यायकतायाः स्वभावसिद्धत्वादिति चेन्न 'व्यवस्थितविभाषया कार्याणि क्रियन्ते' इति परिभाषा–वतरणाददोषात् । गवाक्ष इत्यत्र नित्यमेवावङ् जायते, अतो न प्रकृतिभावः । नापि पूर्वरूपमापद्यते । सा चेयं व्यवस्था लक्ष्यानुरोधाद्बोध्या ।

'लटः शतृशानचावप्रथमासमानाधिकरणे' इत्यादिसूत्रेषु चेयं स्पष्टा । तथाहि भाष्यम् – "शतृशानचौ यदि लटो वा । यदि शतृशानचौ लटो वा भवतः । व्यवस्थितविभाषा च । तेनेह च भविष्यतः कौर्वतः, पाचतः कुर्वद्भक्तिः . . पचमानकल्पः, पचन्पठन्निति च शतृशानचौ । इह च न भविष्यतः पचतितराम् . . पचतिकल्पं, जल्पतिकल्पम् पचति पठतीति च लटः शतृशानचौ"[७४७] इत्यादि । इयं सूत्रभाष्ये वचनरूपेण पठितत्वाद्वाचनिक्येव ।

परिभाषावृत्तावप्यियं परिभाषा सम्यगालोचिता । तत्रोक्तं – जातिपक्षाश्रयणस्यायमर्थः पद्यते । जातौ हि पदार्थे सकृदेव लक्ष्ये लक्षणं प्रवर्तते । भावाभावौ च विकल्पः । तत्र लक्ष्यजातिमभिसमीक्ष्य एकत्र लक्ष्ये भावः कृतः सर्वत्र कृतो भवति । जातेरेकत्वात् एकत्रैव अभावः कृत सर्वत्र कृतो भवति । एतावतैव च विकल्पस्य चरितार्थत्वात् विशिष्टे विषये व्यवस्थिता विभाषा विकल्पो व्यवस्थितविभाषोत्युच्यते"[७४८] इति ।

**'पूर्वत्रासिद्धीयमद्वित्वे' । ११ ।**

'पूर्वत्रासिद्धम्'[७४९] इत्यधिकारे भवं शास्त्रं पूर्वत्रासिद्धीयम् । 'गहादिभ्यश्छः' इति सूत्रेण छप्रत्ययः । सप्तम्यर्थे प्रथमा । तेन पूर्वत्रासिद्धीयम् अर्थात् त्रिपादीस्थे शास्त्रे अद्वित्वे इत्युपतिष्ठते, यत् पूर्वत्रासिद्धीयं शास्त्रं तत्राद्वित्वे इत्युपतिष्ठत इत्यर्थः ।

'द्रोग्धा–द्रोग्धा', 'द्रोढाद्रोढा' इति रूपे 'सर्वस्य द्वे' इति द्वित्वेन सिद्धे स्तः । नन्वत्र द्वित्वदृष्ट्या 'वा द्रुहमुह' इति धत्वस्य 'हो ढः' इति ढत्वस्य चासिद्धत्वाद् 'द्रोह् ता' इत्यवस्थायां द्विते द्रोह् ता द्रोह् ता इति स्थिते एकस्मिन् युग्मकेऽप्येकत्र भागे धत्वम्,

---

२९९. महाभाष्यम् 'लटः शतृशानचावप्रथमासमानाधिकरणे' – ३/२/१२४ ।
३००. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ६२ ।
३०१. अष्टा. – ८/२/१ ।

अपरत्र च ढत्वं स्यात्, तथा च 'द्रोग्धा द्रोढा', 'द्रोढा द्रोग्धा इत्यनिष्टापत्तिरिति चेन्न 'पूर्वत्रासिद्धीयमद्वित्वे' इति परिभाषास्वीकारात् । 'वा द्रुहमुह' इति त्रिपादीस्थे शास्त्रे पूर्वत्र कर्तव्ये तमसिद्धमिति बोधनाय उपस्थितस्य 'पूर्वत्रासिद्धम्' इत्यसिद्धबोधकस्य शास्त्रस्य यत् पूर्वत्र पदं तत्राभेदसम्बन्धेन अद्वित्वे इत्यस्यान्वयेन 'द्वित्वभिन्ने पूर्वत्र कर्तव्ये तमसिद्धमिति बोधनात्', 'वा द्रुहमुह्' इति धत्वम्, 'पूर्वत्र' अर्थात् 'सर्वस्य द्वे' इति द्वित्वशास्त्रे कर्तव्येऽसिद्धं न स्यात् । तेन प्रथमं धत्वं द्रोग्धा इति जातम् ततः द्वित्वे 'द्रोग्धाद्रोग्धा' तस्य विकल्पपक्षे 'हो ढः' इति ढत्वमपि द्वित्वे कर्तव्ये नासिद्धम् । तेन 'द्रोढा द्रोढा' इति सिद्ध्यति धत्वघटितं युग्मकं ढत्वघटितञ्चेति न मिथः साङ्कर्यदोषः ।

नागेशभट्टेस्तु द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमसिद्धमिति फलितार्थमाह । पूर्वत्रासिद्धमित्यधिकारभवं शास्त्रं तस्या लिङ्गम् । अनया पूर्वत्रासिद्धमित्यधिकारस्थं शास्त्रं दृष्ट्वा तत्र गत्वा कथयिष्यते यत् द्वित्वभिन्ने पूर्वत्र कर्तव्ये तमसिद्धमिति । यत्र च सिद्धत्वासिद्धत्वयोः फले विशेषस्तत्रैवेयं परिभाषा प्रवर्तते ।

इयञ्च वर्णद्वित्वेऽपि प्रवर्तते । अतएव वाक्क इत्यादौ ककारद्वयोदाहरणपरकं भाष्यं सङ्गच्छते । सर्वस्य द्वे इति सूत्रे कात्यायनवचनमेतत् परिभाषारूपेण पठ्यते । 'सर्वस्य द्वे' इति भाष्ये स्पष्टेयं परिभाषा । तथाहि – 'यदि तर्हि स्थाने द्विर्वचनं राजा राजा वाग्वाक् – पदस्येति नलोपादीनि न सिद्ध्यन्ति । इदमिह सम्प्रधार्यं द्विर्वचनं क्रियतां नलोपादीनीति । किमत्र कर्तव्यम्? परत्वान्नलोपादीनि । पूर्वत्रासिद्धे नलोपादीनि सिद्ध्यसिद्ध्योश्च नास्ति सम्प्रधारणा एवं तर्हि पूर्वत्रासिद्धीयमद्विर्वचन इति वक्ष्यामि । तच्चावश्यं वक्तव्यम् । किं प्रयोजनम्? विभाषिताः प्रयोजयन्ति – 'द्रोग्धा–द्रोग्धा', 'द्रोढा–द्रोढा'"[७५०] इति ।

अनित्या चेयं परिभाषा 'उभौ साभ्यासस्य' इति सूत्रकरणात् । 'अनितेः' इति सूत्रेण णत्वं कृत्वा द्वित्वे प्राणिनत् प्राणिणिषतीत्यादिसिद्धे सूत्रं व्यर्थमेव स्यात् । अनित्येत्वे स्वीकृते 'अनितेः इत्यनेन साभ्यासस्य णत्वर्थं सूत्रं सफलमिति ।

---

३०२. महाभाष्यम्, 'सर्वस्य द्वे' – ८/१/१ ।

## सूत्रविश्लेषणविशेषसाधिता वाचनिकी परिभाषा

**'निर्दिशमानस्यादेशा भवन्ति' । १ ।**

'षष्ठी स्थानेयोगा'[७५१] इत्यस्यैवार्थः परिभाषारूपेण पठ्यते । 'षष्ठी स्थानेयोगा' इति सूत्रस्यावृत्तिः क्रियते । तत्र प्रथमं सूत्रम् अनिर्धारितसम्बन्धविशेषायाः षष्ठ्याः स्थाने–योगत्वबोधकम् । द्वितीयस्मिन् च सूत्रे षष्ठी पदं लक्षणया षष्ठ्यन्तपरम्, षष्ठी अन्ते यस्येति तदर्थः । षष्ठ्यन्तञ्च निर्दिश्यमानम्, अर्थात् सुत्रे उच्चार्यमाणम् । तत्र सूत्रे उच्चार्यमाणस्यादेशकार्यस्यासम्भवेन उच्चार्यमाणसजातीयं गृह्यते । तथा च उच्चार्यमाणसजातीयं स्थाननिरुपितसम्बन्धेन युज्यते, न प्रतीयमानम्, अर्थात् 'यदागम' इति न्यायेन 'येन विधिस्तदन्तस्य' इत्यादिशास्त्रेण च ग्राहितम् । निर्दिश्यमानञ्च षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयकत्वम् । अतएव षष्ठीप्रकृतिजन्यप्राथमिको–पस्थितिविषयस्यादेशा भवन्तीति इति परिभाषार्थो भवति । अर्थात् यं निर्दिश्य यो विधीयते स तस्यैव स्थाने भवति । 'उदः स्थास्तम्भोः पूर्वस्य' इत्यत्र निर्दिश्यमानः स्थाधातुः । अतएव उदव्यवहितपरस्य 'स्था' इत्यस्यैव पूर्वसवर्णः । तेन उत्थानमित्यत्रैव पूर्वसवर्णः, न तु उदस्थादित्यादौ । 'यदागम' परिभाषाया इयं परिभाषा बाधिका । एवञ्च 'पादः पत्' इति सूत्रेण पादः स्थाने विधीयमानः पदादेश पाद एव स्थाने भवति, न तु पाच्छब्दान्तस्य स्थाने । सूत्रे स्थानिवत्त्वेन पाद एव निर्दिष्टत्वात् ।

यथा लोके गव्यस्य प्रसङ्गे महिषीदुग्धं प्रयोक्तव्यम् इत्युक्ते गोदुग्धस्यैव प्रसङ्गे महिषीदुग्धं प्रयुज्यते, न तु गोमयप्रसङ्गे, गोमूत्रप्रसङ्गे वा गोदुग्धेनैव महिषीदुग्धस्य तौल्यात् ।

न्यायोऽयं 'पादः पत्' इति सूत्रे भाष्ये व्याख्यातः । तत्रैष प्रसङ्गः – 'पादः पत्' इति पाच्छब्दे 'येन विधिस्तदन्तस्य' इति सूत्रेण तदन्तविधौ पाच्छब्दान्तस्य पदादेशः स्यात् । स च भवन् अनेकाल्त्वात् सर्वत्र स्थाने भविष्यतीति द्विपाच्छब्दस्य त्रिपाच्छब्दस्य च स्थाने पच्छब्दादेशो जायते, इत्याशङ्क्य 'निर्दिश्यमानस्यादेशा भवन्ति' इत्यनेन समाहितम् । तेन षष्ठी प्रकृतिजन्यप्राथमिकोपस्थितिविषयस्य पाच्छब्दस्यैव स्थाने पदादेशो भवति, न तु

---

३०३. अष्टा. – १/१/४९ ।

तदन्तस्य । तत्रोक्तं भाष्यकारेण – "आदेशे सर्वादेशप्रसङ्गः, आदेशे हि सति सर्वादेशः प्रसज्येत । सर्वस्य द्विपाच्छब्दस्य त्रिपाच्छब्दस्य च पच्छब्द आदेशः प्रसज्येत 'येन विधिस्तदन्तस्य' इति । किं तर्हि वक्तव्यम्? न वा वक्तव्यम् । किं कारणम् 'निर्दिश्यमानस्यादेशा भवन्तीत्येषा परिभाषा कर्तव्या'"[७५२] इति ।

'षष्ठी स्थानेयोगा' इति सूत्रविश्लेषणादियं परिभाषा प्रदर्शिता । तस्मात् परिभाषेयं सूत्रविश्लेषणविशेषसाधिता वाचनिकी परिभाषा । तत्रत्यं भाष्यमेव प्रमाणम्[७५३] – "न तर्हीदानीमयं योगो वक्तव्यः । किं प्रयोजनम्? षष्ठ्यन्तं स्थानेन यथा युज्येत । यतः षष्ठ्युच्चारिता । किं कृतं भवति ? निदिर्श्यमानस्यादेशा भवन्तीत्येषा परिभाषा न कर्तव्या भवती" ति । अत्र कैयट आह – 'षष्ठीति षष्ठ्यन्तं गृह्यते तेन षष्ठ्यन्तमेव स्थानेन युज्यते । न तु प्रतीयमानमि'ति ।

**'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः' । २ ।**

यत्र स्थान्यादेश प्रसङ्गे अनेकविधं स्थानार्थगुणप्रमाणतः, आन्तर्यं तौल्यं तत्र स्थानतः स्थानकृतमान्तर्यं बलीय इति न्यायार्थः । तेषु स्थानत आन्तर्योदाहरणं 'दध्यत्र' इति । अर्थतो यथा क्रोष्टुशब्दस्य स्थाने समानार्थकक्रोष्टृ इत्यादेशः । गुणशब्देन प्रयत्नस्य ग्रहणम्, उदाहरणं 'वाग्घरिः' । अत्र हकारः स्थानी घोषनादसंवारमहाप्राणप्रयत्नवान्, तस्य स्थाने घकारोऽपि तादृशप्रयत्नवानेव भवति । प्रमाणशब्दः कालार्थकस्तदुदाहरणम् 'अदसोऽसेर्दादु दो मः' इत्यनेन ह्रस्वस्य स्थाने उकारः, दीर्घस्य स्थाने अकारः ।

चिधातोस्तृच्प्रत्यये 'चि + तृ' इति स्थितौ 'सार्वधातुकार्धधातुकयोः इति गुणे चेतृ इत्यस्य कृदन्ततया प्रातिपदिकत्वेन सौ अनङि 'चेतन् स्' इति स्थिते उपधायाः 'सर्वनामस्थाने चासम्बुद्धौ' इति दीर्घे हल्ङ्यादिलोपे चेता इति सिध्यति । तत्र गुणप्रसङ्गे प्रमाणकृतान्तर्येणाकारे प्राप्ते तं प्रबाध्यं स्थानकृतान्तर्येण एकारः सिध्यति ।

लोकेऽपि न्यायोऽयं व्यवह्रियते । यथा – कस्यचिदनपत्यस्य जनस्यानेके सम्बन्धिनः सन्ति सहोदरभ्राता, पितृव्यः पितृव्यपुत्रादयश्च । कदाचित् स जनो मृतो भवति, तदा

---

३०४. महाभाष्यम्, 'पादः पत्' – ६/४/१३० ।
३०५. तत्रैव, 'षष्ठी स्थानेयोगा' – १/१/४९ ।

कस्तद्धनभाग् भवितुमर्हतीति जिज्ञासायां सहोदरभ्राता एव गृह्यते, उभयोरप्येकोदररूपसमानसमानस्थानजन्यत्वात्। अत्र प्रमाणं 'षष्ठी स्थानेयोगा' इत्यत्र एकदेशानुवृत्तेः स्थाने इत्यनुवर्तमाने पुनः 'स्थानेऽन्तरतमः' इत्यत्र स्थानग्रहणमेव । तद्धि 'स्थानेन' इति विपरिणमस्य वाक्यभेदेन सम्बद्ध्यते । तथाहि 'स्थानेऽन्तरतमः' इत्यत्रान्तरतम इत्येकं वाक्यं तच्च पूर्वं पठनीयम् । 'स्थाने' इति परं पाठ्यम् । तत्र पूर्वस्मिन् वाक्ये 'स्थाने' इत्यनुवर्त्य प्रसङ्गे इति तदर्थं मत्वा प्रसङ्गे सति सादृशतम आदेशो भवतीति कार्यः । द्वितीये च स्थाने इति वाक्ये स्थाने इत्यनुवृत्तिसहितमन्तरतम इति पदमनुवर्तनीयम्, निर्दिष्टं स्थाने इति च तृतीयया विपरिणमनीयम् । ततः प्रसङ्गे सति स्थानेन स्थानघटितधर्मेण सादृश्यतम इत्यर्थः । तथा च पुर्ववाक्येनैव सिद्धे उत्तरवाक्यं व्यर्थं सञ्ज्ञापयति सति सम्भवे स्थानेनैव सदृशतम इति । अर्थादनेकविधेषु सादृश्येषु स्थानकृतं सादृश्यं बलवद्भवतीति । 'स्थानेऽन्तरतमः' इति सूत्रं विश्लिष्य इयं परिभाषोपन्यस्ता । तस्मात् सूत्र विश्लेषणविशेषसाधिका वाचनिकी परिभाषा ।

'स्थानेऽन्तरतमः' इति सूत्रभाष्ये इयं परिभाषा पर्यालोचिता । तदुक्तम् – "अथ स्थान इति वर्तमाने पुनः स्थानग्रहणं किमर्थम्? यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयो यथा स्यात् । किं पुनस्तत्? चेता, स्तोता । प्रमाणतोऽकारो गुणः प्राप्नोति, स्थानत एकारौकारौ । पुनः स्थानग्रहणादेकारौकारौ भवतः"[७५४] इति ।

## 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्' । ३ ।

वर्ण आश्रयो निमित्तं यस्य स वर्णाश्रयः, तादृशे कार्ये कर्तव्ये प्रत्ययलक्षणं न भवति । गवे हितमिति लौकिकविग्रहे 'गो ए हित स्' इत्यलौकिकविग्रहे चतुर्थी तदर्थावलिहितसुखरक्षितैः इति समासे, प्रातिपदिकत्वे सुपो लुकि, पुनः सौ, तस्य अमि, पूर्वरूपे गोहितम् इति सिध्यति । यद्यित्यत्र 'सुपो धातु . . .' इत्यनेन लुप्तस्य एकारस्य 'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यानयनेन अच्परत्वाद् 'एचोऽयवायावः' इत्यवादेशः प्राप्तो 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्'[७५५] इति परिभाषास्वीकारेण वार्यते । अवादेशकार्यं

---

३०६. महाभाष्यम्, 'स्थानेऽन्तरतमः' – १/१/५० ।
३०७. परिभाषेन्दुशेखरः, परि. – २२ ।

वर्णनिमित्तकम्, एषो वर्णस्यापि वर्णे परेऽयादेशविधानात् । न चैतावता वर्णाः यस्य कार्यस्योद्देशीभूताः, तादृशे कार्ये कर्तव्ये प्रत्ययलक्षणं नेत्येवायाति ।

'प्रत्ययलोपे प्रत्ययलक्षणम्' इत्यत्र 'स्थानिवदादेशोऽनल्विधौ' इत्यतः स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणं ग्रहणं व्यर्थं सत् प्रत्ययस्य यत्र प्राधान्यं तत्रैव प्रत्ययलक्षणं भवतीति ज्ञापयति । तेन यत्र प्रत्ययोऽन्यस्याविशेषणरूपं प्राधान्यं भजते, तत्रैव प्रत्ययलक्षणसूत्रप्रवृत्तिरित्येषा परिभाषा सिद्धा । तेन सिद्धमेव यत् वर्णस्य प्राधान्येनाश्रयणे प्रत्ययलक्षणं न भवति । तदुक्तं नागेशाचार्येण – 'वर्णप्राधान्यविषयमेतत् । तत्त्वञ्च 'प्रत्ययलोपे' इति सूत्रे स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणग्रहणं प्रत्ययस्येतरविशेषणत्वरूपं यत्र प्राधान्यं तत्रैव प्रवृत्त्यर्थमित्येतत् सिद्धम्''[७५६] इति। अतः ''प्रत्ययलोपे प्रत्ययलक्षणम'' इति सूत्रस्थप्रत्ययलक्षणं पदं सामर्थ्यमूलकविश्लेषणसिद्धत्वं भजते । तस्मात् सूत्रविश्लेषणविशेषसाधिता परिभाषेयम् ।

पुरुषोत्तमदेव एवमाह – ''अयञ्चार्थः प्रत्ययलोपे प्रत्ययलक्षणम् इत्यत्र द्वितीयप्रत्ययग्रहणे साधितः । तथा हि तत्रोक्तम् । तल्लक्षणमिति वाच्ये प्रत्ययग्रहणं प्रत्ययस्वरूपाश्रितमेव कार्यं प्रत्ययलक्षणेन यथा स्यात् । यथा – 'सुप्तिङन्तं पदमिति अचीत्यादि वर्णाश्रितं मा भूदिति ।

**'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' ॥ ४ ॥**

प्रत्यये गृह्यमाणे यस्मादसौ विहितस्तदादेरेव भागस्य तत्प्रत्ययान्तस्य ग्रहणं भवतीति परिभाषार्थः । 'सनाद्यन्ता धातवः'[७५७] इति सन्नन्तस्य धातुसंज्ञा क्रियते । देवदत्तः चिकीर्षति इत्यत्र् देवदत्तश्चिकीर्ष इत्यस्य सन्नन्तत्वाद्धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः' इति देवदत्तोरवर्तिनः सुपो लुगापत्तिः, अतः पराभाषा स्त्रीक्रियते 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति । व्याकरणशास्त्रे यत्र प्रत्ययग्रहणं वर्तते तत्र यस्मात्स प्रत्ययो विहितस्तत्प्रकृत्यादेरेव यश्च प्रत्ययो विहितस्तत्प्रत्ययान्तस्यैव ग्रहणं भवति । तथा च सन्नन्ततदादिरेव धातुसंज्ञाविधायके 'सनाद्यन्ता' इति सूत्रे ग्राह्यः । इह च यस्मात् कृधातोः सन्प्रत्ययो विहितः स एवादिर्नास्ति इति सन्नन्ततदादित्वाभावान्न देवदत्तविशिष्टस्य

---

३०८. तत्रैव ।

३०९. अष्टा. – ३/१/३२ ।

चिकीर्षशब्दस्य धातुसंज्ञापद्यते । यस्मात् सन् विहितस्तदादेः एव तदन्तस्य च धातुसंज्ञा । न संघातस्य देवदत्तश्चिकीर्षक इति । 'सुप आत्मनः क्यच्' इत्यत्र क्यच्प्रत्ययो यतः सुप् तदादेरेव भागस्य पुत्रीयतीति । न संघातस्य महान्तं पुत्रमिच्छतीत्यत्र । सुप्सुपेति समासः यतः सुप् तदादेरेव राजपुरुषः, न संघातस्य ऋद्धस्य राज्ञः पुरुष इति ।

इयं परिभाषा योगविभागमूलिका । 'यस्मात् प्रत्यतविधिः'[७५८] इति सूत्रे 'यस्मात्प्रत्ययविधिस्तदादिप्रत्यये' इति पृथक् प्रथमो योगः क्रियते, 'अङ्गम्' इत्यन्यो योगः । तत्र प्रथमे योगे गृह्यमाणे उपतिष्ठते चेति पदद्वयमाध्याह्रियते । तथा च प्रत्यये गृह्यमाणे यस्मात्स विहितस्तदादिरित्युपतिष्ठत इति शब्दयोजनया परिभाषायाः 'प्रत्ययग्रहणे यस्मात् विहितस्तदादेर्ग्रहणम्' इत्यंशः सिद्धः । तदाद्यन्तांश इति मूले तदादिः अन्ते यस्येति विग्रहः । तदन्तस्य ग्रहणमिति तदन्तांशस्तु 'येन विधिस्तदन्तस्य' इत्यनेन सिद्ध्यति । सन्निति प्रत्ययग्रहणस्य विद्यमानत्वात्तदादिरित्यंशोपस्थितिः । तत्र च सनाद्यन्ता इत्यस्याभेदेनान्वयः । तथा च सनादिर्यस्माद्विहितस्तदादिर्यस्सनाद्यन्त इत्यादिक्रमेण बोध्यः । यत्र प्रत्ययस्य विशेष्यं सूत्रे नोपात्तं यथा 'ङ्याप्प्रातिपदिकात्' इत्यत्र तत्रोपस्थिततदादिशब्दस्वरूपविशेषणादेव ङ्याब्भ्यां तदन्तविधिर्यत्र विशेष्यान्तरं सूत्रे उपात्तमसि यथा 'यञिञोश्च' इत्यत्र प्रातिपदिकादिति तत्र प्रातिपदिकमेव विशेष्यीकृत्य प्रत्ययेन तदन्तविधिधर्मिण उपस्थितौ फलाभावेन तदादित्वमात्रस्योपस्थितस्य स्वरूपसम्बन्धेन प्रत्ययान्तेऽन्वयः । अत इयं परिभाषा यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इति सूत्रयोगविभागात् साधिता । तस्मादियं सूत्रविश्लेषणविशेषसाधिता वाचनिकी परिभाषा ।

**'पदाङ्गाधिकारे तस्य च तदन्तस्य च'** ॥ ५ ॥

'पदाङ्गाधिकारे' इत्यत्र विषयाधिकरणे सप्तमी । 'येन विधिस्तदन्तस्य' इति सूत्रतो विधिरिति सम्बध्यते । अधिकारशब्दो द्वन्द्वान्तशब्दतया प्रत्येकमभिसम्बध्यते । तेन पदाधिकारविषयकम् अङ्गाधिकारविषयकञ्च कार्यं सूत्रे पठितशब्दस्य तदन्तस्य सूत्रपठितशब्दान्तस्य भवतीति परिभाषार्थः ।

---

३१०. तत्रैव – १/४/१३ ।

'जराया जरसन्यतरस्याम्' इत्यत्र 'येन विधिस्तदन्तस्य' इति प्रातिपदिकविशेष्यकतदन्तविधौ जराशब्दान्तस्य परमजराशब्दादेव जरसादेशः स्यात्, जरसावित्यादौ केवलजराशब्दस्य न स्यात् । तस्मात् परिभाषेयं स्वीक्रियते 'पदाङ्गाधिकारे तस्य च तदन्तस्य च'[७५९] इति । अतोऽङ्गाधिकारीयकार्यतया जरसादेशः केवलस्य जराशब्दस्य जायते । तेन जरसावित्यादि सिध्यति । जराशब्दान्तस्य च भवति । अतः परमजरासावित्यादि सिद्धम् । पदाधिकारीयं कार्यं यथा तस्य च तदन्तस्य च भवति तथा मूले एव प्रतिपादितम् – तेनेष्टकचितं पक्वेष्टकचितमित्यादिना । इष्टकाभिश्चितमित्यत्र समासे इष्टकचितमित्यत्र केवलस्य इष्टकशब्दस्य, पक्वाः इष्टकाः पक्वेष्टकास्ताभिः चितमित्यत्र तदन्तस्य च 'इष्टकेषीकामालानां चिततुलभारिषु' इति ह्रस्वः पदाधिकारीयविधिः सम्पद्यते । महान् इत्यत्र केवलस्य परममहान्, परमातिमहान् इत्यादौ तदन्तस्य च सान्तमहतः' इति अङ्गाधिकारीयं कार्यं सिध्यति । 'पदम्' अङ्गञ्चाधिकृतं तत्तत्सूत्रे विशेष्यं कृत्वा विशेषणेन सिद्ध्यति तदन्तविधिः लक्ष्यानुरोधात् ।

'येन विधिस्तदन्तस्य' इति सूत्रभाष्ये सर्वमिदं स्पष्टम् । तत्र ह्युक्तम् – विशेषणविशेष्ययोर्यथेष्टत्वात् । तेन पदाङ्गयोर्विशेष्यत्वे तदन्तविधौ तदन्तस्येति सिद्धम् । विशेषणत्वे तस्येति । . . . पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य चेति तत्र पठितं वार्तिकरूपेण । पदाधिकारे 'इष्टकेषीकामालानां चिततुलभारिषु इति प्रयोजनम् । अङ्गाधिकारे च महदप्स्वसृनप्तृणां दीर्घविधौ इत्यादिना प्रयोजनं प्रादिपादितम् । . . . यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति । 'पादस्य पदाज्यातिगोपहतेषु' । यथेह भवति – पादेनोपहतं पदोपहतम् एवमत्रापि स्यात् दिग्धपदोपहतमिति । एवं तर्ह्यङ्गाधिकार एव प्रयोजनमिति भाष्येणास्याः 'पादस्य' इत्यत्राप्रवृत्तिः सूचिता । अतः परिभाषेयं 'येन विधिस्तदन्तस्य' इति सूत्रविश्लेषणादापद्यते ।

**'सर्वविधयश्छन्दसि विकल्प्यन्ते' । ६ ।**

छन्दसि इष्टानुविधत्वाच्छन्दसि सर्वे विधयो विकल्पेन भवन्ति । छन्दसि प्रयुक्तरूपाणां यथा सिद्धिस्तथा सूत्राणि प्रवर्तनीयानि निवर्तनीयानि च । 'व्यत्ययो बहुलमि'ति सूत्रभाष्ये बहुलमिति योगविभागेन परिभाषेयं साधिता । तत्र बहुलमिति

---

३११. परिभाषेन्दुशेखरः, परि. – ३० ।

पृथग्योगः । तत्र च छन्दसीत्यनुवर्तते । तेन छन्दसि सर्वे विधयो बहुलप्रकारेण भवन्तीत्यर्थेनेयं परिभाषा सिद्धा । तस्मात् सूत्रविश्लेषणविशेषसाधिता वाचनिकी परिभाषा । तथाहि 'व्यत्ययो बहुलमिति सूत्रस्थभाष्यमित्थमस्ति – "योगविभागः कर्तव्यः । '. . . व्यतयः' । व्यत्ययो भवति स्यादीनामिति । . . . ततो बहुलम् । बहुलं छन्दसि विषये सर्वविधयो भवन्ति" इति । बहूनर्थान् लाति ददातीति बहुलमिति व्युत्पत्त्यानेकप्रयोजनमूलकं बहुलग्रहणम् । तथा च –

"क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति" ॥ इति ॥

इत्यत्र प्रतिपादितेषु प्रयोजनेषु विभाषाप्येकं यद्यपि वर्तते तथापि तेन केवलं विधीनां वैकल्पिकत्वज्ञापनमुचितमिति विचार्याह – 'षष्ठी युक्तश्छन्दसि वा' इति सूत्रे वेति योगविभागेनेत्यादि । अत्र वेति योगविभागं कृत्वा तत्र छन्दसीत्यनुवृत्य छन्दसि वा भवन्ति सर्वे विधय इति शेषः । तेनैषा परिभाषा लब्धा ।

**'पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' । ७ ।**

पूर्वपरनित्यान्तरङ्गापवादशास्त्रेषु उत्तरोत्तरं शास्त्रं बलवत्तरं बलवत्तमं वेति यथायोग्यं योग्यम् । परादीनां मध्ये पूर्वपूर्वापेक्षया उत्तरोत्तरं शास्त्रं बलवत्तरमित्यर्थः । परापेक्षया नित्यान्तरङ्गापवादाः, नित्यापेक्षयापि अन्तरङ्गापवादौ, अन्तरङ्गापेक्षयापि अपवादः, इत्येवं क्रमेण पूर्वपूर्वापेक्षया उत्तरोत्तरबलवत्त्वमिति फलितोऽर्थः ।

पूर्वात् परं बलवदित्यत्र किं बीजमित्याशङ्क्षायामाह नागेशाचार्यः – विप्रतिषेधशास्त्रात् पूर्वस्य परं बाधकमिति यावदिति । अयमभिप्रायः पूर्वात् परं बलीयः विप्रतिषेधसूत्रारम्भसामर्थात् । अतएव वृक्षेभ्य इत्यत्र 'सुपि च' इति दीर्घं बाधित्वा परत्वात् 'बहुवचने झल्येत्' इत्येत्त्वम् । परान्नित्यं बलीयो यथा तुदति, रुणद्धीत्यादौ परमपि लघूपधं गुणं बाधित्वा 'तुदादिभ्यः शः' इति 'रुधादिभ्यः श्नम्' चेति शश्नमौ । ततः न लघूपदगुणः । अत्रेवं शप्रत्ययस्तु कृते अकृतेऽपि लघूपधगुणे प्रवृत्तिमर्हतीति स नित्यः । कृताकृतप्रसङ्गी यो विधिः स नित्य इति हि तल्लक्षणम् । अतो नित्यः शप्रत्ययः लघूपधगुणं बाधित्वा प्रथमं प्रवर्तते । ततः 'सार्वधातुकमपित्' इति शस्य क्ङित्त्वात् 'क्ङिति च' इति निषेधान्न गुणः । नित्यस्य बलवत्त्वे किं बीजम्? तदुच्यते बालमनोरमायाम् "अक्ळ्प्तभावकस्य नित्यशास्त्रस्याभावकल्पनापेक्षया कळ्प्ताभावकस्यानित्यशास्त्रस्यैव

तत्कल्पनं युज्यते इति नित्यस्य बलवत्त्वे बीजम्" इति । परादन्तरङ्गं यथा – उभये देवमनुष्या इत्यत्र 'प्रथमचरमतयाल्पर्ध . . .' इति परमपि विकल्पं बाधित्वा 'सर्वादीनि सर्वनामानि' इति नित्यमेव सर्वनामत्वं विभक्तिनिरपेक्षत्वेन तस्यान्तरङ्गत्वात् । अल्पापेक्षमन्तरङ्गमिति हि तल्लक्षणम् । तस्य बलवत्त्वे बीजमाह – 'असिद्धं बहिरङ्गमन्तरङ्गे' इति । परादपवादो बलीयान् यथा दध्ना, दध्ने इत्यादौ परमपि 'अनेकाल्शित्सर्वस्य' इति सर्वादेशं बाधित्वा 'ङिच्च' इत्यपवादत्वाद् 'अस्थिदधि' इति सूत्रेणानङ् अन्तादेशो जायते । नित्यादन्तरङ्गं बलीयो यथा – 'ग्रामणिनि कुले' इत्यत्र 'ग्रामणी इ' इत्यवस्थायाम् 'इकोऽपि विभक्तौ' इति नुमं 'ह्रस्वो नपुंसके प्रातिपदिकस्य इति 'ह्रस्वः' नुमि कृते त्वजन्तत्वाभावाद् ह्रस्वत्वं न प्राप्नोति । अन्तरङ्गादपवादो बलीयान् यथा दैत्यारिः, श्रीश इत्यादौ परमपि सवर्णदीर्घमन्तरङ्गत्वाद् बाधित्वा 'आद्गुणः' इति 'इको यणचि' इति गुणे यणि च प्राप्तेऽपवादत्वात् सवर्णदीर्घः । इयं परिभाषा 'विप्रतिषेध'[७६०] इति पाणिनीयसूत्रविश्लेषणविशेषसाधितत्वाद्वाचनिक्येव ।

**'पुनः प्रसङ्गविज्ञानात् सिद्धम्' । ८ ।**

यथा लोके काकः पुनः पुनर्वारणेऽपि एकमपि भक्ष्यं वारं वारं खादति । तथैव शास्त्रेऽपि यदा पूर्वशास्त्रस्य सकृन्निषेधेन बाधे सत्यपि उद्देशावच्छेदकाक्रान्तौ सत्यां प्रवृत्तिर्भवत्येव ।

पूर्वात् परस्य बलीयस्त्वे 'भिन्धि' इत्यत्र 'भिनद् हि' इति स्थितौ 'तुह्योस्तातङाशिष्यन्यतरस्याम्'[७६१] इति तातङा परेण धिं बाधित्वा तातङि भिन्तात् विकल्पपक्षे भिन्हीत्येव स्याद्ध्यादेशो न स्यात् सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति परिभाषया विप्रतिषेधे सति सकृद् यद्बाधितं तद्गतौ प्राप्तौ सत्यामपि बाधितमेव इत्यनया धेः सकृद्बाधितस्य विकल्पपक्षेऽपि प्रसराभावादत आह 'पुनः प्रसङ्गविज्ञानात् सिद्धम्'[७६२] । इति । अर्थात् पुनः प्रसङ्गे सति विज्ञानं शास्त्रप्रवृत्तिः भवति । तातङभावपक्षे ध्यादेशे भिन्धीति रूपं सिद्ध्यति ।

---

३१२. अष्टा – १/४/२ ।

३१३. अष्टा. – ७/२/३५ ।

३१४. परिभाषेन्दुशेखरः, परि. – ४० ।

‘विप्रतिषेधे परं कार्यमि’ति सूत्रभाष्ये पुनः प्रसङ्ग विज्ञानात् सिद्धमित्यस्य याथार्थ्यं प्रतिपदितम् । तत्रोवमालोचितम् – एतावदिह सूत्रं विप्रतिषेधे परमिति । पठिष्यति ह्याचार्यः । सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति । पुनः पठिष्यति पुनः प्रसङ्गविज्ञानात् सिद्धमिति । किम्पुनरियता सूत्रेणोभयं लभ्यम् । लभ्यमित्याह कथम? इह भवता द्वौ हेतू व्यपदेष्टौ । तृजादिभिस्तूल्यं पर्यायः प्राप्नोतीति च । अप्रतिपत्तिर्बोभयोस्तुल्यबलत्वादिति च । तद्यदा तावदेष हेतुस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति तदा विप्रतिषेधे परमेव भवति । यदा त्वेष हेतुप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तदा विप्रतिषेधे परमित्यनेन किं क्रियते । द्वारम् । विप्रतिषेधे परं तावद्भवति तस्मिन् कृते यदि पूर्वमपि प्राप्नोति तदपि भवति । तदेतदुपपन्नं भवति पुनः प्रसङ्ग विज्ञानात् सिद्धम्”[७६३] इति ।

‘अनियमे नियमकारिणी परिभाषा’[७६४] इति परिभाषालक्षणं वैयाकरणाचार्यैः स्वीक्रियते, ते तदनुसारं व्याख्यायन्ते । परन्तु परिभाषेन्दुशेखरे प्रायः अष्टादशसंख्यकाः परिभाषाः सन्ति, यासु अनियमे नियमकारित्वं न प्रकाशते । तथा हि कुत्रचित् संज्ञापरिभाषयोः यथोद्देशं कार्यकालं पक्षं सूचयति । ‘परान्नित्यं बलवदि’त्युक्तेरनन्तरं ‘शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः’ इत्यवतरणेनानित्यत्वं सूचयति । ‘अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेन बाध्यते’ इत्यनया तथा क्वचिदपवादविषयेऽपि इत्यत्र क्वचित्पदप्रयोगेण ‘पूर्वं ह्यपवादाः’, ‘उपसञ्जनिष्यमाण’ इत्यनयोः द्राढ्यं न प्रकाशते, नित्यतां शास्ति चेत्तर्हि कथं ‘क्वचित्’ इति प्रयोगः । ‘गामादाग्रहणेषु’ इत्यस्याः परिभाषायाः विद्यमानत्वात् लुग्विकणस्य इति परिभाषायाः द्राढ्यं नास्ति तस्मात् कारणात् केचन न्यायसिद्धा वाचनिकी वेति स्वीकुर्वन्ति । परिभाषेन्दुशेखरे सन्निविशा तादृश्य अष्टादशसंख्यकाः परिभाषाः ।

१. यथोद्देशं संज्ञापरिभाषम् ।
२. कार्यकालं संज्ञापरिभाषम् ।
३. क्वचिदेकदेशोऽप्यनुवर्तते ।
४. परान्नित्यं बलवत् ।
५. शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः ।

---

३१५.महाभाष्यम्, ‘विप्रतिषेधे परं कार्यम्’ – १/४/२ ।
३१६. लघुशब्देन्दुशेखरः, परिभाषाप्रकरणे ।

६. शब्दान्तरात् प्राप्नुवनः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ।
७. लक्षणान्तरेण प्राप्नुवन् विधिरनित्यः ।
८. क्वचित्कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता ।
९. यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ।
१०. स्वरभिन्नस्य प्राप्नुवन् विधिरनित्यो भवति ।
११. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ।
१२. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ।
१३. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ।
१४.उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमुत्सर्गं बाधत इति ।
१५. लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ।
१६. क्वचिद्विकृतिः प्रकृतिं गृह्णाति ।
१७. औपदेशिकप्रयोगिकयोरौपदेशिकस्यैव ग्रहणम् ।
१८. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ।

परिभाषेन्दुशेखरे काश्चन परिभाषाः सन्तिः याः वाचनिकन्यायज्ञापकसिद्धादिभेदेन न विभक्तुं शक्यते तासु काश्चनात्रालोच्यन्ते ।

**१. 'यथोद्देशं संज्ञापरिभाषम्' ।**

उद्देश उपदेशदेशः, तमतिक्रम्य यथोद्देशम् । यस्मिन् काले यत्संज्ञाशास्त्रं परिभाषाशास्त्रं वोच्यते तस्मिन्नेव काले वाक्यार्थबोधे जाते गृहीतशक्त्या गृहीतपरिभाषार्थेन च सर्वत्र विधिशास्त्रेषु तेनैव व्यवहारः ।

लोके प्रतिपत्तॄणां द्विविधा प्रवृत्तिरवलोक्यते । एका अपेक्षामूलिका, अपरा चोपेक्षामूलिका । तत्रापेक्षाबुद्धयः छात्राः इदं शास्त्रमाप्तमहर्षिणा प्रणीतमतोऽनर्थकं न भवति किन्तु भविष्यत्यग्रेऽनेन किञ्चित् प्रयोजनमिति निश्चित्याध्ययनकाले एव 'अदेङ्गुणः' इति शास्त्रेण गुणपदस्य 'अएओ' इत्येतेषु त्रिषु शक्तिरिति गुरुणोपदिष्टमिति सम्यगवधारितम् । ततः 'आद्गुणः' इति विधिशास्त्रवाक्यार्थबोधवेलायां गुणपदस्य 'अएओ' वर्णा वाच्या इति स्वयमेवोह्यते । तदुक्तम् – 'इदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रस्थभाष्यपर्यालोचनावसरे कैयटेनाटीकितं – यदाऽनुद्दिश्य प्रयोजनविशेषं प्रयोजनमात्रमभिसन्धाय भविष्यति

किञ्चिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते, तदा सम्भवत्येवायं पक्षो यथा श्रुतगाहिप्रतिपत्रपेक्ष' इति ।

अतोऽपेक्षाबुद्धिसहकृते तत्तद्वाक्यार्थबोधे जाते दृढतरसंस्कारस्य जननाद् भूयो भूयस्तद्बोधस्यानपेक्षितत्वेन अपेक्षाधिय एव यथोद्देशपक्षे मूलम् ।

अस्मिन् प्रसङ्गे प्राचीनाचार्या आहुः – संज्ञाविषये यथोद्देशपक्षस्वीकारे 'वृद्धिरादैच्' इत्यादीनां स्वदेश एव वाक्यार्थबोधरूपे शक्तिग्रहे जाते, भविष्यति किञ्चिदनेन प्रयोजनमिति भाविफलानुसन्धानादपेक्षयाबुद्ध्या आचार्यवाक्ये विश्वसता छात्रेण तदभ्यासेन दृढतरसंस्कारेण 'मृजेर्वृद्धिः' इत्येतस्य वाक्यार्थबोधकाले 'एकसम्बन्धिज्ञानमपर–सम्बन्धिज्ञानस्य स्मारकं भवतीति रीत्या संस्कारोद्बोधने जाते आदैचामुपस्थितौ 'वृद्धिरादैच्' इत्येतद् वाक्यार्थबोधस्य पुनर्नापेक्षा, इति संज्ञाशास्त्रस्य स्वदेश एव सफलवाक्यार्थबोधात् पाठदेशीयत्वमेव ।

एवमेव परिभाषाविषयेऽपि यथोद्देशपक्षस्वीकारे परिभाषाशास्त्रदेश एव तज्जन्यवाक्यार्थबोधे जाते 'इको यणचि' इत्यादिविधिशास्त्रजन्यवाक्यार्थबोधकाले गृहीतपरिभाषाविधेयार्थस्मरणेन पदैकवाक्यतया लक्ष्यसंस्कारको बोध इति स्वदेशत्वमेव परिभाषाशास्त्रस्य स्वीकुर्वन्ति । नव्याचार्यास्तु संज्ञाविषये यथोद्देशपक्षस्वीकारे आकडाराधिकारीयभपदसंज्ञाविषये यथोद्देशपक्ष एवेति स्वीकुर्वन्ति, न तु कार्यकालपक्ष इति संज्ञाशास्त्रदेशीयपूर्वत्वपरत्वाभ्यामेव बाध्यबाधकभावः पदादिसंज्ञानां स्वदेशे गृहीतशक्तिग्रहणेनैव त्रिपाद्यामपि व्यवहारः । अतएव 'पूर्वत्रासिद्धम्'[३१७] इति भाष्ये परिभाषाणामेव त्रिपाद्यामप्रवृत्तिमाशङ्क्य कार्यकालपक्षाश्रयेण समाहितम्, अन्यसंज्ञाविषये तु लक्ष्यानुरोधात् क्वचिद्यथोद्देशपक्षः क्वचिच्च कार्यकालपक्षोऽपि ।

परिभाषाविषये यथोद्देशपक्षे समस्तविधिशास्त्राणि स्वरसंस्काराय परिभाषादेशमागत्य गुणभेदं परिकल्प्य पदैकवाक्यतयान्वेयाः भवन्ति ।

**२. 'कार्यकालं संज्ञापरिभाषम्' ।**

---

३१७. अष्टा. – ८/२/१ ।

कार्येण विधायकशास्त्रेण काल्यते स्वसन्निधिं प्राप्यते संज्ञापरिभाषाशास्त्रं यस्मिन् पक्षे स पक्षः कार्यकालपक्षः ।

लोके केवलं स्वार्थसाधनवेलायामन्यानन्विषति शुश्रूषां च करोति स्वार्थसिद्ध्यनन्तरं परकार्यसम्पादनवेलायां त्वपरिचितमिवचरति यो जनः स जनः कार्यकालपक्षिशब्देन व्यवदिश्यते ।

लोके एकापेक्षामूलिका उपेक्षामूलिका चेति द्विविधा प्रवृत्तिर्दृश्यते । तत्रोपेक्षाबुद्धयो ये जनास्तान् प्रत्ययं न्यायः ।

व्याकरणशास्त्रे त्वयं न्यायः संज्ञापरिभाषाशास्त्रयोः विधिशास्त्रेण सहैकवाक्य–तयैवन्वयो भवतीति तयोः स्वदेशत्वम्, उत विधिशास्त्रदेशत्वमिति विचारणायां परिभाषेन्दुशेखरे उल्लिखितः । तत्र नागेशाचार्येणोक्तम् – 'विधिशास्त्रं स्वसंस्काराय परिभाषाविधेयानां स्मरणं करोति, न तु तान् शास्त्रान् स्वदेशे नयति'[७६६] इति । अतः परिभाषाणां कार्यकालेऽपि स्वदेशकृत एव पूर्वत्वपरत्वव्यवहारो जायते । अन्यथा – 'ङमो ह्रस्वादचि ङमुण्णित्यम्' इति सूत्रे 'तस्मादित्युत्तरस्य', 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषाद्वयोपस्थितावुभयोरप्येकदेशस्थत्वेन पूर्वत्वपरत्वाभावात् परत्वादुभयनिर्देशे पञ्चमी निर्देशो बलीयान् इति 'तस्मिन्' इति सूत्रस्थभाष्यासङ्गतिरेव स्यात् । अतएव भाष्य एकदेशस्थस्यैव सर्वशास्त्राभिज्वालकत्वमुक्तम् ।

प्राचीनाचार्यास्तु एको मुख्यो देशः, द्वितीयश्च गौणो देश इति भेदद्वयं स्वीकुर्वन्ति । तत विधिशास्त्रदेशो मुख्यदेशः, परिभाषाशास्त्रदेशश्च गौणदेशः । यत्र मुख्यदेशेन पूर्वत्वपरत्वव्यवस्था न सिध्यति, तत्र गौणदेशेनैव पूर्वत्वपरत्वव्यवस्था सम्पादनीयेति कथयन्ति ।

### ३. 'अनेकान्ता अनुबन्धाः' ।

अनुबन्धाः इत्संज्ञायोग्याः, अनेकान्ताः अनवयवाः । इत्संज्ञायोग्या बोधकानवयवाः, स्वविधेये कदाप्यदर्शनात् । अतएव 'रामाणाम्' इत्यादौ नुडागमे उकारठकारयोः अनुबन्धयोरश्रवणम् । न चानवयवत्वे प्रत्ययादित्वाभावेन शकारककारयोः कथमित्संज्ञेति

३१८. परिभाषेन्दुशेखरः, परि. – ३ ।

वाच्यम्, समीपेऽवयवत्वारोपेण निर्वाहात् । एवमेव 'हलन्त्यमि'त्यत्राप्यन्त्यशब्दः परसमीपबोधक एव ।

लोकेऽपि शरीरे गृह्यमाणा उष्णिषादयोऽनुबन्धाः शरीरानवयवा एव भवन्ति । अतएव देवदत्तादिपदबोध्यः केवलो हस्तपादादिविशिष्टौ मांसपिण्ड एव भवति, न तु उष्णिषादिविशिष्टः । यद्युष्णिषादयोऽवयवाः स्युस्तदा तथा देवदत्तस्याह्वाने हस्तपादादिरहितस्य व्यक्तेरानयनं न भवति, तथैव उष्णिषादिरहितस्यापि न स्यात् ।

न्यायोऽयं 'दाधाघ्वदाप्' इति सूत्रभाष्ये प्रयुक्तः । तत्रैषः प्रसङ्गः दाप्प्रतिषेधे दैपः प्रतिषेधे न स्यादित्याशङ्क्य आत्वे कृते स्यादिति समाधाय, अनेजन्तत्वादात्वमेव न स्यादिति पुनराशङ्कितम्, ततश्च प्रकृतन्यायेन समाहितम् । तथा च तत्रत्यं भाष्यम् – "दाप्प्रतिषेधे न दैप्यनेजन्तत्वात्, दाप्प्रतिषेधे दैपि प्रतिषेधे न प्राप्नोति अवदातं मुखम् । ननु चात्वे कृते भविष्यति । तद्ध्यात्वं न प्राप्नोति । किं कारणम्? अनेजन्तत्वात् । सिद्धमनुबन्धस्यानेकान्तत्वम्"[७६७] इति ।

### ४. 'एकान्ता अनुबन्धाः' ।

अनुबन्धाः – इत्संज्ञायोग्याः, एकान्ताः अवयवाः । सन्विधायकशास्त्रे बोधके सनि समवायसम्बन्धेनोपलभ्यमानत्वे सत्यन्यत्र तेन सम्बन्धेनानुलम्भाद् गृहादीनामनवयवः काकादिर्येन सम्बन्धेन गृहादिषूपलभ्यते, तेनैवान्यत्रापि वृक्षादिषु ।

यद्यप्यनेकान्तत्वपक्षे 'नानुबन्धकृतमसारूप्यम्', 'नानुबन्धकृतमनेकाल्त्वम्', 'नानुबन्धकृतमनेजन्तत्वम्' चेति परिभाषात्रयं नारम्भणीयम्, तथाप्यस्मिन् पक्षे समीपादाववयवत्वारोपस्य नावश्यकता, आद्यन्तशब्दयोः पूर्वपरसमीपे लक्षणापि न कर्तव्येति महल्लघवम् । अत आह परिभाषेन्दुशेखरे 'वस्तुतस्तु एकान्ता इत्येव न्याय्यम्' इति ।

लोकेऽपि गड्वादिरूपानुबन्धा अवयवा एव । अतएव देवदत्तादिपदबोध्यो गड्वादिविशिष्ट एव भवति, न तु तदरहितः ।

न्यायोऽयं 'तस्य लोपः' इति सुत्रभाष्ये व्यवह्रुतः । तत्रैषः प्रसङ्गः – अनुबन्धा एकान्ता अनेकान्ता वेति विचार उत्थापितः, मध्ये द्वयोरपि पक्षयोर्गुणदोषौ विविच्योक्तम् –

---

३१९. महाभाष्यम्, 'दाधा घ्वदाप्' – १/१/२० ।

'एकान्ता इत्येव न्याय्यम्' इति । तत्र पतञ्जलिनोदीरितम् – 'उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति । किमत्र न्याय्यम्? एकान्ता इत्येव न्याय्यम् । कुत एतत्? अत्र हेतुर्व्यपदिष्टः । यच्च नाम सहेतुकं तन्न्याय्यमिति ।

## ५. 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' ॥

शास्त्रयोः प्राप्तौ सत्यां परत्वाद् यद्बाधितं तद्बाधितमेव स्यादिति न्यायार्थः । यथा लोके कश्चिज्जनः सिंहेनैकदा हतो भवति, स पुनर्जीवितुमसमर्थो भवति, तथैव शास्त्रेऽपि विप्रतिषेधसूत्रस्य नियमार्थत्वस्वीकारे यथा तेन नियमबलेन किञ्चिच्छास्त्रं बाध्यते, तदा तच्छास्त्रं बाधितमेव भवति ।

न्यायोऽयं विप्रतिषेधे परं कार्यमिति सूत्रस्य नियमार्थत्वापक्षेण ज्ञापितः, स्थानिवत्सूत्रे 'तिसृणाम्' इत्यत्र 'त्रिचतुरोः' इत्यनेन त्रेः स्थाने तिस्रादेशे सति स्थानिवद्भावेन पुनस्त्रयादेशः प्राप्नोतीति तन्निषेधः कर्तव्य इत्याशङ्क्य प्रकृतन्यायेन समाहितम् । अर्थात् 'त्रि आम्' इत्यवस्थायां त्रयादेशे त्रिस्रादेशे च प्राप्ते परत्वात् त्रयादेशं प्रबाध्य तिस्रादेशे च प्राप्ते पुनर्न त्रयादेशः, प्रकृतन्यायात् । तथा च भाष्यम् –

"त्रयादेशे स्रन्तस्य प्रतिषेधे वक्तव्यः । तिसृणाम् । तिसृभावे 'त्रेस्त्रयः' इति त्रयोदेशः प्राप्नोति । नैष दोषः । इदमिह संप्रधार्यं तिसृभावः क्रियताम्, त्रयादेश इति । किमत्र कर्तव्यम्? परत्वात् तिसृभावः । अन्यथेदानीं तिसृभावे कृते पुनः संविज्ञानात् त्रयादेशः कस्मान्न भवति? सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव"[७६८] इति ।

## ६. 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः' ।

पूर्वम्–उत्सर्गशास्त्रप्रवृत्तेः प्राक्, अपवादाः निरवकाशाः अभिनिविशन्ते बुद्ध्यारूढा भवन्ति, पश्चात् ततः परम्–उत्सर्गाः उत्सर्गशास्त्रप्रवृत्तिः ।

अर्थात् लक्षणैकचक्षुष्का अपवादशास्त्रस्य सम्यक् समालोचनां कृत्वा तत्प्रवृत्तेः कियल्लक्ष्यमिति बुद्ध्या तत्प्रवृत्त्यतिरिक्ते लक्ष्ये उत्सर्गशास्त्रे प्रवर्तयन्तीति न्यायार्थः ।

---

३२०. महाभाष्यम्, 'विप्रतिषेधे परं कार्यम्' – १/४/२ ।

अतएव न्यायोऽयं लक्षणैकचक्षुष्काणामनुरोधेनेति परिभाषेन्दुकाराः । तथा च परिभाषेन्दु शेखरे आह – 'लक्षणैकचक्षुष्को ह्यपवादविषयं पर्यालोच्य तद्विषयत्वाभावनिश्चये उत्सर्गेण तत्तल्लक्ष्यं संस्करोति' इति ।

लोके हि साधारणासाधारणभेदेन द्विधा जना उपलभ्यन्ते तेषु साधारणाः कर्तव्याकर्तव्यविषये प्रतिपदं शास्त्रोक्तानि प्रवर्तकनिवर्तकवाक्यान्येवावलोकयन्ति । तदनन्तरं यच्छास्त्रशब्दैर्निर्णीयते तदनुसारमेव ते चरन्त्यनाचरन्ति वा । अतएव एते शास्त्रे लक्षणैकचक्षुष्कपदवाच्याः । ये चासाधारणास्ते कर्तव्याकर्तव्यविषये शास्त्रोक्तप्रवर्तक–विवर्तकवाच्यान्यनपेक्ष्य स्वोत्कृष्टधियैव शास्त्रनिर्देशानुसारमाचरन्ति, त एव लक्ष्यैक–चक्षुष्काः । प्रकृतश्च न्यायः साधारणधियमेवापेक्ष्य प्रवर्तितः । अतो लक्षणैकचक्षुष्काः पूर्वम् 'अदभ्यस्तात्' इति शास्त्रं सम्यक् पर्यालोच्य तद्विषयान् दधतीत्यादीन् बुद्धौ कृत्वा तद्विषयत्वाभावस्थले भवन्तीत्यादावुत्सर्गेण 'झोऽन्तः' इत्यनेनान्तादेशं कुर्वन्ति ।

### ७. 'प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते' ।

अपवादविषयम् – निरवकाशशास्त्रलक्ष्यम्, प्रकल्प्य–परित्यज्य, ततः अपवादशास्त्रविषय पर्यालोचनात् प्रागपि, उत्सर्गशास्त्रं स्वलक्ष्ये प्रवर्तते । अतो निरवकाशशास्त्रविषयपर्यालोचनात् प्रागपि तद्विषयं परित्यज्यान्यत्रोत्सर्गशास्त्रे स्वलक्ष्यं संस्करोतीति न्यायार्थः ।

परिभाषेयं लक्ष्यैकचक्षुष्काणामनुरोधेनेति परिभाषेन्दुकाराः । तथा च तत्राह नागेशाचार्यः – 'लक्ष्यैकचक्षुष्कस्तु तच्छास्त्रपर्यालोचनं विनाप्यपवादविषयं परित्यज्योत्सर्गेण लक्ष्यं संस्करोति' इति । यथा लोके साधारणधियो जनाः कर्तव्याकर्तव्यनिर्णयप्रसङ्गे प्रवर्त्तकनिवर्तकशास्त्रवचनं न पर्यालोच्यैव स्वीयोत्कृष्टसंस्कार–वशाच्छास्त्रीयप्रवर्तकवाक्यादेशानुरूपमाचरन्ति । तथैव शास्त्रेऽपि लक्ष्यैकचक्षुष्का अपवादशास्त्रविषयमविचार्यैवोत्सर्गशास्त्रं तद्विषये प्रवर्तयन्ति । असाधारणोत्कृष्टधिय एव व्याकरणशास्त्रे लक्ष्यैकचक्षुष्कपदेनोच्यते ।

द्वावपि "प्रकल्प्य चापवादविषयं तत उत्सर्गः प्रवर्तते इति, पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः इति च 'प्रातिपदिकार्थलिङ्गवचनमात्रे प्रथमा' इति सूत्रभाष्ये

उद्धृतः । तथा च तत्रत्यं भाष्यं – "शतृशानचोश्च निमित्ताभावात् तिङोऽभावः । क्व? पचत्योदनं देवदत्त इति । किं कारणम्? तयोरपवादत्वात् । शतृशानचौ सिद्धोऽपवादौ । तावत्र बाधकौ । न चात्रापवादविषये, उत्सर्गोऽभिनिविशते । पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः । प्रकल्प्य चापवादविषयमुत्सर्गोऽभिनिविशते"[७६९] इति ।

## ८. 'उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' ।

उपसञ्जनिष्यमाणम् उत्पत्स्यमानम्, निमित्तम् हेतुर्यस्यासावुपसञ्जनिष्यमाण–निमित्तोऽपवादः। उपसञ्जातम् उत्पन्नमुपस्थितं वा निमित्तम्, हेतुर्यस्यासावुपसञ्जात–निमित्तः, तमुपसञ्जातनिमित्तमुत्सर्गम् अतः सनिमित्तकमप्युत्सर्गशास्त्रं भविष्यन्नि–मित्तोऽपवादः । अतः सनिमित्तकमप्युत्सर्गशास्त्रं भविष्यन्निमित्तकमपवादशास्त्रं बाधते इति न्यायार्थः ।

लोकेऽपवादस्थानापन्नं द्रुतगामिशकटम् । उत्सर्गस्थानापन्नं मन्दगामिशकटम् । निमित्तम् – एकस्थेयस्थानप्राप्तिरूपम् । अतो यथा पूर्वमुत्सर्गशकटमग्रिमं स्थेयस्थानं गतमपि पश्चादनुपलब्धस्थेयस्थानेन गच्छताऽपवादशकटेन बाध्यते, तथैव शास्त्रेऽपि 'दधती'त्यत्रोपलब्धप्रत्ययावयवझकाररूपनिमित्तकमपि 'झोऽन्तः' इति शास्त्रम् अभ्यस्तसंज्ञारूपनुपलब्धनिमित्तकेनापि 'अदभ्यस्तात्'[७७०] इति शास्त्रेण बाध्यते ।

न्यायोऽयं लक्ष्यैकचक्षुष्मतामनुरोधेन परिभाषेन्दुशेखरे स्फुटितः । तत्र हि 'प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते' इति न्यायो लक्ष्यैकचक्षुष्मतामनुरोधेनेत्युक्तम् । ततश्च एतन्मूलक एव नवीनानां मतेन उपसञ्जनिष्यमाणन्याय इत्यपि प्रकृतन्यायावतरणे प्रातिपादितम् । ततश्च सिद्धमेतत् यत् पूर्वन्यायस्य लक्ष्यैकचक्षुष्कत्वेऽस्यापि लक्ष्यैकचक्षुष्कत्वम् । नायं न्यायो भाष्ये प्रतिपदोक्तरूपेणोपन्यस्तः ।

## ९. 'सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्' ।

अत्र सहचरितशब्दः सदृशार्थवाचकः । अतः सदृशासदृशयोर्मध्ये सदृशस्यैव ग्रहणमिति न्यायार्थः । शब्दशक्तिनियामकासु सामग्रीषु साहचर्यस्यापि मुख्यत्वं मान्यैः

---

३२१. महाभाष्यम्, 'विप्रतिषेधे परं कार्यम्' – १/४/२ ।
३२२. अष्टा. – ७/१/४ ।

स्वीकृतम् । तदुच्यते संयोगो विप्रयोगश्च साहचर्यं विरोधितेति । अतएव रामलक्ष्मणावित्युक्ते रामपदेन सत्स्वपि त्रिषु रामरूपार्थेषूपस्थितेषु तेषु दशरथापत्यस्यैव रामस्य बोधः । लक्ष्मणपदेनापि न दुर्योधनापत्यस्यापि तु दशरथस्यापत्यस्यैव लक्ष्मणस्य बोधः, दशरथापत्ययोरेव तयोः साहचर्यदर्शनात् । एवमेव सवत्सामानय इत्युक्तेऽपि वत्सयुक्ताया गोरेवनयनं भवति, न तु महिष्यादेस्तासामसहचरितत्वात् ।

एवं शास्त्रेऽपि 'भूवादयो धातवः' इति सूत्रे असत्वार्थकवाशब्दसाहचर्येण भूशब्दोऽप्यसत्वार्थकक्रियावाचक एव गृह्यते, न तु द्रव्यवाचकः । क्रियावाचकभू–शब्दसाहचर्ये च वा शब्दोऽपि क्रियावाचक एव गृह्यते, न तु विकल्पार्थकः । एवमेव 'पञ्चम्यपाङ्परिभिः' इति सूत्रेऽपि परिशब्देन वर्जनार्थकस्यैव परेर्ग्रहणं भवति, न तु 'लक्षणार्थद्योतकस्य' । न्यायोऽयं 'कर्मप्रवचनीययुक्ते द्वितीया'[७७१] इति सूत्रभाष्ये ध्वनितः । तथा च तत्रत्यं भाष्यं –'यद्यप्ययं परिर्दृष्टापचारो वर्जने चावर्जने च, अयं स्वल्पशब्दोऽदृष्टापचारो वर्जनार्थ एव कर्मप्रवचनीयस्तस्य कोऽन्यः सहायो भवितुमर्हत्यन्यो वर्जनार्थात्, यथाऽस्य गोः सहायेनार्थ इति गौरेवानियते, नाश्वो न गर्दभः'[७७२] इति ।

## पारिभाषेन्दुशेखरस्य वैशिष्ट्यम्

नागेशाचार्येण ग्रन्थप्रारम्भे एव विज्ञापितं "प्राचीनवैयाकरणतन्त्रे वाचनिकानि तत्रे पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्तिकयोरुपनिबन्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते" । यासां परिभाषाणामुल्लेखो महाभाष्ये नास्ति ताः परिभाषाः परिभाषेन्दुशेखरे उल्लिख्य न स्वीकृताः इति विज्ञापिताः । एतादृशाः परिभाषाः प्रायः पञ्चदशसंख्यकाः ।

१. अकृतव्यूहाः पाणिनीयाः ।
२. चानुकृष्टं नोत्तरत्र ।
३. संज्ञापूर्वकविधेरनित्यम् ।
४. आगमशास्त्रमनित्यम् ।
५. गणकार्यमनित्यम् ।
६. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ।

---

३२३. अष्टा. – २/३/८ ।
३२४. महाभाष्यम्, 'कर्मप्रवचनीयुक्ते द्वितीया' – २/३/८ ।

७. नञ्घटितत्वमनित्यम् ।
८. आतिदेशिकमनित्यम् ।
९. सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ।
१०. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ।
११. विधौ परिभाषोपतिष्ठते नानुवादे ।
१२. क्वचिद्विकृतिः प्रकृतिं गृह्णाति ।
१३. औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणम् ।
१४. श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चेतानि न यङ्लुकि ॥
१५. पदगौरवाद्योगविभागो गरीयान् ।

उपुर्युक्ताः प्रायः सर्वाः परिभाषा व्याडिपुरुषोत्तमसीरदेवादिभिः ज्ञापकत्वमादाय स्वीकृताः । पुरुषोत्तमदेवेनोक्तं 'अकृतव्यूहाः पाणिनीयाः'[७७३] इति परिभाषाविषये – "लिङ्गञ्चास्याः गौरतद्धितलुकि' इति अतद्धितग्रहणम् । तद्धि सुब्लुकि प्रतिषेधो मा भूदित्येवमर्थं क्रियते राजगवीयतीति । अत्र च पुर्वमेव निष्पन्नष्टच् उत्तरकालं क्यचि कृते सुब्लुकि यदा प्रवृत्तोऽपि टच् निवर्तते तदैतदर्थवद्भवतीति" ।

'लुटि च क्ल्पः' इति सूत्रस्थेनानुवृत्त्यर्थसकलचकारप्रत्याख्यानेन भाष्यविरुद्धत्वात् 'चानुकृष्टं नोत्तरत्र' इति नागेशाचर्येणास्वीकृता । तदुक्तं भाष्ये 'किमर्थश्चकारः । स्यसनोरित्येतद– नुकृष्यते । यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति, "द्युद्भ्यो लुङि' इत्यत्रापि चकारः कर्तव्ये विभाषेत्यनुकर्षणार्थः । अथेदानीमन्तरेणापि चकार मनुवृत्तिर्भवतीहापि नार्थश्चकारेण'[७७४] इति । एवं सर्वे चकाराः प्रत्याख्यायन्ते ।

'संज्ञापूर्वकविधेरनित्यत्वमि'ति नियमो भाष्ये न दृश्यते तस्मात् नागेशेनास्वीकृता । परन्तु पुरुषोत्तमदेवेनोदीरितम् 'अयञ्चार्थ ओर्गुणः' इत्यत्र गुणग्रहणेन ज्ञापितः । ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वकत्वेनानित्यत्वमस्य यथा स्यादित्येवमर्थम् । तेन 'धाम स्वायम्भुवं ययुरिति (कुमारसम्भव, २/१) ओर्गुणाभावादुवङ् सिध्यति' इति । परन्तु स्वायम्भुवमिति प्रयोगस्तु लोकेऽसाधुरेव ।

३२५. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – १०४ ।
३२६. महाभाष्यम्, 'लुटि च क्लपः – १/३/९३ ।

आगमशास्त्रमनित्यमिति परिभाषा व्याडिपुरुषोत्तमदेवसीरदेवैः स्वीकृता । व्याडिराह – 'योऽयं थोऽन्थः (७/१/८७) इत्याह एतदस्या ज्ञापकम् । अन्यथा 'थो नुडि'ति नुडागमेनैव सिद्धे 'न्थ' विधानं व्यर्थं स्यात् । ततश्चेयमस्ति परिभाषा 'आगमशास्त्रमनित्यमि'ति । पचान इत्यपि भवति । 'पचमान' इति प्राप्ते आने मुक् (७/२/८२) इति न भवति । आगमस्यानित्यत्वात्'[७७५] इति ।

सीरदेवस्तु अनित्यमागमशासनमित्याह, फलमपि शाकं पचानस्येत्येत्र मुगभावः सागरं तर्तुमिच्छतीत्येव च प्राह । अत्र नागेशाचार्योऽपि सीरदेवमतमेवोद्धरति । अतः स कथयति 'निलोट्' इत्येव सिद्धे 'आनि लोट्' इत्यत्र आनिग्रहणाद आगमशास्त्रमनित्यं सिद्धम् । भाष्यानुक्तत्वात् परिभाषेयं न स्वीकार्या । तर्तुकामस्येत्यादेरसाधुत्वमेव । भाष्यानुक्तज्ञापितार्थो न साधुत्वनियामको प्रमाणाभावात् । किञ्च ज्ञापितेऽप्यानित्यस्य स्वांशे चरितार्थ्यम्, आगमशून्यप्रयोगाप्रसिद्धेः । आग्रहणं लोङ्ग्रहणवदिति स्वीकरोति ।

गणकार्यमनित्यमिति परिभाषाऽपि पुरुषोत्तमदेवसीरदेवाभ्यां स्वीकृता, नागेशाचार्येण भाष्यानुक्ततया न स्वीक्रियते । पुरुषोत्तमदेवस्तु गणकार्यमनित्यमित्येवमालोचयति – ''क्षमूष् सहने' इत्यस्य भिदादित्वादेवाङि सिद्धे षित्करणेन ज्ञापितः । तेनादादित्वाच्छुब्लुकोऽभावात् 'न विश्वसेत् पूर्णविरोधितस्य', 'मण्डपे शयामि तत्परम्' इत्यादि सिध्यति । शयामीति परस्मैपदं तु 'अनुदात्तङित आत्मनेपदमि'ति अनुदात्तेल्लक्षणमात्मनेपदं व्यभिचरति अस्यार्थस्य (अनुदात्तेतस्चक्षितो ङित्करणेन) सूचितत्वादि''ति ।

सीरदेवोऽपि ''तेन श्वसः शीङश्च', 'अदिप्रभृतिभ्यः कप्' इति शब्लुकोऽभावात् 'न विश्वसेत् पूर्वविरोधितस्य' 'मण्डपे शयामि किमतः परमि'त्यादि सिध्यति'' इत्याह । एषापि भाष्यानुक्ततया नागेशेनास्वीकृता, लोके 'विश्वसेत्', 'शयामि' इत्यादीनां चासाधुत्वादिति । पुरुषोत्तमदेवसीरदेवाभ्याम् अनुदात्तत्त्वेलक्षणमात्मनेपदमनित्यमिति परिभाषा न स्वीकृता । परन्तु अनुदात्तेतश्चक्षिङो ङित्करणेन ज्ञापकरूपेण स्वीकृता । नागेशस्तु न स्वीकरोति, स्फायिवृद्धावित्यनुदात्तेतः स्फाय्धातोः परस्मैपदलक्षणः शत्रादेश इति फलन्तु न स्वीकरोति । भाष्यानुक्ततयाऽसाधुत्वात् ।

'नञ्घटितमनित्यम्' इति परिभाषा व्याडिपुरुषोत्तमदेवसीरदेवकृतपरिभाषा–सूचनादिग्रन्थेषु नोपलभ्यते । नागेशाचार्येण न स्वीकृता । तेनोक्तम्[७७६] 'भाष्येऽदर्शानात् ।

---

३२७. व्याडिकृतपरिभाषासूचनम्, परि. – ७६ ।

३२८. परिभाषेन्दुशेखरः, परि. – ९८ ।

भाष्यानुक्तज्ञापितार्थस्य साधुताया नियामकत्वे मानाभावात् । भाष्यविचारितप्रयोजनानां सौत्राक्षराणां पारायणादावदृष्टमात्रार्थकत्वकल्पनाया एवोचित्यादि'ति ।

आतिदेशिकमनित्यम् 'सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् इत्युभये परिभाषे भाष्ये अनुक्तत्वात् नागेशाचार्येण न स्वीकृते । व्याडिपरिभाषापाठे आतिदेशिकमनित्यमिति स्वीकृता । तत्रायमभिप्रायः – 'लोटो लङ्वद्' इत्यदिदेशः परिभाषामेतां ज्ञापयति । अन्यथा ङ्लोडिति विधानेनैव लोटस्तामाद्यादेशसलोपरूपकृते ङित्कार्ये सिद्धे लङ्वदित्यतिदेशविधानं व्यर्थं स्यात् । व्यर्थं सदतिदेशविधानं ज्ञापयति ।

एवमेव 'सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान्' इति परिभाषापि भाष्यानुक्तत्वात् नागेशाचार्येण न स्वीकृता । व्याडिपुरुषोत्तमदेवसीरदेवैः एषा परिभाषा स्वीकृता । व्याडिराह – 'सर्वविधिभ्य इड्विधिः बलवान् भवति । कथं ज्ञायते यदयं सनिग्रहगुहोश्च इति चकारेण श्युकोऽनुकर्षणं करोति । कथं कृत्वा ज्ञापकम् । अत्र हि चकारोऽनर्थकः । कस्माल्लूञः सनि इण् न । तत्र तावदत्रेण् न भवति 'इको झल्' इति कित्त्वं तावत् प्रतीक्षते । तत्र कित्त्वे कृते 'श्युकः किति' इतीट् प्रतिषेधो भविष्यति । नार्थश्चकारेण । पश्यति त्वाचार्यः कित्त्वादपि पूर्वमिडागमः । इटि कृते 'इको झल्' इति कित्त्वं नास्ति । झलिति वचनात् । तस्माच्चकार इट्–प्रतिषेधार्थ इगन्तानाम् । किमेतस्या ज्ञापने प्रयोजनम्? 'शयित्वा' इत्यत्र सम्प्रसारणात् पूर्वमिट् सिद्धो भवति । इटि कृते 'न क्त्वा सेट्' इति कित्त्वप्रतिषेधः । असति कित्त्वे सम्प्रसरणं न भवति' ।

'यत्तु क्वचिद्विकृतिः प्रकृतिं गृह्णाति' इति परिभाषा सीरदेवेन स्वीकृता, खण्डिता च नागेशात् पूर्ववर्तिभ्यां नीलकण्ठदीक्षितहरिभास्करोग्निहोत्रिमहोदयाभ्याम् । सीरादेवेनालोचिता[७७७] – 'तेन निसमुपविभ्यो ह्वः' इति ह्वाधातोरात्मनेपदमुच्यमानं प्रकृतिभूतादपि भवति । निह्वयते । संह्वयते । ज्ञापकञ्चात्र न व्यो लिटि इति विकृतस्य व्यञित्यस्य निर्देशेन व्येञः आत्वनिशेधविधानम् । अत्राहुः 'न व्यो लिटि' इत्यत्र 'निसमुपविभ्यो ह्वः' इत्यत्र चौकारान्ताया एव प्रकृतेरुपादानम् । विकृतिस्तु लक्षण–गतेनात्वेन । तस्माद् 'दाधा घ्वदाप्' इत्यत्र दाधाग्रहणे प्रकृतिभूतयोरपि देङ्धेटोर्ग्रहणम् । प्रणिदयते । प्रणिधयतीति । अत्र 'नेर्गदनद . . .' इति णत्वम् इति । नीलकण्ठदीक्षितस्त्वाह 'इयं निर्मूला भाष्यव्यवहृता च । निसमुपरिभ्यो ह्वः इत्यादौ ह्वेञ एवानुकरणे लक्षणवश–

---

३२९. सीरदेवकृतबृहत्परिभाषावृत्तिः, परि. – ४२ ।

सम्पन्नमात्वम् । अशीतीति प्रसज्यप्रतिषेधः”[७७८] इति । भाष्येऽनुक्तत्वात् अन्या अपि परिभाषाः नागेशाचार्येण न स्वीकृताः ।

महाभाष्ये उल्लिखिता षट्परिभाषाः आचार्यपतञ्जलेः नानुमतत्वात् नागेशाचार्येण पर्यालोच्याप्यस्वीकृताः । यथा – ‘अनेकान्ता अनुबन्धाः’ इति। उभयविधमनुबन्धेषु उक्तमेकान्ता अनेकान्ता इति । किमत्र न्याय्यम्? तदुक्तं नागेशाचार्येण ‘तत्र ह्युक्तमेकान्ता अनुबन्धा इत्येव न्याय्यमिति’[७७९] । अत्र हि हेतुव्यवदिष्टो यच्च नाम सहेतुकं तन्न्याय्यम्। ननु चोक्तं तत्रासरूपसर्वादेशदाप्प्रतिषेधे पृथक्त्वनिर्देशोऽनाकारान्तत्वादिति । असरूपविधौ तावन्न दोषः । दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्तव्य इति न कर्तव्य आचार्य प्रवृत्तिर्ज्ञापयति अनुबन्धकृतमनेजन्तत्वं भवतीति यदयम् ‘उदीतां माङो व्यतिहारे’ इमे मेङः सानुबन्धकस्यात्त्वभूतस्य ग्रहणं करोतीति ‘तस्यः लोपः’ इति सूत्रभाष्येऽपि अनुबन्धा एकान्त इति पक्षः सिद्धान्तितः ।

‘नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे’ इति परिभाषालोचनावसरे नागेशा–चार्येणोदीरितम्– ‘अनभ्यासेत्युक्तेर्विभर्तीत्यादौ भूञामित् इत्याद्यन्त्यस्यैवाभ्यासोऽन–र्थकोऽर्थावृत्त्यभावात्, किन्तूतरखण्ड एवार्थवानित्यन्यत्र निरूपितम् । एषाऽलोऽन्त्यात्सूत्रे भाष्ये स्पष्टा फलानामन्यथासिद्धिकरणेन प्रत्याख्याता चेति तत एवावधार्यम्’ इति ।

‘नाजानन्तर्ये बहिष्ट्वप्रक्ळप्तिः’ इति परिभाषा ‘नागेशेनास्वीकृता । तदुच्यते ‘अत एव ‘अचः परस्मिन्’ इति इति सूत्रे भाष्ये पटु + इ + आ इत्यत्र परयणादेशस्यानयाऽसिद्धत्वात् पूर्वयणादेशः साधितः । अतएवेषा परिभाषा भाष्ये पुनः क्वापि नोल्लिखिता”[७८०] इति । ‘षत्वतुकोरसिद्ध’ इत्यत्र तुग्ग्रहणात् बहिरङ्गपरिभाषायाः अनित्यत्वात् अक्षद्युः इत्यादि सिध्यति ।

“सम्प्रसारणं तदाश्रयं च कार्यं बलवत्” इति परिभाषा न स्वीकृता नागेशाचार्येण । ‘लिट्यभ्यासस्योभयेषामि’ति सूत्रे वच्यादीनां ग्रह्यादीनामनुवृत्त्यैव सिद्धे कृतेन उभयेषामिति ग्रहणेन सामर्थ्यात् सम्प्रसारणमेव प्रथमं सर्वस्मात् कार्यात् कार्यमित्यर्थात् विव्याधेत्यादि प्रयोजनं सिद्धम् । अतः नैषा परिभाषा स्वीकार्या । तदुच्यते नागेशाचार्येण – वस्तुतो ‘लिट्यभ्यासस्य इति सूत्रे उभयेषां ग्रहणस्योभयेषां सम्प्रसारणमेव यथा

३३०. नीलकण्ठदीक्षितकृतपरिभाषावृत्तिः, परि. – १३२ ।

३३१.परिभाषेन्दुशेखरः, परि. – ५ ।

३३२. ‘नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः’ ।

स्यादित्यनर्थकत्वेनेदं सिद्धमित्येषा व्यर्थेति 'लिट्यभ्यासस्ये'ति सूत्रे भाष्ये स्पष्टम्"[७८१] इति ।

ननु तेन वच्यादिगृह्यादिविषयलक्ष्याणां विव्याध, वव्रश्च इत्यादीनां सिद्धिसम्भवेऽपि ह्वेञ्धातोर्निष्पाद्यमाने जुहुवतुरिद्यादौ 'अभ्यस्तस्य च' इति प्राप्तसम्प्रसारणं पूर्वरूपं बाधित्वा परत्वादालोपापत्त्या दोषापत्तिरिति चेन्न एषां फलानां सिद्धेरपि परिभाषां विनैव 'लिट्यभ्यासस्योभयेषाम्' इति भाष्ये दर्शितत्वात् । तत्र हि प्रोक्तं नित्यत्वादन्तरङ्गत्वात् च तत्तत्कार्यं बाधित्वा सम्प्रसारणस्यैव प्रवृत्त्या दोषाभाव इति परिभाषाया नोपयोग इति । तदुक्तं नागेशाचार्येण मूले 'फलान्तरान्यथासिद्धिरपि तत्रैव भाष्ये स्पष्टा' इति ।

प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणमिति 'तित्स्वरितमि'ति सूत्रे लक्ष्यसंस्काराय भाष्ये क्वापि नाश्रिता इति कैयटेनोक्तम् । तत्रत्यः कैयटो यथा प्रत्ययाप्रत्यययोः प्रत्यये कार्यसम्प्रत्ययः इति परिभाषा भाष्यवार्तिकाभ्यां न क्वचिदाश्रिता इत्याह । 'अङ्गस्य' इति सूत्रे तत्प्रत्याख्यानायैषा भाष्ये एकदेशिनोक्ता । अत न तत्प्रामाण्यम् । अतएव परिभाषाया असत्त्वादेव 'तिति प्रत्ययग्रहणं कर्तव्यमि'ति वार्तिककृतोक्तम् । अन्यथानयैव तितः प्रत्ययस्येव ग्रहणे सिद्धे तद्व्यर्थं स्यात् । 'सनाशंसभिक्ष उः' इत्यत्र 'वले च' इति सूत्रयोः तु लक्ष्यानुसारिव्याख्यानात् प्रत्यययोरेव ग्रहणमिति न दोषः । अतः परिभाषेयं न स्वीकार्या इति नागेशाचार्यमतम् ।

'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषापर्यालोचनावसरे 'केचित्त्वनया परिभाषया न किञ्चिल्लक्ष्यं साध्यते' इति मतं नागेशाचार्येणोपस्थापितं तत्तु स्वीयमेव । यतः ज्ञाजनोर्जा'[७८२] इति सूत्रस्योद्द्योते निर्दिष्टवान् तत्रान्यमतत्वेन तस्योल्लेखो न दृश्यते । तत्र नागेशेनैवास्वीकृता । अतएव 'ज्ञाजनोर्जा', 'ज्यादादीयसः' इति सूत्रयोरेनां ज्ञापयित्वा किं प्रयोजनमिति प्रश्ने पिबतेर्गुणप्रतिषेध उक्तः । स न वक्तव्य इत्येव प्रयोजनमुक्तं न तु लक्ष्यसिद्धरूपम् । तदुक्तं 'भ्यसो भ्यमि'त्यत्र भ्यमितिच्छेदः । शेषे लोपश्चान्त्यलोप एव । 'अतो गुणे' इति पररूपेण सिद्धं युष्मभ्यमित्यन्यत्र निरूपितम् । एवञ्च सूत्रद्वयस्थमेतज्ज्ञापनपरं भाष्यं 'भ्यसो भ्यमि'ति सूत्रस्थञ्च भाष्यमेकदेश्युक्तिरित्याहुः"[७८३] इति ।

---

३३३. महाभाष्यम् – ६/१/१७ ।

३३४. अष्टा. – ७/३/७९ ।

३३५. परिभाषेन्दुशेखरः, परि. – ९३ ।

परिभाषेन्दुशेखरे नागेशभट्टस्य स्वकीया स्वतन्त्रतास्ति । तेन लक्ष्यानुसारं परिभाषालोचिता । वहुत्र परिभाषास्वीकारविषये 'तत्र क्वोभयगतिः क्वाकृत्रिमस्यैव क्व कृत्रिमस्यैवेत्यत्र लक्ष्यानुसारिव्याख्यानमेव शरणम्', 'तावान्मात्रांशे स्वरितत्वप्रतिज्ञा–बलाल्लभ्यमिदम्', 'लक्ष्यानुसारात् क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ता–श्रयणम्', 'सर्वं चेदं लक्ष्यानुरोधात् व्यवस्थितम्', 'लक्ष्यानुरोधाच्च व्यवस्था । तत तत्र क्वचित् स्वरितत्वप्रतिज्ञा बाध्यतेऽयं न्यायः', 'लक्ष्यानुरोधाद्व्यवस्था बोध्या', 'लक्ष्यानुरोधेन च व्यवस्था' चेत्येवं नागेशाचार्येण स्वमतमुपस्थापितम् । अनेन अस्य ग्रन्थस्य लक्ष्यप्रधानता रूपप्रधानता प्रक्रियाप्रधानता वापि सिद्धा प्रतिपन्ना ।

**परिभाषेन्दुशेखरे विषयानुसारिणी परिभाषा उपस्थाप्यते ।**

**अनुबन्धविषयकपरिभाषाः पञ्चसंख्यकाः –**

१.अनेकान्ता अनुबन्धाः ।
२.एकान्ताः
३.नानुबन्धकृतमनेकाल्त्वम् ।
४.नानुबन्धकृतमनेजन्तत्वम् ।
५.नानुबन्धकृतमसारूप्यम् ।

**कार्यनिमित्तयोर्भेदविषयकपरिभाषा एका –**

१.कार्यमनुभवन् हि कार्यी निमित्तया नाश्रीयते ।

**आगमोऽङ्गिणोऽङ्ग इति विषयकपरिभाषा एका –**

१.यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ।

**आदेशविषयकपरिभाषात्रयमस्ति –**

१.निर्दिश्यमानस्यादेशा भवन्ति ।
२.यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः ।
३.पदाङ्गाधिकारे तस्य च तदन्तस्य च ।

**अनुवृत्तिसूचकपरिभाषाद्वयमस्ति –**

१.एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ।
२.एकयोगनिर्दिष्टानां क्वचिदेकदेशोऽप्यनुवर्तते ।

**ग्राह्यताग्राह्यताप्रतिपादकपरिभाषा एकादशसंख्यकाः –**

१.अर्थवद्ग्रहणेन नानर्थकस्य ग्रहणम् ।
२.गौणमुख्ययोमुखो कार्यसम्प्रत्ययः ।
३.अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन ।
४.निरुनुबन्धकग्रहणे सानुबन्धकस्य ।
५.तदनुबन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम् ।
६.लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ।
७.प्रधानाप्रधानयोः प्रधाने कार्यः सम्प्रत्ययः ।
८.प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् ।
९.सहचरितसहचरितयोः सहचरितस्यैव ग्रहणम् ।
१०.लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ।
११.औपदेशिकप्रायगिकयोरौपदेशिकस्यैव ग्रहणम् ।

**सवर्णग्राहकतापरिभाषाद्वयमस्ति –**

१.भाव्यमानेन सवर्णानां ग्रहणं न ।
२.भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति ।

**प्रत्ययलक्षणनिषेधिका परिभाषैका –**

१.वर्णाश्रये नास्ति प्रत्ययलक्षणम् ।

**तदन्तविधिविषयकपरिभाषाः अष्टसंख्यकाः –**

१.प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ।
२.प्रत्ययग्रहणे चापञ्चम्याः ।
३.उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम् ।
४.स्त्रीप्रत्यये चानुपसर्जने न ।
५.संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ।
६.कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ।
७.पदाङ्गाधिकारे तस्य च तदन्तस्य च ।
८.ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति ।

**तदादिबोधकपरिभाषा एका –**

१.यस्मिन् विधिस्तदादावल्ग्रहणे ।

**आतिदेशिकपरिभाषाः अष्टसंख्यकाः –**

१.व्यपदेशिवदेकस्मिन् ।
२.व्यपदेशिवद्भावोऽप्रातिपदिकेन ।
३.प्रकृतिवदनुकरणं भवति ।
४.एकदेशविकृतमनन्यवत् ।
५.असिद्धं बहिरङ्गमन्तरङ्गे ।
६.स्वरविधौ व्यञ्जनमविद्यमानवत् ।
७.हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् ।
८.पर्जन्यवल्लक्षणप्रवृत्तिः ।

**बलवत्त्वप्रतिपादकपरिभाषाः त्रयोदशसंख्यकाः –**

१.पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।
२.विकरणेभ्यो नियमो बलीयान् ।
३.अन्तरङ्गानपि विधीन् बहिरङ्गो ल्युग्बाधते ।
४.अन्तरङ्गानापि विधीन् बहिरङ्गो ल्यब्बाधते ।
५.वार्णादाङ्गं बलीयः ।
६.येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति ।
७.उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् ।
८.सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ।
९.उपपदविभक्तेः कारकविभक्तिर्बलीयसी ।
१०.अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ।
११.श्रुतानुमितयोः श्रुतसम्बन्धो बलवान् ।
१२.निषेधाश्च बलीयांसः ।
१३.सम्प्रसारणं तदाश्रयं च कार्यं बलवत् ।

**नित्यानित्यत्वप्रतिपादकपरिभाषा अष्टसंख्यकाः ।**

१.कृताकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम् ।
२.शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ।
३.शब्दान्तरात् प्राप्नुवतः शब्दान्तरे ।
४.लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ।
५.क्वचित् कृताकृतप्रसङ्गित्वमात्रेणापि नित्यता ।
६.यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदनित्यम् ।
७.यस्य च लक्षणान्तरेन निमित्तं विहन्यते तदप्यनित्यम् ।
८.स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यो भवति ।

**अन्तरङ्गपरिभाषायाः बाधिकापरिभाषाः षट्संख्यकाः ।**

१.नाजानन्तर्ये बहिष्ट्वप्रक्ळप्तिः ।
२.अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते ।
३.पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्युकेदेशो न ।
४.अन्तरङ्गान् विधीन् बहिरङ्गो ल्यब् बाधते ।
५.वार्णादाङ्गं बलीयः ।
६.अकृतव्यूहाः पाणिनीयाः ।

**अपवादविषयकपरिभाषाः त्रयोदशसंख्यकाः**

१.येन नाप्राप्ते विधिरारभ्यते स तस्य बाधको न भवति ।
२.क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते ।
३.पुरस्तदपवादा अनन्तरान्विधीन् बाधन्ते नोत्तरान् ।
४.मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान् ।
५.अनन्तरस्य विधिर्वा प्रतिषेधो वा ।
६.पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः ।
७.प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते ।
८.उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमुत्सर्गं बाधते ।
९.अपवादा यद्यन्यत्र चरितार्थस्तर्ह्यन्तरेङ्गेण बाध्यते ।
१०.अभ्यासविकारेषु बाध्यबाधकभावो नास्ति ।
११.ताच्छीलिकेषु वासरूपविधिर्नास्ति ।
१२.क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति ।
१३.लादेशेषु वासरूपविधिर्नास्ति ।

**लिङ्गसम्बधिनीपरिभाषा त्रयमस्ति –**

१.प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

२.विभक्तौ लिङ्गविशिष्टस्याग्रहणात् ।

३.सूत्रे लिङ्गवचनमतन्त्रम् ।

**अधिकसंग्राहकन्यायाः –**

१.प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् ।

२.तन्मध्येपतितस्तद्ग्रहणेन गृह्यते ।

३.प्रकृतिग्रहणे ण्यधिकरणस्यापि ग्रहणम् ।

४.प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ।

५.यत्तु क्वचिद्विकृतिः प्रकृतिं गृह्णाति ।

**अर्थस्यानित्यताप्रतिपादकपरिभाषाः षड्संख्यकाः –**

१.संज्ञापूर्वकविधेरनित्यम् ।

२.आगमशास्त्रमनित्यम् ।

३.गणकार्यमनित्यम् ।

४.अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ।

५.नञ्घटितत्वमनित्यम् ।

६.आतिदेशिकमनित्यम् ।

**उपस्थानानुपस्थानसूचितपरिभाषात्रयमस्ति –**

१.विधौ परिभाषापतिष्ठते नानुवादे ।

२.अनन्त्यविकारेऽन्त्यसदेशस्य ।

३.नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ।

**जायस्त्वप्रतिपादकपरिभाषा एका –**

१.विधिनियमसम्भवे विधिरेव ज्यायान् ।

इत्येवमेव विविधशास्त्रविषयाः परिभाषासु दृश्यन्ते ।

# पञ्चमोऽध्यायः

# परिभाषेन्दुशेखरे पारिभाषिकशब्दानां विश्लेषणम् ।

संस्कृतवाङ्मये सर्वेषां शास्त्राणां किञ्चन स्वकीयं वैशिष्ट्यं दरीदृश्यते । तेषां केचन स्वीयाः पारिभाषिकशब्दा अपि विद्यन्ते । शास्त्रानुसारं तेषामर्था अपि भिन्नाः । यदि पारिभाषिकशब्दानां पदार्थज्ञानं स्यात्तर्हि शास्त्रार्थः सम्यग्रूपेणावज्ञायते । परिभाषेन्दुशेखरे तथा पाणिनीये उक्तानां पारिभाषिकशब्दानां पर्यालोचनमस्मिन्नध्याये आलोच्यते ।

## १. यथोद्देशम् ।

संज्ञापरिभाषासूत्रेषु यथोद्देशपक्षमाश्रियते । उद्देशनमतिक्रम्य यथोद्देशम् । उद्देश उपदेशदेशः। यत्र देश उपदिश्यते तद्देश एवं वाक्यार्थबोधेन गृहीतशक्त्या गृहीतपदार्थेन च सर्वत्र शास्त्रे व्यवहारः । देशश्च प्रथमोच्चारणकाल एवात्र व्यवह्रियते । उद्देशनमनतिक्रम्य यथोद्देशमिति 'यथाऽसादृशे' इति सूत्रेणाव्ययीभावसमासः । छात्रो द्विविधो लोके दृश्यते । एकोऽन्धश्रद्धालुः गुरुर्यदुपदिशति तदवश्यमेव ममोपयोगीति निश्चित्य 'वृद्धिरादैच्' इति 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यादिसंज्ञापरिभाषयोर्वाक्यार्थे गुरुणाध्यापिते भविष्यति किञ्चिदनेन प्रयोजनमिति मत्वा संज्ञापरिभाषादेश एव यथाश्रुतं गृह्णाति । एतादृशः संज्ञापरिभाषयोर्देश एव वाक्यार्थबोधशीलश्छात्रः प्रतिपत्ता अस्य यथोद्देशपक्षस्य मूलम् । स छात्रो 'वृद्धिरादैजि'त्यस्य वृद्धिपदमादैज्निरूपितशक्तिमदित्यर्थे तस्मिन्नित्यादि परिभाषायाः सप्तमीनिर्देशेन विधीयमानं कार्यमव्यवहितपूर्वस्य भवतीत्याद्यर्थे च गुरुभिर्बोधिते सादरानुभवाज्जाततत्तदर्थविषयसंस्कारो 'वृद्धिरेचि', 'इको यणचि' इत्यादि वृद्धिपदौपश्लेषिकाधिकरणबोधकाचीतिपदेत्यादिरूपैकसम्बन्धिज्ञानेनोद्बुद्धतत्तत्संस्कारेणानु–भूततत्तदर्थं स्मृत्वा लक्ष्यसंस्कारोपयोगिबोधवान् । तथा च यथोद्देशपक्षे परिभाषया संज्ञासूत्रेण च विधिशास्त्रस्य वाक्यैकवाक्यता । सा चोपजीव्योपजीवकभावापन्नबोध–जनकत्वरूपा । तस्मिन्नित्यादिपरिभाषाणां वृद्धिरादैजित्यादिसंज्ञासूत्राणां च बोध उपजीव्य 'इको यणचि', 'वृद्धिरेची'त्यादिशास्त्रजन्योऽप्रामाण्यज्ञाना नास्कन्दितो लक्ष्यधर्म्मिकसाधु–त्वप्रकारको बोध उपजीवकः । तादृशबोधस्य संज्ञापरिभाषाबोधाधीनत्वादिति

लक्षणसमन्वयः । नागेशेचार्योऽस्मिन् प्रसङ्गे आह – 'तत्तद्वाक्यार्थबोधे जाते भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानमात्रेण सन्तष्यद्यथाश्रुतग्राहिप्रतिपत्रपेक्षोऽयं पक्ष'[७८४] इति ।

## २. कार्यकालम् ।

कार्यकालमिति पदं 'कार्यकालं संज्ञापरिभाषम्'[७८५] इति परिभाषायामुपतिष्ठते । विधायकशास्त्रेण काल्यते स्वसन्निधिं प्राप्यते इति कार्यकालम् । संज्ञापरिभाषासूत्रेषु कार्यकालमिति पक्षमाश्रियते । कश्चन छात्रो न तथान्धश्रद्धालुः किन्तु फलानुरोधेनैव गुरुवाक्येऽपि श्रद्धधाति । एतादृशश्छात्रो 'वृद्धिरादैच्', 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इत्यादिसंज्ञापरिभाषयोः संज्ञापरिभाषदेशे गुरुणा वाक्यार्थे पठितेऽपि तत्र लक्ष्यसिद्धिरूपं प्रयोजनमदृष्ट्वा नानेन मम किमपीष्टसाधनं भविष्यतीति संज्ञापरिभाषदेशे तद्वाक्यार्थबोधमुपेक्षते । अतस्तत्र देशे संज्ञापरिभाषविषयकदृढतरसंस्काराभावात् 'वृद्धिरेचि', 'इको यणचि' इत्यादिविधिसूत्रीयवाक्यार्थबोधकाले वृद्धिपदेन किं गृह्यते? अचि परे कस्य यण्? इत्यादि जिज्ञासायां जातायां 'वृद्धिरादैच्', तस्मिन्नित्यादिसंज्ञापरिभाषासूत्रं विधिसूत्रप्रदेशामानीय पदैकवाक्यतया वाक्यार्थो बुध्यते । 'इदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रस्थभाष्यपर्यालोचनावसरे कैयटेनोक्तं 'यथोद्देशपक्षाश्रयेण परिहारः कथं पुनरयं पक्षो यावता कार्यार्थत्वात् संज्ञापरिभाषस्य कार्यकालतयैव न्याय्या । नैष दोषः । यथानुद्दिश्य प्रयोजनविषयं प्रयोजनमात्रमभिसन्धाय भविष्यति किञ्चिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते, तदा संभवत्येवायं पक्षो यथा – 'श्रुतग्राहिप्रतिपत्रपेक्ष'[७८६] इति ।

## ३.अनेकान्ताः ।

'अनेकान्ताः' पदमिदम् 'अनेकान्ता अनुबन्धाः'[७८७] इति परिभाषायामुपलभ्यते । अनेकान्ता अनवयवा इत्यर्थः । यो ह्यवयवं स कदाचित्तत्रोपलभ्यत एव अयं तु न तथा । तदर्थभूते विधेये कदाप्यदर्शनात् । न एकान्तः अवयवः अनेकान्तः इति । शास्त्रे अनुबन्धा

---

१. परिभाषेन्दुशेखरः, परि. – २ ।

२. तत्रैव – ३ ।

३. महाभाष्यप्रदीपे – १/१/११ ।

४. परिभाषेन्दुशेखरः, परि. – ४ ।

इत्संज्ञायोग्याः, अनेकान्ताः अनवयवाः भवन्ति । न्यायोऽयं 'दाधा घ्वदाप्'[७८८] इति सूत्रभाष्ये प्रयुक्तः । तदुक्तं "दाप्प्रतिषेधे न दैप्यनेजन्तत्वात् दाप्प्रतिषेधे दैपि प्रतिषेधो न प्राप्नोति । अवदातं मुखम् । ननु चात्वे कृते भविष्यति । तद्ध्यात्वं न प्राप्नोति । किं कारणम्? अनेजन्तत्वात् । सिद्धमनुबन्धस्यानेकान्तत्वात्"[७८९] इति । लोकेऽपि शरीरे गृह्यमाणा उष्णिषादयोऽनुबन्धाः शरीरानवयवा एव भवन्ति ।

**४.अनुबन्धः ।**

अनुबन्ध इति पारिभाषिकशब्दोऽयम् 'अनेकान्ता अनुबन्धाः', 'एकान्ता अनुबन्धा' चोभयत्र विद्यते । अनु पश्चादर्थद्योतकत्वं बध्यते योऽसावनुबन्धः । अनुबन्धत्वञ्च आचार्यकर्तृकलक्ष्यसमवायातिरिक्तकार्यसमर्पकोच्चारणविषयत्वम् । अनूपसर्गपूर्वकात् बन्धधातोः घञ्प्रत्ययनिष्पन्नोऽनुबन्धशब्दः । अनूपसर्गोऽप्राधान्यार्थद्योतकः बध्नाति–रुच्चारणार्थः तेनोक्तलक्षणं सिद्धम् । क्तप्रत्ययादौ आचार्येण ककारादयः, भूतमित्यादौ लक्ष्ये समवेताः भवन्त्वितीच्छया नोच्चारिताः, किन्तु तकारादय एव तादृशेच्छयोच्चारिताः । इत्थं भूतमित्यादौ लक्ष्ये समवायातिरिक्तस्य कार्यस्य गुणादिप्रतिषेधात्मकस्य कार्यस्य सम्प्रदायकृतोच्चारणविषयत्वं ककारादौ वर्तते इति तेषामनुबन्धत्वं संगतम् । इत्संज्ञा–योग्यत्वमनुबन्धत्वम् ।

लक्ष्ये श्रवणातिरिक्तकार्यसमर्पका इत्संज्ञका अनुबन्धाः । ते बोधकानामवयवा अनवयवा वेति सन्देह उद्भवति । तत्रानुमानेन निर्णीयते अनुबन्धा बोधकानवयवाः बोधकावयवत्वेन उपलब्धिविषयत्वाभावात् । अनुबन्धा बोधकावयवत्वेनोपलब्धिविषयत्वा–भाववन्तः, तदर्थभूते विधेये कदाप्यदर्शनात् । यो ह्यवयवः स कदाचिद्विधेये उपलभ्यते । यथा – तिपि इकारः, सुपि चोकारः भवति, 'रामसु' इत्यादौ उपलभ्यते । एषोऽनुबन्धस्तु न तथा तिप्सुपादौ पकारस्य क्वाप्यनुपलब्धेः, पुनः परिभाषेन्दुशेखरे नागेशाचार्येणावतारिता 'एकान्ता अनुबन्धाः' इति । अनुबन्धा इत्संज्ञायोग्याः, एकान्ताः अवयवाः इत्यर्थः । सन्विधायकशास्त्रे बोधके सनि समवायसम्बन्धेनोपलभ्यमानत्वे सत्यन्यत्र तेन सम्बन्धेनानुपलम्भाद्गृहादीनामनवयवः काकादिर्येन सम्बन्धेन गृहादिषु उपलभ्यते, तेनैवात्रापि

---

५. अष्टा. – १/१/२० ।

६. महाभाष्यम् – १/१/२० ।

वृक्षादिषु । अनुबन्धा एकान्ता इत्येव न्याय्यमिति मतं 'तस्य लोपः'[७१०] इति सूत्रभाष्ये उपन्यस्तम् । तदुक्तं पतञ्जलिना – उभयमिदमनुबन्धेषूक्तमेकान्ता अनेकान्ता इति । किमत्र न्याय्यम्? एकान्ता इत्येव न्याय्यम् । कुत एतत्? अत्र हेतुर्व्यपदिष्टः । यच्च नाम सहेतुकं तन्न्याय्यम्'[७११] इति । अनुबन्धविषये पक्षत्रयमाश्रियते – १. 'नानुबन्धकृतमनेकाल्त्वम्' इति । २. 'नानुबन्धकृतमनेजन्तत्वम्' इति । ३.नानुबन्धकृतमसारूप्यम् ।

**५.अल् –**

आचार्यपाणिनिनाष्टाध्यायीग्रन्थारम्भात् पूर्वं शिवानुग्रहलाभाय तपश्चकार । महेश्वरः पाणिनेः तपसा सन्तुष्टः सन् नवपञ्चवारं डमरुध्वनिं कृतवान् । तस्मात् चतुर्दशमाहेश्वरसूत्राणि प्राप्तवान् इति श्रुतिः । तत्र 'अइउण्' इति प्रथमसूत्रस्थस्याकारमादाय अन्तिमसूत्रस्थस्य 'हल्' इत्यतः 'ल्'कारं नीत्वा 'अल्' इति प्रत्याहारो निर्मितः । स्वरव्यञ्जनवर्णाः 'अल्' इत्यनेन गृह्यते । अल्विधिः वर्णविधिरेव बोध्यते ।

**६.कृत्रिमाकृत्रिमसंज्ञा –**

शब्दद्वयं 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः'[७१२] इत्यत्रोपलभ्यते । इह लोके द्विविधाः संज्ञाः दृश्यन्ते, कृत्रिमा अकृत्रिमाश्च । तत्र कृत्रिमा यथा कस्यचित् गोपालकस्यापि गोपालक इति संज्ञा क्रियते । अस्याः संज्ञाया अवयवार्थाः संज्ञिन्यविवक्षिता भवन्ति केवलं संज्ञिसम्प्रत्ययमात्रमेव प्रयोजनं भवति । अकृत्रिमा च संज्ञा या यस्यां संज्ञागता अवयवार्थाः संज्ञिन्युपलभ्यन्ते । यथा कस्यचिद् गोपालनकर्मणि प्रवृत्तस्य 'गोपालक' इति संज्ञा क्रियते । पारिभाषिकं कृत्रिमं ततोऽन्यदकृत्रिमम् । तयोर्मध्ये कृत्रिम एव कार्यसंप्रत्ययः कार्यपरिज्ञानं भवति । यथा 'कर्मणि द्वितीया' (अष्टा. – २/३/२) इति । पारिभाषिकं 'कर्तुरीप्सिततमं कर्म' (अष्टा. – १/४/४९) गृह्यते, न लौकिकं क्रियाकर्म । 'एक गोत्रे' (अष्टा. – ४/१/९३) इति पारिभाषिकं पौत्रप्रभृति अपत्यं गोत्रत्वेन गृह्यत्वेन, नापत्यमात्रम्' इति । तथैव शास्त्रे द्विविधाः संज्ञाः दृश्यन्ते – कृत्रिमा

७. अष्टा. – १/३/९ ।
८. महाभाष्यम् – १/३/९ ।
९. परिभाषेन्दुशेखरः, परि. – ९ ।

अकृत्रिमाश्च । कृत्रिमा यथा बह्वादीनां 'बहुगणवतुडति संख्या' इत्यादिना संख्यासंज्ञा । अकृत्रिमा च एकादीनां संख्यायतेऽनया संख्येति व्युत्पत्त्या स्वत एव संख्यासंज्ञा सिद्धा । आचार्यनागेशेन कृत्रिमाकृत्रिमसंज्ञाविषये परिभाषाद्वयमवतारितम् । तद्यथा – १. 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' । २.'उभयगतिरिह भवति'[७९३] ।

**७.कार्यी –**

'कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते' इति परिभाषायां कार्यी इति पदं प्राप्यते । यस्य स्थाने कार्यं विधीयते स कार्यी । यथा 'इको यणचि' इति सूत्रेण 'इक' इत्यस्य स्थाने यण् विधीयते । अत्र इक् यणः कार्यी भवति । यमाश्रित्य यस्य स्थाने कार्यं भवति स एव निमित्तक इत्युच्यते । 'इको यणचि' इति सूत्रे इक् कार्यी, यण् कार्यम् 'अचि' निमित्तकं च । तस्माद्व्याकरणनिकाये उच्यते –

"कार्यी कार्य्यं निमित्तञ्च त्रिभिः सूत्रमुदाहृतम् ।
कस्यचित् कार्यिकार्य्याभ्यां क्वचित् कार्य्यनिमित्ततः ॥
यस्य निर्दिश्यते कार्यं स कार्यी गदितो बुधैः ।
क्रियते यत्तु तत्कार्य्यमादेश प्रत्ययागमम्" ॥[७९४] इति ।

पाणिनेरष्टाध्याय्याः सूत्रेषु निमित्तं पदं सप्तम्यन्तं पञ्चम्यन्तं च भवति । यथा 'इको यणचि' इत्यत्र निमित्तपदं सप्तम्यन्तम्, 'उदः स्थास्तम्भोः पूर्वस्य' इत्यत्र 'उदः' इति निमित्तं पदं पञ्चम्यन्तम् ।

---

१०.तत्रैव – १० ।

११. हरिनामामृतव्याकरणे गोस्वामिपादेनानुरूपमुक्तम् –

"प्राङ्निमित्तं तथा कार्यी कार्यं परनिमित्तकम् ।
अत्र क्रमेण वक्तव्यं प्रायः सूत्रेषु सर्वत्र ॥
कार्यपूर्वे पञ्चमी स्यात् कार्यस्थाने तु षष्ठिका ।
कार्ये तु प्रथमा वाच्या सप्तमी विषये पर ॥"

द्रष्टव्यम् – व्याकरणदर्शनेर इतिहास, पृ. ३५८–३५९ ।

### ८. निर्दिश्यमानः –

'निर्दिश्यमानस्यादेशा भवन्ति'७९५ इति परिभाषायां पदमिदमुपलभ्यते । निर्दिश्यमानत्वञ्च षष्ठीप्रकृतिजन्यप्राथमिकोपस्थितिविषयत्वम् । षष्ठ्यन्तं निर्दिश्यमानमुच्चार्यमाणसजातीयमेव निर्दिश्यमानावयवरूपमेव वा स्थानेन स्थाननिरूपितसम्बन्धेन युज्यते न प्रतीयमानमिति । 'उदः स्थास्तम्भो : पूर्वस्य' इत्यत्र या षष्ठी, तस्याः प्रकृतिः स्थास्तम्भोरिति तज्जन्यप्राथमिकोपस्थिति– विषयः स्था भवतीति तस्यैवादेशः सम्पद्यते, न तु अडागमविशिष्टस्य 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यते' इति परिभाषाबोधितस्या– स्थेत्यस्य । तस्य षष्ठीप्रकृत्या प्रथममुपस्थितिर्न भवतीति । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रेण शब्दस्वरूपस्योपस्थितिः भवति । तदनन्तरं येन विधिस्तदन्तस्य इति सूत्रेण तस्य तदन्तविधिः भवति । प्राथमिकत्वञ्चात्र स्थानिवद्भावसूत्रम्, सवर्णग्राहकतासूत्रम् 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते', 'प्रातिपदिकग्रहणे लिङ्गविशिष्टास्यापि ग्रहणम्'७९६ इत्यादिशास्त्रतोऽतिरिक्तशास्त्रसहकाराप्रतीयमानत्वम् । तेन परमा चासौ जरा परमाजरा ततः औविभक्तौ परमजरा इत्यत्र 'जराया जरसन्यतरस्याम्' इत्यनेन परमरहितस्य जराशब्दस्य जरसादेशः, षष्ठी जराया इत्यत्र वर्तते तस्याः प्रकृतिः जरा तज्जन्यप्राथमिकोपस्थितिविषयः जराशब्दस्येति तस्यैवादेशप्रवृत्तेः, परमजरा इत्यस्योपस्थितिस्तु 'येन विधिस्तदन्तस्य', 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति सहकारेण जायतेऽतः न प्राथमिकत्वम् । 'पादः पद्' इति सूत्रभाष्ये महाभाष्यकारेणोदीरितम् – 'आदेशे सर्वादेशप्रसङ्गः', आदेशे हि सति सर्वादेशः प्रसज्येत । सर्वस्य द्विपाच्छब्दस्य, त्रिपादच्छब्दस्य च पच्छाब्द आदेशः प्रसज्येत 'येन विधिस्तदन्तस्य' इति । तत्तर्हि वक्तव्यम्? न वा 'निर्दिश्यमानस्यादेशात् न वा वक्तव्यम् । किं कारणम्? निर्दिश्यादेशा भवन्तीति परिभाषा कर्तव्या' इति ।

### ९. आन्तर्यम् –

'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः'७९७ इति परिभाषायां पदमिदमुपलभ्यते । आन्तर्यं सादृश्यमित्यर्थः । स्थानार्थगुणप्रमाणतश्चतुर्विधामान्तर्यं भवति । स्थानतो यथा दध्यत्र । 'दधि + अत्र' इत्यवस्थायाम् 'इको यणचि' इति सूत्रेण इकः

---

१२. परिभाषेन्दुशेखरः, परि. – १३ ।

१३. तत्रैव, परि. – ७२ ।

१४. तत्रैव, परि. – १४ ।

स्थाने यण् स्यादचि संहितायां विषये । तालुस्थानस्य इकारस्य तालुस्थानो यकारो भवति । तेन 'दध्य् अत्र' इति जाते संयोगे 'दध्यत्र' इति रूपं सिद्ध्यति । अर्थतो यथा – 'वातण्ड्ययुवतिः', वतण्डशब्दात् 'वतण्डाच्च' इति सूत्रेण गोत्रापत्ये यञ् । तस्य लुक् स्त्रियामिति लुक् । शार्ङ्गरवादित्वान्ङीन् । वतण्डी चासौ युवति श्चेति विग्रहे 'पोटायुवतिस्तोककतिपय'[७१८] इत्यादिना समासः, 'पुंवत्कर्मधारय' इत्यतिदिश्यमानः पुंशब्दो वतण्डापत्यवाचिनो वतण्डीशब्दस्य तदपत्यवाची वातण्डादिशब्दो भवति, न तु वतण्डादिः । एवञ्च "तृज्वत् क्रोष्टुः" इति सूत्रेण क्रोष्टुशब्दस्य उकारान्तस्य तृजन्त आदेशो भवन् अर्थसाम्यात् क्रोष्टृशब्द एव तृजन्त आदेशो भवति । गुणतो यथा 'वाग्घरिः' अत्र हकारः स्थानी घोषनादसंवारमहाप्राणप्रयत्नवान् । तस्य गकारसवर्णो भवन् चतुर्थो घकारो भवति, तस्य हकारेण स्थानिना घोषनादसंवारमहाप्राणप्रयत्नसाक्षात् । ककारस्तु न भवति, तस्य श्वासाघोषविवाराल्पप्राणप्रयत्नकत्वात् । तथा खकारोऽपि द्वितीयो न भवति, तस्य महाप्राणप्रयत्नसाम्येऽपि श्वासाघोषविवारप्रयत्नभेदात् । तथा तृतीयोऽपि गकारो न भवति, तस्य घोषनादसंवारप्रयत्नसाम्येऽपि अल्पप्राणप्रयत्नभेदात् । अतएव ङकारो न भवति । अतः घोषवतो नादवतो महाप्राणस्य तादृश एव घकारः । प्रमाणतो यथा – अमुम्, अमू, अमून् । 'अदसोऽसेदादु दो मः' इत्यनेन ह्रस्वस्य ह्रस्वो दीर्घस्य दीर्घ उकारो जायते । एषु स्थानकृतार्थकृतगुणकृत प्रमाणकृतेषु चतुर्विधेषु आन्तर्येषु स्थानकृतमान्तर्यं सर्वेभ्यो बलवद्भवति । ततः 'चेता' इत्यत्र प्रमाणकृतेनान्तर्येण प्राप्तमकारगुणं बाधित्वा स्थानत आन्तर्यादेकार एव गुणो भवति । इकारैकारयोस्तालुस्थानकृतसदृश्यस्य सत्त्वाद् 'इचुयशानां तालु एतैतोः कण्ठतालु' इति स्मरणात्।

**१०.गौणमुख्यौ** –

गौणमुख्यौ इति शब्दौ 'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय' इति परिभाषायामुपन्यस्तौ। गुणादागतो गौणः । गुणशब्दात् 'तत आगतः' इत्यनेनाण्प्रत्ययः । आङ्पूर्वकस्य गम्धातोरिह ज्ञानमर्थः । तेन गुणयोगाद् योऽर्थः ज्ञायते स गौणार्थः । यथा गोर्जल्पति इत्यादौ जाड्यमान्द्यादिगुणयोगादिह प्रतीयमानो वाहीकार्थो गोशब्दस्य गौणार्थः । अभिधया प्रतीयमानोऽर्थो मुख्यः, लक्षणया च प्रतीयमानो गौणः । अप्रसिद्धश्च संज्ञादिरपि गौणार्थप्रतिपादक एव । पित्रादिना यदा पुत्रादेः रामकृष्णेति नाम क्रियते तदा

---

७१८. अष्टा. – २/१/६५ ।

रामगतपितृभक्तिसौर्यादिगुणस्तेन तद्गुणदिदृक्षुणा तत्रारोप्यन्ते । अतो रामसंज्ञादिरपि गुणप्रतिसन्धानयोगादेवार्थबोधकत्वाद्गौणार्थप्रतिपादकः । मुखमिव प्रधानत्वादभिधा बोध्योऽर्थो मुख्यः प्रथमः गौणश्चारोपितः । अतएव मुखेतरः लक्षणाबोध्यः । गौणार्थस्य प्रतीतेः पूर्वं मुख्यार्थस्य प्रतीतेरावश्यकत्वात् । तदुक्तं नागेशाचार्येण – 'गौणे ह्यर्थे शब्दः प्रयुज्यमानो मुख्यार्थारोपेण प्रवर्तते । अत एतदेवावगम्यते यत् – योऽप्रसिद्धोऽर्थः सोऽत्र गौणः, यश्च गुणप्रयोज्यलक्षणाविषयः सोऽपि चार्थो गौणः । परिभाषावृत्तौ आह[७११] – "शब्दश्रुतिमात्रेण प्रतीयमानोऽर्थात्मा मुख्यः, प्रयत्नोपपादितस्तु गौणः । तयोर्मध्ये मुख्य एव कार्ययोगित्वं भवति । तद्यथा आग्नेय इति 'अग्नेर्ढक्' इति । अत्राग्निशब्दादग्न्यर्थात् ढक्, न पुनरग्निर्माणवक इत्यादावुपचरितार्थवृत्तेर्गौणादिति" ।

## ११. ग्रहणम् –

परिभाषेन्दुशेखरे 'ग्रहणम्' इति पदं बहुत्र व्यवहृतम् । 'गृह्यते बोध्यते येन तद्ग्रहणमिति व्युत्पत्त्या ग्रहणशब्दस्य बोधकत्वं ग्राहकत्वं वार्थः । बाहुलकात् भावार्थे ल्युट्प्रत्यये कृते तु ग्रहणं बोधनमित्यर्थो भवति । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषायां ग्रहणपदद्वयं दृश्यते । प्रथमग्रहणशब्दः करणसाधकः द्वितीयस्तु भावसाधनः । सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकबोधशब्दग्रहणे प्रातिपदिक–बोधकपदे उच्चारिते सति प्रत्यासत्या तेनैव पदेन लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणं बोधः भवतीति परिभाषार्थो लभ्यते ।

## १२. भाव्यमानः –

भाव्यमान इत्यस्यार्थो विधीयमानः । कस्मिन्नपि यद्विधीयते विधीयमानः । 'त्यदादीनामः' इति सूत्रेण त्यदादिशब्दानामन्तिमवर्णे अकारादेशो भवति स विधीयमान इत्युच्यते । भाव्यमानविषये नागेशाचार्येण 'भाव्यमानेन सवर्णानां ग्रहणं न', भाव्यमानोऽप्युकारः सर्वणान् गृह्णाति चेति परिभाषाद्वयं सन्निविष्टम् । विधीयमाणोऽण् सवर्णान्न न गृह्णाति । 'अणुदित्सवर्णस्य चाप्रत्ययः' इत्यनेन सवर्णग्रहणं भवति । तेन 'इह' इत्यत्र 'इदम इशि' त्यनेन स्थानिन आन्तर्यात् द्विमात्रो न भवति । सर्वोऽपि विधीयमानोऽण् सर्वनान्न गृह्णाति परन्तु उकारो विधीयमानोऽपि सवर्णान् गृह्णाति ।

---

७११. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – ११ ।

## १३. वर्णाश्रयः –

वर्ण आश्रयो निमित्तं यस्य स वर्णाश्रेयः । यथा सुधी + उपास्य इत्यवस्थायाम् 'इको यणचि' इति सूत्रेण अचं निमित्तं कृत्वा इकः स्थाने यण् विधीयते । 'उ' इत्यस्याच्त्वात् 'ई' इत्यस्य स्थाने 'य' इति जाते 'सुध्युपास्य' इति सिध्यति । 'वर्णाश्रये नास्ति प्रत्ययलक्षणम्'[८००] इति परिभाषा शास्त्रे स्वीकृता । वर्णाश्रयविधौ प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं न भवति तद्यथा गवे हितं गोहितं रायः कुलं रैकुलमिति सुब्लुकि प्रत्ययलक्षणेन 'एचोऽयवायावः' इत्यनेन वर्णाश्रयविधौ अवायादेशौ न भवतः ।

## १४.उपसर्जनम् ।

उपसर्जनत्वं द्विविधं लौकिकं शास्त्रीयञ्च । तत्र लौकिकमुपसर्जनं नाम किञ्चिन्निष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वम् । शास्त्रीयञ्चोपसर्जनम् 'प्रथमानिर्दिष्टं समास उपसर्जनम्', 'एकविभक्ति चापूर्वनिपाते'[८०१] इति सूत्रद्वयोक्तम् । समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् । 'उपसर्जनं पूर्वमि'त्यनेन उपसर्जनस्य पूर्वनिपातो भवति । यथा 'व्याघ्रात् भयम्' इति 'पञ्चमी भयेन' इत्यनेन पञ्चमीतत्पुरुषसमासो भवति । व्याघ्रादिति पञ्चम्यन्तं पदमुपसर्जनम् । एकविभक्तीत्यादिना समासवाक्ये यत् नियतैकविभक्तिकं तदपि उपसर्जनमुच्यते, अस्य उपसर्जनस्य तु पूर्वनिपातो न भवति । यथा निर्गतः कौशाम्ब्याः निष्कोशाम्बिः इति । 'स्त्रीप्रत्यये चानुपसर्जने'[८०२] इति परिभाषायां लौकिकमेवोपसर्जनं गृह्यते न शास्त्रीयम् । यतो ह्यत्र प्रत्ययमात्रस्योपसर्जनत्वं विवक्षितमस्ति ।

## १५. व्यपदेशिवद्भावः –

व्यपदेशिवदिति पदं 'व्यपदेशिवदेकस्मिन्'[८०३] इति परिभाषायां समुपलभ्यते । निमित्तसत्त्वे विशिष्टोऽपदेशो मुख्यव्यवहारः यस्यास्ति स व्यपदेशी, तेन तुल्यं व्यपदेशिवत्।

---

१७. परिभाषेन्दुशेखरः, परि. – २२ ।
१८. अष्टा. – १/२/४३, १/२/४४ ।
१९. परिभाषेन्दुशेखरः, परि. – २७ ।
२०. तत्रैव – ३१ ।

व्यपदेशिवदेकस्मिन्नित्यस्यायमाशयः – मुख्यव्यवहारनिमित्तसत्तायां यथा व्यपदेशः, मुख्यव्यवहारो भवति, तथैव मुख्यव्यवहारनिमित्ताभाववत्येकस्मिन् असहायेऽपि मुख्यव्यवहारो भवति । तस्मात् दशरथस्यापत्यं दाशरथिः इत्यादौ दशरथ इति निमित्तसत्त्वे यथादन्तत्वव्यवहारो भवति । अर्थात् 'अत इञ्' इति सूत्रेण इञ्प्रत्ययो विधीयते तथा अस्यापत्यमित्यादौ केवले अकारे अपि अदन्तत्वव्यवहारो भवति । पूर्वसत्त्वे यस्मात् परो नास्ति तस्यैवान्तपदार्थत्वात् । दशरथशब्दस्यादन्तत्वसाधकं निमित्तं दशरथ् इत्यस्ति, एवं रामशब्दस्यादन्तत्वसाधकनिमित्तं राम् इत्यस्ति । अतस्तत्रादन्तत्वस्य मुख्यव्यवहारो भवति, केवले अशब्दे अकारात् पूर्वं कस्यापि वर्णस्याभावाददन्तत्वसाधकनिमित्ताभावादसहायत्वं वर्तते । 'व्यवदेशिवदेकस्मिन्' इत्यनया परिभाषया केवलेऽकारे दशरथाद्यदन्तशब्दवददन्तत्वं सम्पाद्यते । तदुक्तं नागेशाचार्येण – "निमित्तसद्भावाद्विशिष्टोऽपदेशो मुख्यव्यवहारो यस्यास्ति स व्यपदेशी । यस्तु व्यपदेशहेत्वभावादविद्यमानव्यवदेशोऽसहायः स तेन तुल्यं वर्तते । कार्यं प्रतीत्येकस्मिन्नसहायेऽपि तत्कार्यं कर्तव्यमित्यर्थः । तेनाकारस्याप्यदन्तत्वान्न क्षतिः"[८०४] इति ।

## १६. विभाषा –

'न वेति विभाषा' इति सूत्रकृता विभाषा संज्ञा । निषेधविकल्पयोः सा विधीयते । विभाषा चतुर्विधा भवति । १. प्राप्तविभाषा, २. अप्राप्तविभाषा, ३. प्राप्ताप्राप्तविभाषा, ४.व्यवस्थितविभाषा चेति । प्राप्तविभाषा यथा – 'विभाषा जसि' इति । वर्णाश्रमेतरे वर्णाश्रमेतरा इत्यत्र 'द्वन्द्वे च' इति नित्यतया सर्वनामसंज्ञानिषेधे प्राप्ते विभाषेयम् । अप्राप्तविभाषा यथा – 'तीयस्य ङित्सु विभाषा' इति द्वितीयस्मै द्वितीयायेत्यादौ तीयप्रत्ययस्य सर्वादिगणे पाठाभावादप्राप्तायां सर्वनामसंज्ञायां विभाषेयम् । प्राप्ताप्राप्तविभाषा यथा 'विभाषा श्वोः' इति । श्वयतेर्लिटि यङि च सम्प्रसारणविभाषेयम् । तत्र लिटि शुशाव, शिश्वाय, शुशुवतुः, शिश्वियतुः इत्याद्युदाहरणम् । यङि तु शोशूयते इति अत्र यङंशे अप्राप्तविभाषेयम् । लिटि तु द्विवचनबहुवचनेष्वपित्सु 'वचिस्वपियजादीनां किति' इति नित्यतया सम्प्रसारणं प्राप्तम् । पित्सु त्वेकवचनेषु सम्प्रसारणं न प्राप्तमेव । 'असंयोगाल्लिट् कित्' इति कित्त्वस्य अपित्स्वेव प्रवृत्तेः एवञ्च प्राप्तेऽप्राप्ते चारम्भात्

२१. परिभाषेन्दुशेखरः, नागेशाचार्यमतम् ।

'विभाषा श्वोः' इत्युभयत्र विभाषा इति स्थितिः । व्यवस्थिता चासौ विभाषा व्यवस्थितविभाषा । या विभाषा क्व नित्यं क्व च विकल्पेनेति व्यवस्थया युक्ता भवति सा व्यवस्थितविभाषा भवति । व्याकरणशास्त्रे व्यवस्थितविभाषयापि कार्याणि क्रियन्ते । 'गवाक्ष' इत्यादौ अवङादिकार्यं लक्ष्यानुरोधाद्व्यवस्थीयते, क्व नित्यं क्व च विकल्पेन इति निश्चित्य विधीयते । अतः इत्यत्र नित्यमेवावङ् जायते अतः न प्रकृतिभावः, नापि पूर्वरूपमापद्यते । सा चेयं व्यवस्था लक्ष्यानुरोधाद् बोध्या । परिभाषेन्दुशेखरे 'विभाषा' इति शब्दः 'सर्वो द्वन्द्वो विभाषयैकवद्भवति', व्यवस्थितविभाषयापि कार्याणि क्रियन्ते[८०५] इत्यत्रोपलभ्यते ।

## १७. नित्यः –

नित्यशब्दोऽयं परिभाषेन्दुशेखरस्य परिभाषासु उपलभ्यते । कृताकृतप्रसङ्गी यो विधिः नित्यः । तथा 'तुदति' इत्यत्र 'तुदादिभ्यः शः' इति शप्रत्ययं बाधित्वा परत्वात् पुगन्तलघूपधस्य च सूत्रेण लघूपधगुणः प्राप्तः, स च शप्रत्यये प्रवृत्ते सति न प्रवृत्तिमर्हति। शप्रत्ययस्तु कृते अकृतेऽपि लघूपधगुणे प्रवृत्तिमर्हतीति स नित्यः । अतो नित्यः शप्रत्ययः लघूपधगुणं बाधित्वा प्रथमं प्रवर्तते । ततः 'सार्वधातुधातुकर्मपित्' इति शस्य क्ङित्त्वात् 'क्ङिति च' इति सूत्रेण निषेधान्न गुणः । अक्ळ्प्ताभावकस्य नित्यशास्त्रस्याभावकल्पना–पेक्षया क्ळ्प्तभावकस्यानित्यशास्त्रस्यैव तत्कल्पनं युज्यते इति नित्यस्य बलवत्त्वे बीजम् । पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषायां परान्नित्यं बलीयः इत्येवालोचितम् ।

## १८. अन्तरङ्गबहिरङ्गे –

अन्तर् मध्ये अङ्गम् निमित्तं यस्य तदन्तरङ्गम् । बहिः अङ्गं यस्य तद्बहिरङ्गम् । अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्येऽन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम् । अन्तरङ्गशास्त्रीयसमुदायनिमित्तसमुदायात् बहिर्भूताङ्गकं बहिर्भूतनिमित्तकं शास्त्रं बहिरङ्गमित्यर्थः । एवमेव अन्तरङ्गबहिरङ्गयोरनेकानि लक्षणानि लक्ष्यानुरोधात् स्वीकृतानि,

---

२२. परिभाषेन्दुशेखरः, परि.– १०८ ।

तदिह कानिचिदुपलक्ष्यन्ते । पूर्वोपस्थितिनिमित्तकत्वमन्तरङ्गत्वम्, परोपस्थितिनिमित्तकत्वं बहिरङ्गम् अल्पापेक्षकत्वमन्तरङ्गत्वम्, बह्वपेक्षत्वं बहिरङ्गत्वम् इत्यादीनि । अन्तरङ्गे कार्ये कर्तव्ये बहिरङ्गमसिद्धं भवतीति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषार्थः ।

## **१९. विप्रतिषेधः –**

अन्यत्रान्यत्र लब्धावकाशयोरेकत्र युगपत् प्राप्तिस्तूल्यबलविरोधः, स एव विप्रतिषेधः तस्मिन् विप्रतिषेधे परं कार्यं भवति । यथा लोके समबलयोः स्वामिनोरेका भृत्यः पर्यायेणोभयोरपि कार्यं सम्पादयति । यदा द्वावपि स्वामिनौ युगपद् विरुद्धयो दिशोः कार्याय प्रेषयतस्तदा तस्य उभयोरप्य विरोधाय कस्यापि कार्यसम्पादने प्रवृत्तिर्न प्राप्नोतीति । स तयोर्यः पर उत्कृष्टस्तस्य कार्यं विदधाति । एवमेव शास्त्रेऽपि भृत्यस्थानापन्नं लक्ष्यस्वामिस्थानापन्ने शास्त्रे तत्र यदि पूर्वपरशास्त्रे स्व–स्वलक्ष्ये कृतकार्ये भूत्वा अन्यस्मिन् लक्ष्ये समबलतया युगपदेव कार्यं न प्राप्नुत इति परशास्त्रेण विधेयकार्यस्य विधानार्थं सूत्रमिदम् । यथा 'वृक्षाभ्याम्' इत्यत्र यञादिसुप्प्रत्ययाव्यवहितपूर्वत्व विशिष्टस्यातोऽङ्गस्य दीर्घविधानेन 'सुपि च' इति सूत्रस्य, वृक्षेषु इत्यत्र च झलादिबहुवचनसुप्प्रत्ययाव्यवहितपूर्वत्वविशिष्टस्यातोऽङ्गस्य 'बहुवचने झलोत्' इत्यस्य च चारितार्थ्येन उभयोः सूत्रयोः समबलत्वं सिध्यति । ततो 'वृक्षेभ्यः' इत्यदाहरणस्योभय–सूत्रोद्देश्यतावच्छेदकाक्रान्तत्वाद् एकत्र युगपदुभयोः प्रवृत्तिरसम्भवादप्राप्तेति 'बहुवचने झल्येत्' इति परशास्त्रेण एत्वस्य प्रवृत्तिर्विधीयत इति सिध्यत्यस्य सूत्रस्य विध्यर्थत्वम् । तदुक्तं भाष्यकारेण पतञ्जलिना – 'अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात् । किं कारणम्? तुल्यबलत्वात् । तुल्यबले ह्युभयशास्त्रे । तद्यथा द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति, स तयोः पर्यायेण कार्यं करोति । यदा तु तमुभौ युगपत् प्रेषयतो नानादिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थो भवति, उभयोर्न करोति । किं पुनः कारणमुभयोर्न करोति ? यौगपद्यासम्भवात् । नास्ति यौगपद्येन सम्भवः । तत्र प्रतिपत्त्यर्थं वचनम् । तत्र प्रतिपत्त्यर्थमिदं वक्तव्यम्''[८०६] इति ।

२३. महाभाष्यम्, ''विप्रतिषेधे परं कार्यम्' ।

## २०. उत्सगापवादौ –

उत्सर्गो नाम सामान्यविधिः । यथा 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण वलादेरार्धधातकस्येडागमो विधीयते । तेन सामान्यतया बभूविथ इत्यादीनाम् इडागमो भवति । अपवादो नाम विशेषविधिः निरवकाशो वेति । दैत्यारिः 'श्रीशः' इत्यादिस्थले परमपि सवर्णदीर्घं बाधित्वा अन्तरङ्गवाद् 'आद्गुणः' इति सूत्रेण गुणे, 'इको यणचि' इति सूत्रेण च यणि प्राप्तेऽपि अपवादशास्त्रस्य निरवकाशत्वात् 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घो भवति । यद्यपवादोऽन्यत्र चरितार्थस्तर्हि परान्तरङ्गाभ्यां बाध्यते एव । न्यासकारेण सम्यगुक्तं[८०७] "तत्र सामान्येनोत्सर्गः प्रवर्तते । यथा 'आर्धधातुकस्येड्वलादेरिति, वलादिसामान्यस्येड्विधानात् । विशेषोऽपवादः । यथा 'नेड् वशि कृती'ति इट्प्रतिषेधस्य वलादिविशेषे वशादौ कृति विधानात् । यस्य च विशेषे विधिः स बलवान् भवति । तथा हि ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेति विशेषविहितं तक्रदानं सामान्यविहितस्य दधिदानस्यैव बाधकं भविष्यति । तस्माद्वशादौ कृति परेऽपि इडागमो न भवति, प्रतिषेध एव भवति, 'स्थेशभासपिसकसो वरच्', ईश्वर इति" । नागेशाचार्येण उत्सर्गापवादविषये 'पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः', 'प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते', 'उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते' चेति परिभाषा उपस्थापिताः ।

## २१.अकृतव्यूहाः –

'अकृतव्यूहाः पाणिनीयाः' इति परिभाषा नागेशाचार्येण उपस्थापिता । न कृतः अकृतः, अकृतः व्यूहः प्रकृतिप्रत्ययविवेचनं यैस्ते अकृतव्यूहाः पाणिनिशिष्याः । ऊह्यते तर्क्यते इत्यूहः कार्यम्, विशिष्टो य ऊहो व्यूहो, व्यूहो विनाशोन्मुखनिमित्तं कार्यम् । कैयटेन दीक्षितेन चोभाभ्यामपीयं परिभाषाऽङ्गीक्रियते, किन्तु ताभ्यामस्यास्तात्पर्यं व्याख्याभेदमाश्रित्य पृथक् पृथगङ्गीक्रियते कैयटेऽनया निमित्तापाये नैमित्तिकस्याप्यपाये भवतीति स्वीक्रियते, निमित्तस्य विनाशे जातस्य कार्यस्यापि निवृत्तिर्भवतीति कैयटाभि–प्रायः । भट्टोजिदीक्षितस्तु निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यमनया बाध्यते इति मन्यते । महभाष्यकारस्यानुक्तत्वात् नागेशाचार्येण परिभाषेयं नाङ्गीकृता । 'समर्थानां

---

२४. काशिकान्यासः, पूर्वनित्यान्तरङ्ग . . . ।

प्रथमाद्वा' इति सूत्रस्य उद्द्योतटीकायां नागेशाचर्येणोदीरितं – 'न कृतो विशिष्ट ऊहस्तर्को निमित्तविनाशे अपि कार्यस्थितिरूपो यथा दण्डनाशे अपि घटस्थितिः, स यैस्ते इत्यर्थः । परिभाषेन्दुशेखरेऽप्युक्तम् – 'न कृतो व्यूहो विशिष्ट ऊहो निश्चयः शास्त्रप्रवृत्तिविषयो यैरित्यर्थः । भाविनिमित्तविनाशे इत्यध्याहारः" । बालमनोरमायामाह – न कृतः अकृतः, अकृतो व्यूहः प्रकृतिप्रत्ययविवेचनं यैस्ते अकृतव्यूहाः पाणिनिशिष्या इत्यक्षरार्थः । तत्त्वबोधिनीकारेणोक्तं 'अकृतकार्या इत्यर्थः । परिभाषावृत्तौ नीलकण्ठदीक्षितेनोदीरितं विशिष्ट ऊहो येषां ते व्यूहाः, अकृतश्च ते व्यूहाश्च । निमित्तनिर्णयविरहे कार्यं न कुर्वन्तीत्यर्थः । परिभाषाभास्करे आह "कृतो विरुद्ध ऊहो विनङ्क्षतोऽपि निमित्तत्वेन आश्रयणं यैरित्यर्थः" । अपि च व्यूहो नाम रचना । यथा प्राप्तस्य साधनम् । स्थापना व्यूहो लक्षणा रचना पाणिनीयनामाचार्याणामकृतवद्भवति । कार्यं दृष्ट्वा यत् कृतं तत् सर्वं निवर्तते । नैके वैयाकरणा 'अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्ति' एवमपि स्वीकृता । हरदत्तेन 'समर्थानां प्रथमाद्वा' इति सूत्रव्याख्यायामुक्तम् 'एवं तर्हि एतदर्थं समर्थवचनं कुर्वन् एतज्ज्ञापयति अस्तीयं परिभाषा अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्तयन्तीति । व्यूहः शास्त्रकार्यम् तदन्तरङ्गत्वात् प्राप्तमपि पश्चादस्य निमित्तविघातो भविष्यतीति बुद्ध्या न कृतं यैस्ते अकृतव्यूहाः, एवम्भूता भवन्ति पाणिनीया इत्यर्थः । कृतमपीत्यत्र वा शब्दोऽध्याहार्यः, कृतमपि वा शास्त्रकायं निवर्तयन्ति निमित्ताभावे उत्पत्स्यमाने इत्यर्थः । तेन पपुष इत्यादि सिद्धं भवति । अत्रान्तरङ्गत्वात् पूर्वकृतोऽपि इडागम एतत्परिभाषावशान्निवर्तते, पूर्वमेव न क्रियते, ततः शसि सम्प्रसारणे कृते वलादित्वादिडभावः" इति ।

## २२. प्रातिपदिकम् –

प्रातिपदिकमिति महती संज्ञा । आचार्यपाणिनिना प्रातिपदिकसंज्ञाविषये सूत्रद्वयसुपन्यस्तम् – "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्', कृत्तद्धितसमासाश्च" चेति । अनयोस्सूत्रयोर्वृत्तौ भट्टोजिदीक्षितेनोक्तम् धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपं प्रतिपदिकसंज्ञा स्यादिति प्रथमं कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः इत्यपरम् । तथाहि अव्युत्पन्नाः डित्थादिशब्दाः अर्थवत्त्वाद्धातुप्रत्ययप्रत्ययान्तादित्रयभिन्नत्वात् प्रातिपदिकसंज्ञां प्रतिपद्यन्ते । व्युत्पन्नपक्षे कृदन्ते कर्ता, तद्धिते औपगवः, समासे राजपुरुषः इत्यादीनां 'कृत्तद्धितसमासाश्च' इति प्रातिपदिकसंज्ञा । प्रातिपदिकग्रहणे लिङ्गविशिष्टापि

ग्रहणं भवतीति 'ज्ञाप्प्रातिपदिकात्' इति सूत्रव्याख्यानावसरे भाष्यकारेण पतञ्जलिनाकलितम् । सामान्यरूपेण विशेषरूपेण वा प्रातिपदिकबोधकशब्दग्रहणे अर्थात् प्रातिपदिकबोधकपदे उच्चारिते सति प्रत्यासत्या तेनैव पदेन लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणं भवति ।

## २३. सन्निपातलक्षणोविधि –

शब्दोऽयं 'सन्निपातलक्षणो विधिर्निमित्तं तद्विघातस्य' इति परिभाषायामुपलभ्यते । सन्निपातः संश्लेषः सम्बन्धो वा, लक्षणम् – निमित्तं यस्मिन् विधावसौ सन्निपातलक्षणो विधिः । नागेशाचार्येण सन्निपातस्य द्वयोः सम्बन्ध, तन्निमित्तो विधिस्तं सन्निपातं यो विहन्ति तस्यानिमित्तम् । उपजीव्यविरोधस्तस्यायुक्तमिति । लोके न्यायोऽयं 'उपजीव्यविरोध' इति नाम्ना प्रसिद्धः । पित्रोः जन्यजनकभावरूपसम्बन्धेन जायमानः, उपकार्योपकारकभावरूप–सम्बन्धेन प्रवर्धमानश्च पुत्रस्तयोः सम्बन्धयोः विघाते निमित्तत्वं नासादयति, तथैव शास्त्रेऽपि 'शतानि', 'सहस्राणि' इत्यादौ 'नपुंसकस्य झलचः' इति सूत्रेण विभक्तिनिमित्तको जायमानो नुम् नान्तोद्देश्यकषट्संज्ञामाध्यमेन विभक्तेर्लुकि निमित्तत्वं नादधाति । परिभाषावृत्तौ सन्निपातः आनन्तर्यलक्षण इत्यर्थः कृतः । तत्रोक्तम् 'आनन्तर्यलक्षणो विधिस्तद्विघातस्य निमित्तं न भवति । यस्यानन्तर्येण यो विहितस्तदानन्तर्यमसौ न विरुणद्धि इत्यर्थः'[८०८] इति ।

## २४. सन्नियोगशिष्टाः –

सन्नियोगेन साजात्येन एक शास्त्रप्रयुक्तत्वेन, यौ शिष्टौ विहितौ तौ सन्नियोगशिष्टौ, सन्नियोगशिष्टौ च सन्नियोगशिष्टौ च सन्नियोगशिष्टौ च सन्नियोगशिष्टाः । पदमिदं सन्नियोगशिष्टानामन्यतरापाये उभयोरपायः इति परिभाषायामुपलभ्यते । सन्नियोगशिष्टा–नामित्यत्र बहुवचनमविवक्षितम्, अतः सन्नियोगशिष्टयोर्मध्येऽन्यतरस्य एकस्य अपाये अभावे उभयोरपि अपाय इति न्यायार्थः । धीवरी इत्यत्र धीवन् इत्युत्तरं 'वनो र च' इति सूत्रेण ङीप् सन्नियोगशिष्टः रेफः पञ्चधीवरीत्यादौ पञ्चधीवरीभिः क्रीतः इत्यार्हीयठक्प्रत्ययस्य

२५. पुरुषोत्तमदेवकृतपरिभाषावृत्तिः, परि. – १० ।

अध्यर्धपूर्वात् द्विगोर्लुगसंज्ञायामिति सुत्रेण लुकि 'लुक् तद्धितलुकि' इति सूत्रेण ङीपि निवृत्ते रेफस्याप्यपायः । यतो 'वने र च' इति साजात्येन एकशास्त्रप्रयुक्तत्वेन विहितौ ।

## २५. आगमः –

वर्णोपस्थितिरागमः । यत्र यस्योपस्थितिः पूर्वं नासीत् । केनापि नियमेन तस्योपस्थितिः स आगमः। मित्रवदागमः । यथा रामाणाम् इत्यत्र रामशब्दस्योत्तरं षष्ठीबहुवचने आम्प्रत्यये 'ह्रस्वनद्यापो नुट्' इति सूत्रेण नुडागमे, अनुबन्धलोपे 'राम न् आम्' इति संयोगे, रामनाम् इति स्थिते 'नामि' इति सूत्रेण दीर्घे 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण णत्वे 'रामाणाम्' इति सिध्यति । अत्र 'नुट्' इति प्रत्ययागमनेन प्रकृतेः प्रत्ययस्यापि प्रत्यवायो न भवति । सुबोधटीकायां दुर्गादासेनोपन्यस्तः –

"प्रकृतेः प्रत्ययस्यापि सम्बन्धो यो भवन्नपि ।
तयोरनुपघाती स्यादागमः स बुधैर्मताः ॥ इति ॥

परिभाषेन्दुशेखरे आगमविषये काश्चन परिभाषा उपन्यस्ताः "यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते", 'आगमशास्त्रमनित्यम् चेति ।

## २६. आदेशः –

रूपान्तरापत्तिरादेशः । आदेश उपघाती यः प्रकृतेः प्रत्ययस्य वा । यथा 'पादः पत्' इति सूत्रेण पादः स्थाने एव पदादेशो भवति, शत्रुवदाचरति शत्रुः यथा कमपि विनश्य तत्स्थाने आत्मानं स्थापयति तथैव पादः स्थाने पदादेशो भवति । नागेशाचार्येणादेशस्य कुत्रोपस्थितिः तथाहि निर्देश्यसानस्यादेशाः भवन्ति इति परिभाषा उपन्यस्ता । 'पादः पत्' इति सूत्रभाष्ये पतञ्जलिनोक्तं "आदेशे सर्वादेशप्रसङ्गः, आदेशे हि सति सर्वादेशः प्रसज्येत । सर्वस्य द्विपाच्छब्दस्य, त्रिपाच्छब्दस्य च पच्छब्द आदेशः प्रसज्येत 'येन विधिस्तदन्तस्य" इति ।

## २७. उपदेशः –

"एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवती"ति महाभाष्यकारवचनात् शब्दज्ञानं तु आवश्यकम् । शब्दज्ञानमवश्यमेव उपदेशसापेक्षम् । पाणिनीयव्याकरणे उपदेशपदमिदं नैकेषु सूत्रेषु व्यवहृतम् । उपशब्द

आद्यर्थकः । दिशिरुचारणक्रियायाम् । उपपूर्वात् दिश्धातोः भावेऽर्थे घञ्प्रत्ययेन उपदेशनमित्यर्थे उपदेश इत्येवं निष्पद्यते । उपशब्दस्य आद्यर्थकत्वात् दिश्धातोरुच्चारणा–र्थकत्वात् आद्योच्चारणमर्थः सम्पन्नः आद्यत्वं चाज्ञातस्वस्वरूपज्ञापकत्वम् । उच्चारणं बोधानुकूलशब्दप्रयोगः, वोधस्य ज्ञानस्य सविषयकत्वनियमात् । अर्थात् ज्ञानं किञ्चित् विषयमवलम्ब्यैव भवति । तथा च किञ्चिद्विषयनिष्ठविषयतानिरूपको बोधः । आद्यत्वञ्च विषयतां विवक्षितम् । तच्चेह बोधान्तरानिरूपितत्वरूपम् । तथा च बोधान्तरानिरूपित–विषयतानिरूपकबोधानुकूलः शब्दप्रयोग आद्योच्चारणम् । 'एकाच उपदेशेऽनुदात्तात्' इति सूत्रे कैयटेनोक्तम् – "इत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते' इति । 'आदेच उपदेशऽशिति' इति सूत्रेऽपि येषां स्वरूपज्ञापनायापूर्वमुच्चारणं तेषामेवोपदेश व्यवहारः । तत्र सूत्रभाष्ये अपि 'उद्देशश्च प्रातिपदिकानां नोपदेशः' इति । प्रकृतसूत्रभाष्येऽपि 'प्रत्यक्षमाख्यानमुपदेशः' इत्युक्तम्' । तस्य चोक्त एवार्थः । स्वावच्छिन्नविधेय–ताकशाब्दबोधानुकूलत्वम्, स्वप्रकारकप्रत्यक्षानुकूलत्वमुत्युभयसम्बन्धेन धर्मविशिष्टो व्यापारः प्रत्यक्षानुकूलत्वमित्युभयसम्बन्धेन धर्मविशिष्टो व्यापारः प्रत्यक्षमाख्यानम् । यथा – कश्चित् कर्णं गृहीत्वा 'अयं ते गौः, अयं ते गौः इति प्रतिपादयति । तत्र कर्णग्रहणव्यापारे स्वगोत्वं; तदवच्छिन्ना या गोनिष्ठा विधेयता तादृशविधेयताको ये गोत्वप्रकारकगोविषयकः शाब्दबोधः तदनुकूलत्वम्, गोत्वप्रकारकं यत् प्रत्यक्षं तदनुकूलत्वं चास्त्येवेति लक्षण–समन्वयादुपदिष्टो गौरिति व्यवहारः । एवं 'गुप्तिजकिद्भ्यं सन्' इत्यादौ सन्प्रत्ययोच्चारणे सन्त्वावच्छिन्नाश्रयणप्रत्यक्षविधेयताकशाब्दबोधानुकूलत्वं तथा स्वं सन्त्वं तत्प्रकारक–प्रत्यक्षानुकूलत्वमपि सन्शब्दोच्चारणे सन्त्वप्रकारकं प्रत्यक्षं श्रोत्रेन्द्रियेण जायते इति तत्र सनि उपदेशव्यवहारः सङ्गच्छते ।

काशिकायां जयादित्येनोक्तम् 'उपदिश्यतेऽनेनेत्युपदेशः शास्त्रवाक्यानि, सूत्रपाठः खिलपाठश्च'[८०९] ।

"धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥" इति ।

---

२६. जयादित्यवामनकृतकाशिका – 'उपदेशेऽजनुनासिक इत्', 'एकाच उपदेशे' इति सूत्रव्याख्यायाम् ।

उपर्युक्ता प्राचीनकारिका तु प्रौढमनोरमायां बहुधा दूषिता । तत्र दीक्षिताचार्य आह “उणादिलिङ्गानुशासनयोरपि सूत्रत्वात् सिद्धे पृथगुपादानं गोबलीवर्दन्यायेन । एवं गणत्वादेव सिद्धे धातोरपीत्यादि”[८१०] इति ।

**२८.प्रत्ययः –**

येनार्थः प्रतीयते सः प्रत्ययः । यस्यागमनेन प्रकृतेः अर्थः प्रकाशते स प्रत्ययः । यथा ‘दशरथस्यापत्यं पुमान्’ इत्यत्र अपत्यार्थे ‘अत इञ्’ इति सूत्रेण इञ्प्रत्यये दाशरथिः दशरथनन्दन इत्यर्थः प्रतीयते । संक्षिप्तसारे उक्तम् ‘प्रत्याययन्तीति सुप्तिङ्कृत्तद्धिताः प्रत्ययाः’ इति । धात्ववयवोऽपि प्रत्ययविशेषः । यथा सन्काम्यादिप्रत्ययेन नूतनधातोरुत्पत्तिः भवति । तदुच्यते जगदीशाचार्येण ‘विभक्तिधात्वंशकृद्भ्योऽन्यं प्रत्ययस्तद्धितः । अतः प्रत्ययपञ्चविधः विभक्तिः कृत् तद्धितः स्त्री धात्ववयवश्चेति । विभक्तिः द्विविधा सुप् तिङ् चेति। तदुक्तं  शब्दशक्तिप्रकाशिकायां –

“संख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः ।
सा विभक्तिर्द्विधा प्रोक्ता सुप् तिङ् चेति प्रभेदतः ॥ इति ।

**२९. एकशेषः ।**

एकः शेषाऽवशिष्टो यस्य स एकशेषः । यत्र द्वयोः पदयोः बहूनां पदानां वा मध्ये पदमेकमवशिष्य पदसमूहस्य अर्थः प्रकाशते स एकशेषः । एकशेषो द्विविधः सरूपैकशेषो विरूपैकशेषश्चेति । ‘सरूपाणामेकशेष एकविभक्तौ’[८११] इति सूत्रेण सरूपैकशेषः, ‘विरुपाणां समानार्थानामि’ति[८१२] वार्तिकेन विरूपैकशेषश्चालोचितः । अर्थभेदे सत्यपि एकविभक्तौ समानाकृतिकः शब्दसमूहः सरूपैकशेष । यथा रामश्च (परशुरामः) रामश्च (श्रीरामः) रामश्च (बलरामः) ते रामाः, घटश्च घटश्च घटौ इत्यादि । समानार्थकः भिन्नाकृतिकः शब्दानामेकशेषो विरूपैकशेषः । यथा – वक्रदण्डश्च कुटिलदण्डश्च

२७. दीक्षितकृत प्रौढमनोरमा – १/३/२ ।
२८. अष्टा. – १/२/६४ ।
२९. महाभाष्यवार्तिकम् – सू. – १/२/६४ ।

वक्रदण्डौ कुटिलदण्डौ वा, माता च पिता च पितरौ इति । चान्द्रसम्प्रदायास्तु एकशेषस्य द्वैध्यं नाङ्गीकुर्वन्ति । तस्मात् पुरुषोत्तमदेवस्य प्रयोगरत्नमालायामुदीरितं –

> "यः सरूपविरूपैकशेषः पाणिनिसम्मतः ।
> चान्द्राः प्रकृतिवृत्तिभ्यां सिद्धौ तन्नानुमेनिरे ॥"[८१३] इति ।

एकशेषः पञ्चवृत्तिषु अन्यतमः । सावकाशनिरवकाशयोर्निरवकाशो बलीयान् 'इत्यनया द्वन्द्वापेक्षया एकशेषो बलीयान् भवति । 'द्वन्द्वप्रतिषेधश्च' इति वार्तिकव्याख्यायां भाष्यकारणोक्तम् – अनवकाश एकशेषो द्वन्द्वं बाधिष्यते'[८१४] अतः एकशेषस्य पृतक् सत्ता पाणिनीयसम्प्रदाये स्वीक्रियते ।

---

२८. पुरुषोत्तमदेवकृतप्रयोगरत्नमालायाम् ।

२९. महाभाष्यम् – १/२/६४

# प्रथमं परिशिष्टम्
# व्याकरणशास्त्रे लौकिकन्यायानां संग्रहः

**१.कूपखानकन्यायः ।**

कूपखननकाले यथा कूपखानकशरीरे संलग्नं पङ्कादिस्तन्निस्सृतेन तोयेन परिमार्ज्यते । उत तथा कूपखनने कीटादिविभिन्नजन्तुहिंसाजन्यप्रत्यवायः कूपनिस्मृत–तोयपानादिना संतृप्तानेकजन्तुजन्यपुण्येनापयाति । तथैव शब्दज्ञानसहकृतापशब्दज्ञानजन्यो दोषः शब्दज्ञानजन्यपुण्येन निवार्यते । न्यायोऽयं भाष्ये 'ज्ञाने धर्म इति चेत्तथाधर्मः' इति वार्तिकव्याख्यानावसरे यथा शब्दज्ञाने धर्मस्तथैवापशब्दज्ञानेऽधर्मः। यो हि शब्दान् जानात्यसावपशब्दानपि जानाति । अथवा भूयानधर्मः प्राप्नोतीत्येवम्विधाक्षेपस्यानेकविध–समाधानदानप्रसङ्गेऽन्यतमत्वेनोपन्यस्तः ।

न्यायार्थविचारावसरे द्वावर्थावभिहितो तत्र कतरो हि पक्षो रमणीया इति विचारे कूपखानकः कूपं खननं यद्यपि मृदापांशुर्भिश्चावकीर्णो भवति । सोऽप्सु संज्ञातासु तत एव तं गुणमासदयति येन स च दोषो निर्हण्यते, भूयसाचाभ्युदयेन योगो भवतीति भाष्यकारवचनं प्रथमार्थे उपलक्षणम्। द्वितीयार्थ एव समीचीनः । अन्यथा तोयनिस्मरणात् प्राक् कूपखननक्रियाकालिको मृत्पांश्वोः शरीरे सम्बन्धस्तस्मिन् काले तोयाभावात्तयोः प्रक्षालनमशक्यं स्यात् ।

**२.भक्ष्यनियमेनाभक्ष्यप्रतिषेधः ।**

धर्मशास्त्रे यथा भक्ष्याभक्ष्यविचारप्रसङ्गे 'पञ्च पञ्चनखा भक्ष्याः' इति नियमवाक्येन एतद्भिन्ना अभक्ष्या इत्यभक्ष्यप्रतिषेधः फलति, तथैव व्याकरणशास्त्रेऽपि शब्दानुशासनप्रस्तावे शब्दानामुपदेशः कर्तव्य उतापशब्दानामिति जिज्ञासायां शब्दानामल्पीयस्त्वात् अपशब्दानां च भूयस्त्वाल्लाघवाच्छब्दोपदेश इति नियमेन तदतिरिक्ता अपशब्दा इति फलति ।

न्यायोऽयं महाभाष्ये पस्पशाह्निके शब्दानुशासनं कथं कर्तव्यमिति विचारप्रसङ्गे प्रयुक्तः । तदुक्तं तत्र 'शब्दानुशासनमिदानीं कर्तव्यम् । किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशब्दोपदेश इति । अन्यतरोपदेशेन कृतं स्यात् । तद्यथा भक्ष्यनियमेनाभक्ष्य प्रतिषेधो गम्यते । पञ्च पञ्चनखा भक्ष्याः इत्युक्ते गम्यत एतत् अतोऽन्ये अभक्ष्या' इति ।

### ३.उत्सर्गापवादन्यायः

लोके किञ्चिद्वस्तु सामान्येन सर्वेभ्यो दीयते किञ्चिच्च वस्तु विशेषरूपेण कस्मैचिदेव दीयते । यथा 'क्षुधार्तेभ्यः भोजन देयम्', 'ज्वराक्रान्तेभ्यश्च पयो देयम् इत्युभाभ्यामपि वाक्यभ्यां क्षुधार्तेभ्यो भोजनमेव दीयते, ज्वराक्रान्तेभ्यश्च दुग्धमेव दीयते । एवमेव शास्त्रेऽपि केनचित् सामान्यशास्त्रेण सामान्यतया कार्यं सम्पाद्यते, तद्विरुद्धं केनचिद्विश्लेषशास्त्रेण विशेषतया कार्यं सम्पाद्यते ।

भाष्ये त्वयं न्यायः पस्पशाह्निके 'शब्दाः कथं प्रतिपत्तव्याः' इति विचार प्रसङ्गे व्याख्यातः । तथा च भाष्यं – "कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित् सामान्य–विशेषवल्लक्षणं प्रवक्तव्यम् । येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । किं पुनस्तद् उत्सर्गापवादौ । किञ्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः । कथं जातीयकः पुनरुत्सर्गः कर्तव्यः, कथं जातीयकोऽपवादः? सामान्येनोत्सर्गः कर्तव्यः । तद्यथा 'कर्मण्यण्' । तस्य विशेषेणापवादः तद्यथा – आतोऽनुपसर्गे कः" इति ।

### ४. दीर्घसत्रवन्न्यायः ।

लोके यथा वार्षशतिकानां वार्षसाहस्रिकाणाञ्च दीर्घसत्राणां सम्प्रत्यसम्भवेऽपि वेदाध्ययनमृषिसम्प्रदाय इति कृत्वा याज्ञिकैस्ते यज्ञाः शास्त्रेण ज्ञायन्ते, तथैव सम्प्रत्यप्रयुज्यमानानामपि शब्दानां पूर्वप्रयुक्तत्वादनुशासनं कर्तव्यमेव । न्यायोऽयं महाभाष्ये अप्रयुक्तशब्दानामन्वाख्यानं कर्तव्यं न वेति विचारप्रसङ्गे अन्वाख्यानं कर्तव्यमेवेति प्रतिपादकत्वेनोद्धृतः । तथा हि भाष्यम् – "अप्रयुक्ते दीर्घसत्रवत् । यद्यप्यप्रयुक्ता अवश्यं दीर्घसत्रवल्लक्षणेनानुविधेयाः । तद्यथा दीर्घसत्राणि वार्षशतिकानि वार्षसाहस्रिकाणि च । न चाद्यत्वे कश्चिदप्याहरति । केवलमृषिसम्प्रदायो धर्म इति कृत्वा याज्ञिकाः शास्त्रेणानुविदधते" इति ।

### ५. शल्यकन्यायः ।

लोके यथा एक एव शल्यकः (शाहीति प्राणिविशेषः) कण्टकतुल्यैः पक्षैः परितो व्याप्यते तथा एक एव वर्णः सर्वानुबन्धयुक्तो भवितुमर्हति । न्यायोऽयम् 'अइउण्' इति सूत्रव्याख्यावसरे अकारादीनां वर्णानामेकत्वमनेकत्वं वेति विचारप्रसङ्गे उद्धृतः । तत्रायमवसरः – यदि वर्णानामेकत्वं स्वीक्रियते, तदा 'क अण् टक्' आदिघटकानामकारा–णामेकत्वेऽनुबन्धसाङ्कर्यात् कप्रत्ययेऽपि णित्प्रयुक्त वृद्ध्यादिकार्यापत्तिः स्यात् । ततश्च प्रतिप्रत्ययमनुबन्धभेदाद् अनुबन्धसाङ्कर्यापत्तिर्वारिता । अग्रे च प्रतिप्रत्ययमनुबन्धभेदस्ये–

त्संज्ञार्थत्वादनुबन्धसाङ्कर्यवारणरूपं फलं भवितुं नार्हति । यतो हि यत्येक एव 'अकारः' सर्वानुबन्धयुक्तः स्यात्तदा आद्यन्तयोरेवानुबन्धयोरित्संज्ञाविधानाद् मध्येऽनुबन्धश्रवणापत्तिः स्यात् ।

### ६. आदितवत् ।

यथा एकोऽप्यादित्यं अनेकाधिकरणस्थो युगपद् विभिन्नेषु देशेषूपलभ्यते । तथैवैकोऽप्यकारो युगपच्छब्दरूपविभिन्नेषु देशेषूपलभ्यते । यद्येकदाऽनेकेषु देशेषूपलभ्यमानत्वेनाकारस्यानेकत्वं स्वीक्रियते, तदा आदित्यस्याप्यनेकेदेशोपलब्धत्वाद-नेकत्वमनित्यत्वञ्च स्यात् । न्यायोऽयम् 'अइउण्' इति सूत्रभाष्ये उल्लेखितः । अत्र एष प्रसङ्गः – पूर्वमकारस्यैकत्ववादिना शकुनिवद् दृष्टान्तेन एकत्वं साधितम् । ततश्चानेक-त्ववादिना यद्यकारादीनामेकदा देशपृथक्त्वेषूपलब्धिः स्वीक्रियते, तदा शब्दनित्यत्व-सिद्धान्तविरोधः स्यादित्युक्तम् । इमामेवापत्तिं निराकुर्वन् भाष्यकृता अयं न्यायः प्रयुक्तः ।

### ७. शकुनिवत् ।

यथा शकुनिः पक्षिविशेषः पङ्क्तेरादौ स्थितेऽपि सन् आशुगामित्वेन शीघ्रं तदन्तेऽपि दृश्यते, तथैवाकारोऽप्येक एव व्यञ्जकध्वनिसन्निधानादुपलब्धिरसन्निधानाच्चानुपलब्धिः जायते । अकारस्यानेकदेशेषु युगपदुपलब्धिः व्यञ्जकवशादेव ।

न्यायोऽयम् 'अइउण्' इति सूत्रभाष्येः प्रयुक्तः । तत्रोक्तं पतञ्जलिना – युगपच्च देशपृथक्त्वदर्शनान्मन्यामहे – आन्यभाव्यसकारस्येति । यदयं युगपच्च देशपृथक्त्वे-षूपलभ्यते – अश्वः, अर्कः, अर्थ इति । न ह्येको देवदत्तो युगपत्सुघ्ने च भवति, मथुरायाञ्च यदि पुनरिमे वर्णाः शकुनिवत् स्युः, तद्यथा शकुनय आशुगामित्वात् पुरस्तादुत्पतिताः पश्चाद्दृश्यन्ते, एवमकारो 'द' इत्यत्र दृष्टः, 'ण्ड' इत्यत्र दृश्यते" इति ।

### ८. गुप्तचरन्यायः ।

लोके यथा एक एव गुप्तचरः परिस्थितिवशाद् राजाज्ञया राजकार्यसिद्ध्यर्थं क्वचिच्छिखां गृह्णाति, क्वचिन्मूण्डी भवति, कुतचिन्नग्नो भवति, एवमेव एक एव अकारो लक्ष्यसिद्ध्यर्थं विभिन्नेषु स्थलेषु विभिन्नैरनुबन्धैः सह स्थास्यति । यथा ङीबर्थम् 'अण्' प्रत्यये णकारेण सह । चित्वप्रयुक्तस्वरादिकार्यसिद्धये अच् प्रत्यये चकारेण सह ।

अयं न्यायः ‘अइउण्’ इति सूत्रभाष्ये व्याख्यातः । तत्रैवमुक्तम् – “नैष दोषः लोकतस्तत्सिद्धम् । तद्यथालोके कश्चिदेवं देवदत्तमाह – ‘इह मुण्डो भव’, ‘इह जटिले भव’, इह शिखी भव’ इति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपस्थाप्यते” इति ।

अत्रायमाशायः – यथा एकस्यैव गुप्तचरस्य कार्यार्थमनेकरूपग्राहकत्वेऽपि व्यक्तेरभेदस्तथैव लक्ष्यसाधुत्वार्थमनेकाबन्धयुक्तत्वेऽपि भेदाभाव एव सिध्यति ।

## ९. आकृतिन्यायः ।

यथा ब्राह्मणो न हन्तव्य ब्राह्मणशब्दे जातावेकवचनम् । अतएव ब्राह्मणत्वजात्यवच्छिन्नानां सर्वेषां ब्राह्मणानां हनने प्रतिषेधो गम्यते । अन्यथा व्यक्तिपक्षाश्रयणे कमप्येकं ब्राह्मणं न हत्वा तदतिरिक्तब्राह्मणहनेन दोषाभावः स्यात् ।

एवमेव वर्णसमाम्नायस्थोऽप्यकारो जात्या निर्दिष्ट इति सर्वेषामकाराणां संग्राहको भविष्यति । तदुक्तं ‘अइउण्’ इति सूत्रभाष्ये पतञ्जलिना – ‘आकृतिग्रहणात् सिद्धम् । अवर्णाकृतिरुपदिष्टा सर्वसवर्णकुलं गृहीष्यति । तथेवर्णाकृतिः, तथोवर्णाकृतिः’ इति । अयमाकृतिपक्षः ‘जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्यामि’ति सूत्रे जातिग्रहणात् तद्व्याख्यानभूताद् भाष्याच्चोपलभ्यते ।

## १०. रूपसामान्यन्यायः ।

लोके यथा अल्पमहत्स्थूलकृशह्रस्वदीर्घादिविशेषणविशिष्टव्यक्तिभेदेऽपि सर्वास्वपि गवादिव्यक्तिषु गवादिव्यवहारो भवति, तथैव शास्त्रेऽपि यत्र रूपसामान्यादनेकेषु वर्णेषु एकत्वव्यवहारः क्रियते, तत्रास्य न्यायस्य प्रवृत्तिः, अनुगतप्रतीतिव्यवहारयोः सादृश्येनैव प्रतीतेः ।

न्यायोऽयम् ‘अइउण्’ इति सूत्रभाष्येऽकारादीनां वर्णानामेकत्वप्रतिपादनाय प्रयुक्तः । तथा च भाष्यं – ‘रूपसामान्याद्वा सिद्धमेतत् । तद्यथा तानेव शाटकानाच्छादयामो ये मधुरायाम् । तानेव शालीन् भुञ्ज्महे, ये मगधेषु । तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीतम् । अन्यस्मिंश्चान्यस्मिन् रूपसामान्यात् तदेवेदमिति भवति । एवमिहापि रूपसामान्यात् सिद्धम्’ इति ।

## ११. द्रव्यवच्चोपचारन्यायः ।

उपचारो नाम व्यवहारः । तथा हि द्रव्यवद्व्यवहारा भवन्तीति न्यायार्थः । यथा लोके नैकेन घटात्मकेन द्रव्येणानेको युगपदुदकाहरणादिक्रियां करोति, तथैव एकम् 'अकारं' युगपदनेको नोच्चारयति ।

न्यायोऽयं भाष्ये वर्णसमाम्नायस्थाकारात् 'अस्य च्वौ' इत्यादिलक्षणघटकाकारा भिन्नाः, अभिन्ना वेति विचारावसरे वर्णितः । तत्र सर्वेष्वप्यकारेष्वभेदारोपपक्षे एकोऽयम् 'अकारः' इति बुद्धौ, तृतीयदूषणोपपादकवार्तिकरूपेणोद्धृतः । यदि सर्वेऽकारा अभिन्नास्तदेकमकारं नानेको युगपदुच्चारयेत् । तदुक्तं पतञ्जलिना 'द्रव्यवच्चोपचाराः' । द्रव्यवच्चोपचाराः प्राप्नुवन्ति । तद्यथा द्रव्येषु नैकेन घटेनानेको युगपत्कार्यं करोति । एवमकारं नानको युगपदुच्चारयेत् ।

## १२. युगपदनेककार्यम् ।

यथा लोके एकेनापि द्रव्येण युगपदेनकं कार्यं साधयितुं शक्यते तदाक्रियते एव । यथैकेनाश्वेन युगपद्यात्रापि क्रियते, तस्य स्पर्शनमपि क्रियते, दर्शनमपि सम्भवात् । एवमेव अकारस्यैकत्वस्वीकारेऽपि युगपत् स्थानकरणनिष्पन्नध्वनिव्यङ्ग्यत्वात् सवैरुच्चारणं कर्तुं शक्यते एव । न्यायोऽयम् 'अइउण्' इति सूत्रभाष्ये व्याख्यातः । तदुक्तं तत्र "यदप्युच्यते द्रव्यवच्चोपचाराः प्राप्नुवन्तीति । भवेत् यदसम्भविकार्यमनेकोऽपि तद्युगपत् करोति । तद्यथा – घटस्य दर्शनं स्पर्शनं वा । सम्भवि चेदं कार्यमकारस्योच्चारणं नाम । तदेनेकोऽपि युगपत् करिष्यति" इति ।

## १३. ऋषिसहस्रदक्षिणान्यायः ।

यथैकां गां वित्तेन क्रीत्वा, अन्यस्मै दत्वा, पुनरन्येन क्रीत्वा, अन्यस्मै दत्वेति क्रयणदानाभ्यां सहस्रर्षयः सहस्रदक्षिणाः सम्पन्नाः स्युस्तथैव यत्रैकस्यैव वस्तुन आवृत्त्यानेककर्तृकक्रियया अनेकोद्देशसिद्धिस्तत्रैवास्यन्यायस्योपयोगः । महाभाष्ये त्वयं न्यायः 'अइउण्' इति माहेश्वरसूत्रे व्यवहृतः ।

## १४. शिष्टानुकरणम् ।

यथा लोके कश्चिदाप्तजनो दानं करोति, ब्राह्मणान् भोजयति, ईश्वरं भजति, गुरून् सेवते, यदा तस्यानुकुर्वन्नन्योऽपि तथैवाचरति, तदा सोऽप्यभ्युदयेन युज्यते । यत् कार्यं न

केनापि शिष्टेनाचरितम्, नापि शास्त्रेण निषिध्यते, तस्य कर्मणः करणे नापि किञ्चित् पुण्यं नापि दोष एव । एवमेव तदनुकरणेऽपि पुण्यपापयोरभावः । तथैव यदि शिष्टोच्चारितस्यानुकरणं स्यात्तदा तदभ्युदयाय भवितुमर्हति, अशक्तिजोच्चारणस्य स्वयमेवासाधुत्वात् तदनुकरणस्याप्यसाधुत्वात् शास्त्राविषयत्वात्, ळकारस्य तदर्थता नोपयुक्तेति भावः ।

न्यायोऽयं भाष्ये ळकारोपदेशस्य प्रयोजनावसरे अशक्तिजोच्चरितळकारसाधुत्वार्थमपि तदुपदेशस्य प्रयोजनं नास्तीति निरूपणावसरे प्रयुक्तः । तदुक्तं तत्र भाष्यकारेण – 'अनुकरणं हि शिष्टस्य साधु भवति, अशिष्टाप्रतिषिद्धस्य वा नैव तद्दोषाय भवति, नाभ्युदयाय । यथा लौकिकवैदिकेषु । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावत् य एवमसौ ददाति, य एवमसौ यजते, य एवमसावधीते इति । तस्यानुकुर्वन् दद्याच्च यजेत चाधीयीत सोऽप्यभ्युदयेन युज्यते' इति ।

## १५. लट्वानुकर्षणम् ।

महतो वंशस्तम्बात् लट्वानुकर्षणमिति न्यायस्वरूपम् । यत्र महता प्रयासेनातितुच्छं लघुभूतं कार्यं सम्पद्यते, तत्र तस्य प्रयासस्य निन्दायामयं न्यायः प्रवर्तते । अयं न्याय 'ऋळक्' इति सूत्रभाष्ये ळकारोपदेशप्रयोजनप्रत्याख्यानप्रसङ्गे व्यवहृतः । तत्रोक्तं पतञ्जलिना – 'इह तर्हि कळ३तप्तशिखः', अणृत इति प्रतिषेधः प्राप्नोति रवत्प्रतिषेधाच्चैतत् सिध्यति । 'गुरोररवतः' इति वक्ष्यामि । यदि 'अररवतः' इत्युच्यते 'होतृळकाराः, होतृकार' अत्र न प्राप्नोति । 'गुरोररवतो ह्रस्वस्य' इति वक्ष्यामि । स एष सूत्रभेदेन ळकारोपदेशः प्लुताद्यर्थः सन्प्रत्याख्यायते, सैषा महतो वंशस्तम्बाल्लट्वानुकृष्यते' इति ।

## १६.माठरपरिवेषणम् ।

'सर्वे ब्राह्मणा भोज्यन्तां माठरकौण्डिन्यौ परिवेविषाताम्' इति न्यायस्वरूपम् । कस्मिंश्चिद्ग्रामे केनापि यज्ञकर्त्रा ग्रामस्थाः सर्वे ब्राह्मणा भोजनार्थमाहूताः तत्र भोजनावसरे यज्ञकर्त्रा निवेदितं यत् सर्वे ब्राह्मणाः भोज्यन्ताम्, किन्तु माठरकौण्डिन्यौ परिवेविषाताम् । इत्थं च ब्राह्मणत्वावच्छेदेन सर्वेषु ब्राह्मणेषु भोजनक्रियायाः प्राप्तत्वाद् माठरकोण्डिन्ययोरपि प्राप्तिः, किन्तु माठरकौण्डिनौ परिवेविषातामिति विशेषवचनेन परिवेषणक्रियाया भोजनक्रियाया बोधो ज्ञायते, युगपदुभयोः क्रिययोरेकस्मिन्नसम्भवात् । अतएवायं न्यायोऽसम्भवे एव प्रवर्तते, किन्तु अनेन न्यायेन यो बाधः, स परिवेषणक्रियाकालिक एव न तु सार्वदिकस्तेन परिवेषणक्रियाया अनन्तरं माठरकौण्डिन्याभ्यामपि भोजनं दीयते एव ।

न्यायोऽयं 'हयवरट्' इति सूत्रभाष्ये व्यवहृतः । तत्र एष प्रसङ्गः– 'हयवरट्' इति सूत्रे रेफो अकारवकारभ्यां पूर्वं पठनीयः, उत पर एव यथा पठितम् । तत्र यथास्थितपाठे रेफस्यापि यर् प्रत्याहारान्तर्गतत्वेन 'मद्रहृदः', 'भद्रहृदः' इत्यादौ रेफस्य 'अचोरहाभ्यां द्वे" इत्यनेन द्वित्वापत्तिराशङ्किता । ततश्च यथोक्तोदाहरणे माठरकौण्डिन्ययोर्ब्राह्मणत्वेन प्राप्तायाः सामान्यक्रियायाः विशिष्टपरिवेषणक्रियाया बाधः । एवमत्रापि रेफाऽकारयोः यर्त्वेन प्राप्तस्यापि कार्यित्वस्य निमित्तत्वेन बाधो जायते ।

## १७. आचार्याचारन्यायः

लोके यथा नवजातशिशोर्मातृपितृभ्यां द्वादशेऽहनि देवदत्तादिनामकरणे सति तयोर्व्यवहारादन्येऽपि अस्य मांसपिण्डस्य देवदत्त इति संज्ञेति व्यवहरन्ति, तथैव शास्त्रे अपि तत्तच्छास्त्रप्रणेतृभिराचार्यैः कृताभिः संज्ञाभिस्तत्तच्छास्त्रेषु इयमस्य संज्ञेति व्यवहारः क्रियते ।

न्यायोऽयं 'वृद्धिरादैच्' इति सूत्रभाष्ये उद्धृतः । तत्रैवं प्रसङ्गः – वृद्ध्यादीनां शब्दानां संज्ञात्वव्यवहाराय संज्ञाधिकारं मत्वा वृद्ध्यादयः शब्दा पठितव्याः अधिकाराभावे तु वृद्ध्यादिशब्देष्वानर्थक्यापत्तिः स्यात्, यथा 'दश दाडिमानिषडपूपाः' इत्यादीनाम् । अस्या एव शङ्काया निराकरणाय न्यायोऽयं व्यवहृतः।

## १८. इतरेतराश्रयन्यायः

यथा नावि बद्धा नौः परस्परं परित्राणाय न भवतीति लोके अन्योन्याश्रयाणि कार्याणि न भवन्ति । तथैव शास्त्रेऽपि 'वृद्धिरादैच्' इत्यादिसूत्रेषु अन्योन्याश्रयाणि कार्याणि न सिध्यति । तत्र हि सतामादैचां संज्ञा कार्या, संज्ञया चादैचो भाव्यन्ते, इत्यन्योन्याश्रयः । न च लोके नौः शकटं वहति, शकटं च नावं वहतीति भवन्त्येवान्योन्याश्रयाणि कार्याणि, इति वाच्यम्? तत्रापि जले नौः शकटं वहति, स्थले च शकटो नावं वहतीत्याश्रयभेदात्, यत्रान्योन्याश्रयत्वेन विवक्षितोद्देश्यताश्रयातिरिक्ताश्रयो न भवति, तत्रैवोक्तदोषस्य स्वीकारात् । तदुक्तं 'वृद्धिरादैच्' इति सूत्रभाष्ये पतञ्जलिना – "सतः संज्ञिनः संज्ञाभावात्, तदाश्रये संज्ञिनि वृद्ध्यादिष्वितरेतराश्रयत्वादप्रसिद्धिः । का इतरेतराश्रयता? सतामादैचां संज्ञया भवितव्यम्, संज्ञया चादैचो भाव्यन्ते । तदितरेतराश्रयं भवति । इतरेतराश्रयाणि च कार्याणि न प्रकल्प्यन्ते । तद्यथा नौर्नावि बद्धा नेतरेतरत्राणाय" भवति ।

## १९. मण्डूकप्लुतिः ।

यथा लोके मण्डूका मध्ये मध्ये भूमिं परित्यज्य स्वेच्छया इतस्तत उत्प्लुत्योत्प्लुत्य गच्छन्ति, तथैव शास्त्रेऽपि यत्रैकसूत्रस्थं पदं मध्यस्थं सूत्रं परित्यज्योत्तरसूत्रेऽनुवर्तते । तत्रायं न्यायः प्रयुज्यते ।

न्यायोऽयं 'इको गुणवृद्धी' इति सूत्रभाष्ये प्रयुक्तः । तत्रायमवसरः – पूर्वं यदीकः स्थाने गुणवृद्धी स्यातामित्युच्यते तदा द्यौः इत्यादावपीक एव स्थाने औदादेशः स्यादित्याशङ्कितम् । ततश्च 'वृद्धिरादैच्' इत्यतो वृद्धिग्रहणस्य 'अदेङ्गुणः' इत्यतो गुणग्रहणस्य चानुवर्तमानेऽपि गुणवृद्धी यत्र विधीयेते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठत इत्यर्थलाभेऽपि प्रकृतसूत्रे गुणवृद्धिग्रहणसामर्थ्याद् यत्र गुणवृद्धिशब्दाभ्यां गुणवृद्धीत्यद्यर्थलाभेन 'द्यौः' इत्यत्र दोषाभावः साधितः । तदनन्तरं यदि धाराप्रवाहन्यायेन वृद्धिपदस्यानुवृत्तिः स्यात्तदा मध्ये 'अदेङ्गुणः' इत्यत्रापि तस्य सम्बन्धाद् अदेङामपि वृद्धिसंज्ञा स्यादिति मण्डूकप्लुतिन्यायेनानुवृत्तिः स्वीकृता । तथा चोक्तं भाष्यकारेण – "अथवा मण्डूकगतयोऽधिकाराः । यथा मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः" इति ।

## २०. भ्रष्टावसरन्यायः

यथा लोके कस्मिंश्चिन्न्यायालये केनापि वादिना कश्चिद्वादः प्रस्तावितः । तत्र न्यायाधीशेन कस्याञ्चित्तिथौ स्वपक्षस्थापनाय प्रतिवादी निर्दिष्टः । यदि तस्यां तिथौ प्रतिवाद्युपस्थितः सन्नपि स्वपक्षं नोपस्थापयति अथवा केनापि शत्रुणा निगृहीतः सन्नुपस्थित एव न भवति, तदा भ्रष्टावसरत्वात् तस्मिन् वाद स पराजित इति मन्यते । एवमेव शास्त्रेऽपि किमप्युत्सर्गशास्त्रं यदि केनाप्यपवादशास्त्रेण बाधितः सन् लक्ष्ये स्वकार्यं न सम्पादयति, तदा स पुनः कार्यं कर्तुं नानुमन्यते, उक्तन्यायेन प्रतिषेधात् । न्यायोऽयम् 'इको गुणवृद्धी' इति सूत्रभाष्ये वृद्धिपदप्रयोजनप्रतिपादनावसरे उद्द्योतटीकायां चर्चितः ।

## २१. प्रासादवासिन्यायः ।

यथा एक एव देवदत्तो यदा यज्ञदत्तस्य पिता भवति, विष्णुमित्रस्य च पुत्रोऽपि, तदा तस्य पुत्रशब्देनापि बोधः, पितृशब्देनापि । एवमेव ये प्रासादे भूमौ च निवसन्ति, प्रासादवासिग्रहणेनापि ग्रहणं भवति, भूमिवासिग्रहणेनापि ।

न्यायोऽयं ‘मुखनासिकावचनोऽनुनासिकः’ इति सूत्रभाष्ये प्रयुक्तः । तत्र हि मुखग्रहणप्रत्याख्यानायायं न्यायः प्रवर्तितः । तत्रायमभिप्रायः – मुखग्रहणाभावे केवलं नासिकयोच्चार्यमाणानां यमानुस्वाराणामेव अनुनासिकसंज्ञा स्यात्, न तु तदतिरिक्तानामिति मुखग्रहणस्यावश्यकत्वं प्रदर्शितम् । ततो मुखग्रहणाभावेऽपि प्रासादवासिन्यायेन ये वर्णा मुखनासिकाभ्यामुभाभ्यामुच्चार्यमाणास्तेषां नासिकयाप्युच्चार्यमाणत्वेन नासिकग्रहणेनैव ग्रहणादनुनासिकसंज्ञायां सिद्धायां मुखग्रहणं न कर्तव्यमिति ।

### २२. सम्बन्धितशब्दन्यायः

लोके यथा मातरि वर्तितव्यम्, पितरि वर्तितव्यम् इत्युक्ते सम्बन्धसूचकमातृपितृशब्दाभ्यामेव स्वस्मिन्निति पदानुपादाने अपि स्वस्यां मातरि, स्वस्मिन् पितरि इत्यर्थो गम्यते, तथैव शास्त्रेऽपि यत्र व्याख्यानान्तरणापेक्षसम्बन्धबोधकशास्त्रेऽपि यत्र व्याख्यानान्तरानपेक्षसम्बन्धबोधकशास्त्र– वचनैरेव सम्बन्धार्थप्रतीतिस्तत्रायं न्यायः प्रवर्तते । न्यायोऽयं ‘तुल्यास्यप्रयत्नं सवर्णम्’ इति सूत्रेभाष्ये व्यवहृतः ।

### २३. काकाधिकरणन्यायः ।

यथा लोके कश्चिज्जनः देवदत्तस्य गृहमन्विष्यन् कस्मिंश्चिद् ग्रामं गतवान् । द्वयोर्गृहयोस्तुल्यमेव स्वरूपमिति दृष्ट्वा सन्दिहानः कश्चिज्जनमपृच्छदनयोः ‘कतरद्देवदत्तस्य गृहम्?’ इति, ततोऽभिज्ञो वदति यस्य गृहस्योपरि काकस्तिष्टति तदेव देवदत्तस्य गृहम् । अथ यथेदृशस्थले चञ्चलयापि काकस्थित्या स्थिरस्य गृहस्य पार्थक्येन परिचयो दीयते, तथैव पाणिनीयशब्दशास्त्रेऽपि निवर्तमानेनाप्यनुबन्धेन प्रत्ययाः पृथक् कृत्य ज्ञायन्ते । न्यायोऽयं ‘क्तक्तवतू निष्ठा’ इति सूत्र भाष्ये व्यवहृताः ।

### २४. सूत्रशाकटन्यायः ।

यत्र कार्योत्पत्तेः पश्चाद्भाविन्याः संज्ञायाः कार्योत्पत्तेर्प्रागेव व्यवहारः, तत्रायं न्याय प्रयुज्यते । यथा लोके शाकटनिर्माणात् पूर्वमेव कश्चिज्जनः कस्यचित्तन्तुवायस्य गृहं गत्वा वक्ति ‘अस्य सूत्रस्य शाकटं वय’ इति । न्यायोऽयम् ‘इग्यणः सम्प्रसारणम्’ इति सूत्रभाष्ये व्यवहृतः । तत्रायमवसरः प्रकृतसूत्रेण वर्णस्य सम्प्रसारणसंज्ञा पक्षे इतरेतराश्रयरूपदोष– माशङ्क्य अनेन न्यानेन तस्य परिहारो विहितः ।

## २५. खदिरबर्बुदन्यायः

यस्य कस्यचिद्वस्तुनः सामान्याभिज्ञानानन्तरं विशेषाभिज्ञानं क्रियते, तथैवास्य न्यायस्य प्रवृत्तिः। यथा लोके कस्यचिद् गृहं बालकौ समागतौ । ततो गृहपतिना तयोरभिज्ञानं दीयते यदिमौ बालकौ देवदत्तयज्ञदत्तयोः । तदनन्तरं विशेषजिज्ञासायाम् अनयोर्यः स्थूलो गौरश्च स देवदत्तस्य, कृशः श्यामश्च स यज्ञदत्तस्य इति विशिष्टः परिचयो दीयते । तथैव शास्त्रेऽपि पूर्वं सामान्येन प्रकृतेरुपदेशो भवति, ततः प्रत्ययस्य । न्यायोऽयम् 'आद्यन्तौ टकितौ' इति सूत्रभाष्ये प्रयुक्तः । तत्रेदमाशङ्कितं – वैयाकरणानां नये शब्दा नित्याः, टकितौ यद्यागमौ स्याताम्, तदा शब्दनित्यत्वहानिः स्यात् । यतो हि आगमो नाम अपूर्वोपजनः, नित्यत्वं नाम अपायोपजनविकाररहितत्वम् । अस्यामाशङ्कायामनेकविधि–समाधानप्रसङ्गेऽयं न्याय उपस्थापितः ।

## २६. तक्रकौण्डिन्यन्यायः

सर्वेभ्यो ब्राह्मणेभ्यो दधि दीतयां तक्रं कौण्डिन्याय इति न्यायस्वरूपम् । न्यायेऽयं यत्र कस्यचिद्व्यक्तौ सामान्योद्देश्यकविधायकवचनेन कस्यचित् कार्यस्य प्राप्तौ विशेषवचनेन सामान्यकार्यबाधपूर्वकं विधानं क्रियते, तत्रैवोपयुज्यते । यथा लोके कस्मिंश्चिच् भोजने प्रसङ्गे सर्वेभ्यो ब्राह्मणेभ्यो दधि दीयतामिति सामान्यविधिवचनेन ब्राह्मणत्वजात्यवच्छिन्नेभ्यो सर्वेभ्यो ब्राह्मणेभ्यो दधिदानस्य प्राप्तिरस्तीति तक्रं कौण्डिन्याय इति विशेषोद्देश्येन प्रकृतेन वचनेन दधिदाननिषेधपूर्वकं तक्रदानस्य विधानं क्रियते । एवमेव शास्त्रेऽपि सर्वेषामित्यत्र सुटा नुड्बाधः तक्रकौण्डिन्यायात् । न्यायोऽयं 'मिदोऽचोऽन्त्यात्परः' इति सूत्रभाष्ये प्रयुक्तः ।

## २७. भूयसा व्यपदेशन्यायः ।

यथा लोके एकस्मिन् ग्रामे सतीष्वपि कुलालकर्मकारनापिताद्यनेकासु जातिषु ब्राह्मणानामाधिक्याद् ब्राह्मणग्रामोऽयमिति व्यवह्रियते इति यत्र यस्याधिकं तत्र तन्नाम्नैव व्यपदेशो भवति । अतएव उच्यते भूयसा व्यपदेशमूलकोऽयं न्यायः । न्यायोऽयं व्याकरणशास्त्रे 'एच इग्घ्रस्वादेशे' इति सूत्रभाष्ये व्यवहृतः । तत्रायमाशयः – अनेन सूत्रेणैव एच इग्घ्रस्वविधानं किमर्थमित्याशङ्क्य एचः स्थाने प्रवर्तमानः सवर्णह्रस्वः कदाचिदर्धेकारः, अर्धोकारो वा न स्यात् । एवञ्च एचोः समाहारवर्णत्वात् कदाचिदवर्णरूपो ह्रस्वो न स्यादित्येतदर्थं सूत्रं वक्तव्यमित्युत्तरितम् ।

## २८. रज्वायमकाष्ठम् ।

यथा लोके एकत्र स्थितं काष्ठं रज्वा अयसा वा अन्यत्रानीयते तथैव व्याकरणशास्त्रेऽपि चकारादिग्रहणबलेनान्यसूत्रसम्बद्धं पदमन्यस्मिन् सूत्रे आनीयते । इदमप्यानयनमनुवृत्त्यपकर्षणानुकर्षणभेदेन त्रैध्यं भजते । यत्र यत्र पूर्वसूत्रस्थं पदमुत्तरसूत्रे नीयते, तत्रानुवृत्तिपदव्यवहारः । यत्र चोत्तरसूत्रस्थं पदं पूर्वसूत्रे नीयते, तत्रापकर्षणपदव्यवहारः । यत्र च चकारादिबलेन पूर्वसूत्रस्थं पदमुत्तरसुत्रे नीयते, तत्रानुकर्षणपदवाच्यता । पुनरपि धारावाहिमण्डूकप्लुतिभेदेन त्रिष्वपि द्वौ द्वौ भेदौ । यत्र पूर्वोत्तरसूत्राभ्यां पदानां जलप्रवाह इव मध्यस्थितानि सूत्राण्यपरित्यज्य नानयनं भवति, स पक्षो धारावाहिपक्षः । यत्र कुत्रचित् सुत्रस्थं पदं कस्मिंश्चिद्व्यवह्विते सूत्रे मण्डूकोत्प्लवनरीत्या मध्यस्थानि सूत्राणि परित्यज्योत्तरसूत्रे दीयते, तत्र मण्डूकप्लुतिपक्षः ।

अयमपि न्यायः 'षष्ठी स्थानेयोगा' इति सूत्रभाष्ये प्रदीपन्यायव्याख्यानप्रसङ्गे अधिकारशास्त्राणां त्रिप्रकारकत्वसम्पादने द्वितीयप्रकारोपपादनमुखेन व्यवहृतः । तदुक्तं भाष्यकारेण 'अपरोऽधिकारः यथा रज्वा अयसा वा वद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण' इति । अयञ्चाधिकारो गोयूथसिंहदृष्टिमण्डूकप्लुतिगङ्गाप्रवाहवदित्येवमपि वैयाकरणैः विभज्यते ।

### क. गोयूथः

यथा गोयूथः क्षेत्रेषु तृणानि खादन् यदा याति, तदा मध्ये यदि किमप्यभक्ष्यं तृणं प्राप्यते तदा स तत्परित्यज्याग्रे गत्वा खाद्यं तृणमत्ति । एवमेव किमप्यधिकारसूत्रं मध्येऽधिकारानर्हसूत्रं परित्यज्य तदर्हसूत्रे स्वीयं पदमुपस्थापयति । यथा 'एकाचो द्वे प्रथमस्य' इत्यधिकारसूत्रम्, 'अजादेर्द्वितीयस्य', 'न नन्द्रा संयोगादयः' इत्यधिकारानर्हं सूत्रद्वयं परित्यज्य 'पूर्वोऽभ्यासः', 'लिटि धातोरनभ्यासस्य' इत्यनयोः अधिक्रियते ।

### ख. सिंहदृष्टिः ।

सिंहो यथा स्वाग्रे स्थितं किमपि लक्ष्यमाकर्षति, तथैव यदा कस्मिंश्चित् परवर्तिसूत्रे स्थितं किमपि पदं पूर्ववर्तिसूत्रेणापकृष्यते, तदैवायमधिकारः सिंहदृष्टिपदेन व्यवह्रियते । यथा – 'वृद्धो यूना तल्लक्षणश्चेद्देवविशेषः' इति परवर्तिसूत्राद् 'एव' पदं 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रेऽनुकृष्यते । अतएव 'एकविभक्तौ यानि सरूपाण्येव दृष्टानि, तेषाकेम एव शिष्यते' इत्येव सूच्यते । मण्डूकप्लुतिगङ्गाप्रवाहवन्न्यायौ पूर्वो आलिचितौ

## २९. सन्देहे नियमन्यायः ।

यथा लोके तमसावृतायां रज्जौ सर्पसन्देहे सति प्रदीपदिना नियमः क्रियते नायं सर्पः तथैव शास्त्रे अपि यत्र सन्देहस्तत्रैव प्रवर्तते नियमशास्त्रेण नियमः क्रियते, न त्वसन्दिग्धे विषये । अतएव 'षष्ठी स्थानेयोगा' इति सूत्रम् 'इको यणचि' इत्यादौ यत्र षष्ठ्या, अर्थो निर्णीतस्तत्रैव प्रवर्तते, न तु 'शास इदङ्हलोः', 'उदुपधाया गोहः' इत्यादौ उपधापदसन्निधानेन स्थानिनेऽसन्दिग्धत्वात् । 'न्यायेऽयं 'षष्ठी स्थानेयोगा' इति सूत्रभाष्ये व्याख्यातः। तत्रायं प्रसङ्गः – यदि स्थानषष्ठीनिधारणायेदं सूत्रं स्वीक्रियते, तदा यत्रावयवषष्ठी तत्रापि स्थानषष्ठ्यापत्तावतिप्रसङ्गः स्यादित्याशङ्क्यानेन न्यायेन समाहितः ।

## ३०. प्रदीपन्यायः ।

यथा लोके कश्चिदेकदेशस्थोऽपि सुप्रज्ज्वलितः प्रदीपः स्वसन्निहितं सर्वमप्यन्धकारमपाकरोति, तथैव शास्त्रे एकदेशस्थमपि परिभाषाशास्त्रं स्वापेक्षितानि सर्वाण्यपि विधिशास्त्राण्युपकरोति ।

अपि च लोके तैलवर्तिकाग्नीनां त्रयाणां समवधान एव प्रदीपः प्रकाशको भवति, अन्यतमस्याभावे तु तस्य वैयर्थ्यमेव स्यात्, अथैव यत्रानेकवस्तुसमवधान एव कार्यसिद्धिर्भवति, अन्यतमासमवधाने तु कार्यसिद्धिः सञ्जायते, तत्रायं न्यायः प्रयुज्यते इत्यर्थान्तरम् ।

अयं न्यायः 'षष्ठी स्थानेयोगा' इति सूत्रभाष्ये व्यवहृतः । तत्रेत्थं – कुत्रस्था षष्ठी स्थानार्थिका, कुत्रस्था चावयवार्थिका? इति जिज्ञासायां स्थानषष्ठीषु लिङ्गासञ्जनपक्षे 'शास इदङ्हलोः' इत्यादौ लिङ्गासञ्जनं कर्तव्यमित्याशङ्क्य अनेन न्यायेन समाहितम् ।

## ३१. स्वभावसिद्धन्यायः ।

यथा लोकेषु समाजेषु, समाशेषु, समवायेषु चास्यतामित्युक्ते, स्वशब्दस्योक्तिमन्तरापि स्वसमाजेषु, समाशेषु, समवायेषु च सर्वे आसते स्वभावसिद्धत्वात्, तथैव यत्र प्रयत्नमन्तरापि स्वभावतः सानुरूपं कार्यं सम्पद्यते, तत्रास्य न्यायस्य प्रवृत्तिः ।

न्यायोऽयं 'स्थानेऽन्तरतमः' इति सूत्रभाष्ये व्यवहृतः । तत्रोक्तं पतञ्जलिना – 'प्रत्यात्मवचनमशिष्यम्, स्वभावसिद्धत्वात् एवमेव अन्तरतमवचनं चाशिष्यम् योगश्चाप्यशिष्यः । कुतः स्वभावसिद्धत्वादेव । तद्यथा – समाजेषु, समाशेषु, समवायेषु चास्यतामित्युक्ते, नैव कृशाः कृशै सहासते, न पाण्डवः पाण्डूभिः । येषामपि

किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते । तथा गावो दिवसं चरितव्यो यस्याः प्रसवे भवति स तेन सह शेरते । तथा यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति, तान्यन्योन्यं पश्यन्ति शब्दं कुर्वन्ति' इति ।

## ३२. तप्तभ्राष्ट्रतिलन्यायः

यथा लोके तप्ते भ्राष्ट्रे प्रक्षिप्तास्तिलास्तस्मिन् क्षणमपि नावतिष्टमानास्त्वरितं बहिर्निर्गच्छन्ति, तथैव यत्र कस्यचिद्वस्तुनः सततं स्थितेरभावो जायते, तत्रास्य न्यायस्य प्रवृत्तिः । न्यायोऽयं 'स्थानेऽन्तरतमः' इति सूत्रभाष्ये व्यवहृतः । तत्रायमवसरः – इदं सूत्रं स्वातन्त्र्येण निवर्तकम्, उत अन्येन निर्वृत्तानामनेन नियमः क्रियते । यदि स्वातन्त्र्येण निर्वर्तकम्, तर्हि सर्वेषां स्थानिनां निर्वृत्त्यापत्तौ दधिमधुशब्दयोरप्यादेशाः प्राप्नुवन्ति । अपि च इष्टा व्यवस्था न सिध्येत् । तथोक्तं भाष्ये – 'अपि चेष्टा व्यवस्था न प्रकल्पेत । तद्यथा तप्ते भ्राष्ट्रे तिलाः प्रक्षिप्ता मुहूर्तमपि नावतिष्ठते । एवमिमे वर्णा मुहूर्तमपि नावतिष्ठेरन्' इति ।

## ३३. पितापुत्रवन्न्यायः

लोके यथा देवदत्त इत्येक एव व्यक्तिः स्वपुत्रापेक्षया पितृपदव्यवहार्यः, पितुरपेक्षया च पुत्रपदव्यवहार्यो भवति, तथैव शास्त्रेऽपि एक एव शब्दोऽपेक्षावशात् विशेष्यमपि भविष्यति विशेषणमपि । न्यायोऽयं 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति, 'तस्मादित्युत्तरस्य' इत्युभयसूत्रव्याख्यानावसरे उपस्थापितो महाभाष्यकारेण । तत्रोक्तम् – 'पर आह प्रकल्पेत च कथम्? पितापुत्रवत् । तद्यथा – स एव कञ्चित् प्रति पिता भवति, कञ्चित् प्रति पुत्रो भवति । एवमिहापि स एव कञ्चित् प्रति सामान्यं कञ्चित् प्रति विशेषः' इति ।

## ३४. भेर्याघातवन्न्यायः ।

यथा लोके घटाः पुनः पुनः दृश्यमानोऽपि भेदं नावलम्बते, तथैव द्रुतमध्यमविलम्बितास्वन्यतमायां कस्याञ्चिदपि वृत्तावुच्चार्यमाणोऽकारः सः, स एव पुनः पुनरुपलभ्यते इति वृत्तिभेदेऽपि वर्णस्य भेदो न गृह्यते इति सर्ववृत्तिषु तत्कालत्वमेव । न्यायोऽयं 'तपरस्तत्कालस्य' इति सूत्रभाष्ये प्रयुक्तः । तत्रोक्तं पतञ्जलिना – "एवं तर्हि स्फोटः शब्दः, ध्वनिः, शब्दगुणः कथम्? भेर्याघातवत् तद्यथा – भेर्याघातो भेरीमाहत्य कश्चिद् विंशति पदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत् । स्फोटस्तावानेव भवति । ध्वनिकृता वृद्धिः" इति ।

### ३५. कान्तारसार्थन्यायः ।

लोके कश्चिद् निर्जने भयावहेऽरण्ये समुपागते कमपि सहायकं गृहीत्वा गच्छति । ततो निर्गते तु सः सहायकं परित्यज्य एकाकी एव व्रजति, रम्ये प्रदेशे सहायकस्य निष्प्रयोजनत्वात् । एवमेव 'एङ् प्राचां देशे' इति 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रतो यस्याचामादिग्रहणमनुवर्तते 'एङ् यस्याचामादिस्तद्वृद्धम्' इति वाक्यार्थसम्पादानाय । 'त्यदादीनि च' इति सूत्रे तु केवलं वृद्धिग्रहणमेवानुवर्तते, त्यदादीनि वृद्धिसंज्ञानि स्युरित्यर्थस्यैवेष्टत्वात् । न्यायोऽयं 'त्यदादीनि च' इति सूत्रे भाष्ये व्यवहृतः ।

### ३६. पर्जन्यवल्लक्षणप्रवृत्तिः

लोके यथा मेघः मरुस्थले शस्यपूरिते क्षेत्रे फलमपेक्ष्य वर्षति, तथैव वारिपूरितेषु सरित्समुद्रादिष्वपि फलमपेक्ष्य वर्षति, न हि भेदबुद्धिमादधाति, तथैव शास्त्रमपि स्वीयोद्देश्यतावच्छेदकाक्रान्ते भेदबुद्धिं परित्यज्य फलविशेषाभावेऽपि प्रवर्तते, उक्तन्यायात् । न्यायोऽयम् 'इको झल्' इति सूत्रभाष्ये व्यवहृतः । तत्रोक्तम् – 'दीर्घाणामपि दीर्घवचन एतत्प्रयोजनं गुणो मा भूदिति । कृतकारि खल्वपि शास्त्रं पर्जन्यवत् तद्यथा पर्जन्यो यावद्वनं पूर्णञ्च सर्वमभिवर्षति' इति ।

### ३७. अदग्धदहनन्यायः

लोके वह्नेः दग्धदहनस्य निष्फलत्वात् तद्दहने प्रवृत्तिर्न भवति, अदग्धस्यैव दहने प्रवृत्तिर्भवति, तथैव शास्त्रमपि अकृतकार्ये एव प्रवर्तते, न तु कृते कार्ये निष्फलत्वात् । अतएव बुभूषतीत्यादौ 'सार्वधातुकार्धधातुकयोः' इत्यनेन प्राप्तगुणबाधनार्थम् 'इको झल्' इति सूत्रेण सनः कित्त्वमपजायते । अन्यथा कृतेऽपि कार्ये शास्त्रस्य प्रवृत्तिरिति नियमादुक्तोदाहरणे सनि परे दीर्घोकारस्य पुनरपि 'अजझन्गमां सनि' इति सूत्रेण दीर्घे दीर्घवचनसामर्थ्यादेव गुणनिषेधसिद्धे, तद्वारणार्थम् 'इको झल्' इति सूत्रेण सनो विधीयमानं कित्त्वमनर्थकमेव स्यात् । तदुक्तं भाष्ये 'सामर्थ्याद्धि पुनर्भाव्यम् सामर्थ्याद्धि पुनः प्रवृत्तिर्भवति । भोजनविशेषाच्छिल्पिविशेषाद्वा । दीर्घाणां पुनर्दीर्घत्ववचनेन किञ्चित्प्रयोजमस्ति । 'अकृत्कारि खल्वपि शास्त्रमग्निवत्' । तद्यथा अग्निर्यददग्धं दहति इति ।

### ३८. अवस्थितन्यायः

यथा लोके अरण्यस्थेषु वृक्षेषु मध्ये एक एव वृक्ष स्वस्मादुत्कृष्टाद् वृक्षात् नीचैः भवति, अपकृष्टाच्च उच्चैर्भवति । अयम् उच्चैरेव नीचैरेव वेति कस्यचिदपि कृते निश्चितरूपे वक्तुं न शक्यते, उच्चनीचयोरनवस्थिततत्वात्, तथैव शास्त्रेऽपि यत्रानिश्चयो भवति, तत्रायं न्यायः प्रयुज्यते ।

न्यायोऽयम् 'उच्चैरुदात्तः', 'नीचैरनुदात्तः' इत्युभयसूत्रभाष्ये व्याख्यातः । तत्रानेन न्यायेन उच्चनीचपदार्थयोरनवस्तितं प्रतिपाद्य तावुद्दिश्य उदात्तानुदात्तसंज्ञयोरप्रवृत्तिरेव स्यादित्याशङ्कितम् । तथा च भाष्यम् – "इदमुच्चनीचमवनवस्थितपदार्थकम् । तदेव हि किञ्चित् प्रत्युच्चैर्भवति, कञ्चित् प्रति नीचैः । एवं हि कश्चित् कञ्चिदधीयानमाह – 'किमुचैः रोरुयसे शनैर्वर्ततामिति' । तमेव चाधीयानमपर आह – किमन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति । एवमुच्चनीचमनवस्थित– पदार्थकम्, तस्यानवस्थिततत्वात् संज्ञाया अप्रसिद्धिः" इति ।

### ३९. आमिश्रयणन्यायः

यथा लोके आमिश्रिते शर्करोदके स्पष्टतया पार्थक्येन न ज्ञायते कियच्छर्करा कियदुदकमिति । तथैव शास्त्रेऽपि उदात्तानुदात्तयोः सम्मेलने, न ज्ञायते कियानुदात्तः, कियाननुदात्तः, आमिश्रयणत्वात् । न्यायोऽयं 'तस्मादित उदात्तमर्धह्रस्वम्' इति सूत्रभाष्ये व्याख्यातः । तत्रायमवसरः एकारादिसन्ध्यक्षरेष्वपि वर्णानामामिश्रणस्य सत्त्वात्तत्र कियती मात्रा कस्य वर्णस्येति प्रतिपदमनुक्तत्वाद् यथा सन्देहो भवति, तथैव स्वरितविषयेऽपि कथं मात्रा निर्धारणं कियती उदात्तस्य, कियती चानुदात्तस्येति जिज्ञासासयामुक्तं भाष्यकारैः किमर्थं पुनरिदमुच्यते आमिश्रीभूतमिवेदं भवति । तद्यथा – "क्षीरोदके सम्पृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत् क्षीरम्, कियदुदकम्, कस्मिन्नवकाशे क्षीरम्, कस्मिन् वोदकमिति । एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते कियदुदात्तम्, कियदनुदात्तम्, कस्मिन्नवकाशे उदात्तम्, कस्मिन्ननुदात्तमिति । तदाचार्यः सुहृद्भूत्वान्वाचष्टे इयदुदात्तमियदनुदात्तम् । अस्मिन्नवकाश उदात्तम्, अस्मिन्नवकाशेऽनुदात्तम्" इति ।

### ४०. शालीकलापन्यायः

लोके यथा कश्चिच्छाल्यर्थी शालिकलापं सपलालं सतुषमाहरति, पलालतुषाभ्यां विना शालिकलापानुपलब्धेः । ततः स शालिकलापेभ्यो यत्सङ्ग्राह्यं वस्तु तण्डुलं तं संगृह्य तुषपलालानि परित्यजति, तथैव शास्त्रेऽपि सूत्रघटकपदप्रयोक्तुकामो महर्षिपाणिनिः

‘स्वरितात्संहितायामनुदात्तानाम्’ इति सूत्रे ‘अनुदात्तानाम्’ इति पदं सविभक्तिकं निर्दिशति, विभक्तिं विना पदप्रयोगस्यासम्भवात् । तत्र पदसंस्कारोपयोग्येव बहुत्वं विवक्ष्यते, न तु कार्यसिद्ध्यर्थम् । अतएव द्व्येकयोरपि एकश्रुतिस्वरः सिध्यति । न्यायोऽयं ‘स्वरितात्संहितायामनुदत्तानाम्’ इति सूत्रभाष्ये व्यवहृतः ।

## ४१. स्थालीपुलकन्यायः

यथा लोके कश्चन पाचकः स्थाल्यां तण्डुलान् पचति । स तुण्डलाः पक्वा उत न पक्वा इति परीक्षणाय एकं तण्डुलं सम्यक् परीक्ष्य निर्णयमुपगच्छति यत् स्थाल्यां स्थिताः सर्वे तण्डुलाः पक्वा, न पक्वा वेति । एवमेव शास्त्रेऽपि यत्रैकेनैवावयवेन परीक्षितेन तद्घटितस्य सर्वस्यापि समुदायस्य निश्चयो विधीयते, तत्रायं न्यायः प्रयुज्यते । न्यायोऽयं ‘कारके’ इति सूत्रभाष्ये व्याख्यातः। तत्रोक्तम् ‘एवं तर्हि न ब्रुवः – अपादानादीनां कर्तृत्वस्याप्रसिद्धिरिति । पर्याप्तं करणाधिकरणयोः कर्तृत्वं निदर्शतमपादानादीनां कर्तृत्वनिदर्शनाय पर्याप्तो लोकः पुलाकः स्थाल्या निदर्शनाय । किं तर्हि? संज्ञाया अप्रसिद्धिः’ इति ।

## ४२. राजतक्षन्यायः

यदा परकार्ये रतः कोऽपि जनस्तस्मिन् क्षणे स्वकार्यं न करोति, तदैवायं न्यायः । अतएव राजकार्ये रतास्तक्षाः तस्मिन्नेव काले स्वीयं तदेव कार्यं न कुर्वन्ति । तथैव शास्त्रेऽपि पदार्थसम्पादने रतं पदं स्वार्थं जहाति ।

न्यायोऽयं ‘समर्थः पदविधि’ इति सूत्रभाष्ये जहत्स्वार्थावृत्तेः समर्थनाय साधकत्वेन प्रयुक्तः । तत्र पतञ्जलिना भणितं – ‘युक्तं पुनर्यत् स्वार्था नाम वृत्तिः स्यात्? बाढं युक्तम् । एवं दृश्यते लोके पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वकर्म जहाति । तद्यथा तक्षो राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति’ इति ।

## ४३. भिक्षुकभिक्षान्यायः ।

लोके यथा भिक्षुको द्वितीयां भिक्षामवाप्य प्रथमामपि भिक्षां न जहाति, अपि तु सञ्चयमेव करोति तथैव जहत्स्वार्थावृत्तिपक्षे समासघटितानि पदानि स्वार्थत्यागमन्तरैव एकार्थीभावं परिकल्पयति । न्यायऽयं ‘समर्थः पदिविधिः’ इति सूत्रभाष्येऽजहत्–स्वार्थावृत्तिसमर्थानाय प्रवृत्तः । तथा च भाष्यं युक्तं पुनरिदं यदजहत्स्वार्था नाम वृत्तिः

स्यात्? बाढं युक्तम् । एवं हि दृषत् लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति, सञ्चयायैव प्रवर्तते इति ।

## ४४. वृद्धकुमारीवरन्यायः (वृद्धकुमारीवाक्यवन्न्यायः) ।

यथा कदाचित् पूर्वं काचित् वृद्धा कुमारी तपसेन्द्रं तोषितवती तदा प्रसन्नश्चेन्द्रस्तं वरं बृणीष्वेव प्रोवाच । सा चेत्थं वरं याचितवती पुत्रा मे बहुक्षीरघृतमोदकं कांस्यपात्र्यां भुञ्जीरन्निति । अत्र यथा वृद्धकुमार्य्या एकेनैव वाक्येन सर्वमपि भौतिकं सुखभोगसाधनं याचितं, तथैव शास्त्रेऽपि तत्रैकेनैव सूत्रेण केनापि वाक्येन वानेकेऽर्था उपलभ्यन्तेऽनेके कार्याणि वा क्रियन्ते, तत्रायं न्यायो दृष्टान्तमुखेन व्यवह्रियते । 'नमुने' इति सूत्रभाष्ये न्यायस्यास्य व्यवहारो दृश्यते ।

## ४५. सूचीकटाहन्यायः ।

सूचीकटाहावधिकृत्य प्रवर्तितोऽयं न्यायः सूचीकटाहन्यायः । लोके यथा कदाचित् कस्यचिल्लौहकारस्य समीपे युगपत् सूचीकटाहापेक्षिणौ गतवन्तौ । तत्रैकेनोक्तं 'कुरु मे कटाहम्' इति अन्येन चोक्तं 'कुरु सूचीम्' इति । ततः शिल्पिना चिन्तितं यदल्पायाससाध्या सूची पूर्वं निर्मातव्या, कटाहश्च पश्चान्निर्मातव्यो बहुकालायाससाध्यत्वात् । यतो हि पूर्वं कटाहनिर्माणे सूच्यपेक्षकस्य बहुकालयापनं मा भुदिति । तथैव शास्त्रेऽपि यदा युगपदुभयविषयकविचारौ विचारकोटावागतौ चेत्तदा अल्पायाससाध्यविषयकविचारः पूर्वं क्रियत इति लाघवमूलकोऽयं न्यायः । न्यायोऽयं व्याकरणशास्त्रे कौण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थनिरूपणप्रकरणे व्यवहृतः ।

## ४६. अर्धजरतीन्यायः ।

जरत्याः अर्धम् अर्धजरती 'अर्धं नपुंसकम्' इत्यनेन समासः । ततोऽर्धजरती इव इति विग्रहे 'समासाच्च तद्विषयात्' इति सूत्रेणैवार्थे छप्रत्ययः, उद्गहादित्वाच्छः । जरत्याः वृद्धायाः अर्धं कानिचिदङ्गानि कामयते, अर्धं कानिचिदङ्गानि न कामयत इत्यर्धजरतीशब्दस्यार्थः, तदिव अर्धजरतीयम् । एवमेव यत्र कुत्रचिदेकोद्देश्यकः परस्परविरुद्धद्रव्यव्यवहारो लक्ष्यते, तत्रैवायं न्यायः प्रयुज्यते । न्यायोऽयं वैयाकरणभूषणसारे महाभाष्ये च बहुश उपलभ्यते । वैयाकरणभूषणसारे धात्वर्थनिर्णये प्रयुक्तः । वैयाकरणानां मते सर्वेषां कारकाणां भावनायामेवान्वय इति सिद्धान्तः ।

## ४७. रेखागवयन्यायः

यत्रोपायभूतेनावास्तविकेन वास्तविकस्य प्रतीतिः प्रतिपाद्यते तत्रैवास्य न्यायस्योपयोगो जायते । यथा लोके केनचिन्नागरिकेण कश्चन पृष्टो ग्राम्यो जनः कीदृग् गवयपदार्थ इति, ततस्तेन रेखया गवयजीवविशेषस्याकृतेरिवाकृतेः निर्माणं कृत्वा 'एतादृशावयववान् य स गवयपदार्थः' इत्युक्तम्, जायते च गवयविषयको बोधो नागरिकस्य । तत्र यथा रेखामयगवयप्रतिकृतौ वास्तविकपाणिपादाद्यभावेऽपि 'अयं पाणिः', 'अयं पादः', 'इदं मुखम्' इत्यारोपितबुद्ध्या वास्तविकव्यवहारः क्रियते, तत्रैवायं न्यायः प्रवर्तते । व्याकरणे न्यायोऽयं वैयाकरणभूषणसारे समासशक्तिनिर्णयप्रकरणे उद्धृतः ।

## ४८. खले कपोतन्यायः ।

वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति । तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति ॥

यथा लोके विरुद्धावस्थाकानामनेकेषां वृद्धयुवशिशुकपोतानां खले सहैवापतनं भवति, तथैव सर्वत्रार्थबुबोधयिषया वाक्यप्रयोगो वाक्यार्थघटकानामनेकेषां पदार्थानामा–काङ्क्षादिवशात् परस्परं सहैवान्वयः सम्पद्यते ।

व्याकरणशास्त्रेऽयं न्यायो नागेशभट्टेन विरचितायाः वैयाकरणसिद्धान्तलघुमञ्जूषा–यास्तात्पर्यनिरूपणप्रकरणे व्यवहृतः ।

## ४९. राजपुरप्रवेशन्यायः

राज्ञः पुरो राजपुरस्तस्मिन् प्रवेशो राजपुरप्रवेशः। यथा स्वस्वकार्यार्थिनो राजपुरप्रवेशाभिलाषिणो बहवो जना राजद्वारे एकत्र स्थिता मदीयमेव कार्यं पूर्वं स्यात् मदीयमेव कार्यं पूर्वं स्यादिति बुद्ध्या अतीव व्यग्रा अपि राजपुरुषैः नियन्त्रिताः सन्तस्तदादेशे सति कोलाहलमकुर्वन्तः क्रमेणैव प्रविशन्ति, न त्वनियमेनैकदेव । तथैव शास्त्रेऽपि यत नियमेन क्रमेण च कार्यं जायते, तत्रायं न्यायो व्यवह्रियते । यथा शाब्दबोधस्थले प्रायः सर्वैरेव शास्त्रकारैरेष क्रमः सिद्धान्तरूपेणाङ्गीक्रियते यत् –

'पदज्ञानं तु करणं द्वारं यत्र पदार्थधीः ।
शाब्दबोधो फलं तत्र शक्तिधीः सहकारिणी ॥'

न्यायोऽयं वैयाकरणसिद्धान्तलघुमञ्जूषायास्तात्पर्यनिर्णयप्रकरणान्ते प्रयुक्तः । तत्रेवमालोचितः – श्रौतवाक्यघटाकपदानां तज्जन्यपदार्थज्ञानानामाकङ्क्षादीनाञ्च क्रमेणो–च्चारणान्तरं विनष्टात्वात् कथं महावाक्यार्थबोध इति जिज्ञासायामेवमुच्यते – 'यदा तु

क्रमेणेवोद्बोधकसमवधानात्तत् खण्डवाक्यार्थबोधोत्तरं पूर्वपूर्वस्स्माणात् तत्संस्काराद्वा महावाक्यार्थबोधस्तदा राजपुत्रप्रवेशन्यायेन बोध इत्यन्यत्र विस्तरः' इति । अयमेव बोधो विशिष्टस्य वैशिष्ट्यमिति न्यायेनोच्यते । यदा एकस्मिन् वाक्ये एकमुख्यविशेष्यार्थका–न्वयबोधस्थले अनेके खण्डवाक्यार्थाः कल्प्यन्ते तदा ते सर्वे स्वस्वविशेषणैर्वैशिष्ट्यमनु–भूयैव मुख्यविशेष्येण सह सम्बन्धन्ति ।

**५०. गोबलीवर्दन्यायः ।**

ई–लक्ष्मीः, वृणोतीति विग्रहे वृञ्धातोः कर्तरि रिच्प्रत्यय वर्, ई च वर् चेति द्वन्द्वे ईवरौ तौ ददातीति ईवर्दः, बली चासौ ईवर्दः बलीवर्दः वृष इत्यर्थः । गोश्च बलीर्वद श्चेति द्वन्द्वे गोबलीवर्दशब्दो निष्पद्यते । अतएव गोबलीवदमानय इत्युक्ते स्त्रीत्वविशिष्टां गां पुंस्त्वविशिष्टं वृषञ्चानय इत्यर्थः सम्पद्यते ।

न्यायोऽयं प्रक्रियाकौमुद्याः प्रकाशव्याख्यायां, प्रौढमनोरमायाञ्च संज्ञाप्रकरणे 'हलन्त्यम्' इतिसूत्रे उपदेशपदार्थनिरूपणे के उपदेशाः इति जिज्ञासायामुच्यते –

"धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमाः प्रत्यादेशा उपदेशाः प्रकीर्तितः ॥"

इति परिगणनं कृतम् । अत्रैव पदकृत्यचिन्तायां सूत्रपदोपादानेनोणादिलिङ्गानुशासनयोरपि ग्रहणे सिद्धे किमर्थमुपादानमिति प्रश्ने 'गोबलीर्वदन्यायेन' समाहितम् । अर्थात् गामानय इत्युक्ते यथा गोत्वावच्छिन्नत्वात् सामान्यस्य गोरानयनं भवति, तथैव बलीवर्दस्यापि भवितुमर्हति तस्यापि गोत्वावच्छिन्नत्वात् तथापि बलीर्वदस्यानयने विशेषाग्रहद्योतनायोपादानं कृतम् । एवमेवोणादिलिङ्गानुशासनयोरपि ज्ञेयम् ।

वैयाकरणसिद्धान्तलघुमञ्जूषायाः प्रातिपदिकार्थप्रकरणे त्वस्य न्यायस्य सामान्यविशेषभावो भाष्यप्रामाण्यमुपदर्श्य श्रीमता नागेशाचार्येण खण्डितः । इत्येवं व्याकरणशास्त्रस्य केषाञ्चिन्न्यायायामुपस्थापनं विहितम् ।

## द्वितीयं परिश्लिष्टम्

## महाभाष्ये प्रयुक्तानां केषाञ्चिद् लोकिकदृष्टान्तानां संग्रहः ।

| | |
|---|---|
| १.अथवा प्रतीतपदार्थको लोकेध्वनिः शब्द इत्युच्यते । | पस्पशाह्निकम् |
| २.भक्ष्यनियमेनाभक्ष्यप्रतिषेधः (वा) सिद्धे शब्दार्थसम्बन्धे । | पस्पशाह्निकम् |
| ३.सिद्ध ओदनः, सिद्धः सूपः (अत्र लौकिकस्यैवोदहरणस्य प्राधान्यम्) । | पस्पशाह्निकम् |
| ४.सन्त्येकपदान्यप्यवधारणानि (अभक्षो वायुभक्षः) । | पस्पशाह्निकम् |
| ५.अथवा पूर्वपदलोपोऽत्र द्रष्टव्यः – अत्यन्तसिद्धः सिद्धः । | पस्पशाह्निकम् |
| ६.माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थसिद्धशब्दमादितः प्रयुङ्क्ते । | पस्पशाह्निकम् |
| ७.अथवा द्रव्य एव पदार्थे एष विग्रहो न्याय्यः सिद्धे शब्दे–अर्थे–सम्बन्धे । | पस्पशाह्निकम् |
| ८.आकृतावपि पदार्थे एष विग्रहो न्याय्यः, सिद्धे शब्दे–अर्थे–सम्बन्धे । | पस्पशाह्निकम् |
| ९.(वा) "लोकतः" । | पस्पशाह्निकम् |
| १०.(वा) लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः । | पस्पशाह्निकम् |
| ११.(वा) यथा लौकिकवैदिकेषु । | पस्पशाह्निकम् |
| १२.लौकेऽप्रयुक्ता इति । | पस्पशाह्निकम् |
| १३.अभ्यन्तरोऽहं लोके न त्वहं लोकः । | पस्पशाह्निकम् |
| १४.(वा) अप्रयुक्ते दीर्घसत्रवत् । | पस्पशाह्निकम् |
| १५.(वा) प्रयोगे वा सर्वलोकस्य । | पस्पशाह्निकम् |
| १६.अशिष्टाप्रतिषिद्धम् । हिक्किकतहसितकण्डूयितानि । | पस्पशाह्निकम् |
| १७.अथवा "कुपखानकवत्" । | पस्पशाह्निकम् |
| १८."दिग्गत अपि हेतव भवन्ति"। आम्राश्च सिक्ताः पितरश्च प्रीणिता इति । (८/२/१) । | पस्पशाह्निकम् |
| १९.नैव लोके न वेदेऽकारो वुवृतोऽस्ति । | पस्पशाह्निकम् |
| २०.आहो पुरुषिकामात्रं तु भवानाह (७/२/६७) । | पस्पशाह्निकम् |
| २१.नैव लोके न च वेदे दीर्घप्लुतौ संवृतौ । | पस्पशाह्निकम् |
| २२.(वा) द्रव्यवच्चोपचाराः । | पस्पशाह्निकम् |
| २३.न ह्ययमनुबन्धैः शाल्यकवच्छक्य उपचेतुम् । | पस्पशाह्निकम् |

२४.नैष दोषः, लोकत एतत्सिद्धम् । तद्यथा – लोके कश्चिदेवं देवदत्तमाह, 'इह मुण्डो भव, इह जटिलो भव, इह शिखो भव' इति यल्लिङ्गो यत्रोच्यते तल्लिङ्गस्तत्रोपतिष्ठते ।

२५.तद्यथा – सप्तदशसामिधेन्यो भवन्ति, इति त्रिः प्रथमामन्वाह, त्रिरुत्तमाम् इत्यवृत्तितः सप्तदशत्वं भवति । (एओङ्)

२६.एतदपि सिद्धम् । कथम् ? लोकतः । तद्यथा – ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्वा तया सर्वे ते सहस्रदक्षिणाः सम्पन्नाः ।

२७.सम्भविकार्यमनेकोऽपि युगपत् करोति । तद्यथा–घटस्य दर्शनं स्पर्शनं वा ।

२८.(वा) युगपच्च देशपृथक्त्वदर्शनात् ।
२९.(वा) शकुनिवत्स्युः ।
३०.आदित्यवत्स्युः । १/२/६४)
३१.रूपासामान्याद् वा ।
३२.अर्तिप्रवृत्तिश्चैव हि लोके लक्षते । (ऋलृक्)
३३.(वा) अनुकरणं शिष्टाशिष्टप्रतिषिद्धेषु यथा लौकिकवैदिकेषु ।
३४.सैषा महतो वंशस्तम्बाल्लट्वनुकृष्यते ।
३५.एओङ् – पारिषदकृतिरेषा तत्रभवताम् । नैव लोके नान्यस्मिन् वेदेऽर्ध एकारोऽर्ध ओकारो वा अस्ति ।
३६.वृक्षः प्रचलन् सहावयवैः प्रचलति । (६/१/१)
३७.हयवरट् – "संघातार्थवत्वाच्च" (वा) । तद्यथा – एकश्चक्षुष्मान् दर्शने समर्थः, तत्समुदायश्च शतमपि समर्थम् । एकश्च तिलस्तैलदाने समर्थः, तत्समुदायाश्च खार्यपि समर्था ।
३८.उभयमित्याह । तद्यथा – समानमीहमनानां चाधीयानानां केचिदर्थैर्युज्यन्त अपरे न किमस्माभिः कर्तुं शक्यते । (१/१/३८)
३९.तुल्यजातीयांस्तुल्यजातीयेषूपदिशति – अचोऽक्षु हलो हल्सु ।
४०.वृद्धिरादैच् – १/१/१ । यथा लोके ह्यर्थवन्ति चानर्थकानि च वाक्यानि दृश्यन्ते । अर्थवन्ति तावत्–देवदत्त गामभ्याज शुक्लां दण्डेन, देवदत्त गामभ्याज कृष्णाम् । अनर्थकानि–दश दाडिमानि, षडपुपाः, कुण्डमयाजिनम्, पलालपिण्डः ।
४१.(वा) यथा लौकिकवैदिकेषु च कृतान्तेषु । लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति । तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति ।
४२.(वा) अनाकृतिः, अथवा अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः । लोकेऽपि ह्याकृतिमतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते ।
४३.न यथा लोके तथा व्याकरणे । प्रमाणभूत आचार्यो दर्भपवित्रपणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण ।
४४.द्वयोर्हि प्रतीतपदार्थकयोर्लोके विशेषण–विशेष्यभावो भवति ।
४५.अथवा आवर्तिन्यः संज्ञाः ।
४६.अथवा–पूर्वोच्चरितः संज्ञी, परोच्चारिता संज्ञा ।
४७.सतो हि कार्यिणः कार्येण भवितव्यम्, इतरत्रापि सतो मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते।
४८.अथवा–अस्थानेऽयं यत्नः क्रियते । न हीदं लोकाद् भिद्यते, यदीदं लोकाद् भिद्यते ततो यत्नार्हं स्यात् ।
४९.लोकेऽपि हि यस्मै सम्प्रत्युपदिशति तस्याकृतः । अथ तत्र कृत इहापि कृतो द्रष्टव्यः ।
५०.इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते । तद्यथा नौर्नावि बद्धा नेतरत्राणाय भवति । (१/१/८, १/१/३८,१/१/५४,१/१/६०,१/३/१,१/३/१२,२/१/५०,३/२/८४,३/२/१०२,३/२/१२४,३/३/३)

५१.ननु च भो इतरेतराश्रयाण्यपि कार्याणि दृश्यन्ते । तद्यथा–नौः शकटं वहति, शकटं च नवं वहति ।
५२.(वा) प्रत्यवयवं वाक्यपरिसमाप्तिः । तद्यथा–देवदत्त–यज्ञदत्त–विष्णुमित्रा भोज्यन्ताम् इति । न चोच्यते प्रत्येकमिति । प्रत्येकं च भुजिः परिसमाप्यते । (१/१/३, १/२/३९, २/१/१, २/१/४, ३/३/१२, ६/१/५, ८/३/५८, ८/४/२)
५३.समुदाये वाक्यपरिसमाप्तिः । तद्यथा–गर्गाः शतं दण्ड्यन्ताम् इति । अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति । (१/१/७, २/१/१–२/१/४–२/३/४६–६/१/१–६/१/५–८/१/१)
५४.(वा) भेदकात्वात् स्वरस्य । एवं हि दृश्यते लोके य उदात्ते कर्तव्येऽनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति, अन्यत्त्वं करोषीति ।
५५.भेदकत्वाद् गुणस्य । एवम् हि दृश्यते लोके–एकोऽयमात्म उदकं नाम तस्य गुणभेदादन्यत्वं भवति–अन्यदिदं शीतम्, अन्यदिदमुष्णमिति ।
५६.ननु च भो–अभेदका अपि गुणा दृश्यन्ते । तद्यथा–देवदत्तो मुण्ड्यपि जट्यपि शिख्यपि स्वमाख्यां न जहाति ।
५७.इको गुणवृद्धी – १/१/३ । अथवा–मण्डूकगतयोऽधिकाराः । यथा – मण्डूका उत्प्लुत्योत्प्लुत्य गच्छन्ति तद्वदधिकाराः । (२/३/३२–५/२/४–६/१/१७–६/३/४९–७/२/११७)
५८.उत्सर्गापवादयोश्चायुक्तो विप्रतिषेधः ।
५९.न धातुलोप आर्धधातुके – १/१/४ । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य । (१/१/२०–१/१/२४–१/१/३९–३/१/३६–७/२/१०१–८/२/१–८/३/१३)
६०.हलोऽनन्तराः संयोगः – १/१/७ । (वा) दृष्टमानन्तर्यं व्यवहितेऽपि । व्यवहितेऽप्यनन्तरशब्दो दृश्यते । तद्यथा – "अनन्तराविमौ ग्रामौ" इत्युच्यते, तयोश्चैवान्तरा नद्यश्च पर्वताश्च भवन्ति ।
६१.(वा) न वा अतज्जातीयव्यवायात् । न व एष दोषः । किं कारणम्? अतज्जातीयस्य व्यवायात् । अतज्जातीयकं लोके व्यवधायकं भवतीति ।
एवं हि कश्चित् कच्छित् पृच्छति – 'अनन्तर एते ब्राह्मणकुले' इति । स आह – 'नानन्तरे वृषकुलमनयोरन्तरा' इति ।
कथमनन्तराविमौ ग्रामाविति । ग्रामशब्दोऽयं बह्वर्थः । अस्त्येव शालासमुदाये वर्तते । तद्यथा–ग्रामो दग्ध इत्यादि ।
६२.मुखनासिकावचनोऽनुनासिकः – १/१/८ । प्रासादवासिन्यायेन। तद्यथा – केचित् प्रासादवासिनः, केचिद् भूमिवासिनः, केचिदुभयवासिनः । ये प्रासादवासिनः, गृह्यन्ते ते प्रासादवासिग्रहणेन । ते भूमिवासिनः, गृह्यन्ते ते भूमिवासिग्रहणेन । ये उभयवासिनः, गृह्यन्त एव ते प्रासादवासिग्रहणेन, भूमिवासिग्रहणेन च ।
६३.तुल्यास्यप्रयत्नं सवर्णम् । (१/१/९–१/१/७१–३/१/१९) सम्बन्धिशब्दैर्वा तुल्यमेतत् । तद्यथा सम्बन्धिशब्दाः – मातरि वर्तितव्यम्, पितरि शुश्रूषुतव्यम्' इति । न चोच्यते स्वस्यां मातरि, स्वस्मिन्पितरि इति । सम्बन्धाच्चैतद् गम्यते या यस्य माता, यश्च यस्य पिता इति ।

६४.(वा) अववचनाल्लोकविज्ञानात् सिद्धम् । अन्तरेणैव वचनं लोकविज्ञानात् सिद्धमेतत् । तद्यथा–लोके शालासमुदायो ग्राम इत्युच्यते । भवति चैतदेकस्मिन्नपि 'एकशालो ग्रामः' इति ।
६५.यथा तर्हि बहुषु पुत्रेष्वेतदुपपन्नं भवति – अयं मे ज्येष्ठः, अयं मे मध्यमः, अयं मे कनीयानिति । भवति चैतदेकस्मिन्नपि–अयमेव मे ज्येष्ठः, अयमेव मे मध्यमः, अयमेव मे कनीयानिति ।
६६.बहुगणवतुडति संख्या – १/१/२३ । कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः । (१/३/१४–१/४/३२)
६७.उभयगतिरिह भवति ।
६८.अन्यार्थमपि प्रकृतामन्यार्थं भवति । तद्यथा–शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपास्पृश्यते च, शालयश्च भाव्यन्ते । (१/३/१२–६/१/५०)
६९.नहि गोधा सर्पन्ती सर्पणादहिर्भवति । (१/३/१२–६/१/५०)
७०.क्तक्तवतू निष्ठा – १/१/२६ अनुबन्धोऽन्यत्वकरः । यद्यपि लुप्यते, जानाति त्वसौ सानुवन्धकस्येयं संज्ञा कृतेति । तद्यथा इतरत्रापि–कतरद्देवदत्तस्य गृहम्? 'अदो यत्रासौ काकः' इति । उत्पतिते काके यद्यपि नष्टं तद्गृहं भवति, अन्ततस्तमुद्देशं जानाति ।
७१.विभाषा दिक्समासे बहुव्रीहौ । (१/१/२८–३/१/४६–३/२/१–६/१/१०२) पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ।
७२.कृन्मेजन्तः । (१/१/४३–४/१/१) नहि दोषाः सन्तीति परिभाषा न कर्तव्या ।
७३.नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते ।
७४.नहि मृगाः सन्तीति यवा नोप्यन्ते ।
७५.सुडनपुंसकस्य – १/१/४३) । अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा । (१/३/१२–३/१/६७) ।
७५.न वेति विभाषा – १/१/४४ । न वा विधिपूर्वकत्वात् प्रतिषेधसम्प्रत्येयो यथा लोके । न वा एष दोषः । किं कारणम? विधिपूर्वकत्वात् । विधाय किञ्चिद् न वेत्युच्यते । तेन प्रतिषेधवाचिनः सम्प्रत्येयो भवति । तद्यथा – लोके ग्रामो भवता गन्तव्यो न व नेति   गम्यते ।
७६.इग्यणः सम्प्रसारणम् – १/१/४५ । यथा काकाज्जातः काकः, श्येनाज्जातः श्येनः, एवं सम्प्रसारणाज्जातं सम्प्रसारणमिति ।
७७.अथवा–दृश्यते हि वाक्ये वाक्यैकदेशान् प्रयुञ्जानाः पदेषु पदेकदेशान्, वाक्येषु तावद् वाक्यैकदेशान् 'प्रविश पीण्डीम्, प्रविश तर्पणम्' इति ।
७८.एवं तर्हि भाविनीयं संज्ञा विज्ञास्यते । तद्यथा–कश्चित् कञ्चित् तन्तुवायमाह–अस्य सूत्रस्य शाटकं वय इति । स पश्यति यदि शाटकः, न वातव्यः । अथ वातव्यः, न  शाटकः । शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य संज्ञा अभिप्रेता । (२/१/५०–३/२/१०२)
७९.अथवा–इजादिप्रवृत्तिर्यजादिप्रवृतिश्चैव हि लोके लक्ष्येते । यजाद्युपदेशादिजादिप्रवृतिः प्रसक्ता। प्रयुज्यते च पुनर्लोके इष्टम्, उप्तमिति ।
८०.आद्यन्तौ टकितौ – १/१/८६ । तद्यथा–'अजाविधनौ देवदत्तयज्ञदत्तौ' इत्युक्तौ, तत्र न ज्ञायते कस्याजाधनम्, कस्यावय इति । यद्यपि तावल्लोक एष दृष्टान्तः ।

८१.तद्यथा खदिरबर्बुरयोः– खदिरबर्बुरौ गौरकाण्डौ सूक्ष्मपर्णौ तत आह – कङ्कटवान् खदिर इति ।
८२.मिददोऽन्यात्परः । (१/१/४७–६/१/२–६/२/१–६/४/१६३) लौकिकोऽयं दृष्टान्तः । लोके हि सत्यपि सम्भवे बाधनं भवति । तद्यथा–दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय (७/१/७२–७/२/११७ – इति । सत्यपि मम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति ।
८३.एच इग्घ्रस्वादेशे – १/१/४५ । भूयस एव ग्रहणानि भविष्यन्ति । तद्यथा –'ब्राह्मणग्राम आनीयताम् इत्युच्यते । तत्र चावरतः पञ्चकारुकी भवति ।
८४.षष्ठी स्थानेयोगा–१/१/४९ । लौकिकोऽयं दृष्टान्तः। तद्यथा लोके कश्चित् पृच्छाति ग्रामान्तरं गमिष्याामि, पन्थानं मे भवानुपदिशत्विति । स तस्मायाचष्टे – अमुस्मिन्नवकाशे हस्तदक्षिणो ग्रहीतव्यः । अमुस्मिन्नवकाशे हस्तवाम इति । यस्तत्र तिर्यक् पथो भवति, न तस्मिन् सन्देह इति नासावुपदिशति ।
८५.अधिकारो नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति । यथा प्रदीपः सुप्रज्वलितः सर्वं वेश्माभिज्वलयति । (८/३/३७)
८६.अपरोऽधिकारः – यथा रज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण ।
८७.असति पुनर्नियमे कामचारः । एकया षष्ठया अनेकं विशेषयितुम् । तद्यथा–देवदत्तस्य पुत्रः, पाणिः, कम्बल इति ।
८८. नैष दोषः । यद्यपि लोके बहवोऽभिसम्बन्धाः – आर्याः, यौनाः, सौरवाः, स्रौवाश्च ।
८९.स्थानेऽन्तरतमः – १/१/५० । अपि चेष्टा व्यवस्था न प्रकल्पेत । तद्यथा – तप्ते भ्राष्टे तिलाः प्रक्षिप्ता मुहूर्त्तमपि नावतिष्ठेरन् ।
९०.(वा) अनर्थकं च – ६/७३७) । अनर्थकमेतत् स्यात् । यो हि भुक्तवन्तं प्रति ब्रूयान् मा भुक्थाः इति, किं तेन कृतं स्यात् ।
९१.अन्तरतमवचनं चाशिष्यम्, योगश्चाप्ययमशिष्यः । कुतः? स्वभावसिद्धत्वादेव । तद्यथा–समाजेषु समाशेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः । येषामेव किञ्चिदर्थकृतमान्तर्यं तेनैव सहासते । तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति, तेन सह शेरते ।
९२.तथा यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति, तान्यन्योऽन्यं पश्यन्ति शब्दं कुर्वन्ति ।
एवं तावच्चेतनवत्सु अेचेतनेष्वपि – लोष्ठः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति । पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः ।
तथा च एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः । स धूम आकाशे निवाते नैव तिर्यग्गच्छति, नार्वागवरोहति । अवविकारोऽप एव गच्छत्यान्तर्यतः । तथा ज्योतिषो विकारोऽर्चिराकांशदेशे निवाते सुप्रज्वलितं नैव तिर्यग्गच्छति नार्वागवरोहति । ज्योतिषो विकारो ज्योतिरेव गच्छत्यान्तर्यतः ।
९३.सम्प्रयोगो वा नष्टाश्वदग्धरथवत् । . . . तद्यथा – "तवाश्वो नष्टो ममापि रथो दग्धः, उभौ समप्रयुज्यवहै" इति । एवमिहापि तवाप्यन्तरतमा प्रकितिर्नास्ति ममाप्यन्तरतम आदेशो नास्ति ।
९४.उरण्रपरः – १/१/५१ । (वा) अवयवग्रहणात् सिद्धम् । यदत्र ऋवर्णं तदाश्रयं रपरत्वं भविष्यति। तद्यथा माषा न भोक्तव्या इत्युक्ते मिश्रा अपि न भुज्यन्ते ।

१०५.स्थानिवददेशोऽनल्विधौ – १/१/५६ । स्थानिकार्यमादेशेऽतिदिश्यते । 'गुरुवद् गुरुपुत्रे' इति यथा ।

९५.(वा) सामान्यातिदेशे विशेषानतिदेशः । सामान्ये ह्यतिदिश्यमाने विशिष्टो नातिदिष्टो भवति । तद्यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति । सामान्यं यद् ब्राह्मणकार्यं तत् क्षत्रियेऽतिदिश्यते । यद् विशिष्टं माठरे कौण्डिन्ये वा न तदतिदिश्यते । (१/२/५१–६/३/६८)

९६.गुरुवदस्मिन् गुरुपुत्रे वर्तितव्यम् । अन्यत्रोच्छिष्टभोजनात् पादोपसङ्ग्रहणाच्च इति । गुरुपुत्रोऽपि गुरुर्भवति तदपि कर्तव्यं भवति ।

९७.'एकदेशविकृतमनन्यवद्भवति' इति । तिङ्ग्रहणेन ग्रहणं भविष्यति तद्यथा – श्वा कर्णे वा पुच्छे वा छिन्ने श्वैव भवति, नाश्वो न गर्दभ इति । (४/१/८३–६/४/१४९)

९८.नैवन्मन्तव्यम्, 'समुदाय आश्रीयमाणेऽवयवो नाश्रीयते' इति, आभ्यन्तरो हि समुदायेऽवयवः । तद्यथा – वृक्षः प्रचलन् महावयवैः प्रचलति ।

९९.(वा) सिद्धं तु यथा लौकिकवैदिकेष्वभूतपूर्वोऽपि स्थानशब्दप्रयोगात् । यथा लौकिकवैदिकेषु कृतान्तेषु अभूतपूर्वोऽपि स्थानशब्दप्रयोगो वर्तते । लोके तावद् उपाध्यायस्य स्थाने 'शिष्यः' इत्युच्यते, न च तत्रोपाध्यायो भूतपूर्वो भवति ।

१००.भूतपूर्वे चापि स्थानशब्दो वर्त्तते । कथम् बुद्ध्या तद्यथा–कश्चित् कस्मैचिदुपदिशति प्राचीनं ग्रामादाम्रा इति । तस्य सर्वत्र आम्रबुद्धिः, प्रसक्ता । ततः पश्चादाह – ये क्षीरिणोऽवसहवन्त पृथुपर्णास्ते न्यग्रोधा इति । स तत्राम्रबुद्ध्या न्यग्रोधबुद्धिं प्रतिपद्यते ।

१०१.अचः परस्मिन् पूर्वविधौ – १/१/५७ । व्यवहितेऽपि पूर्वशब्दो वर्तते । तद्यथा – पूर्वं मथुरायाः पाटलिपुत्रम् ।

१०२.न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति । (६/१/८६)

१०३.कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा–उशीनरवन्मद्रेषु यवाः सन्ति न सन्तीति । मातृवदस्याः कलाः सन्ति न सन्तीति । (१/३/६२–४/१/९०–७/१/७४–७/१/७५)

१०४.उभयनिमित्तत्वाद् इति । इह यस्य ग्रामे नगरे वा अनेकं कार्यं भवति, शक्नोत्यसौ तत्रान्यतरद् व्यपदेष्टुम् । तद्यथा – 'गुरुनिमित्तं वसामः' इति, 'अध्ययननिमित्तं वसामः' इति ।

१०५.यो द्वयोः षष्ठीनिर्दिष्टयोः प्रसङ्गे भवति लभतेऽसावन्यतरतो व्यपदेशम् । तद्यथा–देवदत्तस्य पुत्रो देवदत्तायाः पुत्र इति ।

१०६.द्विर्वचनेऽचि । (१/१/५९–६/१/३२–३३) दधित्रपुषं प्रत्यक्षो ज्वरः, ज्वरनिमित्तमिति गम्यते ।

१०७.अलोऽन्त्यत्पूर्व उपधा – (१/१/६५) । (वा) अववचनाल्लोकविज्ञानात् सिद्धम् । अन्तरेणापि वचनं लोकविज्ञानात् सिद्धमेतत् । तद्यथा लोके अमीषां ब्राह्मणानामन्त्यात् पूर्वं आनीयतामित्युक्ते यथाजातीयकोऽन्त्यास्तथाजातीयकोऽन्त्यात्पूर्व आनीयते ।

१०८.तस्मिन्निति निर्दिष्टे पुर्वस्य – १/१/६६ । पितापुत्रवत् । तद्यथा – स एव कञ्चित् प्रति पिता भवति, कञ्चित् प्रति पुत्रो भवति । एवमिहापि स एव कञ्चित् प्रति सामान्यम्, कञ्चित् प्रति विशेषो भवति ।

१०९.अणुदित्सवर्णस्य चाप्रत्ययः – १/१/६९ । (वा) अनेकान्तोऽनन्यत्वकरः । तद्यथा – न गोश्च गोश्च भेदः सोऽन्यत्वं करोति । यस्तु खलु गोश्च अश्वस्य च भेदः सोऽन्यत्वं करोति ।

११०.तपरस्तत्कलस्य । (१/१/३०–४/२/६३) साहचर्यात्तच्छब्द्यम् । कालसहचरितो वर्णोऽपि काल एव । १/२/५१)

१११.(वा) सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते । वक्ता कश्चिदाश्वभिधायी भवति । आशु वर्णानभिधत्ते । कश्चिच्चिरेण । कश्चिच्चिरतरेण । कश्चिच्चिरतमेन । तद्यथा–तमेवाध्वानं कश्चिदाशु गच्छति । कश्चिच्चिरेण । कश्चिच्चिरतरेण । कश्चिच्चिरतमेन । रथिक आशु गच्छति । आश्विकस्चिरेण । पदातिश्चिरतरेण । शिशुश्चिचरतमेन ।

११२.(वा) भेर्याघातवत् । तद्यथा–भेर्याघातः, भेरीमाहत्य कश्चिद् विंशति पदानि गच्छति । कश्चित् त्रिंशत् । कश्चिच्चत्वारिंशत् । स्फोटस्तावानेव भवति, ध्वनिकृता वृद्धिः ।

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**
**चक्षुरुन्मिलितं येन तस्मै श्रीगुरवे नमः ॥**

**हरि ओँ तत्सत् हरि ओँ तत्सत्**
**हरि ओँ तत्सत्**
**शान्तिः शान्तिः शान्तिः ॥**

# उपसंहारः

वेदाङ्गप्रधानस्य व्याकरणशास्त्रस्य पूर्वप्रदर्शितरीत्या ऐन्द्रादिभेदभिन्नस्य बहुविधस्य सत्त्वेऽपि साम्प्रतं पाणिनीयं व्याकरणमेव शब्दसाधुत्वसाधने लोके परमोपकारत्वेन प्राप्तसाफल्यमाद्रियते । तदुक्तं विद्वद्भिः

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥" इति ।

तदेव पाणिनीयव्याकरणशास्त्रं पाणिन्युपज्ञमस्माकं समक्षमष्टाध्यायीरूपेण चकास्ति । यद्यपि पाणिनीये संज्ञापरिभाषाविधिनियमातिदेशाधिकारसूत्रभेदात् षड्विधं सूत्रं प्राप्यते तथापि परिभाषासूत्रविषयमाश्रित्य ममायं कृतप्रयत्नः । अस्य शोधबन्धस्य नाम 'पाणिनिसम्प्रदाये परिभाषासमीक्षा' इति ।

शोधबन्धस्य प्रस्तावनायां पाणिनिव्याकरणस्य तस्य सम्प्रदायस्य संस्कृतवाङ्मये कीदृशं गुरुत्वमिति अवबोधयता वेदाङ्गत्वेन व्याकरणस्य गुरुत्वं, व्याकरणपरम्परा, पाणिनेः जीवनवृत्तम्, पाणिनेः शिष्याणां परम्परा, पाणिनेः कालः, निवासभूमिः, पाणिनेराचार्यस्य कृतयः, पाणिनीयसम्प्रदाये वार्तिककारकात्यायनस्य गुरुत्वम्, वार्तिकपदस्य साधुत्वविचारः, वार्तिकलक्षणम्, महाभाष्यकर्तुः पतञ्जलेः परिचयः, तस्य जन्मकालः, आचार्यपतञ्जलेः कृतिः, षड्विधसूत्रस्य परिचयः चेत्यादि सामान्यतया पर्यालोचितम् ।

परिभाषालक्षणरूपेण 'अनियमे नियमकारिणी परिभाषा, लिङ्गवत्त्वे फलवत्त्वं परिभाषात्वम्, परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नानन्तरे च भाष्यते कार्यमनया सा परिभाषा, परितो व्यापृतां भाषा परिभाषा' चेत्यादिपरिभाषासूत्रलक्षणं विहितं तदस्मिन्नध्याये पर्यालोच्यते । पाणिनीयेतरेषु व्याकरणेषु उल्लिखितं परिभाषालक्षणं प्रथमाध्याये सामान्यतया उपस्थाप्यते । त्रिमुनिव्याकरणे विद्यमानाः परिभाषा उपस्थापिताः । परिभाषाणां वैज्ञानिकपद्धत्या विभागादिकमत्र पर्यालोचितम् । सामान्यतया परिभाषा त्रिधा विभज्यते– ज्ञापकसिद्धा, न्यायसिद्धा, वाचनिकी चेति । तासामप्यवान्तरविभागाः सामान्यतया दिग्दर्शिताः ।

'अन्येषु शास्त्रेषु केचित् पारिभाषिकशब्दाः, तेषाञ्च वैशिष्ट्यमि'ति द्वितीयऽध्यायः । न केवलं व्याकरणशास्त्रे अपि तु मीमांसादिशास्त्रेषु बहवः पारिभाषिकाः शब्दाः विद्यन्ते ।

तेषु केचिदत्रालोच्यते । शौनकीये ऋग्वेदप्रातिशाख्ये कानिचित् परिभाषासूत्राणि प्राप्यन्ते यानि मन्त्राणामर्थज्ञानाय अवश्यकानि तान्यालोचितानि । मीमांसाशास्त्रे धर्मः, अनुबन्धः, विधिः, भावना, प्रकृतिः विकृतिः, संदंशः चेति, न्यायशास्त्रे, मीमांसाशास्त्रे, काव्यशास्त्रे च अभिधा, लक्षणा, व्यञ्जना, तात्पर्यं, योग्यता, आसत्तिः, आकाङ्क्षा चेति, काव्यशास्त्रे रसः, ध्वनिः, अलंकारः, गुणः, रीतिः, वृत्तिः, सन्धिः चेति पारिभाषिकशब्दा अस्मिन्नध्याये आलोच्यन्ते ।

'त्रिमुनिव्याकरणे परिभाषापर्यालोचनम्' इति तृतीयोऽध्यायः । आचार्यभट्टोजि–दीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां प्रकरणानुसारं लक्ष्यानुसारं सूत्राणि विभज्य उपस्थापितम् । अस्मिन् अध्याये तत्कृतपरिभाषाप्रकरणे सन्निविष्टानि परिभाषासुत्राणि तथा काशिकावृत्तौ परिभाषासूत्ररूपेण स्वीकृतानि परिभाषासूत्राणि पर्यालोचितानि । यथा 'पूर्वत्रासिद्धमि'ति सूत्रं नैके वैयाकरणाः अधिकारसूत्ररूपेण स्वीकृता परन्तु परिभाषासूत्ररूपेण उपस्थापितम् । 'अदर्शनं लोपः' इति सूत्रं कातन्त्रपरिभाषासूत्रवृत्तौ परिभाषारूपेण स्वीकृता । 'स्थानिवदादेशोऽनल्विधौ', 'अचः परस्मिन् पूर्वविधौ', 'न पदान्तद्विर्वचन' चेत्यादीनि सूत्राणि कातन्त्रे परिभाषारूपेण स्वीकृतानि । तान्यस्मिन् अध्याये पर्यालोचितानि । आचार्यकात्यायनेन केचन वार्तिकाः उपन्यस्ताः ते परिभाषाप्राकृतिक–वचनरूपाः । तेषां नामोल्लेखः क्रियते ।

'परिभाषाणां वर्गीकरणे नागेशभट्टस्य स्वतन्त्रता' इति चतुर्थोऽध्यायः । अस्मिन् अध्याये परिभाषेन्दुशेखरे विद्यमानाः परिभाषाः पर्यालोचिताः । ज्ञापकन्यायसिद्धपरिभाषापि सूत्रविश्लेषणविशेषसाधिता वाचनिकी परिभाषा भवितुमर्हति तद्दर्शिता । ज्ञापकसिद्धापि लोकन्यायसिद्धा भवितुमर्हति तदस्मिन्नध्याये पर्यालोचिता । यथा नानुबन्धकृतमनेकाल्त्वमिति ज्ञापकसिद्धा परिभाषा इत्संज्ञायोग्याल्कृतानेकाल्त्वं न भवतीति सूत्रार्थः । पतञ्जलिना ज्ञापकत्वेन स्वीकृता, तथापि लोके यथा कुत्रचित् द्वावेकाक्षौ स्तः तत्र तयोर्मध्ये यद्येकेन स्वीयं भग्नं नेत्रं प्रस्तरेण निर्मीयते । तथापि द्विनेत्रभाग् भवितुं नार्हति । एवम् इत्संज्ञायोग्यानेकाल्त्वं न भवति इत्येवं लौकिकन्यायेन वक्तुं शक्यते । पर्जन्यवल्लक्षणप्रवृत्तिः इति परिभाषा लोकसिद्धा नागेशभट्टेन स्वीकृता । दृश्यते मेघो यथा जलेऽपि वर्षति स्थलेऽपि च । यत्र जलं पूर्वतो विद्यमानमस्ति तत्र तात्कालिकजलवर्षणोपयोगशून्येऽपि पर्जन्यो यथा वर्षति तथा तात्कालिकलाभाभाव

स्थलेऽपि लक्षणं प्रवर्तते । परिभाषेन्दुशेखरे यद्यपि ज्ञापकसिद्धरूपेण न स्वीकृता तथापि 'प्रवाहणस्य डे' (अष्टा. – ७/३/२८) इत्यनेन प्रावहणस्यापत्यं प्रावाहणेय इति शुभ्रादित्वात् ढकि उभयपदवृद्धिविधानम् । तत्र च पूर्वपदस्य प्रशब्दस्य विभाषोत्तरपदस्य तु वाहणशब्दस्यापि नित्यं वृद्धिः । न च प्रवाहणेयीभार्य इति वृद्धिनिमित्तस्य च 'तद्धितस्य' (अष्टा. – ६/३/३९) इति । पुंवद्भावप्रतिषेधार्थमिदं वृद्धिविधानं स्यात् । जातेश्च (अष्टा. – ६/३/४१) इत्यनेनैव प्रतिषेधस्य सिद्धत्वात् । 'गोत्रं च चरणैः सह', 'इति जातित्वमत्र तस्माद्, ज्ञापकमत्र वृद्धिविधानमेव ।

'अनियमे नियमकारिणी परिभाषा' इति परिभाषालक्षणस्वीकारे 'यथोद्देशम्', 'कार्यकालमि'त्यादि परिभाषालक्षणे नान्तर्याति । प्रायः षोडश एतादृशपरिभाषाः सन्ति । काश्चन परिभाषा नागेशाचार्येण न स्वीकृताः तत्र व्याडिपुरुषोत्तमदेवादिभिर्मतमुपस्थाप्य ज्ञापकत्वेन स्वीकृताः । यथा आगमशास्त्रमनित्यमिति परिभाषा तैरेव स्वीकृताः । आचार्यव्याडिः 'थो न्थः' (अष्टा. – ७/१/८७) इत्याह ज्ञापकमस्याः । अन्यथा 'थो नुड्' इति नुडागमेनैव सिद्धे 'न्थ' विधानं व्यर्थं स्यात् ततश्चेयमस्ति परिभाषा आगमशास्त्रमनित्यमिति । 'पचान' इत्यपि भवति । 'पचमानः' इति प्राप्ते 'आने मुक्' इति न भवति । आगमस्यानित्यत्वात् । एषा भाष्येऽनुक्तत्वात् नागेशेनास्वीकृता । विषयवस्तु अवलम्ब्य परिभाषा उपस्थापिता । यथा अनुबन्धविषयकाः पञ्चपरिभाषाः १. अनेकान्ता अनुबन्धाः, २. एकान्ताः, ३. नानुबन्धकृतमनेकाल्त्वम्, ४. नानुबन्धकृतमनेजन्तत्वम्, ५. नानुबन्धमसारूप्यम् ।

परिभाषेन्दुशेखरे पारिभाषिकशब्दानां विश्लेषणम् इत्यन्तिमेऽध्याये विलसति ॥

पाणिनिव्याकरणे सर्वासां परिभाषाणां सम्यक् पर्यालोचनं मे उद्देश्यम् । तस्मात् परिभाषेन्दुशेखरं शिरस्यवधार्य व्याडिपुरुषोत्तमदेवसीरदेवदीनामाचार्याणां मतमुपस्थापितम् । परिभाषाः सम्यक् समीक्ष्य प्रतिपादिताः । तत्र गुणदोषावपि प्रदर्शितौ, तयोः समर्थननिराकरणे अपि विहिते । तत्र चानेकानि प्रमाणाणि पुरस्कृतानि । मन्ये, प्रकृतशोधप्रबन्धनिबन्धविषयेण न केवलं छात्राणाम् अपि तु विदुषामपि परिभाषाबोधविषये महान् उपकारो भविष्यति । तथापि

"आपरिताषाद् विदुषां साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥" इति

कालिदासीयं वचनमिदं सर्वदा हृदि निधाये विदुषो निवेदये यत् – ‘गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः’ इति प्रकृतिसिद्धोऽयं परिणामो महता यत्नेन वारयितुं न शक्यते प्रयत्नसहस्रेणापि किं मादृशेन मन्दधिया इति । पुनः सहृदयान् प्रति प्रणतिं विज्ञाप्य विरमामि इति शिवम् ।

# ग्रन्थसूची


१.अमरसिंहः । *अमरकोषः (रामाश्रमी टीकोपेतः)* । दिल्ली : चौखम्बा सस्कृत प्रतिष्टानम्, १९८५ । मुद्रितम् ।

२.कौण्डभट्टः । *वैयाकरणभूषणसारः (कमलासंस्कृतहिन्दीव्याख्याद्वयोपेतः)* । सम्पा. श्री प. कालीकान्त झा । वाराणसी : चौखम्बा कृष्णदास एकादेमी, २००३ । मुद्रितम् ।

३.गौतमः । *न्यायदर्शनम् (वात्स्यायनभाष्यसहितम्)* । वाराणसी : चौखम्बा संस्कृत सीरिज, १९४२ । मुद्रितम् ।

४.चन्द्रगोमी । *चान्द्रव्याकरणम्* । पूना : डेकेल कलेज, १९५३ । मुद्रितम् ।

५.नागेशभट्टः । *परिभाषेन्दुशेखरः* । दिल्ली : राष्ट्रियसंस्कृसंस्थानम्, १९८७ । मुद्रितम् ।

६.नागेशभट्टः । *परिभाषेन्दुशेखरः (भूतितिलकविभूषितः)* । वाराणसी : चौखम्बा संस्कृत संस्थानम्, १९७२ । मुद्रितम् ।

७.नागेशभट्टः । *परिभाषेन्दुशेखरः* । सम्पा. वासुदेव बालकृष्ण पटवर्धन । वाराणसी :राजराजेश्वरी प्रेस पुस्तकालय, १९६७ । मुद्रितम् ।

८.नागेशभट्टः । *परिभाषेन्दुशेखरः (दुर्गाटीकोपेतः)* । दिल्ली : लालवाहादुरशास्त्री केन्द्रिय संस्कृत विद्यापीठम्, १९७८ । मुद्रितम् ।

९.नागेशभट्टः । *परिभाषेन्दुशेखरः (दुर्गाटीकापेतः)* । सम्पा. ड. हर्षनाथमिश्रः । नवदेहली : राष्ट्रीयसंस्कृतसंस्थानम्, २०१० (तृतीयसंस्करणम्) । मुद्रितम् ।

१०.नागेशभट्टः । *परिभाषेन्दुशेखरः* । सम्पा. आचार्यः सत्यनारायणमूर्तिः । तिरुपतिः राष्ट्रीयसंस्कृतसंस्थानम्, २००४ । मुद्रितम् ।

११.नागेशभट्टः । *परिभाषेन्दुशेखरः (हिन्दीव्याख्यासहिता)* । सम्पा. आचार्यः विश्वनाथमिश्रः । वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००२ । मुद्रितम् ।

१२.नागेशभट्टः । *बृहद्शब्देन्दुशेखरः* । वाराणसी : वाराणसेय–संस्कृत–विश्वविद्यालयः, १८८२ (शकाब्दः) । मुद्रितम् ।

१३.नागेशभट्टः । *परमलघुमञ्जूषा* । सम्पा. डः विजया गोस्वामी । कोलकाता : संस्कृत पुस्तक भाण्डार, २००६ । मुद्रितम् ।

१४.नागेशभट्टः । *वैयाकरणसिद्धान्तलघुमञ्जूषा* (कुञ्चिका कला च टीकाद्वयेन संवलिता) । सम्पा. प्रफेसर मानवेन्दु व्यानार्जी, वृहद्भूमिका प्रफेसार नन्दिता वन्द्योपाध्यायः । कलिकाता : संस्कृत पुस्तक भाण्डार, २००४ (प्रथमसंस्करणम्) । मुद्रितम् ।

१५.नागेशभट्टः । *लघुशब्देन्दुशेखरः (भैरवीमिश्रप्रणीतः चन्द्रकलाटीकोपेतः)* । वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, १९८७ । मुद्रितम् ।

१६.नागेशभट्टः । *लघुशब्देन्दुशेखरः, अव्ययीभावान्तः (नित्यानन्दपन्तटीप्पणी)* । वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, १९८६ । मुद्रितम् ।

१७.पतञ्जलिः । *महाभाष्यम् (नवाह्निकम्)* । बोम्बाई : निर्णयसागरप्रेसः, १९५१ । मुद्रितम् ।

१८.पतञ्जलिः । *महाभाष्यम् (प्रदीपोद्द्योतटीकोपेतम्)* । वाराणसी : मोतीलालबनारसीदास । मुद्रितम् ।

१९.पतञ्जलिः । *व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्द्योतसहितम्)* । सम्पा. श्रीभार्गवशास्त्री जोशी । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २००४ (पुनर्मुद्रणम्) । मुद्रितम् ।

२०.पतञ्जलिः । *महाभाष्यम् (नवाह्निकम्)* । सम्पा. चारुदेवशास्त्री । वाराणसी : मोतीलालबनारसीदास । मुद्रितम् ।

२१.पतञ्जलिः । *व्याकरणमहाभाष्यम्* (भाष्यप्रदीपोद्द्योतसहितम्) । सम्पा. म.म. पण्डितशिवदत्तशर्मा । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २००० (पुनर्मुद्रितसंस्करणम्) । मुद्रितम् ।

२२. पाणिनिः । *अष्टाध्यायीसूत्रपाठ* । बोम्बाई : निर्णयसागरप्रेस, १९५४ । मुद्रितम् ।

२३.पाणिनि । अष्टाध्यायी । वाराणसी : चौखम्बा संस्कृत सीरिज, १९६५ । मुद्रितम् ।

२४.पुरुषोत्तमदेवः । *परिभाषावृत्तिः* । सम्पा. ड. तपनशङ्करभट्टाचार्य्यः । कलिकाता : संस्कृत–पुस्तक– भाण्डार, २०१० । मुद्रितम् ।

२५.भट्टोजिदीक्षितः । *प्रौढमनोरमा* । वाराणसी : चौखम्बा संस्कृत संस्थानम्, १९३४ । मुद्रितम् ।

२६.भट्टोजिदीक्षितः । *प्रौढमनोरमा (लघुशब्दरत्नटीकोपेता)* । वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, १९३४ । मुद्रितम् ।

२७.भट्टोजिदीक्षितः । *प्रौढमनोरमा (भैरवी, रत्नप्रभाटिप्पण्या च संवलिता)* ।

वाराणसी : वाणिविलासप्रकाशनस्, १०३९ (तृतीयसंस्करणम्) । मुद्रितम् ।
२८.भट्टोजिदीक्षितः । *वैदिकप्रक्रिया (हिन्दीटीका)* । सम्पा. ओमाशंकर ऋषिः । वाराणसी : चौखम्बा, १९६२ । मुद्रितम् ।
२९.भट्टोजिदीक्षितः । *शब्दकौस्तुभः* । सम्पा. गोपालशास्त्रि नेने । वाराणसी : चौखम्बा संस्कृत संस्थान, १९३३ । मुद्रितम् ।
३०.भट्टोजिदीक्षितः । *शब्दकौस्तुभः* । सम्पा. विन्धेश्वरीप्रसाद द्विवेदी । वाराणसी : चौखम्बा सुरभारती प्रकाशन, १९१७ । मुद्रितम् ।
३१.भट्टोजिदीक्षितः । *सिद्धान्तकौमुदी (बालमनोरमाटीकोपेता)* । वाराणसी : चौखम्बा संस्कृत सीरीज, १९६९ (पंचमसंस्करणम्) । मुद्रितम् ।
३२.भट्टोजिदीक्षितः । *सिद्धान्तकौमुदी (तत्वबोधिनीटीकोपेता)* । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, १९८५ । मुद्रितम् ।
३३.भट्टोजिदीक्षितः । *सिद्धान्तकौमुदी (लक्ष्मीटीका)* । सम्पा. सभापतिशर्माविरचिता । दिल्ली : मोतिलालबनारसीदास, १९६६ (प्रथमसंस्करणम्) । मुद्रितम् ।
३४.भर्तृहरिः । वाक्यपदीयम् (ब्रह्मकाण्डम्) । सम्पा. विष्णुपद–भट्टाचार्यः । कलिकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, १९८५ । मुद्रितम् ।
३५.यास्कः । *निरुक्तम् (दुर्गाचार्यभाष्योपेतम्)* । बोम्बाई : वेङ्कटेश्वरमुद्रणालयम्, १९६९ (सं.वत्)। मुद्रितम्।
३६.युधिष्ठिर मीमांसकः । *संस्कृत्व्याकरणशास्त्र का इतिहासः* । हरियाणा : रामलाल कपूर ट्रस्ट प्रेस, २०३९ (स.वत्.) । मुद्रितम् ।
३७.रामचन्द्राचार्यः । *प्रक्रियाकौमुदी (प्रकाशव्याख्यासंवालिता)* । वाराणासी :

सम्पूर्णानन्द–संस्कृत–विश्वविद्यालयः, १९७७ । मुद्रितम् ।

३८.वामन–जयादित्यौ । *काशिकावृत्तिः (न्यासपदमञ्जरीसहिता)*। वाराणसी : तारापब्लिकेशन्स, १९६६ । मुद्रितम् ।

३९.विश्वेश्वरसुरिः । *व्याकरणसिद्धान्तसुधानिधिः* । सम्पा. माधवशास्त्री । वाराणसी : चौखम्बा संस्कृत सीरीज, १९२४ । मुद्रितम् ।

४०.शाकटायनः । *ऋक्तन्त्रम्*। प्रका. मेहरचन्द लक्ष्यणदासः । दरियागञ्च : कुचाचलम्, १९७० । मुद्रितम् ।

४१.सदानन्दयोगीन्द्रः । वेदान्तसारः (सुबोधिनी, बालबोधिनी विद्वन्मञ्जरी च टीका सहिता) । सम्पा. ब्रह्मचारी मेधाचैतन्यः । कलकाता : आद्यापीठ (बालकाश्रमः), २०१० (पञ्चममुद्रणम्) । मुद्रितम् ।

४२.सायणाचार्यः । *माधवीयधातुवृत्तिः* । सम्पा. स्वा. द्वारिकादासः । वाराणसी : प्राच्यविद्याप्रकाशनम्, १९६४ । मुद्रितम् ।

## English Books:


Cardona, George. *Panini: A Survey of Research.* Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 1997. Print.

Chakravarti, Prabhat Chandra. *The Philosophy of Sanskrit Grammar*. Calcutta: Sanskrit Pustak Bhandar. 1997. Print.

Coward, Harold G & Raja, K. Kunjunni. *Encyclopedia of Indian Philosopies (The Philosophy of the Grammarians).* Vol.-V. Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 2008. Print.

Diksita, Bhattoji. *Siddhanta Kaumudi*. Vol.-I. Ed. Srisa Chandra Vasu. Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 2003. Print.

Diksita, Bhattoji. *Siddhanta Kaumudi*. Vol.-II. Ed. Srisa Chandra Vasu. Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 1995. Print.

Panini. *Ashtadhyayi.* Vol.-I. Ed. Srisa Chandra Vasu. Delhi: Motilal Banarasidass, 1977. Print.

Williams, Monier. *A Sanskrit-English Dictionary*. Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 1997. Print.

Williams, Monier. *A Dictionary of English and Sanskrit*. Delhi: Motilal Banarasidass Publisheers Pvt. Ltd, 1996. Print.